आनन्दाश्रममुद्रणालयस्थग्रन्थानां सूचीपत्रम् ।

ग्रन्थनाम ।	मूल्यम् । रू०	आ०
१ गणेशाथर्वशीर्षम्—सभाष्यम् ।	०	६
२ रुद्राध्यायः—सायणाचार्यभट्टभास्करप्रणीतभाष्याभ्यां संवलितः।	१	६
३ पुरुषसूक्तम्—सायणभाष्योपेतम् ।	०	४
४ योगरत्नाकरः—वैद्यकशास्त्रीयग्रन्थोऽतीव पुरातनः । ...	५	०
५ ईशोपनिषत्—सटीकशांकरभाष्याद्युपेता । ...	०	१४
६ केनोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	०
७ काठकोपनिषत्—टीकाद्वयसहितशांकरभाष्योपेता । ...	१	४
८ प्रश्नोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	०
९ मुण्डकोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	०	१०
१० माण्डूक्योपनिषत्-सटीकशांकरभाष्यगौडपादीयकारिकाद्युपेता।	२	५
११ ऐतरेयोपनिषत्—सटीकशांकरभाष्याद्युपेता । ...	१	४
१२ तैत्तिरीयोपनिषत्—सटीकशांकरभाष्याद्युपेता । ...	१	१२
१३ तैत्तिरीयोपनिषद्भाष्यवार्तिकम्—सुरेश्वराचार्यकृतं सटीकम् ।	२	२
१४ छान्दोग्योपनिषत्—सटीकशांकरभाष्योपेता ।	५	०
१५ बृहदारण्यकोपनिषत्—सटीकशांकरभाष्योपेता । ...	८	०
१६ बृहदारण्यकोपनिषद्भाष्यवार्तिकम्—भागत्रयात्मकम् ।	२२	८
१७ श्वेताश्वतरोपनिषत्—भाष्यदीपिकाद्युपेता ।	२	४
१८ सौरपुराणम्—श्रीमद्द्वैपायनप्रणीतम् । उपपुराणम् । ...	३	०
१९ रसरत्नसमुच्चयः—श्रीमद्वाग्भटाचार्यविरचितः। वैद्यकग्रन्थः।	३	१२
२० जीवन्मुक्तिविवेकः—विद्यारण्यविरचितः सटीकः । ...	३	१२
२१ ब्रह्मसूत्राणि—सटीकशांकरभाष्योपेतानि भागद्वयात्मकानि ।	१२	०
२२ श्रीमच्छंकरदिग्विजयः-विद्यारण्यकृतः। टीकाटिप्पणीभ्यां सहितः।	६	०
२३ वैयासकन्यायमालाविस्तरः-भारतीतीर्थमुनिप्रणीतः। ...	१	१२
२४ जैमिनीयन्यायमालाविस्तरः—श्रीमाधवप्रणीतः । ...	८	०
२५ सूतसंहिता—माधवकृतटीकोपेता । भागत्रयात्मिका । ...	११	८
२६ हस्त्यायुर्वेदः—पालकाप्यमुनिविरचितः ।	७	६
२७ वृन्दमाधवः—श्रीमद्वृन्दप्रणीतः । सटीकः । वैद्यकग्रन्थः ।	६	१२
२८ ब्रह्मपुराणम्—श्रीमद्व्यासविरचितम् । प्रथमं महापुराणम् ।	६	४
२९ उपनिषदां समुच्चयः-श्रीनारायणशंकरानन्दकृतदीपिकासहितः।	६	१२
३० नृसिंहपूर्वतापनीयोपनिषत्—भाष्याद्युपेता । ...	१	१२

ग्रन्थनाम ।	मूल्यम् । रू०	आ०
३१ बृहदारण्यकोपनिषन्मिताक्षरा—श्रीनित्यानन्दमुनिविरचिता ।	२	१२
३२ ऐतरेयब्राह्मणम्—सायणभाष्यसमेतम् । भागद्वयात्मकम् । ...	१०	१०
३३ धन्वन्तरीयनिघण्टुः—श्रीधन्वन्तरिविरचितः । वैद्यकग्रन्थः ।	६	४
३४ श्रीमद्भगवद्गीता—शांकरभाष्योपेता ।	२	०
३४ श्रीमद्भगवद्गीता—सटीकशांकरभाष्योपेता ।	६	४
३५ संगीतरत्नाकरः—शार्ङ्गदेवकृतः सटीको द्विभागः । गानशास्त्रम् ।	१०	४
३६ तैत्तिरीयारण्यकम्—सायणभाष्यसमेतं भागद्वयात्मकम् ।	९	१
३७ तैत्तिरीयब्राह्मणम्—सायणभाष्यसमेतं भागत्रयात्मकम् । ...	१४	८
३८ ऐतरेयारण्यकम्—सायणभाष्यसहितम् ।	३	०
३९ संस्काररत्नमाला—गोपीनाथभट्टविरचिता । भागद्वयात्मिका ।	१२	८
४० संध्याभाष्यसमुच्चयः—खण्डराजश्रीकृष्णपण्डितादिप्रणीतः ।	२	०
४१ अग्निपुराणम्—महर्षिव्यासप्रणीतम् । महापुराणम् ...	५	४
४२ तैत्तिरीयसंहिता—सायणभाष्यसमेता । भागनवकात्मिका ।	४५	१२
४३ वैयाकरणसिद्धान्तकारिकाः—भट्टोजीदीक्षितकृताः सटीकाः ।	०	१२
४४ श्रीमद्भगवद्गीता—पैशाचभाष्यसमेता ।	१	८
४५ श्रीमद्भगवद्गीता—मधुसूदनश्रीधरकृतटीकोपेता । ...	५	४
४६ याज्ञवल्क्यस्मृतिः—अपरार्ककृतटीकासहिता भागद्वयात्मिका ।	१३	०
४७ पातञ्जलयोगसूत्राणि—भाष्यवृत्तिभ्यां समेतानि । ...	३	०
४८ स्मृतीनां समुच्चयः—अङ्गिरःप्रभृतिसप्तविंशतिस्मृत्यात्मकः ।	५	०
४९ वायुपुराणम्—महर्षिव्यासप्रणीतम् । महापुराणम् । ...	४	१२
५० यतीन्द्रमतदीपिका—श्रीनिवासदासकृता । प्रकाशटीकोपेता ।	१	४
५१ सर्वदर्शनसंग्रहः—माधवाचार्यप्रणीतः ।	२	०
५२ श्रीमद्गणेशगीता—नीलकण्ठकृतटीकोपेता ।	२	०
५३ सत्याषाढश्रौतसूत्रम्—सत्याषाढविरचितं भागदशकात्मकम् ।	२८	५
५४ मत्स्यपुराणम्—श्रीमद्द्वैपायनमुनिप्रणीतम् । महापुराणम् ।	६	०
५५ पुरुषार्थचिन्तामणिः—आठवलेइत्युपाह्वविष्णुभट्टकृतः ।	४	०
५६ नित्याषोडशिकार्णवः—भास्करराययोगीतटीकासहितः ।	३	८
५७ आचारभूषणम्—हिरण्यकेश्याह्निकसूत्रकोपाह्वत्र्यम्बककृतम् ।	४	६
५८ आचारेन्दुः—मोटेइत्युपाह्वत्र्यम्बकविरचितः । ...	४	०
५९ श्राद्धमञ्जरी—केळकरोपाह्वबापूभट्टविरचिता । ...	२	०
६० यतिधर्मसंग्रहः—विश्वेश्वरसरस्वतीकृतः ।	१	१२

ग्रन्थनाम ।	मूल्यम् । रू०	आ०
६१ गौतमप्रणीतधर्मसूत्रम्—हरदत्तकृतटीकासमेतम् । ...	२	८
६२ ईशकेनकठप्रश्नमुण्डमाण्डूक्यानन्दवल्लीभृगूपनिषदः-सटीकाः	२	८
६३ छान्दोग्योपनिषत्—रङ्गरामानुजविरचितप्रकाशिकोपेता ।	३	१२
६४ बृहदारण्यकोपनिषत्—रङ्गरामानुजविरचितप्रकाशिकोपेता ।	३	४
६५ शाङ्खायनब्राह्मणम्—ऋग्वेदान्तर्गतबाष्कलशाखीयम् । ...	१	४
६६ काव्यप्रकाशः—उद्द्योतयुतप्रदीपसहितः । ...	६	४
६७ ब्रह्मसूत्राणि—दीपिकासमेतानि ।	४	८
६८ बृहद्ब्रह्मसंहिता—नारदपञ्चरात्रान्तर्गता ।	१	१२
६९ ज्ञानार्णवतन्त्रम्—ईश्वरप्रोक्तम् । तन्त्रशास्त्रग्रन्थः । ...	१	४
७० स्मृत्यर्थसारः—श्रीधराचार्यविरचितः ।	१	१०
७१ बृहद्योगतरङ्गिणी—त्रिमल्लभट्टविरचिता भागद्वयोपेता ।	१०	१२
७२ परिभाषेन्दुशेखरः—वैद्यनाथकृतगदाख्यटीकायुतः । ...	२	६
७३ गायत्रीपुरश्चरणपद्धतिः—श्रीमच्छंकराचार्यविरचिता । ...	१	८
७४ द्राह्यायणगृह्यसूत्रवृत्तिः—रुद्रस्कन्दप्रणीता । ...	१	०
७५ ब्रह्मसूत्रभाष्यार्थरत्नमाला—सुब्रह्मण्यविरचिता । ...	४	४
७६ ईशकेनकठोपनिषदः—दिगम्बरानुचरकृतव्याख्यासमेताः ।	१	०
७७ वेदान्तसूत्रमुक्तावलिः—ब्रह्मानन्दसरस्वतीविरचिता । ...	२	६
७८ त्रिस्थलीसेतुः—नारायणभट्टविरचितः ।	३	१२
७९ छान्दोग्योपनिषत्—मिताक्षराव्याख्यासमेता । ...	२	०
८० [illegible]वृत्तिः—श्रीमच्छंकराचार्यकृता सटीका । ...	०	८
८१ आश्वलायनश्रौतसूत्रम्—नारायणकृतवृत्तिसमेतम् । ...	४	११
८२ ब्रह्मसूत्रवृत्तिः—हरिदीक्षितविराचिता ।	२	७
८३ संक्षेपशारीरकम्—व्याख्यासहितं भागद्वयोपेतम् । ...	९	१
८४ अद्वैतामोदः—अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः । ...	२	०
८५ ज्योतिर्निबन्धः—शूरमहाठश्रीशिवराजविरचितः । ...	३	१५
८६ विधानमाला—श्रीनृसिंहभट्टविरचिता ।	४	४
८७ अभिहेत्रचन्द्रिका—किंजवडेकरोपाह्ववामनशास्त्रिकृता ।	२	१४
८८ निरुक्तम्—दुर्गाचार्यकृतवृत्तिसमेतम् । भागद्वयात्मकम् । ...	१६	४
८९ काव्यप्रकाशः—संकेताख्यटीकासमेतः ।	३	४
९० शाङ्खायनारण्यकम्—ऋग्वेदान्तर्गतबाष्कलशाखीयम् । ...	०	९
९१ गौतमप्रणीतन्यायसूत्राणि-भाष्यवृत्तिभ्यां समेतानि । ...	४	८
९२ श्रीमद्भगवद्गीता—सटीकरामानुजभाष्ययुता । ...	७	८
९३ दर्शपूर्णमासप्रकाशः—किंजवडेकरोपाह्ववामनशास्त्रिकृतः ।	६	१२

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १०

सगौडपादीयकारिकाथर्ववेदीय-माण्डूक्योपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता ।
शंकरानन्दभगवत्कृता माण्डूक्योपनिषद्दीपिका च ।
एतत्पुस्तकद्वयं
ब्याचलर् ऑफ् आर्टस् इत्युपपदधारिभिः अहमदाबाद-
कालेजस्थसंस्कृतभाषाध्यापकैः
'काथवटे' इत्युपाह्वैः विष्णुतनुजैः आबाजीशर्मभिः संशोधितम् ।
तच्च
बी. ए. इत्युपपदधारिभिः
विनायक गणेश आपटे
इत्येतैः
पुण्याख्यपत्तने
श्रीमन् 'महादेव चिमणाजी आपटे' इत्यभिधेय-
महाभागप्रतिष्ठापिते
आनन्दाश्रममुद्रणालये
आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

षष्ठीयमङ्कनावृत्तिः ।
शालिवाहनशकाब्दाः १८५८ ।
ख्रिस्ताब्दाः १९३६ ।
(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।
मूल्यं पञ्चाणकाधिकरूपकद्वयम् (२८५) ।

आदर्शपुस्तकोल्लेखपत्रिका ।

अथास्याः "सगौडपादीयकारिकाथर्ववेदीयमाण्डूक्योपनिषदः" पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रकाश्यन्ते—

(क.) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, कलिकातानगरस्थमुद्रणालये मुद्रितं, कैलासवासिनां "देव" इत्युपाह्वानां पुण्यपत्तननिवासिनां वे० शा० रा० रा० बालशास्त्रिणाम् ।

(ख.) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, करवीरपुरनिवासिनां वे० शा० रा० रा० श्रीमतां गुरुमहाराजानाम् । पत्राणां संख्या १३२ । एकपत्रस्थपङ्क्तिसंख्या २८ । एकपङ्क्तिस्थानाक्षराणां संख्या ४९ । लेखनकालस्तु शतसंवत्सरमित इत्यनुमीयते ।

(ग.) इति संज्ञिता—केवला टीका, करवीरपुरनिवासिनां वे० शा० रा० रा० "नानाशास्त्री द्रविड" इत्येतेषाम् । पत्राणि ३१ । षड्क्तयः ४० । अक्षराणि ७६ । लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(घ.) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, वटोदरानिवासिनां श्री० रा० रा० "कृष्णरावभीमाशंकर" इत्येतेषाम् । पत्राणि १४१ । पङ्क्तयः २६ । अक्षराणि ९० । लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(ङ.) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, श्री० रा० रा० "महादेव चिमणाजी आपटे" इत्येतेषाम् । काश्यां मुद्रणालये मुद्रितम् । मुद्रणकालः संवत् १९४२ ।

(च.) इति संज्ञितम्—मूलं सभाष्यम्, इन्दूरपुरनिवासिनां श्री० रा० रा० "भाऊसाहेब बाळासाहेब" इत्येतेषाम् । पत्राणि ६१ । पङ्क्तयः २३ । अक्षराणि ४९ । लेखनकालः श० १७७२ ।

(छ.) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च । मोहमधीराजधानीनिवासिनां श्री० वे० शा० सं० रा० रा० "जयकृष्णमहाराज" इत्येतेषाम् । पत्राणि ४९ । पङ्क्तयः ४८ । अक्षराणि ७७ । लेखनकालः संवत् १९१९ ।

(ज.) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, अष्टेग्रामनिवासिनां "लिमये" इत्युपाह्वानां रा० रा० गोविन्दशर्मणाम् । पत्राणि ७१ । पङ्क्तयः ४६ । अक्षराणि ७१ । लेखनकालः शके १७४६ ।

(झ.) इति संज्ञितम्–केवलभाष्यं टीकोपेतं च, श्री० रा० रा० "रावसाहेब अण्णासाहेब विंचूरकर" इत्येतेषाम् । पत्राणि १८१ । पङ्क्तयः २४ । अक्षराणि ३९ । लेखनकालः शके १६३२ ।

(ञ.) इति संज्ञितम्–मूलं सभाष्यं टीकोपेतं च । इन्दूरपुरनिवासिनां "किबे" इत्युपाह्वानां श्री० रा० रा० "भाऊसाहेब बाळासाहेब" इत्येतेषाम् । पत्राणि ९७ । पङ्क्तयः ९० । अक्षराणि ६७ । लेखनकालः शके १७७३ ।

(ट.) इति संज्ञितम्–मूलं सभाष्यं टीकोपेतं च । मोहमयीराजधानीनिवासिनां "साठे" इत्युपाह्वानां रा० रा० "गोपालराव" इत्येतेषाम् । पत्राणि १४२ । पङ्क्तयः ३१ । अक्षराणि ४८ । लेखनकालः शके १७११ ।

(ठ.) इति संज्ञितम्–केवलं मूलम् । करवीरपुरनिवासिनां वे० शा० सं० रा० रा० श्रीमतां गुरुमहाराजानाम् । पत्राणि १४ । पङ्क्तयः २३ । अक्षराणि २९ । लेखनकालः सार्धशतसंवत्सरमित इत्यनुमीयते ।

(ड.) इति संज्ञितम्–केवलं मूलम् । करवीरपुरनिवासिनां वे० शा० सं० रा० रा० श्रीमतां गुरुमहाराजानाम् । पत्राणि १२ । पङ्क्तयः २२ । अक्षराणि ३८ । लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(क.) इति संज्ञिता–माण्डूक्योपनिषद्दीपिका, मोहमयीराजधानीनिवासिनां श्री० वे० शा० सं० रा० रा० "जयकृष्णमहाराज" इत्येतेषाम् । पत्राणि ९ । पङ्क्तयः २४ । अक्षराणि ३२ । लेखनकालः संवत् १९०२ ।

(ख.) इति संज्ञिता–माण्डूक्योपनिषद्दीपिका, वटोदरनिवासिनां "पटवर्धन" इत्युपाह्वानां श्री० रा० रा० "कृष्णराव भीमाशंकर" इत्येतेषाम् । पत्राणि ६ । पङ्क्तयः १८ । अक्षराणि ३८ । लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(ग.) इति संज्ञिता–माण्डूक्योपनिषद्दीपिका, वटादरनिवासिनां "पटवर्धन" इत्युपाह्वानां श्री० रा० रा० "कृष्णराव भीमाशंकर" इत्येतेषाम् । पत्राणि ६ । पङ्क्तयः १८ । अक्षराणि ६७ । अस्या अपि लेखनकालः शतसंवत्सरमित इत्येवमेवानुमीयते ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

ॐ तत्सद्ब्रह्मणे नमः ।

गौडपादीयकारिकासहिता

अथर्ववेदीयमाण्डूक्योपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
भद्रं नो अपि वातय मनः ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिः ।

(अथ श्रीमच्छंकरभगवत्पादविरचितं भाष्यम्) ।

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान्स्थविष्ठान्पुनरपि धिषणोद्भासितान्कामजन्यान् ।
पीत्वा सर्वान्विशेषान्स्वपिति मधुरभुङ्मायया भोजयन्नो
मायासंरुध्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥ १ ॥

(अथाऽऽनन्दगिरिकृता टीका) ।

पारंपूर्णपरिज्ञानपरितृप्तिमते सते ।
विष्णवे जिष्णवे तस्मै कृष्णनामभृते नमः ॥ १ ॥
शुद्धानन्दपदाम्भोजद्वंद्वमद्वंद्वतास्पदम् ।
नमस्कुर्वे पुरस्कृत्य तत्त्वज्ञानमहोदयम् ॥ २ ॥
गौडपादीयभाष्यं हि प्रसन्नमिव लक्ष्यते ।
तदर्थतोऽतिगम्भीरं व्याकरिष्ये स्वशक्तितः ॥ ३ ॥

---

१ ब. "ज्ञा मोहय" । २ ग. घ. ज. झ. ट. "भवते । ३ झ. "ङ्गं मुद्वन्दनाम" ।

पूर्वे यद्यपि विद्वांसो व्याख्यानमिह चक्रिरे ।
तथाऽपि मन्दबुद्धीनामुपकाराय यत्यते ॥ ४ ॥

श्रीगौडपादाचार्यस्य नारायणप्रसादतः प्रतिपन्नान्माण्डूक्योपनिषदर्थाविष्करणपरानपि श्लोकानाचार्यप्रणीतान्व्याचिख्यासुर्भगवान्भाष्यकारश्चिकीर्षितस्य भाष्यस्याविघ्नपरिसमाप्त्यादिसिद्धये परदेवतातत्त्वानुस्मरणपूर्वकं तन्नमस्कारैरूपं मङ्गलाचरणं शिष्टाचारप्रमाणकं मुखतः समाचरन्नर्थादपेक्षितमभिधेयादनुबन्धमपि सूचयति—**प्रज्ञानेत्यादिना** । तत्र विधिमुखेन वस्तुप्रतिपादनमिति प्रक्रियां प्रदर्शयति—**ब्रह्म यत्तन्नतोऽस्मीति** । अस्मदर्थस्य तदैक्यस्मरणरूपं नमनं सूचयता ब्रह्मणस्तदर्थस्य प्रत्यक्त्वं सूचितमिति तत्त्वमर्थयोरैक्यं विषयो ध्वनितः । यच्छब्दस्य प्रसिद्धार्थावद्योतकत्वाद्वेदान्तप्रसिद्धं यद्ब्रह्म तन्नतोऽस्मीति संबन्धेन मङ्गलाचरणमपि श्रुत्या क्रियते । ब्रह्मणोऽद्वितीयत्वादेव जननमरणकारणाभावादमृतमजमित्युक्तम् । जननमरणप्रबन्धस्य संसारत्वात्तन्निषेधेन स्वतोऽसंसारित्वं दर्शयता संसारानर्थनिवृत्तिरिह प्रयोजनमिति द्योतितम् । यद्यद्वितीयं स्वतोऽसंसारि ब्रह्म वेदान्तप्रमाणकं तर्हि कथमवस्थात्रयविशिष्टा जीवा भोक्तारोऽनुभूयन्ते भोजयिता चेश्वरः श्रूयते भोज्यं च विषयजातं पृथगुपलभ्यते । तदेतदद्वैते विरुध्येतेत्याशङ्क्य ब्रह्मण्येव जीवा जगदीश्वरश्चेति सर्वं काल्पनिकं संभवतीत्यभिप्रेत्याऽऽह—**प्रज्ञानेति** । प्रकृष्टं जन्मादिविक्रियाविरहितं कूटस्थं ज्ञानं ज्ञप्तिरूपं वस्तु प्रज्ञानम् । तच्च ब्रह्म । प्रज्ञानं ब्रह्मेति हि श्रूयते । तस्यांशवो रश्मयो जीवाश्चिदाभासाः सूर्यप्रतिबिम्बकल्पा निरूप्यमाणा बिम्बकल्पाद्ब्रह्मणो भेदेनासन्तस्तेषां प्रताना विस्तारास्तैरपर्यायमेवाशेषशरीरव्यापिभिः । तदेवाऽऽह—**स्थिरेति** । स्थिरा वृक्षादयः । चरा मनुष्यादयः । तेषां निकरः समूहस्तं व्याप्तुं शीलं येषामिति तथा । तैरिति यावत् । लोका लोक्यमाना विषयास्तान्व्याप्येति विषयसंबन्धोक्तिः फलं कथयति । भोगाः सुखदुःखादिसाक्षात्कारास्तेषां स्थविष्ठत्वं स्थूलतमत्वं देवतानुगृहीतबाह्येन्द्रियद्वारा बुद्धेस्तत्तद्विषयाकारपरिणामजन्यत्वं तान्भुक्त्वा स्वपितीति संबन्धः । एतेन जागरितं ब्रह्मणि कल्पितमुक्तम् । तत्रैव स्वप्नकल्पनां दर्शयति—**पुनरपीति** । जागरहेतुधर्माधर्मक्षयानन्तर्य

---

१ ख. °वत° । २ ग. झ. °रपूर्वकं म° । छ. °रलक्षणं म° । ३ घ. °रूपम° । ४ घ. ज. ट. °र्थां द° । ५ ग. ङ. छ. ज. झ. ट. °द्भव° । ६ ग. ङ. ज. झ. °न्ति° । ७ ग. °पि श्रूयते । ख. छ. ज. °पिशब्देन कि° । ८ ग. झ. °णविकाराणामभा° । ९ ग. झ. °णसंब° । ज. °णप्रतिब° । १० घ. तदद्वै° । ११ ग °यार° । १२ क. °ति श्रुतेः । त° । ङ. °ति श्रु° । १३ घ. °कल्पनि° । १४ घ. ज. ट. °माणे वि° । झ. °माना । १५ झ. °त्वेनैवा° । १६ झ. °मेवस्थावराद्यशे° । १७ ङ. छ. °मानवि° ।

पुनःशब्दार्थः। स्वप्नेऽपि कर्मोद्भवे च सतीत्यपिनोच्यते। न च तत्र बाह्यानीन्द्रियाणि स्थूला विषयाश्च सन्ति किंतु विषणाशब्दितबुद्ध्यात्मानो वासनात्मानो विषया भासन्ते ताननुभूय स्वपितीत्यर्थः। तेषां प्रापकमुपन्यस्यति—कामजन्यानिति। कामग्रहणं कर्मविधयोरुपलक्षणार्थम्। अवस्थाद्वयकल्पनां ब्रह्मणि दर्शयित्वा तत्रैव सुषुप्तिकल्पनां दर्शयति—पीत्वेति। सर्वे विशेषाः सर्वे विषयाः स्थूलाः सूक्ष्माश्च जागरितस्वप्नरूपास्तान्पीत्वा स्वात्मन्यज्ञाने प्रविलाप्य स्वपिति कारणभावेन तिष्ठतीत्यर्थः। तत्राऽऽनन्दप्राधान्यमभिप्रेत्य विशिनष्टि—मधुरभुगिति। अवस्थात्रयस्य मायाकृतस्य मिथ्याभूतस्य प्रतिबिम्बकल्पेष्वस्मासु संबन्धितामिवाऽऽपाद्यास्मान्भोजयद्ब्रह्म वर्तते। अतो ब्रह्मण्येवावस्थात्रयम्। तद्वन्तो जीवा मायावि ब्रह्म चैं ब्रह्मणि परिशुद्धे परिकल्पितं सर्वमित्याह—माययेति। तस्यैव ब्रह्मणोऽवस्थात्रयातीतत्वेन विज्ञप्तिमात्रत्वं दर्शयति—तुरीयमिति। चतुर्णां पूरणं तुरीयमिति व्युत्पत्तेर्ब्रह्मणस्तुरीयत्वेन निर्देशात्प्राप्तं सद्वितीयत्वमित्याशङ्क्य कल्पितस्थानत्रयसंख्यापेक्षया तुरीयत्वं न सद्वितीयत्वेनेत्याह—मायेति। मायावित्वेन निकृष्टत्वमाशङ्क्योक्तम्—परमिति। मायाद्वारा ब्रह्मणस्तत्संबन्धेऽपि स्वरूपद्वारा न तत्संबन्धोऽस्तीति कुतो निकृष्टतेत्यर्थः॥ १॥

यो विश्वात्मा विधिजविषयान्भोग्य भोगान्स्थविष्ठा-
न्पश्चाद्यान्यान्स्वमतिविभवाज्ज्योतिषा स्वेन सूक्ष्मान्।
सर्वानेतान्पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान्विशेषान्विगतगुणगणः पात्वसौ नस्तुरीयः॥ २॥

विधिमुखेन वस्तुप्रतिपादनप्रक्रियामवलम्ब्य तदर्थेनोपक्रम्य तस्य त्वमर्थप्रत्यगात्ममात्रत्वमुक्तम्। अभिधेयफलोक्त्या संबन्धाधिकारिणौ च सूचितौ। संप्रति निषेधद्वारा वस्तुप्रतिपादनप्रक्रियामाश्रित्य त्वमर्थेनोपक्रम्य तस्य तदर्थासंसारिब्रह्ममात्रत्वं प्रत्याययति—यो विश्वात्मेति। तत्र त्वमर्थः स्वतःसिद्धश्चिद्धातुः सर्वनाम्ना परामृश्यते। तस्मिञ्जागरितमारोपितं तमुदाहरति—विश्वात्मेति। विश्वं पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकं स्थूलं जगद्वैराजं शरीरम्। तस्मिञ्जागरिते चाहं ममेत्यभिमानवानित्यर्थः। तस्यार्थक्रियामुपन्यस्यति—विधिजेति। विधीयत इति विधिर्धर्मो नैं-

---

१ ङ. स्थूलवि°। २ ख. ङ. ञ. °द्ध्यात्मना वा°। ३ ङ. ञ. °नात्मनो। ४ ञ. °न्यसति। ५ ख. ग. घ. ङ. ज. ञ. °षाः स्यू°। ६ घ. ञ. 'ज्ञानं प्र°। ७ ग. ङ. ञ. च प°। ८ ङ. °लिपतावस्थात्र°। ९ च. ट. विविधवि°। १० च. °न्प्राप्य भो°। ११ ङ. °नमिति प्र°। १२ ज. ञ. °णौ सू°। १३ ग. घ. ङ. ज. ञ. °ति प्रतिषे°। १४ घ. ज. °पितमु°। १५ ञ. भूतं त°। १६ ङ. °मानीत्य°। १७ ग. ञ. °र्थप्रक्रि°। १८ ग. ङ. ज. ञ. नवनु°।

नाऽऽकाशेन ततो व्यतिरिक्तोऽविशिष्टधर्मस्ताभ्यां धर्माधर्माभ्यामविद्याकामप्रसूताभ्यां विषया शब्ददयो मन्यन्ते। तान्भोगयोग्यतया भोगशब्दितानादित्याद्यनुगृहीत-बाह्येन्द्रियद्वारकबुद्धिपरिणामगोचरतया स्थूलतमान्प्राप्य साक्षादनुभूय स्थितोऽयं प्रत्यगात्मेत्यर्थः। तत्रैवं स्वप्नावस्थोपमध्यस्यति—पश्चाच्चेति। जाग्रद्धेतुकर्मक्षयानन्तरं स्वप्नहेतुकर्मोद्भवे च सति स्थूलेभ्यो विषयेभ्योऽन्यानस्मादेव हेतोः सूक्ष्मान्बाह्येन्द्रियाणामुपरतत्वादविद्याकामकर्मपरिनिर्मितत्वीयमतिप्रभावादेव प्रसूतानन्तःकरणात्मनो वासनामयानादित्यादिज्योतिषामस्तमितत्वादात्मभूतेनैव ज्योतिषा विषयीकृतानन्भूयापञ्चीकृतपञ्चमहाभूततत्कार्यात्मकं सूक्ष्मप्रपञ्चं हैरण्यगर्भं शरीरं स्वप्नस्थानं चाभिमन्यमानस्तैजसो भवतीत्यर्थः। तत्रैव सुषुप्तकल्पनां दर्शयति—सर्वानिति। स्थूलसूक्ष्मविभागेन स्थानद्वयावच्छिन्नान्प्रकृतानेतानशेषानपि विशेषानुपाधिद्वयभूतानुपाधिद्वयद्वारकस्थानद्वयसंचारयुक्तश्रमोद्भवानन्तरं तस्यापि पारिजिहीर्षया शनैरनुक्रमेणाक्रमेण वा स्वात्मन्यीते कारणात्मनि स्थापयित्वोपसंहृत्याव्याकृतप्रधानः सन्प्राज्ञो भवतीत्यर्थः। तस्यैव प्रत्यगात्मनः स्थानत्रयविशिष्टस्य नान्तःप्रज्ञं न बहिष्प्रज्ञमित्यादिप्रतिषेधशास्त्रप्रसूतप्रमाणज्ञानसमारूढस्य सर्वानर्थानर्थविशेषान्कार्यकरणरूपान्प्रमाणज्ञानेनैव बाधत्वादेव हित्वा निरुपाधिकपरिपूर्णपरिज्ञानपरमात्मस्वरूपेण पारिनिष्पन्नं तत्त्वं कथयति—हित्वेति। प्रथमश्लोकेन प्रदर्शितप्रणामस्य प्रत्यूहप्रवाहप्रशमनात्मकं प्रयोजनं स्थानत्रयप्रकल्पनातीतपरवस्तुपयुक्तं प्रार्थयते द्वितीयेन—पारेति। नो अस्मान्व्याख्यातृत्वेन श्रोतृत्वेन च व्यवस्थितान्पुरुषार्थपरिपन्थिकृतकारणनिरासपुरःसरं परमात्मा पराकृताशेषकल्पनो निर्यो वेज्ञप्तिस्वभावो मोक्षप्रदानेन तद्धेतुज्ञानप्रदानेन च परिरक्षतादित्यर्थः। केचित्तु प्रकरणचतुष्टयात्मनो ग्रन्थस्य वेदान्तैकदेशसंबद्धत्वज्ञापनार्थं निष्प्रपञ्चं वाक्यप्रतिपाद्यं ब्रह्म प्रथमश्लोकेन सूचितम्। द्वितीयेन माण्डूक्यश्रुतिव्याख्यानरूपेणाऽऽद्यप्रकरणेन प्रणवमात्राणामात्मपादानां चैकीकरणेन प्रतिपाद्यं ब्रह्म सूचितमिति मन्यन्ते। न च द्वितीयश्लोके चतुर्थपादे वृत्तलक्षणाभावादसंगत्यमाशङ्कनीयम्। गाथालक्षणस्य तत्र सुसंपादत्वादिति द्रष्टव्यम्। अन्ये त्वाद्यश्लोकं मूलश्लोकान्तर्भू-

---

१ ब. 'प्रभूता'। झ. 'प्रस्तुता'। २ ख. 'म्भोगभोग्य'। ३ ग. झ. 'तो यः प्र'। ४ छ. 'ध च स्व'। ५ ग झ. 'त्यामुपन्यस्य'। ६ ग झ 'त्मना वा'। ७ क. ख छ सूक्ष्मं प्र'। ८ क. ब 'गर्भ'। ९ छ 'सुप्तिक'। १० छ 'षान्विशे'। ११ क. छ. 'यद्वा'। १२ ग. ब. 'हीर्षया श'। १३ ग. झ. 'क्षनै'। १४ ग. घ. ज. 'व्यर्थ'। १५ ब. प्रभवा'। १६ ग. छ झ. 'त्मानं क'। १७ क. झ. 'तीतं प'। १८ ख. ग. 'स्थिभूतकार'। १९ ज. 'स्यचिज्ज्ञ'। २० ग. घ. झ. 'बन्धत्व'। ज. 'बन्धत्वं ज्ञानार्थं। २१ ब. 'पद्यवा'। २२ ख. ग. झ. 'न तु मा'। २३ ब. 'तमुप'।

द्वितीयश्लोकं भाष्यकारप्रणीतमभ्युपयन्ति । तदसत् । उत्तरश्लोकेष्विवाऽऽद्येऽपि श्लोके भाष्यकृतो व्याख्यानप्रणयनप्रसङ्गात् ओमित्येतदक्षरमित्यादिभाष्यविरोधाच्च । अपरे पुनराद्येन श्लोकेन शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणद्वारेण नमनक्रिया प्रकरणप्रारम्भोपयोगित्वेन क्रियते । परदेवताभक्तिवदपरदेवताभक्तेरपि विद्याप्राप्तावन्तरङ्गत्वस्य शास्त्रीयस्य शिष्यशिक्षायै ज्ञापनार्थमवस्थात्रयातीतानित्यसिद्धविज्ञानमूर्तेराचार्यान्मोक्षौपयिकज्ञानप्राप्तिराचार्यवान्पुरुषो वेदेत्यादिश्रुत्यवष्टम्भेन मुमुक्षुणा प्रार्थ्यते द्वितीयश्लोकेनेति कल्पयन्ति ॥ २ ॥

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानम् । वेदान्तार्थसारसंग्रहभूतमिदं प्रकरणचतुष्टयमोमित्येतदक्षरमित्यारभ्यते । अत एव न पृथक्संबन्धाभिधेयप्रयोजनानि वक्तव्यानि । यान्येव तु वेदान्ते संबन्धाभिधेयप्रयोजनानि तान्येवेह भवितुमर्हन्ति । तथाऽपि प्रकरणव्याचिख्यासुना संक्षेपतो वक्तव्यानि ।

यदुद्दिश्य मङ्गलाचरणं कृतं तन्निर्देष्टुमादौ व्याख्येयस्य प्रतीकं गृह्णाति—ओमित्येतदिति । ओमित्येतदक्षरमित्यादिप्रकरणचतुष्टयविशिष्टमिदमारभ्यते व्याख्यायतेऽस्माभिरित्युद्देश्यं प्रतिजानीते । किमिदं शास्त्रत्वेन वा प्रकरणत्वेन वा व्याचिख्यासितम् । नाऽऽद्यः । शास्त्रलक्षणाभावाद्[1]नित्याशास्त्रत्वात् । एवं प्रयोजनापरिबद्धस्य शेषार्थप्रतिपादकं हि शास्त्रम् । अत्र च मोक्षलक्षणैकप्रयोजनवत्त्वेऽपि नाशेषार्थप्रतिपादकत्वम् । न द्वितीयः । प्रकरणलक्षणाभावादित्याशङ्क्याऽऽह—वेदान्तेति । शास्त्रं वेदान्तशब्दार्थः । तस्यार्थोऽधिकारिनिर्णयगुरूपसदनपदार्थद्वयतदैक्यविरोधपरिहारसाधनफलाख्यः । तत्र सारो जीवपरैक्यं तस्य सम्यग्ग्रहः संग्रहः संशयविपर्यासादिप्रतिबन्धव्युदासेन तदुपायोपदेशो यस्मिन्प्रकरणे तत्तथेति यावत् । तथा च शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् । इदं प्रकरणत्वेन व्याख्यातुमिष्टम् । निर्गुणवस्तुमात्रप्रतिपादकत्वात् । तत्प्रतिपादनसंक्षेपस्य च कार्यान्तरत्वात्प्रकरणत्वलक्षणस्य चात्र संपूर्णत्वादित्यर्थः । प्रकरणत्वेऽपि निर्विषयत्वादिप्रयुक्तमव्याख्येयत्वमाशङ्क्याऽऽह—अत एवेति । प्रकरणत्वादेव प्रकृतशास्त्रसंबन्धेन सबन्धादीनामवाच्यत्वेऽपि प्रकरणप्रवृत्त्यङ्गतया तानि त्ववश्यं वक्तव्या-

---

१ ग. घ. ङ. ज. झ. °मात्रिका । २ ग. छ. झ. °तीतनित्य° । ३ ख. ञ. °न्मोक्षोपयोगिक° । ४ क. °र्थ्यत इति द्वितीयश्लोकेन वक्ष्यन्तीति ॥ २ ॥ ५ ग. झ. °तीयेन श्लो° । ६ झ. °त्यार° ७ झ. °व्यानीति मन्यन्ते व्याख्यातारः त° । ८ झ. °ते । ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमित्यादि । कि° । ९ ख. ग. छ झ. न प्र° । १० घ. °दशा° । ११ झ. °नत्वेऽपि । १२ झ. °शब्दः । त° । १३ छ. °वक्रङ्कणोरै° । १४ ञ. °वन्धं शा° । १५ क. ञ. °स्य का° ।

नीत्याशङ्क्य शास्त्रीयसंबन्धादीनां तदीये प्रकरणेऽर्थात्प्राप्तत्वान्नास्ति वक्तव्यत्वमर्थपुनरुक्तेरित्याह—यान्येवेति । श्रोतारो हि शास्त्रीयं प्रकरणं प्रतिपद्यमानाः शास्त्रीयाण्येव संबन्धादीन्यत्र वचनाभावेऽपि बुध्यमानाः प्रवृत्तिं तस्मिन्प्रकुर्वन्तीत्यर्थः । तर्हि प्रकरणकर्तृवदेव तद्भाष्यकृताऽपि विषयादीनामत्रावक्तव्यत्वाद्भाष्यकृतो विषयाद्युपन्यासायासो वृथा स्यादित्याशङ्क्याऽऽह—तथाऽपीति । प्रकरणकर्तुरवक्तव्यान्यपि तद्भाष्यकृतां तानि संक्षेपतो वक्तव्यानीति व्याख्यातॄणां मतम् । द्वाभ्यामनुक्तत्वे तेष्वनाश्वासाशङ्कावकाशादित्यर्थः ।

तत्र प्रयोजनवत्साधनाभिव्यञ्जकत्वेनाभिधेयसंबद्धं शास्त्रं पारम्पर्येण विशिष्टसंबन्धाभिधेयप्रयोजनवद्भवति ।

भाष्यकृता प्रयोजनादीनां वक्तव्यत्वे सिद्धे शास्त्रप्रकरणयोर्मोक्षलक्षणप्रयोजनत्वं प्रतिजानीते—तत्रेति । प्रयोजनवच्छास्त्रमिति संबन्धः । शास्त्रग्रहणं प्रकरणोपलक्षणार्थम् । मोक्षलक्षणं फलं ब्रह्मज्ञानंस्येष्यते न शास्त्रप्रकरणयोरित्याशङ्क्याऽऽह—साधनेति । सत्यं मोक्षस्य साधनं ब्रह्मात्मैकत्वज्ञानम् । तस्य जनकं शास्त्रादि तद्द्वारेण ज्ञानव्यवधानेन मोक्षफलवद्भवति शास्त्रादित्यर्थः । तथाऽपि ब्रह्मणा विषयेण संबन्धो वेदान्तानामेवेष्यते तत्कथमभिधेयसंबद्धं शास्त्रादीत्याशङ्क्य ब्रह्मविचारमन्तरेण तज्ज्ञानजनकत्वायोगात्तज्ज्ञानजननद्वारा विषयसंबन्धसिद्धिरित्याह—अभिधेयेति । उक्तं ज्ञानव्यवहितं प्रयोजनादि शास्त्रादेरुपसंहरति—पारम्पर्येणेति । तत्र संबन्धो ब्रह्मज्ञानं शास्त्रादिना जन्यमेवेत्ययोगव्यवच्छेदादुक्तः । शास्त्रादिनैव जन्यमित्यन्ययोगव्यवच्छेदाद्विषयोऽपि दर्शितः ।

किं पुनस्तत्प्रयोजनमित्युच्यते । रोगार्तस्येव रोगनिवृत्तौ स्वस्थता तथा दुःखात्मकस्याऽऽत्मनो द्वैतप्रपञ्चोपशमे स्वस्थता । अद्वैतभावः प्रयोजनम् । द्वैतप्रपञ्चस्याविद्याकृतत्वाद्विद्यया तदुपशमः स्यादिति ब्रह्मविद्याप्रकाशनायास्याऽऽरम्भः क्रियते । "यत्र हि द्वैतमिव भवति । यत्र त्वाऽन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यद्विजानीयात् । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं

---

१ क. °र्थस्य पु° । २ क. °दीन्यन्य° । ३ क. ग. झ. °न्यासो । ४ छ. °ता सं° । ज. °ताऽतिसं° । ५ क. °णां संभ° । ६ ज. °नुक्तेष्वेते । ७ ख. °श्वासश° । ८ ज. झ. ढ. °ङ्का स्यादि° । ९ च. झ. °वत् । किं । १० घ. ज. °स्योच्यते । ११ ग. झ. °स्य व्यञ्जकं । १२ ग. °दान्तज्ञानाना° । १३ क. °यत्वसं° । १४ ग. ज. झ. °बन्धं शा° । १५ ग. झ. ब्रह्माभिधानम° । १६ घ. ज. °गाज्ज्ञान° । १७ झ. °नद्वा° । १८ क. छ. °हितप्र° । १९ ग. °न्यमेवेत्य° । २० क. °त्ययो° । ३१ घ. क. ज. ढ. तथैव तु° । २२ च. छ. झ. °श्चेद्वि° ।

पश्येत्केन[2] कं विजानीयात्" इत्यादिश्रुतिभ्योऽस्यार्थस्य सिद्धिः ।

यदुक्तं प्रयोजनवत्त्वं तदाक्षिपति—किं पुनरिति । साध्यत्वे स्वर्गवदनित्यत्वं नित्यत्वे साधनानधीनत्वान्न तादर्थ्येन शास्त्रादि प्रयोक्तव्यमित्यर्थः । मोक्षस्याऽऽत्मस्वरूपत्वान्नानित्यत्वं नापि साधनानर्थक्यम् । स्वरूपभूतमोक्षप्रतिबन्धनिवर्तकत्वेनार्थवत्त्वादित्युत्तरमाह—उच्यत इति । यथा देवदत्तस्य ज्वरादिना रोगेणाभिभूतस्य स्वस्थता स्वरूपादप्रच्युतिरूपा स्वरूपभूतैव प्रागाप सती रोगप्रतिबद्धाऽसतीव स्थिता चिकित्साशास्त्रीयोपायप्रयोगवशात्प्रतिबन्धभूतरोगापगमे सत्यभिव्यज्यते न हि तत्रोपायवैयर्थ्यं प्रतिबन्धप्रध्वंसार्थत्वात् । न चानित्यत्वं स्वस्थतायाः शङ्क्येत । तस्यास्तदसाध्यत्वादित्युक्तेऽर्थे दृष्टान्तमाह—रोगार्तस्येवेति । यथोदितदृष्टान्तानुरोधादात्मनः स्वतः समुत्खातनिखिलदुःखस्य निरतिशयानन्दैकतानस्यापि स्वाविद्याप्रसूताहंकारादिद्वैतप्रपञ्चसंबन्धादात्मनि दुःखमारोप्याहं दुःखी सुखं मया प्राप्तव्यमिति प्रतिपद्यमानस्य परमकारुणिकाचार्योपदिष्टवाक्योत्थाद्वैतविद्यातो द्वैतनिवृत्तौ प्रतिबन्धप्रध्वंसे स्वभावभूता परमानन्दता निरस्तसमस्तानर्थता च स्वारस्येनाभिव्यक्ता भवति । सा च स्वस्थता परिपूर्णवस्तुस्वभावान्नातिरिच्यते । तदिदं शास्त्रीयं प्रयोजनम् । तस्य च स्वरूपत्वेनासाध्यत्वान्नानित्यत्वं शङ्कितव्यम् । न च साधनवैयर्थ्यं प्रदर्शितप्रतिबन्धनिवृत्तिफलत्वादिति दार्ष्टान्तिकमाह—तथेति । ननु द्वैतस्याहंकाराद्यात्मनो वस्तुत्वाद्वस्तुनश्च विद्यानपोह्यत्वान्नित्यनैमित्तिककर्मायत्तत्वान्निवृत्तेरलं विद्यार्थेन प्रकरणारम्भेणेति तत्राऽऽह—द्वैतेति । आत्माविद्याकृतस्य द्वैतस्याऽऽत्मविद्यया कारणनिवृत्त्या निवृत्तेरात्मविद्याभिव्यक्तये शास्त्रारम्भो युज्यते । न च द्वैतस्याविद्याकृतस्य विद्यमानदेहत्वे प्रमाणमस्तीशङ्क्यान्वयव्यतिरेकानुविधायिनीं श्रुतिमुदाहरति—यत्र हीति । इदमुक्तं भवति—अविद्यावस्थायां प्रतिभातद्वैतस्य तत्प्रतिभानस्य चाऽऽभासत्वेनाविद्यामयत्वमुच्यते—आत्मैवाभूदिति । दृष्टो विद्यावस्थायां कर्तृकरणादिसर्वात्मभावं नातिरिक्तमस्तीत्युक्त्वा विद्याद्वारा तस्यैव द्वैतस्याऽऽत्ममात्रत्ववचनाद्विद्यानिमित्ता कार्यकारणात्मकद्वैतनिवृत्तिरात्मैवेत्यभिलप्यते । तथा च विद्यातो द्वैत-

---

१ च. छ. झ. 'श्येद्विज्ञा' । २ क. कं तद्विजा' । ३ ग. छ. ज. झ. 'त्मरू' । ४ छ. 'न्धकनि' । ५ घ. ङ. ज. 'दिरो' । ६ ग. ङ. 'द्धा सती स्वात्मस्थि' । ७ छ. 'व स्वात्मस्थि' । ८ ग. घ. ज. 'न्धरूपरो' । ९ छ. ज. 'न्धध्वं' । १० घ. शङ्क्यते । ११ झ. 'न्धध्वं' । १२ ख. 'ता या प' । १३ क. ख. 'पूर्णा व' । १४ घ. ङ. ज. नथैवेति । १५ ङ. छ झ. 'पोद्यत्वा' । १६ घ. ङ. ज. 'र्मापेक्षत्वा' । १७ क. 'त्वानि' । १८ ख. घ. ङ. छ. ज. 'द्यावि' । १९ ख. 'ब्दाभ्यां त्वावि' । २० घ. 'ङ्कार' । २१ क. मित्तका' ।

निवृत्तिनिर्देशात्तस्याविद्यात्वमवद्योत्यते । आदिशब्दान्नेह नानेत्यधिष्ठाननिष्ठात्यन्ताभाव-प्रतियोगित्वं द्वैतस्याभिदधद्वाक्यं वाचारम्भणवाक्यं च गृहीतम् । अस्यार्थस्येति । द्वैतगताविद्याकृतत्वस्येत्यर्थः ।

तत्र तावदोंकारनिर्णयाय प्रथमं प्रकरणमागमप्रधानमात्मतत्त्वप्रतिपत्त्युपाय-भूतम् । यस्य द्वैतप्रपञ्चस्योपशमेऽद्वैतप्रतिपत्तौ रज्ज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः। तस्य द्वैतस्य हेतुतो वैतथ्यप्रतिपादनाय द्वितीयं प्रकरणम् । तथाऽद्वैतस्यापि वैतथ्यप्रसङ्गप्राप्तौ युक्तितस्तथात्वदर्शनायँ तृतीयं प्रकरणम् । अद्वैतस्य तथात्वप्रतिपत्तिप्रतिपक्षभूतानि यानि वादान्तराण्यवैदिकानि तेषाम-न्योन्यविरोधित्वादतथार्थत्वेन तदुपपत्तिभिरेव निराकरणाय चतुर्थं प्रकरणम्।

विषयप्रयोजनाद्यनुबन्धोपन्यासमुखेन ग्रन्थारम्भे स्थिते सत्यादौ प्रकरचतुष्टयस्य प्रत्येक-मसंकीर्णं प्रमेयं प्रतिपत्तिसौकर्यार्थं सूचयितव्यमित्याह—तत्र तावदिति । ओंकारप्रकरण-स्यासंकीर्णं प्रमेयं संगृह्णाति—ओंकारेति । तन्निर्णयाय प्रकरणमारब्धमित्ययुक्तम् । तन्नि-र्णये प्रमाणाभावात्तस्य चानुपयोगित्वात् । आत्मप्रतिपत्तिर्हि पुरुषार्थोपयोगिनीत्याशङ्क्या-ऽऽगमेत्यादिविशेषणद्वयम् । तदुपदेशप्रधानं माण्डूक्योपनिषद्व्याख्यानरूपम् । तेन तत्र प्रामाण्यादुक्तो निर्णयः सेत्स्यति न त्विदं युक्तिप्रधानम् । युक्तिलेशस्य सतोऽपि गुण-त्वादप्रधानत्वात् । न चायमोंकारनिर्णयो नोपयुज्यते । यदात्मनस्तत्त्वमनारोपितरूपं तत्प्र-तिपत्तावुपायत्वात् । तत्प्रतिपत्तेश्च मुक्तिफलत्वात् । अतश्चाऽऽद्यं प्रकरणमोंकारनिर्णया-वान्तरफलद्वारेण तत्त्वज्ञाने परमफले पर्यवस्यतीत्युपदेशवशादधिगन्तव्यमित्यर्थः । वैत-थ्यप्रकरणस्यावान्तरविषयविशेषं दर्शयति—यस्येति । आरोपितनिषेधे सत्यनारोपितप्र-तिपत्तिः स्वाभाविकीत्यत्र दृष्टान्तमाह—रज्ज्वामिवेति । हेतुतो दृश्यत्वाद्यन्तवत्त्वादि-युक्तिवशादित्यर्थः । अद्वैतप्रकरणस्यार्थविशेषमुपन्यस्यति—तथाऽद्वैतस्यापीति । तस्यापि द्वैतवद्व्यवस्थानुपपत्त्या मिथ्यात्वप्रसङ्गः शङ्क्यते । तस्यां सत्यामौपाधिकभेदाद्व्यवस्था-याः सुस्थत्वादव्यभिचारादियुक्तिवशाद्द्वैतस्य परमार्थत्वं प्रतिपादयितुं तृतीयं प्र-करणमित्यर्थः । अलातशान्तिप्रकरणस्यार्थविशेषं कथयति—अद्वैतस्येति ।

---

१ च. °तस्य प्र° । २ छ. °पद्यौप° । ३ क. ख. °थ प्रकरणं तृतीयम् । ४ च. °पत्तेर्विपक्ष-भूतानि वा° । ५ छ. झ. °तस्यार्थ° । ६ क. घ. ङ ज. झ. °कीर्णप्र° । ७ क. °मित्युक्त° । ८ ग. ङ. छ. झ °नुपत्त्या° । ९ ग. छ. °त्वात् । १० ग. झ. °व्यार्थस्य° । ११ ग. °दाद्वयव्य° । १२ ग. झ. °तीयप्र° ।

तस्य तथात्वमबाधितत्वेन वस्तुत्वं तत्प्रतिपक्षत्वं पक्षान्तराणामित्यत्र हेतुमाह-अवैदिकानीति । तेषां निराकार्यत्वे हेतुमाह— अतथार्थत्वेनेति । मिथ्याद्वैतनिष्ठत्वेनेत्यर्थः । तदुपपत्तिमिरेव निराकरणे हेतुमाह—अन्योन्येति । पक्षान्तरप्रतिषेधमुखेनाद्वैतमेव द्रढयितुमन्त्यं प्रकरणमित्यर्थः ।

कथं पुनरोंकारनिर्णय आत्मतत्त्वमितिपत्त्युपायत्वं प्रतिपद्यत इति । उच्यते " ओमित्येतत् " । " एतदालम्बनम् । " " एतद्वै सत्यकामं " " ओमित्यात्मानं युञ्जीत " । " ओमिति ब्रह्म " । ओंकार एवेदं सर्वम् " इत्यादिश्रुतिभ्यः । रज्ज्वादिरिव सर्पादिविकल्पस्याऽऽस्पदोऽद्वय आत्मा परमार्थः सन्प्राणादिविकल्पस्याऽऽस्पदो यथा तथा सर्वोऽपि वाक्यपञ्चकः प्राणाद्यात्मविकल्पविषय ओंकार एव ।

ओंकारनिर्णयद्वारेणाऽऽत्मप्रतिपत्त्युपायभूतमाद्यं प्रकरणमित्युक्तम् । तन्निर्णस्य तद्धीहेतुत्वायोगात् । न खल्वर्थान्तरज्ञानमर्थान्तरज्ञाने व्याप्तिमन्तरेणोपयुज्यते । न चात्र धूमाग्न्योरिव व्याप्तिरुपलभ्यते । न चाऽऽत्मकार्यत्वमोंकारस्य युक्तम् । आकाशादेरविशेषात् । तस्य च सर्वात्मत्वेनाऽऽत्मवत्तत्कार्यत्वव्याघातादिति मन्वानः सन्प्रथमप्रकरणार्थं प्रागुक्तमाक्षिपति—कथमिति । न वयमनुमानावष्टम्भादोंकारनिर्णयमात्मप्रतिपत्त्युपायमभ्युपगच्छामो येन व्याप्त्यभावो दोषमावहेत् । किंतु श्रुतिप्रामाण्यात्तन्निर्णयस्तद्धीहेतुरिति परिहरति—उच्यत इति । तत्र मृत्युना नचिकेतसं प्रत्योमित्येतदित्यनेन वाक्येन ब्रह्मत्वेनोमित्येतदुपदिष्टम् । समाहितेनोंकारोच्चारणे यच्चैतन्यं स्फुरति तदोंकारसामीप्यादेव शाखाचन्द्रन्यायेनोंकारशब्देन लक्ष्यते । तेन लक्षणयोंकारनिर्णयो ब्रह्मधीहेतुरिति विवक्षित्वा श्रुतिमुदाहरति—ओमित्येतदिति । प्रतिमायां विष्णुबुद्धिवदोंकारो ब्रह्मबुद्ध्योपास्यमानो ब्रह्मप्रतिपत्त्युपायो भवतीत्यभिप्रेत्य वाक्यान्तरं पठति—एतदालम्बनमिति । किं चायमोंकारो यदा परापरब्रह्मदृष्ट्योपास्यते तदा तज्ज्ञानोपायतामुपारोहतीति मत्वा पुनः श्रुतिं दर्शयति—एतद्वै (द्वा इ)ति । किंच समाधिनिष्ठो यदोमित्युच्चार्याऽऽत्मानमनुसंधत्ते तदा स्थूलमकारमुकारे

---

१ छ. ज्ञ. °तत्त्वार्थ° । २ क. °मन्त्यप्र° । ३ च. °र्णयस्याऽऽत्म° । ४ ज्ञ. तत्त्वं प्रत्युपा° । ५ घ. °प्रत्युपा° । ६ छ. 'तदा' । ७ क. °म परं चापरं च ब्रह्म यदोंकारः । तस्माद्विद्वानेतेनैवाऽऽयतनेनैकतरमन्वेति । ओ° । च. °म परं चापरं च ब्रह्म यदोंकारः । तस्माद्विद्वानेतेनैकतरमन्वेतीति शेषः । ओ° । ८ छ. °स्पदेद्व° । ९ क. ख. ज. °मार्थतः स° । १० ख. ग. ज्ञ. नो । ११ छ. °मित्य° । १२ ग. छ. ज्ञ. °नोंश° । १३ ज्ञ. °क्षितत्वाच्छ्रुतिं' । १४ ग. छ. °यदे-तदो° ।

सूक्ष्मे तं च कारणे मकारे तमपि कार्यकारणातीते प्रत्यगात्मन्युपसंहृत्य तन्निष्ठो भवतीत्यनेन प्रकारेणोंकारस्य तत्प्रतिपत्त्युपायतेति विधान्तरेणाऽऽह—ओमित्यात्मानमिति । किंच योऽयं स्थाणुः स पुमानितिवद्यदेतदोमित्युच्यते तद्ब्रह्मेति बाधायां सामानाधिकरण्येन समाहितो ब्रह्म बोध्यते । तथा च युक्तमोंकारस्य ब्रह्मज्ञानहेतुत्वमित्याह—ओमिति ब्रह्मेति । किं च सर्वास्पदत्वादोंकारस्य ब्रह्मणश्च तथात्वादेकलक्षणत्वादन्यत्वासिद्धेरोंकारप्रतिपत्तिर्ब्रह्मप्रतिपत्तिरेवेत्याह—ओंकार एवेति । ओमितीदं सर्वमित्यादिवाक्यान्तरसंग्रहार्थमादिपदमित्यादिश्रुतिभ्यो ब्रह्मप्रतिपत्त्युपायत्वमोंकारस्य प्रमितमिति शेषः । ननु स्वानुमतप्रतिभासे सन्मात्रे चिदात्मनि प्राणादिविकल्पस्य कल्पितत्वादात्मनः सर्वास्पदत्वं न पुनरोंकारस्य तदस्त्यननुगमादिति तत्राऽऽह—रज्ज्वादिरिवेति । यथा रज्जुः शुक्तिरित्यादिरधिष्ठानविशेषः सर्पो रजतमित्यादिविकल्पस्याऽऽस्पदोऽभ्युपगतस्तथाऽऽत्माऽद्वयत्वान्मिथ्यात्वहेत्वभावात्परमार्थसत्त्वभावो वक्ष्यमाणस्तस्य प्राणादिविकल्पस्याऽऽस्पदोऽभ्युपगम्यते । यथैष दृष्टान्तस्तथैव प्राणादिरात्मविकल्पो यस्तद्विषयः सर्वो वाक्प्रपञ्चो यथोक्तोंकारमात्रात्मकस्तदास्पदो गम्यते । न च जगत्योंकारस्याननुगमः । ओंकारेण सर्वा वाक्संतृण्णेति श्रुतेः । अतो युक्तमोंकारस्य सर्वास्पदत्वमित्यर्थः ।

स चाऽऽत्मस्वरूपमेव । तदभिधायकत्वात् । ओंकारविकारशब्दाभिधेयश्च सर्वः प्राणादिरात्मविकल्पोऽभिधानव्यतिरेकेण नास्ति ।

" वाचाऽऽरम्भणं विकारो नामधेयम् " " तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम् " । " सर्वं हीदं नामनि " इत्यादिश्रुतिभ्यः ।

नन्वर्थजातस्याऽऽत्मास्पदत्वादोंकारास्पदत्वाच्च वाक्प्रपञ्चस्य प्राप्तमास्पदद्वय[त्व]मिति नेत्याह—स चेति । आत्मवाचकत्वेऽपि नास्त्योंकारस्याऽऽत्ममात्रत्वं तद्वाचकस्य तन्मात्रत्वमिति व्याप्त्यभावात् । प्राणादेरात्मविकल्पस्याभिधानव्यतिरेकदर्शनादित्याशङ्क्याऽऽह—ओंकारेति । तस्य विकारः सर्वो वाग्विशेषः । अकारो वै सर्वा वागिति श्रुतेः । ओंकारस्य च तत्प्रधानत्वात्तेन प्राणादिशब्देन वाच्यः प्राणादिरात्मविकल्पः सर्वः स्वाभिधानव्यतिरेकेण नास्ति । तच्चाभिधानं प्राणादिशब्दविशेषात्मकमोंकारविकारभूतमोंकारातिरेकेण न संभवतीत्योंकारमात्रं सर्वमिति निश्चीयते । आत्मनोऽपि तद्वा-

---

१ ख. °ति यदे° । २ क. °ज्ञाने हे° । ३ क. ख. प्रतिपादित° । ४ झ. °दत्वात् । न । ५ क. °भ्यात्व° । ६ ख. °रमोऽर्थः स° । ७ ग. °मार्थः । स° । झ. °मार्थः सन्त्वभा° । ८ घ. ङ. °णप्रा° । ९ झ. °थैव द° । १० ज. °र्वो वा वा° । ११ क. °तृणोति । १२ क. ख. च. छ. °भिधानाभिधे° । १३ च. ज. तस्ये° । १४ छ. नास्योंका° । १५ ग. घ. ट. °न बोध्यः प्रा° । १६ झ. °धानादिभ्य° ।

च्यस्य तन्मात्रत्वाभिधानादित्यर्थः । शब्दातिरिक्तार्थाभावे शब्दस्यार्थवाचकत्वानुपपत्तेरेकत्र विषयविषयित्वयोगान्निर्विकल्पं सन्मात्रं वस्तु वाच्यवाचकविभागशून्यं पर्यवस्यतीत्यभिप्रेत्य कार्यस्य वस्तुतोऽसत्त्वे प्रमाणमाह—वाचाऽऽरम्भणमिति । कार्यस्य सर्वस्यैवं मिथ्यात्वेऽपि कथमोंकारनिर्णयस्य ब्रह्मप्रतिपत्त्युपायत्वसिद्धिरित्याशङ्क्याऽऽह—तदस्येति । तदिदं विकारजातमस्य ब्रह्मणः संबन्धि वाचा सामान्यरूपया तन्त्या प्रसारितरज्जुतुल्यया सितं बद्धं व्याप्तमिति संबन्धः । शब्दसामान्येनार्थसामान्यस्य व्याप्तावपि कथमर्थविशेषस्य शब्दविशेषव्याप्तिरित्याशङ्क्याऽऽह—नामभिरिति । शब्दविशेषैर्दामभिर्दामस्थानीयैर्विशेषरूपमपीदमर्थजातं व्याप्तं वक्तव्यं न्यायस्य तुल्यत्वादित्यर्थः । उक्तमर्थं समर्थयते —सर्वं हीति । इदं हि सर्वं सामान्यविशेषात्मकमर्थजातं, सामान्यविशेषरूपेण नाम्ना नीयते व्यवहारपथं प्राप्यते तेन नामनीत्युच्यते । तदेवं वागनुरक्तबुद्धिबोध्यत्वाद्वाङ्मात्रं सर्वं वाग्जातं च सर्वमोंकारानुविद्धत्वादोंकारमात्रम् । स चोंकारो लक्षणादिनाऽऽत्मधीहेतुरित्याद्यप्रकरणारम्भः संभवतीत्यर्थः । तद्यथा शङ्कुनेतिश्रुतिसंग्रहार्थमादिपदं प्रतिज्ञातप्रथमप्रकरणार्थसिद्धिरिति शेषः ।

अत आह—

(अथ माण्डूक्योपनिषत्)।

हरिः ॐ । ओमित्येतदक्षरमिदꣳ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव । यच्चान्यत्त्रिकालातीतं तदप्योंकार एव ॥ १ ॥

ओमित्येतदक्षरमिदं सर्वमिति । यदिदमर्थजातमभिधेयभूतं तस्याभिधानाव्यतिरेकात् । अभिधानस्य चोंकाराव्यतिरेकादोंकार एवेदं सर्वम् । परं च ब्रह्माभिधानाभिधेयोपायपूर्वकमेव गम्यत इत्योंकार एव । तस्यैतस्य परापरब्रह्मरूपस्याक्षरस्योमित्येतस्योपव्याख्यानम् । ब्रह्मप्रतिपत्त्युपायत्वाद्ब्रह्मसमीपतया विस्पष्टं प्रकथनमुपव्याख्यानं प्रस्तुतं वेदितव्यमिति वाक्यशेषः । भूतं भवद्भविष्यदिति कालत्रयपरिच्छेद्यं यत्तदप्योंकार एवोक्तन्यायतः । यच्चान्यत्त्रिकालातीतं कार्याधिगम्यं कालापरिच्छेद्यमव्याकृतादि तदप्योंकार एव ॥ १ ॥

---

१ ग. घ. ङ. छ. ज. झ. ट. °ब्दस्य शब्दत्वा° । २ घ. ट. °षये वि° । ३ ग. छ. ज. °त्वाभावान्नि° । ४ ग. झ. °कल्पविषयस° । ५ क. °स्यैव मि° । ६ ग. घ. झ. °मस्था° । ७ ग. ज. °यतु° । ८ ख. झ. ञ. °यति—स° । ९ ख. ग. हि सा° । १० क. ख. ग. °कार उपासनेना° । ११ छ. मिति । १२ ज. °ष्टं क.° ।

अर्थमुपपाद्य तस्मिन्नर्थे श्रुतिमवतारयति—अत आहेति । श्रुतिं व्याचष्टे—यदिदमिति । तदिदं सर्वमोंकार एवेति संबन्धः । अभिधानस्याभिधेयतया व्यवस्थितमर्थजातमोंकार एवेत्यत्र हेतुमाह—तस्येति । तथाऽपि पृथगभिधानभेदः स्थास्यतीत्याह—अभिधानस्येति । वाच्यं वाचकं च सर्वमोंकारमात्रमित्यभ्युपगमेऽपि परं ब्रह्म पृथगेव स्थास्यतीत्याशङ्क्याऽऽह—परं चेति । यद्धि परं कारणं ब्रह्म तच्चेदवगम्यते तदा किंचिदभिधानं तेनेदमभिधेयमित्येवमात्मकोपायपूर्वकमेव तदधिगमोऽभिधेयं च स्वाभिधानात्यतिरिक्तं तत्पुनरोंकारमात्रमित्युक्तत्वाद्वाच्यं ब्रह्मापि वाचकाभिन्नं तन्मात्रमेव भविष्यति यत्र तु कार्यकारणातीते चिन्मात्रे वाच्यवाचकविभागो व्यावर्तते तत्र नास्त्योंकारमात्रत्वमोंकारेण लक्षणया तदवगयाङ्गीकारादित्यर्थः । तस्येत्यादिश्रुतिमवतार्य व्याकरोति—तस्येति । भूतमित्यादिश्रुतिं गृहीत्वा व्याचष्टे—कालेति । वाच्यस्य वाचकामेदात्तस्य चोंकारमात्रत्वादित्युक्तो न्यायः । कालत्रयातीतमोंकारातिरिक्तं जडं वस्तु नास्त्येवं प्रमाणाभावादित्याशङ्क्याऽऽह—कार्याधिगम्यमिति । अव्याकृतं साभासमज्ञानमनिर्वाच्यं तन्न कालेन परिच्छिद्यते कालं प्रत्यपि कारणत्वात्कार्यस्य कारणात्पश्चाद्भाविनो न प्रागभाविकारणपरिच्छेदकत्वं संगच्छते । सूत्रमादिपदेन गृह्यते तदपि न कालेन परिच्छेत्तुं शक्यते । ससंवत्सरोऽभवँर्न ह पुरा ततः संवत्सर आसेति सूत्रात्कालोत्पत्तिश्रुतेः । तदपि सर्वमोंकारमात्रं वाच्यस्य वाचकान्यतिरेकन्यायादित्यर्थः ॥ १ ॥

अभिधानाभिधेययोरेकत्वेऽप्यभिधानप्राधान्येन निर्देशः कृतः । ओमित्येतदक्षरमिदं सर्वमित्याद्यभिधानप्राधान्येन निर्दिष्टस्य पुनरभिधेयप्राधान्येन निर्देशोऽभिधानाभिधेययोरेकत्वप्रतिपत्त्यर्थः । इतरथा ह्यभिधानतन्त्राऽभिधेयप्रतिपत्तिरित्यभिधेयस्याभिधानत्वं गौणमित्याशङ्क्या स्यात् । एकत्वप्रतिपत्तेश्च प्रयोजनमभिधानाभिधेययोरेकेनैव प्रयत्नेन युगपत्प्रविलापयंस्तद्विलक्षणं ब्रह्म प्रतिपद्येतेति । तथा च वक्ष्यति—

"पादा मात्रा मात्राश्च पादाः" इति । तदाह—

सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥२॥

सर्वं ह्येतद्ब्रह्मेति । सर्वं यदुक्तमोंकारमात्रमिति तदेतद्ब्रह्म । तच्च

---

१ घ. ञ. ट. °ति । यदि° । २ घ. ङ. ज. वाच्यवाचकं स° । ख. ञ. वाच्यवा° । ३ ग. °कं स° । ४ घ. ङ. ज. ट. परञ्च° । ५ ग. झ. °त्युक्त्वा तद्वा° । ६ ग. छ. झ. जडव° । ७ ग. °वमेह । ८ ख. ट. °न हि पु° । ९ घ. ङ. ट. °मित्यभि° ।

ब्रह्म परोक्षाभिहितं प्रत्यक्षतो विशेषेण निर्दिशति—अयमात्मा ब्रह्मेति । अयमिति चतुष्पात्त्वेन प्रविभज्यमानं प्रत्यगात्मतयाऽभिनयेन निर्दिशति—अयमात्मेति । सोऽयमात्मोंकाराभिधेयः परापरत्वेन व्यवस्थितश्चतुष्पात्कार्षापणवन्न गौरिवेति । त्रयाणां विश्वादीनां पूर्वपूर्वप्रविलापनेन तुरीयस्य प्रतिपत्तिरिति करणसाधनः पादशब्दः । तुरीयस्य पद्यत इति कर्मसाधनः पादशब्दः ।

अभिधानाभिधेययोरेकस्मिन्नेव सति कल्पितत्वे तदेकरूपत्वस्योक्तत्वात्किमिति पुनः सर्वं ह्येतद्ब्रह्मेत्युच्यते । तत्र वृत्तानुवादपूर्वकमुत्तरवाक्यस्य सफलं तात्पर्यमाह—अभिधानेत्यादिना । वाच्यस्य वाचकत्वोक्त्यैव तयोरेकत्वसिद्धेर्व्यतिहारनिर्देशो वृथेत्याशङ्क्याऽऽह—इतरथेति । वाच्येन वाचकस्यैक्यमनुक्त्वा वाचकेनैव वाच्यस्यैक्यवचने सत्युपायोपेयप्रयुक्तमेकत्वं न मुख्यमैक्यमित्याशङ्क्येत, तन्निवृत्त्यर्थं व्यतिहारवचनमर्थवदित्यर्थः । परस्परभेदोपदेशादभिधानाभिधेययोरेकत्वप्रतिपत्तिस्तु साऽपि विफला ब्रह्मप्रतिपत्त्यनुपयोगित्वादित्याशङ्क्याऽऽह—एकत्वेति । अभिधानाभिधेययोरेकत्वप्रतिपत्तेश्चेदं प्रयोजनं यदेकेनैव प्रयत्नेन द्वयमपि विलापयन्नुभयविलक्षणं ब्रह्म प्रतिपद्य निर्वृणोतीति योजना । अभिधानाभिधेययोर्व्यतिहारोपदेशे वाक्यशेषमनुकूलयति—तथा चेति । उक्ते वाचकस्य वाच्याभिन्नत्वे वाक्यमवतार्य योजयति—तदाहेति । सर्वं कार्यं कारणं चेत्यर्थः । ब्रह्मणः श्रुत्युपदिष्टस्य परोक्षत्वं व्यावर्तयति—तच्चेति । यद्ब्रह्म श्रुत्या सर्वात्मकमुक्तं तन्न परोक्षमिति मन्तव्यं किंत्वयमात्मेति योजना । चतुष्पात्त्वेन विश्वतैजसप्राज्ञतुरीयत्वेनेत्यर्थः । अभिनयो नाम 'विवक्षितार्थप्रतिपत्त्यर्थमसाधारणः शारीरो व्यापारः' तेन 'हस्ताग्रं हृदयदेशमानीय कथयति इत्यर्थः' । सोऽयमित्यादिवाक्यान्तरमवतार्य व्याकरोति—ओंकारेति । सर्वाधिष्ठानतया परोक्षरूपेण परत्वं प्रत्यग्रूपेण चापरत्वं तेन कार्यकारणरूपेण सर्वात्मना व्यवस्थितः सन्नात्मा प्रतिपत्तिसौकर्यार्थं चतुष्पात्कल्प्यते तत्र दृष्टान्तमाह—कार्षापणवदिति । देशविशेषे कार्षापणशब्दः षोडशपणानां संज्ञा । तत्र यथा व्यवहारप्राचुर्याय पादकल्पना क्रियते तथेहापीत्यर्थः । यथा गौश्चतुष्पादुच्यते न तथा चतुष्पादादेष्टुं शक्यते निष्फलश्रुतिव्याकोपादित्याह—न गौरिवेति । विश्वादिषु तुर्यान्तेषु पादशब्दो यदि करणव्युत्पत्तिकस्तदा विश्वादिचतुर्थस्यापि करणकोटिनिवेशे ज्ञेयासिद्धिः । यदि तु पादशब्दः सर्वत्र कर्मव्युत्पत्तिकस्तदा साधनासिद्धिरित्याशङ्क्य विभज्य पादशब्दप्रवृत्तिं प्रकटयति—त्रयाणामित्यादिना । करणसाधनः करणव्युत्पत्तिकः कर्मसाधनः कर्मव्युत्पत्तिक इति यावत् ॥ २ ॥

---

१ ज. झ. ट. °रिव त्र° । २ क. ख. ग. झ. ञ. °त्वेन त°. ३ ग. झ. तत्रानु । ४ झ. °व च त° । ५ ट. °वतुरीयस्या° । ६ छ. प्रदर्शयति ।

कथं चतुष्पात्त्वमित्याह—

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ २ ॥

जागरितं स्थानमस्येति जागरितस्थानः । बहिष्प्रज्ञः स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहिष्प्रज्ञो बहिर्विषयेव प्रज्ञाऽविद्याकृताऽवभासत इत्यर्थः । तथा सप्ताङ्गान्यस्य " तस्य ह वा एतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ " इत्यग्निहोत्रकल्पनाशेषत्वेनाऽऽहवनीयोऽग्निरस्य मुखत्वेनोक्त इत्येवं सप्ताङ्गानि यस्य स सप्ताङ्गः । तथैकोनविंशतिर्मुखान्यस्य बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश वायवश्च प्राणादयः पञ्च मनो बुद्धिरहंकारश्चित्तमिति मुखानीव मुखानि द्वान्युपलब्धिद्वाराणीत्यर्थः । स एवंविशिष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन्स्थूलान्विषयान्भुङ्क्त इति स्थूलभुक् । विश्वेषां नराणामनेकधा नयनाद्वैश्वानरः । यद्वा विश्वश्चासौ नरश्चेति विश्वानरो विश्वानर एव वैश्वानरः । सर्वपिण्डात्मानन्यत्वात्स प्रथमः पादः । एतत्पूर्वकत्वादुत्तरपादाधिगमस्य प्राथम्यमस्य ।

आत्मनो निरवयवस्य पादद्वयमपि नोपपद्यते पादचतुष्टयं तु दूरोत्सारितमिति शङ्कते—कथमिति । परमार्थतश्चतुष्पात्त्वाभावेऽपि काल्पनिकमुपायोपेयभूतं पादचतुष्टयमविरुद्धमित्यभिप्रेत्याऽऽद्यं पादं व्युत्पादयति—आहेत्यादिना । स्थानमस्येत्यभिमानस्य विषयभूतमित्यर्थः । प्रज्ञायास्तावदान्तरत्वप्रसिद्धेरयुक्तमिदं विशेषणमित्याशङ्क्य व्याचष्टे—बहिरिति । चैतन्यलक्षणा प्रज्ञा स्वरूपभूता न बाह्ये विषये प्रतिभासते तस्या विषयानपे-

---

१ ख. ज. °मस्य स जा° । २ घ. ङ. ज. ट. °रिक्तवि° । ३ च. झ. °षयैव । ४ ख. ज. ये च प्र° । ५ ख. ज. °द्यातोऽव° । ६ छ. वस्तेरेव रयिः पृथिव्येव पादा अग्निहोत्रकल्पनाशेषत्वेनाग्निर्मुखत्वेनाऽऽहवनीय उक्त । ७ च. रयिः पृथिव्येव पादावग्निहोत्रकल्पनाशेषत्वेनाग्निर्मुख्यत्वेनाऽऽहवनीय उक्त । ८ क. °पादावग्निहोत्रकल्पनाशेषत्वेनाग्निर्मुखत्वेनाऽऽहवनीय उक्त । झ. °पादावुर एव वेदिरित्यग्निहोत्रकल्पनाशेषत्वेनाग्निर्मुखत्वेनाऽऽहवनीय उक्त । ९ ख. °नास्याग्निर्मुखत्वेनाऽऽहवनीय उक्त । १० ख. च. °रः । विश्वानर ए° । ११ ख. च. झ. °व वा वै° । १२ घ. ज. ञ. ङ. °न्यलभ्यत्वा° । १३ क. °षयीसु° ।

क्षत्वात् । बाह्यस्य च विषयस्य वस्तुतोऽभावादित्याशङ्क्याऽऽह—बहिर्विषयेति । न स्वरूपेप्रज्ञा वस्तुतो बाह्यविषयेष्यते बुद्धिवृत्तिरूपा त्वसावज्ञानकल्पिता तद्विषया भवति । न च साऽपि वस्तुतस्तद्विषयतामनुभवति । वस्तुतः स्वयमभावाद्बाह्यस्य विषयस्य काल्पनिकत्वादतस्तद्विषयत्वं प्रातिभासिकामित्यर्थः । पूर्वेण विशेषणेन विशेषणानन्तरं समुच्चिनोति—तथेति । सप्ताङ्गत्वं श्रुत्यवष्टम्भेन विश्वस्य विशदयति—तस्येत्यादिना । प्रकृतस्य संनिहितप्रसिद्धस्यैवाऽऽत्मनस्त्रैलोक्यात्मकस्य वक्ष्यमाणरीत्या वैश्वानरशब्दितस्य सुतेजस्त्वगुणविशिष्टो द्युलोको मूर्धेवेति द्युलोकस्य शिरस्त्वमुपदिश्यते । विश्वरूपो नानाविधः श्वेतपीतादिगुणात्मनः सूर्यश्चक्षुर्विवक्ष्यते । प्रत्यङ्नानाविधं वर्त्म संचरणमात्मा स्वभावोऽस्येति व्युत्पत्त्या वायुस्तथोच्यते । स च प्राणस्तस्येति संबन्धः । बहुलो विस्तीर्णगुणवानाकाशः संदेहो देहस्य मध्यमो भागो रयिरन्नं तद्धेतुरुदकं बस्तिरस्य मूत्रस्थानं पृथिव्येव प्रतिष्ठात्वगुणा वैश्वानरस्य पादौ तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यग्निहोत्रैकल्पना श्रुता । तस्याः शेषत्वेनाऽऽहवनीयोऽग्निरस्य मुखत्वेनोक्त इति योजना । उक्तं सप्ताङ्गत्वमुपसंहरति—इत्येवमिति । विशेषणान्तरं समुच्चिनोति—तथेति । बुद्ध्यर्थानीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि । कर्मार्थानीन्द्रियाणि वाक्पाणिपादपायुपस्थानि । तान्येतानि द्विविधानीन्द्रियाणि दश भवन्ति । प्राणादय इत्यादिशब्देनापानव्यानोदानसमाना गृह्यन्ते । उपलब्धिद्वाराणीत्युपलब्धिपदं कर्मोपलक्षणार्थम् । द्वारत्वं करणत्वम् । तत्र बुद्धीन्द्रियाणां मनसो बुद्धेश्च प्रसिद्धमुपलब्धौ करणत्वम् । कर्मेन्द्रियाणां तु वदनादौ कर्मणि करणत्वम् । प्राणादीनां पुनरुभयत्र पारम्पर्येण करणत्वम् । तेषु सत्स्वेव ज्ञानकर्मणोरुत्पत्तेः । असत्सु चानुत्पत्तेः । मनोबुद्ध्योश्च सर्वत्र साधारणं करणत्वमहंकारस्यापि प्राणादिवदेव करणत्वं मन्तव्यं चित्तस्य चैतन्याभासोदये करणत्वमुक्तमिति विवेक्तव्यम् । पूर्वोक्तैर्विशेषणैर्विशिष्टस्य वैश्वानरस्य स्थूलभुगिति विशेषणान्तरम् । तद्विभजते—स एवंविशिष्ट इति । शब्दादिविषयाणां स्थूलत्वं दिगादिदेवतानुगृहीतैः श्रोत्रादिभिर्गृह्यमाणत्वम् । इदानीं वैश्वानरशब्दस्य प्रकृतविश्वविषयत्वं विशदयति—विश्वेषामिति । कर्मणि षष्ठी । विश्वे च ते नराश्चेति विश्वानराः । निपातात्पूर्वपदस्य दीर्घता । विश्वानरान्मोक्तृत्वेन व्यव-

---

६ ख. ग. ज. झ. ट. °ये चेति । २ क. ख. छ. ञ. °पभूता प्र° । ३ घ. ङ. ज. °ह्यवि° । ४ ज. °ङ्गश्रु° । ङ. ठ. °ङ्गत्वश्रु° । ५ ख. घ. ङ. ज. ट. °स्य विराट्त्वं वि° । ६ ख. ग. °तस्य प्र° । ७ ख. ज. °शिष्टश्रु° । ८ ख. घ. ज. °ति तस्य । ९ ग. °विधव° । १० घ. ङ. ज. °त्रत्वक° । ११ ग. छ. °ति—एव° । १२ घ. ङ. °णाख्यानि । १३ घ. झ. ट. °धर्म° । १४ घ. ज. ञ. ट. °बुद्धेश्च । १५ ङ. ट. °तस्यचै° । १६ ग. झ. °त्वमिति युक्त° । १७ ङ. °पातनात्पू° । १८ क. ख. ङ छ. °श्वानरा° ।

स्थितान्प्रत्यनेकधा धर्माधर्मकर्मानुसारेण सुखदुःखादिप्रापणादयं कर्मफलदाता वैश्वानर-शब्दितो भक्तीत्यर्थः । अथवा विश्वश्चासौ नरश्चेति विश्वानरः । स एव वैश्वानरः । स्वार्थे तद्धितो राक्षसावार्यसवदित्याह—विश्वेति । कथं विश्वश्चासौ नरश्चेति विगृह्यते जाग्रतां नराणामनेकत्वात्तादात्म्यानुपपत्तरित्याशङ्क्याऽऽह—सर्वेति । सर्वपिण्डात्मा समष्टिरूपो विराडुच्यते तेनाऽऽत्मना विश्वेषामनन्यत्वाद्यथोक्तसमाससिद्धिरित्यर्थः । विश्वस्य तैजसादुत्पत्तेस्तस्यैव प्राथम्यं युक्तं कार्यस्य तु पश्चाद्भावित्वमुचितमित्याशङ्क्याऽऽह—एतदिति । प्रविलापनापेक्षया प्राथम्यं न सृष्ट्यपेक्षयेत्यर्थः ।

कथमयमात्मा ब्रह्मेति प्रत्यगात्मनोऽस्य चतुष्पात्त्वे प्रकृते द्युलोकादीनां मूर्धाद्यङ्गत्वमिति । नैष दोषः । सर्वस्य प्रपञ्चस्य साधिदैविकस्यानेनाऽऽत्मनश्चतुष्पात्त्वस्य विवक्षितत्वात् ।

अध्यात्माधिदैवयोर्भेदमादाय प्रागुक्तं सप्ताङ्गत्वमाक्षिपति—कथमिति । ब्रह्मणि प्रकृते तस्य परोक्षत्वे शङ्किते तन्निरासार्थं ब्रह्मायमात्मेति प्रत्यगात्मानं प्रकृत्य सोऽयमात्मा चतुष्पादिति चतुष्पात्त्वे तस्य प्रक्रान्ते द्युलोकादीनां मूर्धाद्यङ्गत्वसिद्ध्यर्थं यदुक्तं तदयुक्तं प्रक्रमविरोधादित्यर्थः । अध्यात्माधिदैवयोर्भेदाभावान्न प्रक्रमविरोधोऽस्तीति परिहरति—नैष दोष इति । तत्र हेतुमाह—सर्वस्येति । आध्यात्मिकस्याऽऽधिदैविकेन सहितस्य प्रपञ्चस्य सर्वस्यैव स्थूलस्य पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकस्यानेनाऽऽत्मना विराजा प्रथमपादत्वम् । तस्यैव सूक्ष्मस्यापञ्चीकृतपञ्चमहाभूततत्कार्यात्मनो हिरण्यगर्भात्मना द्वितीयपादत्वम् । तस्यैव कार्यरूपतां त्यक्त्वा कारणरूपतामापन्नस्याकृतात्मना तृतीयपादत्वम् । तस्यैव तु कार्यकारणरूपतां विहाय सर्वकल्पनाधिष्ठानतया स्थितस्य सत्यज्ञानानन्तानन्दात्मना चतुर्थपादत्वम् । तदेवमध्यात्माधिदैवयोरभेदमादायोक्तेन प्रकारेण चतुष्पात्त्वस्य वक्तुमिष्टत्वात्पूर्वपूर्वपादस्योत्तरोत्तरपादात्मना प्रविलापनात्तुरीयनिष्ठायां पर्यवसानं सिध्यतीत्यर्थः ।

एवं च सति सर्वप्रपञ्चोपशमेऽद्वैतसिद्धिः । सर्वभूतस्थश्चाऽऽत्मैको दृष्टः स्यात् । सर्वभूतानि चाऽऽत्मनि । यस्तु सर्वाणि भूतानीत्यादिश्रुत्यर्थः उपसंहृतश्चैवं स्यात् । अन्यथा हि स्वदेहपरिच्छिन्न एव प्रत्यगात्मा सांख्यादिभिरिव दृष्टः स्यात्तथा च सत्यद्वैतमिति श्रुतिकृतो विशेषो न स्यात् । सांख्यादिदर्शनेनाविशेषात् ।

---

१ ग. घ. ङ. ञ. ट. °यसादिव° । २ ज. °राडित्युच्य° । ३ ग. झ. °तैऽनेना° । ४ ख. °सृष्टेरपे° । ५ घ ट. °वतयो° । ६ ज °लप° । ७ ग. झ. °वका° । ८ झ. °तानि आत्मन्येवानुपश्यतीत्या° ।

यदैवं[1] तुरीये पर्यवसानं जिज्ञासोर्मुमुक्षोरिष्यते तदा तत्त्वज्ञानप्रतिबन्धकस्य प्रातिभासिकद्वैतस्योपरमे सत्यद्वैतपरिपूर्णब्रह्माहमस्मीति वाक्यार्थसाक्षात्कारः सिध्यतीति फलितमाह—एवं चेति। उक्तन्यायेन तत्त्वसाक्षात्कारे संगृहीते सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेष्वात्मैकोऽद्वितीयो दृष्टः स्यात्। एको देवः सर्वभूतेष्विति तत्र तत्र ब्रह्मचैतन्यस्यैव प्रत्यक्त्वेनावस्थानाभ्युपगमात्तानि तानि च सर्वाणि प्रातिभासिकानि भूतानि तस्मिन्नेवाऽऽत्मनि कल्पितानि दृष्टानि स्युः। तथा च पूर्णत्वमात्मनो भूतान्तराणां च तदतिरेकेण सत्तास्फुरणविरहितत्वं सिध्यति। ततश्च—

सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि।
संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति॥

इति स्मृतिरनुगृहीता भवतीत्याह—सर्वभूतस्थश्चेति। न चेदं मानवं वचनममानमिति शङ्कनीयम्। यद्वै किंचन मनुरवदत्तद्भेषजमिति श्रुतेरित्यभिप्रेत्य दर्शितस्मृतिमूलभूतां श्रुतिं सूचयति—यस्त्विति। यो हि पादत्रयं प्रागुक्तक्रमेण प्रक्रियया प्रविलाप्य तुरीये नित्ये विज्ञप्तिमात्रे सदानन्दैकतानेऽपरिपूर्णे प्रतिष्ठां प्रतिपद्यते स ब्रह्माहमस्मीत्यात्मानं जानानः सर्वेषां भूतानामधिष्ठानान्तरमनुपलभमान आत्मन्येव प्रातीतिकानि तानि प्रत्येति। तेषु सर्वेष्वात्मानं सत्तास्फूर्तिप्रदमवगच्छति। ततश्च न किंचिदपि गोपायितुमिच्छतीति श्रुत्यर्थश्च यथोक्तरीत्या तत्त्वसाक्षात्कारे संगृहीते सति स्वीकृतः स्यादित्यर्थः। अध्यात्माधिदैवयोरभेदाभ्युपगमद्वारेण प्रागुक्तपरिपाट्या तत्त्वज्ञानानभ्युपगमे दोषमाह— अन्यथेति। सांख्यादिपक्षस्थापि प्रामाणिकत्वात्तथैव प्रतिदेहं पारिच्छिन्नस्य प्रत्यगात्मनो दर्शनेन प्रामाणिकोऽर्थोऽभ्युपगतो भवति। व्यवस्थानुपपत्त्या च प्रतिशरीरमात्मभेदः सिध्यतीत्याशङ्क्याऽऽह— तथा चेति। सांख्यादीनां द्वैतविषयं दर्शनमिदं तेन त्वदीयदर्शनस्याद्वैतविषयस्य विशेषाभावादद्वैतं तत्त्वमिति श्रुतिसिद्धो विशेषस्त्वत्पक्षे न सिध्येदतः श्रुतिविरोधो भेदवादे प्रसज्येत। व्यवस्था त्वौपाधिकभेदमधिकृत्य सुस्था भविष्यतीत्यर्थः।

इष्यते च सर्वोपनिषदां सर्वात्मैकयप्रतिपादकत्वम्। अतो युक्तमेवास्याऽऽऽ-

---

१ ग. छ. °दैव तु°। २ ज. ट. °पूर्णे ब्र°। ३ ङ. ज. 'दिषु स्था°। ४ घ. ङ ट. °नि च। ५ क. °तान्यस्मि°। ६ झ. °णर°। ७ घ. ट. °हित्वं। ८ छ. ज. ट. °नवत्°। ९ झ. ञ. °तिं च सू°। १० छ. °क्तप्र°। ११ घ. ङ. ट. °या वि°। १२ ज. °नित्यवि°। १३ ग. छ. °मात्रस°। १४ घ. ज. °ह्मास्मी°। १५ ग. झ. °धु च स°। १६ ग. घ. झ. °क्तनीया। १७ ग. °णिकार्थो। १८ छ. झ. °षयद°। १९ घ. °सज्जते व्य°। ट. सृज्यते व्य°। २० घ. ज. ट. °र्वात्मप्र°। २१ ग. ट. °मेव साध्या°।

ध्यात्मिकस्य पिण्डात्मनो द्युलोकाद्यङ्गत्वेन विराडात्मनाऽऽधिदैविकेनैक-त्वमभिप्रेत्य सप्ताङ्गत्ववचनम् । " मूर्धा ते व्यपतिष्यत् " इत्यादिलिङ्ग-दर्शनाच्च ।

ननु भेदवादेऽपि नाद्वैतश्रुतिर्विरुध्यते । ध्यानार्थमन्नं ब्रह्मेतिवदद्वैतं तत्त्वमित्युपदेश-सिद्धेरित्याशङ्क्याऽऽह–इष्यते चेति । उपक्रमोपसंहारैकरूप्यादिना सर्वासामुपनिषदां सर्वेषु देहेष्वात्मैक्यप्रतिपादनपरत्वमिष्टमतो न ध्यानार्थत्वमद्वैतश्रुतेरेष्टुं शक्यम् । वस्तुपर-त्वलिङ्गविरोधादित्यर्थः । अध्यात्माधिदैवयोरेकत्वमुपेत्याद्वैतपर्यवसाने सिद्धे सत्याध्या-त्मिकस्य व्यष्ट्यात्मनो विश्वस्य त्रैलोक्यात्मकेनाऽऽधिदैविकेन विराजा सहैकत्वं गृहीत्वा यत्तस्य सप्ताङ्गत्वमुक्तं तदविरुद्धमित्युपसंहरति–अत इति । अध्यात्माधिदैवयोरैक्ये हेत्वन्तरमाह–मूर्धेति । दि(दै)वादित्यादिकं वैश्वानरावयवं वैश्वानरबुद्ध्या ध्यायतो जि-ज्ञासया पुनरखण्डपक्षमुपगतस्य मूर्धा ते व्यपतिष्यद्यन्मां नाऽऽगमिष्यं इत्यन्धोऽमविष्यो यन्मामित्यादिव्यस्तोपासननिन्दा समस्तोपासनविधित्सया दृश्यते । न च द्युलोकादिकं विपरीतबुद्ध्या गृहीतवतः स्वकीयमूर्धादिपरिपतनमुचितं यद्यध्यात्माधिदैवयोरेकत्वं न भवेत्तस्मात्तयोरेकत्वमत्र विवक्षितं भवतीत्यर्थः ।

विराजैकत्वमुपलक्षणार्थं हिरण्यगर्भव्याकृतात्मनोः । उक्तं चैतन्मधु-ब्राह्मणे—" यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायम-ध्यात्मम् " इत्यादि । सुषुप्ताव्याकृतयोस्त्वेकत्वं सिद्धमेव । निर्विशेषत्वात् । एवं च सत्येतत्सिद्धं भविष्यति सर्वद्वैतोपशमे चाद्वैतमिति ॥ ३ ॥

ननु विराजो विश्वैनैकत्वमेव मूलग्रन्थे दृश्यते तत्कथमविशेषेणाध्यात्माधिदैवयोरै-क्यं विवक्षित्वाऽद्वैतपर्यवसानं भाष्यकृतोच्यते तत्राऽऽह–विराजेति । यन्मुखतो विराजो विश्वैनैकत्वं दर्शितं तत्तु हिरण्यगर्भस्य तैजसेनान्तर्यामिणश्चाव्याकृतोपाहितस्य प्राज्ञेन सहैकत्वस्योपलक्षणार्थमतो मूलग्रन्थेऽप्यविशेषेणाध्यात्माधिदैवयोरेकत्वं विवक्षितमित्यद्वै-तपर्यवसानसिद्धिरित्यर्थः । अध्यात्माधिदैवयोर्यदेकत्वमिहोच्यते तन्मधुब्राह्मणेऽपि दार्शी-तमित्याह—उक्तं चेति । अधिदैवमध्यात्मं चैकरूपं निर्देशं प्रतिपर्यायमयमेव स इत्यभेदवचनादेकत्वमत्र विवक्षितमित्यर्थः । ननु विश्वविराजोः स्थूलाभिमानित्वात्तैजस

---

१ झ. °त्वमित्यभि° । २ ग. घ. ङ. ज. झ. ट. °षदामात्मै° । ३ घ. ङ. ञ. °वतयो° । ४ ग. झ. °द्धमुप° । ५ छ. °वतयो° । ६ ज. °त्यात्मकं । ७ क. ग. च. °ण्डं प° । ८ घ. °व्यतीत्य° । ९ घ. °न्धो भविष्यति य° । १० घ. ङ. ञ. °वतयो° । ११ झ. ट. °योरेक° । १२ घ. च. ज. ञ. ट. °शेषात् । १३ झ. °ति यत्सर्वं° । १४ घ. ङ. °वतयो° । १५ क. ख. °त्वं प्रद° । १६ झ. °वतयो° । १७ घ. ङ. °वतयो° । १८ ज. °रूपनि° ।

हिरण्यगर्भयोश्च सूक्ष्मामिमानित्वादेकत्वं युक्तम् । प्राज्ञाव्याकृतयोस्तु केन साधर्म्येणैकत्वं तत्राऽऽह—सुषुप्तेति । प्राज्ञो हि सर्वं विशेषमुपसंहृत्य निर्विशेषः सुषुप्ते वर्तते प्रलयदशायामव्याकृतं च निःशेषविशेषं स्वात्मन्युपसंहृत्य निर्विशेषरूपं तिष्ठति तेनोक्तं साधर्म्यं पुरोधाय तयोरैक्यमविरुद्धमित्यर्थः । अध्यात्माधिदैवयोरेकत्वे प्रागुक्तन्यायेनैव प्रसिद्धे सत्युपसंहारप्रक्रियया सिद्धमद्वैतमिति फलितमाह—एवं चेति । तच्चाद्वैतं प्रतिबन्धध्वंसमात्रेण न स्फुरति किंतु वाक्यादेवाऽऽचार्योपदिष्टादिति वक्तुं चशब्दः ॥ ३ ॥

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः
प्रविविक्तभुक्तैजसो द्वितीयः पादः ॥ ४ ॥

स्वप्नः स्थानमस्य तैजसस्य स्वप्नस्थानः । जाग्रत्प्रज्ञाऽनेकसाधना बहिर्विषयेवावभासमाना मनःस्पन्दनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते । तन्मनस्तथा संस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षमविद्याकामकर्मभिः प्रेर्यमाणं जाग्रद्वदवभासते । तथा चोक्तम्—" अस्य लोकस्य सर्वावतो मात्रामुपादाय " इति । तथा " परे देवे मनस्येकी भवति " इति प्रस्तुत्य " अत्रैष देवः स्वप्ने महिमानमनुभवति " इत्याथर्वणे । इन्द्रियापेक्षयाऽन्तःस्थत्वान्मनसस्तद्वासनारूपा च स्वप्ने प्रज्ञा यस्येत्यन्तःप्रज्ञः । विषयशून्यायां प्रज्ञायां केवलप्रकाशस्वरूपायां विषयित्वेन भवतीति तैजसः । विश्वस्य सविषयत्वेन प्रज्ञायाः स्थूलाया भोज्यत्वम् । इह पुनः केवला वासनामात्रा प्रज्ञा भोज्येति प्रविविक्तो भोग इति । समानमन्यत् । द्वितीयः पादस्तैजसः ॥ ४ ॥

द्वितीयं पादमवतार्य व्याचष्टे—स्वप्नेत्यादिना । स्थानं पूर्ववत् । द्रष्टुर्ममाभिमानस्य विषयभूतमिति यावत् । स्वप्नपदार्थं निरूपयितुं तत्कारणं निरूपयति—जाग्रदित्यादिना । तस्याः स्वप्नाद्वैधर्म्यार्थं विशेषणमाह—अनेकेति । अनेकानि विविधानि साधनानि करणानि यस्याः सा तथेति यावत् । विषयद्वारकमपि वैषम्यं दर्शयति—बहिरिति । बाह्यस्य शब्दादेर्विषयस्याविद्याविवर्तत्वेन वस्तुतोऽभावान्न तद्विषयत्वमपि यथोक्तप्रज्ञाया वास्तवं किंतु प्रातीतिकमित्यभिप्रेत्योक्तमिवेति । न

---

१ छ. °शेषं सु° । २ झ. °नोक्तसा° । ३ ङ. °वतयो° । ४ ग. झ. °न सि° । ५ झ. °सस्येति स्व° । ६ घ. ङ. ज. ट. °भूतसं° । ७ झ. °द्वदेवाव° । ८ झ. °दायेत्यादि । त° । ९ छ. स्वप्नप्रज्ञेत्य° । १० क. घ. ङ. च. ज. झ. प्रज्ञेत्य° । ११ ख. घ. ङ. च. छ. ज. झ. °ज्ञः । तैजसो वि° । १२ घ. झ. °वलं प्र° । १३ घ. ङ. च. झ-ञ. °शरू° । १४ घ. ट. °यां सविषयत्वे° १५ झ. °बलवा° । १६ ग. घ. ङ. ज. झ. °तीयं पा° । १७ ग. घ. ङ. छ. ज. झ. °णमने° ।

च यथोक्ता प्रज्ञा प्रमाणसिद्धा। तस्या अनवस्थानात्। तेन साक्षिवेद्या सेति विवक्षित्वाऽऽह— अवभासमानेति। द्वैततत्प्रतिभासयोर्वस्तुतोऽसत्त्वे हेतुं सूचयति— मनःस्पन्दनेति। यथोक्ता प्रज्ञा स्वानुरूपां वासनां स्वसमाधानाधारामुत्पादयतीत्याह— तथाभूतामिति। जाग्रद्वासनावासितं मनो जागरितवदवभासते स्वप्नदृष्टुरित्येष्टव्यं मनस एव वासनावतः स्वप्ने विषयत्वातिरिक्तविषयाभावादित्याह— तथासंस्कृतमिति। जाग्रद्वासनावासितं मनो जागरितवद्भातीत्यत्र दृष्टान्तमाह—विचित्रेति। यथा पटश्चित्रितश्चित्रवद्भाति तथा मनो जागरितसंस्कृतं तद्वद्भातीति युक्तमित्यर्थः। स्वप्नस्य जागरिताद्वैधर्म्यं सूचयति— बाह्येति। यथोक्तस्य मनसो जागरितवदनेकधा प्रतिभाने कारणान्तरमाह— अविद्येति। यदुक्तं स्वप्नस्य जागरितैतजनितैतवासनाजन्यत्वं तत्र बृहदारण्यकश्रुतिं प्रमाणयति—तथा चेति। अस्य लोकस्येति जागरितोक्तिस्तस्य विशेषणं सर्वावदिति। सर्वा साधनसंपत्तिरस्मिन्नस्तीति सर्ववान्सर्ववानेव सर्वावांस्तस्य मात्रा लेशो वासना तामपादायोपच्छिद्य गृहीत्वा स्वापेति वासनाप्रधानं स्वप्नमनुभवतीत्यर्थः। यत्तु स्वप्नरूपेण परिणतं मनः साक्षिणो विषयो भवतीति तत्र श्रुत्यन्तरं दर्शयति— तथेति। परत्वं मनसस्तदुपाधित्वाद्वाऽसाधारणकारणत्वाद्वा देवत्वं द्योतनात्मकत्वात्तन्मनोज्योतिरिति ज्योतिःशब्दात्तस्मिन्नेकी भवति। स्वप्ने द्रष्टा तत्प्रधानो भवतीति स्वप्नं प्रकृत्यात्र स्वप्ने स्वप्रकाशो द्रष्टा महिमानं मनसो विभूतिं ज्ञानज्ञेयपरिणामित्वलक्षणां साक्षात्करोति। तथा च मनसो विषयत्वान्न तत्राऽऽत्मग्राहकत्वशङ्केत्यर्थः। ननु विश्वस्य बाह्येन्द्रियजन्यप्रज्ञायास्तैजसस्य मनोजन्यप्रज्ञायाश्चान्तःस्थत्वाविशेषादन्तःप्रज्ञित्वविशेषणं न व्यावर्तकमिति तत्राऽऽह— इन्द्रियेति। उपपादितं तावद्विश्वस्य बहिष्प्रज्ञत्वं तैजसस्त्वन्तःप्रज्ञो विज्ञायते बाह्यानीन्द्रियाण्यपेक्ष्य मनसोऽन्तःस्थत्वात्तत्परिणामत्वाच्च स्वप्नप्रज्ञायास्तद्वानन्तःप्रज्ञो युज्यते। किंच मनःस्वभावभूता या जागरितवासना तद्रूपा स्वप्न प्रज्ञेति युक्तं तैजसस्यान्तःप्रज्ञत्वमित्यर्थः। स्वप्नाभिमानिनस्तेजोविकारत्वाभावात्कुतस्तैजसत्वमित्याशङ्क्याऽऽह— विषयेति। स्थूलो विषयो यस्यां वासनामय्यां प्रज्ञायां न ज्ञायते तस्यां विषयसंस्पर्शमन्तरेण प्रकाशमात्रतया स्थितायामाश्रयत्वेन भवतीति स्वप्नद्रष्टा तैजसो विवक्षितः। तेजःशब्देन यथोक्तवासनामय्याः प्रज्ञाया निर्देशादित्यर्थः। ननु

---

१ ज. °नाकारा°। २ ङ. °सितम°। ३ घ. °भानादि°। ४ ङ. ज. जाग्रद्वद्भा°। ५ ख. °असद°। ६ क. °ति। तथो°। ७ घ. ङ °क्तम°। ८ छ. °तवा°। ९ घ. °तवद्वास°। १० ग. छ. झ. सर्वसा°। ११ ग. झ. ट. °सर्वा°। १२ घ. ज. झ. ट. °परिच्छि°। १३ ख. ग. ङ. झ. 'मल°। १४ छ. °यप्र°। १५ घ. ङ. छ. ज. ट. °ज्ञत्वं वि°।

विश्वतैजसयोर्विशिष्टं प्रविविक्तभुगिति विशेषणम्। प्रज्ञाया भोज्यत्वस्य तुल्यत्वात्। नैवम्। तस्या भोज्यत्वाविशेषेऽपि तस्यामवान्तरभेदात्सविषयत्वाद्विश्वस्य भोज्या प्रज्ञा। स्थूला लक्ष्यते। तैजसे तु प्रज्ञा विषयसंस्पर्शशून्या वासनामात्ररूपेति विविक्तो भोगः सिध्यतीत्याह— विश्वस्येति। सप्ताङ्गैकोनविंशतिमुखत्वमित्येतदन्यदित्युच्यते ॥४॥

यत्र सुप्तो न कंचन कामं कामयते न कंचन
स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः
प्रज्ञानघन एवाऽऽनन्दमयो ह्यानन्दभुक्चेतोमुखः
प्राज्ञस्तृतीयः पादः ॥ ५ ॥

दर्शनादर्शनवृत्त्योस्तत्त्वाप्रबोधलक्षणस्य स्वापस्य तुल्यत्वात्सुषुप्तिग्रहणार्थं यत्र सुप्त इत्यादि विशेषणम्। अथवा त्रिष्वपि स्थानेषु तत्त्वाप्रतिबोधलक्षणः स्वापोऽविशिष्ट इति पूर्वाभ्यां सुषुप्तं विभज्यते। यत्र यस्मिन्स्थाने काले वा सुप्तो न कंचन स्वप्नं पश्यति न कंचन कामं कामयते। न हि सुषुप्ते पूर्वयोरिव वाग्यथाग्रहणलक्षणं स्वप्नदर्शनं कामो वा कश्चन विद्यते। तदेतत्सुषुप्तं स्थानमस्येति सुषुप्तस्थानः। स्थानद्वयविभक्तं मनःस्पन्दितं द्वैतजातम्। तथा रूपापरित्यागेनाविवेकापन्नं नैशेन तमोग्रस्तमिवाहः समापन्नमेकमेकीभूतमित्युच्यते। अत एव स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानीव सेयमवस्थाऽविवेकरूपत्वात्प्रज्ञानघन उच्यते। यथा रात्रौ नैशेन तमसाऽविभज्यमानं सर्वं घनमिव तद्वत्प्रज्ञानघन एव। एवशब्दान्न जात्यन्तरं प्रज्ञानव्यतिरेकेणास्तीत्यर्थः। मनसो विषयविषयाकारस्पन्दनायासदुःखाभावादानन्दमय आनन्दप्रायो नाऽऽनन्द एव। अनात्यन्तिकत्वात्। यथा लोके निरायासस्थितः सुखयानन्दभुगुच्यते। अत्यन्तानायासरूपा ह्ययं स्थितिरनेनानुभूयत इत्यानन्दभुक्। "एषोऽस्य परम आनन्दः" इति श्रुतेः। स्वप्नादिप्रतिबोधचेतः प्रति द्वारीभूतत्वाच्चेतोमुखः। बोधलक्षणं वा चेतो

---

१ ग. झ. °त्वान्नैव°। २ छ. °ति प्रवि°। ३ क ङ. च. छ. झ. °वृत्त्योः स्वा°। ४ ङ. °णस्वा°। ५ ख. °षुप्तप्र°। ६ ख. च. ञ. °भज्यते। ७ ख. घ. झ. ञ. ट. सुषुप्तो। ८ क. न कामं कामयते न कंचन स्वप्न पश्यति नहि। ९ झ. °स्पन्दनमात्रं द्वै°। १० ख. छ. झ. ञ. तथथा। ११ घ. ट. °हः स्वप्नप्रपञ्चमे°। १२ ङ. छ. झ. ञ. ट. °ञ्चमे°। १३ ञ. °व च त°। १४ च. °नव नव्य°। १५ झ. °नाऽऽनमनाऽनु°। १६ च. °बोधं चे।

द्वारं मुखमस्य स्वप्नाद्यागमनं प्रतीति चेतोमुखः । भूतभविष्यज्ज्ञातृत्वं सर्वविषयज्ञातत्वमस्यैवेति प्राज्ञः । सुषुप्तोऽपि हि भूतपूर्वगत्या प्राज्ञ उच्यते । अथवा प्रज्ञप्तिमात्रमस्यैवासाधारणं रूपमिति प्राज्ञः । इतरयोर्विशिष्टमपि विज्ञानमस्ति सोऽयं प्राज्ञस्तृतीयः पादः ॥ ५ ॥

पादद्वयमेवं व्याख्याय तृतीयं पादं व्याख्यास्यन्व्याख्यायमानश्रुतौ न कंचनेत्यादिविशेषणस्य तात्पर्यमाह- दर्शनेति । दर्शनस्य स्थूलविषयस्य वृत्तिरत्रास्तीति जागरितं दर्शनवृत्तिरित्युच्यते । स्थूलविषयदर्शनादन्यद्दर्शनमदर्शनं वासनामात्रं तस्य वृत्तिरत्रास्तीत्यदर्शनवृत्तिः स्वप्नशरीरयोः सुषुप्तवदेव स्वापस्य तत्त्वाग्रहणस्य तुल्यत्वात् । यत्र सुप्त इत्युक्ते तयोरपि प्रसक्तौ तद्व्यवच्छेदेन सुषुप्तस्यैव ग्रहणार्थं यत्र सुप्त इत्यादिवाक्ये न कंचनेत्यादिविशेषणम् । तद्धि स्थानद्वयं व्यवच्छिद्य सुषुप्तमेव ग्राहयतीत्यर्थः । न कंचन स्वप्नं पश्यतीत्यनेनैव विशेषणेन स्थानद्वयव्यवच्छेदसंभवाद्विशेषणान्तरमकिंचित्करमित्याशङ्क्याऽऽह- अथवेति । तत्त्वाप्रतिबोधः स्वापस्तस्य स्थानत्रयेऽपि तुल्यत्वाज्जाग्रत्स्वप्नाभ्यां विमज्य सुषुप्तं ज्ञापयितुं विशेषणमित्यर्थः । एकस्यैव विशेषणस्य व्यवच्छेदकत्वसंभवादलं विशेषणाभ्यामित्यस्य कः समाधिरित्याशङ्क्य विशेषणयोर्विकल्पेन व्यवच्छेदकत्वान्नाऽऽनर्थक्यमिति मत्वाऽऽह- न हीति । यत्रेत्यस्यापेक्षितार्थं कथयति— तदेतदिति । अन्यथाग्रहणशून्यत्वं कामसंस्पर्शविरहितत्वं च विशेषणाभ्यां विवक्षितम् । कथमस्य सद्वितीयस्यैकीभूतत्वविशेषणमित्याशङ्क्याऽऽह- स्थानद्वयेति । जागरितं स्वप्नश्चेति स्थानद्वयम् । तेन प्रविभक्तं तद्द्वैतं स्थूलं सूक्ष्मं च तत्सर्वं मनःस्पन्दितमात्रमिति वक्ष्यते । तच्च यथा स्वकीयरूपमात्मनो विभक्तं तथैव तत्त्यागेनाव्याकृताख्यं कारणमापन्नं स्वकीयसर्वविस्तारसहितं कारणात्मकं भवति । यथाऽहर्नैशेन तमसा ग्रस्तं तमस्त्वेनैव व्यवह्रियते तथेदमपि कार्यजातं कारणभावमापन्नं कारणमित्येव व्यवह्रियते । तस्यां चावस्थायां तदुपाधिरात्मैकीभूतविशेषणभाग्भवतीत्यर्थः । तथाऽपि कारणोपहितस्य प्रज्ञानघनविशेषणमयुक्तं निरुपाधिकस्यैव तथा विशेषणसंभवादित्याशङ्क्याऽऽह- अत एवेति । सर्वस्य कार्यप्रपञ्चस्य समनस्कस्य सुषुप्ते कारणात्मना स्थितत्वादेवेत्यर्थः । सुषुप्तावस्थायामुक्तप्रज्ञानानामेकमूर्तित्वं न

---

१ ङ. ञ. °पि भू° । २ ञ. °मस्यास्ति । ३ घ. ङ. छ. ज. °तीयपा° । ४ घ. ङ. छ. °त्तिरुच्य° । ५ ग. ङ. ज. °दयादर्श°। ग. छ. °दयादर्श°। ६ ग. °न्यददर्शनं वा°। ७ ख. °द्रबो°। ८ छ. °त्रेलेतस्या°। ९ ग. छ. °हितं च। १० ङ. छ. ञ. °नोऽवि° । ११ ग. घ. ज. °था नैशेन तमसा ग्रस्तम्हरतमस्त्वे° । १२ घ. ङ. छ. ज. °प्तव्य° ।

वास्तवं पुनर्यथापूर्वविभागयोग्यत्वादिति मत्वोक्तम्—इवेति । सुषुप्त्यवस्थायाः कारणात्मकत्वाज्जाग्रत्स्वप्नप्रज्ञानानां तत्रैकीभावात्प्रज्ञानघनशब्दवाच्यतेत्युक्तमनुवदति—सेयमिति । उक्तमेवार्थं दृष्टान्तेन बुद्धावाविर्भावयति—यथेत्यादिना । एवकारस्य नायोगव्यवच्छित्तिरर्थः किंत्वन्ययोगव्यवच्छित्तिरित्याह—एवशब्दादिति । प्राज्ञस्याऽऽनन्दविकारत्वाभावे कथमानन्दमयत्वविशेषणमित्याशङ्क्य स्वरूपसुखाभिव्यक्तिप्रतिबन्धकदुःखाभावात्प्राचुर्यार्थत्वं मयटो गृहीत्वा विशेषणोपपत्तिं दर्शयति—मनस इति । मयटः स्वरूपार्थत्वादानन्दमयत्वमानन्दत्वमेव किं न स्यादित्याशङ्क्याऽऽह—नेत्यादिना । न हि सुषुप्ते निरुपाधिकानन्दत्वं प्राज्ञस्याभ्युपगन्तुं शक्यम् । तस्य कारणोपाहितत्वात् । अन्यथा मुक्तत्वात्पुनरुत्थानायोगात्तस्मादानन्दप्राचुर्यमेवास्य स्वीकर्तुं युक्तमित्यर्थः । आनन्दभुगिति विशेषणं सदृष्टान्तं व्याचष्टे—यथेति । तथा सुषुप्तोऽपीति शेषः । दार्ष्टान्तिकं विवृणोति—अत्यन्तेति । इयं स्थितिरिति सुषुप्तिरुक्ता । अनेनेति प्राज्ञोक्तिः । सौषुप्तस्य पुरुषस्य तस्यामवस्थायां स्वरूपभूतानतिशयानन्दाभिव्यक्तिरस्तीत्यत्र प्रमाणमाह—एषोऽस्येति । प्राज्ञस्यैव चेतोमुख इति विशेषणान्तरं तद्व्याचष्टे—स्वप्नादीति । स्वप्नो जागरितं चेति प्रतिबोधशब्दितं चेतस्तत्प्रतिद्वारभूतत्वं द्वारभावेन स्थितत्वम् । न हि तत्स्वप्नस्य जागरितस्य वा सुषुप्तद्वारमन्तरेण संभवोऽस्ति । तयोस्तत्कार्यत्वात् । अतः सुषुप्ताभिमानी प्राज्ञः स्थानद्वयकारणत्वाच्चेतोमुखव्यपदेशभागित्यर्थः । अथवा प्राज्ञस्य सुषुप्ताभिमानिनः स्वप्नं जागरितं वा प्रति क्रमाक्रमाभ्यां यदागमनं तत्प्रति चैतन्यमेव द्वारम् । न हि तद्व्यतिरेकेण काऽपि चेष्टा सिध्यतीत्यभिप्रेत्य पक्षान्तरमाह—बोधेत्यादिना । भूते भविष्यति च विषये ज्ञातृत्वं तथा सर्वस्मिन्नपि वर्तमाने विषये ज्ञातृत्वमस्यैवेति प्रकर्षेण जानातीति प्रज्ञः । प्रज्ञ एव प्राज्ञः । तदेव प्राज्ञपदं व्युत्पादयति—भूतेति । सुषुप्ते समस्तविशेषविज्ञानोपरमात्कुतो ज्ञातृत्वमित्याशङ्क्याऽऽह—सुषुप्तोऽपीति । यद्यपि सुषुप्तस्तस्यामवस्थायां समस्तविशेषविज्ञानविरहितो भवति तथाऽपि भूता निष्पन्ना या जागरिते स्वप्ने च सर्वविषयज्ञातृत्वलक्षणा गतिस्तया प्रकर्षेण सर्वमा समन्ताज्जानातीति प्राज्ञशब्दवाच्यो भवतीत्यर्थः । तर्हि प्राज्ञशब्दस्य मुख्यार्थत्वं न सिध्यतीत्याशङ्क्याऽऽह—अथवेति । असाधारणमितिविशेषणद्योतितमर्थं स्फुटयति—इतरयोरिति । आध्यात्मिकस्य तृतीयपादस्य व्याख्यामुपसंहरति—सोऽयमिति ॥ ९ ॥

---

१ ग. छ. ज. झ. °पूर्वं वि° । २ ग. °भुसावं° । ३ ग. छ. झ. °वाच्या सेत्यु° । ४ क. घ. °त्तिरित्यर्थः । ५ छ. °न्द एव । ६ क. °क्तिः सुषु° । ७ क. ख. हि स्वप्न° । ८ ख. °ये प्राज्ञत्वं । ९ ग. °पज्ञा° । १० घ. ज. ट. °रही भ° । ११ ग. छ. झ. °व्यानमु° ।

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः
सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

एष हि स्वरूपावस्थः[1] सर्वेश्वरः साधिदैविकस्य भेदजातस्य सर्वस्येशिता नेतस्माज्जात्यन्तरभूतोऽन्येषामिव । " प्राणबन्धनं हि सौम्य[2] मनः " इति श्रुतेः । अयमेव हि सर्वस्य सर्वभेदावस्थो ज्ञातेत्येष सर्वज्ञ[3] एषोऽन्तर्याम्यन्तरनुप्रविश्य सर्वेषां भूतानां नियन्ताऽप्येष एव । अत एव यथोक्तं सभेदं जगत्प्रसूयत इत्येष योनिः सर्वस्य । यत एवं प्रभवश्चाप्ययश्च प्रभवाप्ययौ हि भूतानामेष एव ॥ ६ ॥

प्राज्ञस्याऽऽधिदैविकेनान्तर्यामिणा सहाभेदं गृहीत्वा विशेषणान्तरं दर्शयति—एष हीति । स्वरूपावस्थत्वमुपाधिप्राधान्यमवधूय चैतन्यप्राधान्यम् । अन्यथा स्वातन्त्र्यानुपपत्तेः। नैयायिकादयस्तु तादस्थ्यमीश्वरस्याऽऽतिष्ठन्ते। तदयुक्तम्। पत्युरसामञ्जस्यादितिन्यायविरोधादित्याह—नेतस्मादिति । श्रुतिविरोधादपि न तस्य तादस्थ्यमास्थेयमित्याह—प्राणेति । प्रकृतमज्ञातं परं ब्रह्म सदाख्यं प्राणशब्दितं तद्बन्धनं बध्यतेऽस्मिन्पर्यवस्यतीति व्युत्पत्तेः । न हि जीवस्य परमात्मातिरेकेण पर्यवसानमस्ति । मनस्तदुपहितं जीवचैतन्यमात्रप्राणशब्दस्याऽऽध्यात्मिकार्थस्य परस्मिन्प्रयोगान्मनःशब्दितस्य च जीवस्य तस्मिन्पर्यवसानाभिधानाद्वस्तुतो भेदो नास्तीति द्योतितमित्यर्थः । प्राज्ञस्यैव विशेषणान्तरं साधयति—अयमेवेति । नन्ववधारणं नोपपद्यते । व्यासपराशरप्रभृतीनामन्येषामपि सर्वज्ञत्वप्रसिद्धेरित्याशङ्क्य विशिनष्टि—सर्वेति । अन्तर्यामित्वं विशेषणान्तरं विशदयति—अन्तरिति । अन्यस्य कस्यचिदन्तरनुप्रवेशे नियमने च सामर्थ्याभावादवधारणम् । उक्तं विशेषणत्रयं हेतुं कृत्वा प्रकृतस्य प्राज्ञस्य सर्वजगत्कारणत्वं विशेषणान्तरमाह—अत एवेति । यथोक्तं स्वप्नजागरितस्थानद्वयप्रविभक्तमित्यर्थः । सभेदमध्यात्माधिदैवाधिभूतभेदसहितमिति यावत् । निमित्तकारणत्वनियमेऽपि प्राचीनानि विशेषणानि निर्वहन्तीत्याशङ्क्य च प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति न्यायान्निमित्तोपादानयोर्जगति न भिन्नत्वमित्येवं नियमतः सिद्धमतो विशेषणान्तरमित्याह—यत इति । प्रभवत्यस्मादिति प्रभवः । अप्ययत्यस्मिन्नित्यप्ययः । न चैतौ भूतानामेकत्रोपादानादृते संभावितावित्यर्थः ॥ ६ ॥

---

१ ख. घ. ङ. ज. झ. ञ. ट. °स्थः सा° । २ ख. घ. सौम्य । ३ ख. °वज्ञः । अत एव ए° । ४ ङ. °स्यावति° । ५ घ. ज. °त्य जी° । ६ घ. ङ. ज. °शरादिना° । ७ ङ. °रं साधयति । ८ घ. ङ. °णत्वनि° ।

(गौडपादीयकारिकाणां स्वकृतमवतरणम्) ।

अत्रैते श्लोका भवन्ति—

अत्रैतस्मिन्यथोक्तेऽर्थ एते श्लोका भवन्ति ।

आचार्यैर्माण्डूक्योपनिषदं पठित्वा तद्व्याख्यानश्लोकावतारणमत्रेत्यादिना कृतं तदत्रेत्यनूद्य भाष्यकारो व्याकरोति—एतस्मिन्निति ।

(अथ गौडपादीयकारिकाः) ।

बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥ १ ॥

बहिष्प्रज्ञ इति । पर्यायेण त्रिस्थानत्वात्सोऽहमिति स्मृत्या प्रतिसंधानाच्च स्थानत्रयव्यतिरिक्तत्वमेकत्वं शुद्धत्वमसङ्गत्वं च सिद्धमित्यभिप्रायः । महामत्स्यादिदृष्टान्तश्रुतेः ॥ १ ॥

विश्वस्य विभुत्वं प्रागुक्ताधिदैविकभेदादवधेयम् । अध्यात्माधिदैवाभेदे पूर्वोदाहृतां श्रुतिं सूचयितुं हिशब्दः । स्थूलसूक्ष्मकारणोपाधिभेदाज्जीवभेदमाशङ्क्य स्वरूपैक्येऽपि स्वतन्त्रोपाधिभेदमन्तरेण विशेषणमात्रभेदादवान्तरभेदोक्तिरित्याह—एक एवेति । पदार्थानां पूर्वमेवोक्तत्वात्तात्पर्यं श्लोकस्य वक्तव्यमवशिष्यते तदाह—पर्यायेणेति । यद्यात्मनश्चैतन्यमिव स्वाभाविकं स्थानत्रयं न तर्हि तद्वदेव तं व्यभिचरितुमर्हति व्यभिचरति चाऽऽत्मानं स्थानत्रयं क्रमाक्रमाभ्यां तस्य त्रिस्थानत्वादतस्तद्व्यतिरिक्तत्वमात्मनः सिद्धम् । यः सुप्तः सोऽहं जागर्मीत्यनुसंधानादेकत्वं तस्यावगतम् । एकत्वेन हि स्मृत्या घटादावेकत्वमिष्यते । धर्माधर्मरागद्वेषादिमलस्यावस्थाधर्मत्वात्तदतिरेके शुद्धत्वमपि सिध्यति । सङ्गस्यापि वेद्यत्वेनावस्थाधर्मत्वाङ्गीकारात्तदतिरेकिणस्तदद्रष्टुरसङ्गत्वमपि संगतमेवेत्यर्थः । युक्तिसिद्धेऽर्थे श्रुतिमुदाहरति—महामत्स्यादीति । महान्नादेयेन स्रोतसाऽऽप्रकम्प्यगतिरतिबृहतीर्यांतिमिरुभे कूले नद्याः संचरन्क्रमसंचरणात्ताभ्यामतिरिच्यते । न च तस्य कूलद्वयगतदोषगुणवत्त्वम् । नैं चासौ क्वचिदपि सज्जते । न च श्येनो वा सुपर्णो वा नभसि परिपतन्क्वचिदपि प्रतिहन्यते तथैवायमात्मा क्रमेण स्थानत्रये संचरन्नुक्तलक्षणो युक्तोऽङ्गीकर्तुमित्यर्थः ॥ १ ॥

---

१ ख. ज. ठ. अथ वार्तिककारोक्तं वाक्यम् । अत्रै° । २ छ. स्थितः । ड. ट. मतः । ३ झ. °कत्वमस° । ४ ज. °कादिभे° । ५ ख. °बलस्ति° । ङ. ज. °बली तिमि° । ६ छ. °तगुणदोषत्व° । ७ छ. न त्वसौ । ८ ग. घ. ङ. ज. झ. °त्मा स्था° । ९ ग. घ. ज. झ. °त्रयं सं° । १० क. °णोपयु° ।

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥ २ ॥

जागरितावस्थायामेवं विश्वादीनां त्रयाणामनुभवंप्रदर्शनार्थोऽयं श्लोकः- दक्षिणाक्षीति । दक्षिणमक्ष्येव मुखं तस्मिन्प्राधान्येन द्रष्टा स्थूलानां विश्वोऽनुभूयते । " इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषः " इति श्रुतेः । इन्धो दीप्तिगुणो वैश्वानर आदित्यान्तर्गतो वैराज आत्मा चक्षुषि च द्रष्टैकः । नन्वन्यो हिरण्यगर्भः क्षेत्रज्ञो दक्षिणेऽक्षि(क्ष)ण्यक्ष्णोर्नियन्ता द्रष्टा चान्यो देहस्वामी । न । स्वतो भेदानभ्युपगमात् । " एको देवः सर्वभूतेषु गूढः " इति श्रुतेः ।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ॥ इति स्मृतेः ।

विश्वतैजसप्राज्ञानां स्थानत्रयं क्रमेण संचरतामैक्यमेव वस्तुतो भवतीत्यत्र हेत्वन्तरं विवक्षन्नाह—दक्षिणेति । श्लोकस्य तात्पर्यं संगृह्णाति—जागरितेति । न चैकस्यामवस्थायामेकस्मिन्नेव देहे भिन्नत्वमात्मनस्तद्वादिभिरपीष्यते । जाग्रदवस्थायामिति तु देहे व्यवस्थितत्वोक्त्या विशेषणम् । तद्धि तत्र व्यवस्थितत्वं यदात्मनः सर्वगतस्य तदभिमानित्वम् । देहाभिमानश्च जागरिते परं संभवति । तेन तस्यामेवावस्थायामेकस्मिन्नेव देहे त्रयाणामनुभवात्तेषां मिथो भेदो नास्तीति सिध्यतीत्यर्थः । मुखं द्वारमुपलब्धिस्थानं शरीरमात्रे दृश्यमानस्य कथमिदमुपलब्धौ विशेषायतनमुपदिश्यते स्थानान्तरापेक्षयाऽस्य प्राधान्यादित्याह—प्राधान्येनेति । अनुभूयते ध्याननिष्ठैरिति शेषः । उक्तेऽर्थे श्रुतिं संवादयति—इन्ध इति । बृहदारण्यकश्रुतेरुदाहृतायास्तात्पर्यार्थमाह—इन्ध इत्यादिना । वैराजस्याऽऽत्मनो यथोक्तगुणवत्त्वेऽपि द्रष्टुश्चाक्षुषस्य किमायातमित्याशङ्क्याऽऽह—चक्षुषि चेति । अध्यात्माधिदैवयोरेकत्वादाधिदैविको गुणश्चाक्षुषेऽप्याध्यात्मिके संभवतीत्यर्थः । उक्तमेकत्वमाक्षिपति—नन्विति । हिरण्यगर्भः सूक्ष्मप्रपञ्चाभिमानी सूर्यमण्डलान्तर्गतः सूक्ष्मसमष्टिदेहो लिङ्गात्मा चक्षुर्गोलकानुगतेन्द्रियानुग्राहकः संसारिणोऽर्थान्तरम् । विराडा-

---

१ छ. °वद° । २ छ. °क्षिण.क्ष्ये° । ३ क. °तामात्मैक्य° । ४ ग. झ. विवृण्वन्ना° । ५ छ. °स्मिन्देहे । ६ छ. °भिरिष्य° । ७ ग. झ. °ति दे° । ८ घ. ष. देहव्य° । ९ झ. °मानत्व° । १० छ. °स्यामव° । ११ क. °भवति तेषां । घ. ज. झ. °भवेत्तेषां । १२ घ. ङ. ञ. °था प्रा । १३ ष. संप्रमाणयति । १४ ग. छ. ज. झ. °त्पर्यमा° । १५ ग. झ. °राजात्मनो । १६ घ. ङ. ज. °णत्वेऽपि । १७ घ. ङ. झ. °तः स° । १८ ग °क्षुर्गतकरणांशानु° ।

स्माऽपि स्थूलप्रपञ्चाभिमानी सूर्यमण्डलात्मकः समष्टिदेहश्चक्षुर्गोलकद्वयानुग्राहकस्ततोऽर्थान्तरमेव . क्षेत्रज्ञस्तु व्यष्टिदेहो दक्षिणे चक्षुषि व्यवस्थितो द्रष्टा चक्षुषोः करणानां नियन्ता कार्यकरणस्वामी ताभ्यां समष्टिदेहाभ्यामन्योऽभ्युपगम्यते । तदेवं समष्टिव्यष्टित्वेन व्यवस्थितजीवभेदानुक्तमेकत्वमयुक्तमित्यर्थः । काल्पनिको जीवभेदो वास्तवो वेति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—नेत्यादिना । एको हि परो देवः सर्वेषु भूतेषु समष्टित्वेन व्यष्टित्वेन च समावृत्यतिष्ठतीति श्रवणाद्वस्तुतो भेदो नास्तीत्युक्तं हेतुं साधयति—एक इति । सर्वेषु क्षेत्रेषु व्यवस्थितं क्षेत्रज्ञं मामीश्वरं विद्धीति भगवतो वचनाच्च तात्त्विकभेदासिद्धिरित्याह—क्षेत्रज्ञं चेति । सर्वेषु भूतेषु क्षेत्रज्ञैश्चैदात्मैकः कथं तर्हि प्रतिभूतं भेदप्रथेत्याशङ्क्याऽऽह—अविभक्तं चेति । तत्त्वतोऽविभागेऽपि देहकल्पनया भेदधीरित्यर्थः ।

सर्वेषु करणेष्वविशेषेऽपि दक्षिणाक्षि(क्ष)ण्युपलब्धिपाटवदर्शनाच्चत्र विशेषेण निर्देशो विश्वस्य । दक्षिणाक्षिगतो रूपं दृष्ट्वा निमीलिताक्षस्तदेव स्मरन्मनस्यन्तः स्वप्न इव तदेव वासनारूपाभिव्यक्तं पश्यति । यथाऽत्र तथा स्वप्ने । अतो मनस्यन्तस्तु तैजसोऽपि विश्व एव । आकाशे च हृदि स्मरणाख्यव्यापारोपरमे प्राज्ञ एकीभूतो घनप्रज्ञ एव भवति । मनोव्यापाराभावात् । दर्शनस्मरणे एवं हि मनःस्पन्दिते तदभावे हृद्येवाविशेषेण प्राणात्मनाऽवस्थानम् । " प्राणो ह्येवैतान्सर्वान्संवृङ्क्ते " इति श्रुतेः ।

ननु करणेषु सर्वेषु विश्वस्याविशेषान्न दक्षिणे चक्षुषि विशेषनिर्देशो युज्यते । यद्यपि करणान्तरेभ्यश्चक्षुषि प्राधान्यमुक्तं तथाऽपि नार्थो दक्षिणविशेषणेनेति तत्राऽऽह—सर्वेष्विति । श्रुत्यनुभवाभ्यां निर्देशविशेषसिद्धिरित्यर्थः । यद्यपि देहदेशभेदे विश्वोऽनुभूयते तथाऽपि कथं जागरिते तैजसोऽनुभूयत इत्याशङ्क्य द्वितीयं पादं व्याचष्टे—दक्षिणेति । यथा स्वप्ने जागरितवासनारूपेणाभिव्यक्तमर्थजातं द्रष्टाऽनुभवति तथैव जागरिते दक्षिणे चक्षुषि द्रष्टृत्वेन व्यवस्थितः संनिकृष्टं रूपं दृष्ट्वा पुनर्निमीलिताक्षो दृष्टमेव रूपं रूपोपलब्धिजनितसमुद्बुद्धवासनात्मना मनस्यन्तरभिव्यक्तं स्मरन्विश्वस्तैजसो भवति । तथा च तयोर्भेदाशङ्का नावतरतीत्यर्थः । स्वप्नजागरितयोर्विलक्षणत्वात्तद्द्रष्टोर्विश्वतैजसयोरपि वैलक्षण्यमुचितमित्याशङ्क्याऽऽह—यथेति । जागरिते

---

१ ज. झ. °र्यकार° । २ ख. ङ. °त्युक्तहे° । ३ ग. छ. झ. °श्च एकश्चेदात्मा । क° । ४ झ. °णेषु ह्यवि° । ५ घ. ङ. ज. झ. °२णव्या° । ६ घ. ज. °व म° । ७ ग. °देश उपयु° । ८ ग. छ. °कृष्टरू° । ९ घ. °वकाशवती° ।

यथाऽर्थजातं द्रष्टा पश्यति तथैव स्वप्नेऽपि तदुपलभते । ततो न तयोर्वैलक्षण्यसिद्धिरित्यर्थः । द्वितीयपादस्य व्याख्यामुपसंहरति— अत इति । स्थानद्वये द्रष्टुर्भेदाशङ्का निरवकाशेति दर्शयितुमेवकारः । तृतीयं पादं व्याकुर्वञ्जाग्रत्येव सुषुप्तिं दर्शयति—आकाशे चेति । यो विश्वस्तैजसत्वमुपगतः स पुनः स्मरणाख्यस्य व्यापारस्य व्यावृत्तौ हृदयावच्छिन्नाकाशे स्थितः सन्प्राज्ञो भूत्वा तल्लक्षणलक्षितो भवति । न हि तस्यं रूपविषयदर्शनस्मरणे परिहृत्य विशिष्टाकाशनिविष्टस्य प्राज्ञादर्थान्तरत्वम् । अतश्च स एकीभूतो विषयविषयाकाररहितः । यतो घनप्रज्ञो विशेषविज्ञानविरहो रूपान्तररहितस्तिष्ठतीत्यर्थः । उक्तमर्थं प्रपञ्चयन्मनोव्यापाराभावादिति हेतुमुक्त्वा व्याचष्टे—दर्शनेत्यादिना । अविशेषेणाव्याकृतरूपेणेत्यर्थः । अवस्थानं जागरिते सुषुप्तमिति शेषः । यदुक्तमव्याकृतेन प्राणात्मना हृदयेऽवस्थानमिति तत्र प्रमाणमाह—प्राणो हीति । यो हि प्राणोऽध्यात्मं प्रसिद्धः स वागादीन्प्राणानात्मनि संवृङ्क्ते संहरतीति प्राणस्याध्यात्मं वागादिसंहर्तृत्वमुक्तम् । अधिदैवं च यो वायुः सूत्रात्मा सोऽग्न्यादीनात्मनि संहरतीत्यग्न्यादिसंहर्तृत्वं वायोरुक्तम् । अध्यात्माधिदैवयोश्चैकत्वात्प्राणस्य वायोश्च वागादिष्वग्न्यादिषु संहर्तृत्वेनाव्याकृतत्वस्य संवर्गविद्यायां सूचितत्वादव्याकृतेन प्राणात्मना सुषुप्ते प्राज्ञस्यावस्थानमिति युक्तमेवोक्तमित्यर्थः ।

तैजसो हिरण्यगर्भो मनःस्थत्वात् । लिङ्गं मनः । " मनोमयोऽयं पुरुषः " इत्यादिश्रुतिभ्यः । ननु व्याकृतः प्राणः सुषुप्ते तदात्मकानि करणानि भवन्ति कथमव्याकृतता । नैष दोषः । अव्याकृतस्य देशकालविशेषाभावात् ।

पूर्वमेव विश्वविराजोरैक्यस्यानन्तरं च सुषुप्ताव्याकृतयोरैक्यस्य दर्शितत्वात्तैजसहिरण्यगर्भयोरनुक्तमभेदं वक्तव्यमिदानीमुपन्यस्यति—तैजस इति । तत्र हेतुमाह—मनःस्थत्वादिति । हिरण्यगर्भस्य समष्टिमनोनिष्ठत्वात्तैजसस्य व्यष्टिमनोगतत्वात्तयोश्च समष्टिव्यष्टिमनसोरैक्यात्तद्गतयोरपि तैजसहिरण्यगर्भयोरैक्यमुचितमित्यर्थः । किंच हिरण्यगर्भस्य क्रियाशक्त्युपाधौ लिङ्गात्मतया प्रसिद्धत्वात्तस्य च सामानाधिकरण्यश्रुत्या मनसा सहाभेदावगमान्मनोनिष्ठस्य तैजसस्य युक्तं हिरण्यगर्भत्वमित्याह—लिङ्गमिति ।

---

१ क. 'पलम्भात् । त' । २ ग. झ. 'दव्या' । ३ घ. व्याख्येयमु' । ४ छ. 'ख्यानमु' । ५ घ. च. छ. ज. द्रष्टृभेदा' ६ झ. 'स्य स्वरू' । ७ घ. ङ. 'तश्चैकी' । ग. झ. 'तश्चासावेकी' । ८ घ. ङ. 'हितो घ' । ९ ख. 'रहादूपा' । १० छ हेतुं कृत्वा व्या' । ११ ग. छ. झ. 'स्थानमिति जा' । १२ छ. 'स्थानं त' । १३ ख. तत्राऽऽह । १४ घ. ङ. 'दैवतं च । १५ घ. ङ. 'वतयो' । १६ झ. 'श्रुतेः । न' । १७ छ 'कृतप्रा' ।

किंच पुरुषस्य मनोमयत्वश्रवणात्पुरुषविशेषत्वाच्च हिरण्यगर्भस्य तत्प्रधानत्वाधिगमात्तन्निष्ठस्तैजसो हिरण्यगर्भो भवितुमर्हतीत्याह— मनोमय इति । प्राणस्य प्रागुक्तमव्याकृतत्वमाक्षिपति—नन्विति । सुषुप्ते हि प्राणो नामरूपाभ्यां व्याकृतो युक्तस्तद्व्यापारस्य पार्श्वस्थैरतिस्पष्टं दृष्टत्वादित्यर्थः । किंच तस्यामवस्थायां वागादीनि करणानि प्राणात्मकानि भवन्ति । त एतस्यैव सर्वे रूपमभवन्निति श्रुतेः । अतोऽपि प्राणस्य व्याकृतत्वं युक्तमित्याह— तदात्मकानीति । उक्तन्यायेन प्राणस्याव्याकृतत्वायोगादव्याकृतेन प्राणात्मना सुषुप्तस्यावस्थानमयुक्तमिति निगमयति—कथमिति । एकलक्षणत्वादव्याकृतप्राणयोरेकत्वोपपत्तिरित्युत्तरमाह—नैष दोष इति । अव्याकृतं हि देशकालवस्तुपरिच्छेदशून्यम् । प्राणोऽपि सौषुप्तद्रष्टुस्तथा । न हि सौषुप्तदृष्ट्या तत्कालीनस्य प्राणस्य देशादिपरिच्छेदोऽवगम्यते । तथा च लक्षणविशेषादव्याकृतप्राणयोरेकत्वमविरुद्धमित्यर्थः ।

यद्यपि प्राणाभिमाने सति व्याकृततैव प्राणस्य तथाऽपि पिण्डपरिच्छिन्नविशेषाभिमानविरोधः प्राणे भवतीत्यव्याकृत एव प्राणः सुषुप्ते परिच्छिन्नाभिमानवताम् । यथा प्राणलये परिच्छिन्नाभिमानिनां प्राणोऽव्याकृतस्तथा प्राणाभिमानिनोऽप्यविशेषापत्तावव्याकृतता समाना प्रसवबीजात्मकत्वं च तदध्यक्षश्चैकोऽव्याकृतावस्थः । परिच्छिन्नाभिमानिनामध्यक्षाणां च तेनैकत्वमिति पूर्वोक्तं विशेषणमेकीभूतः प्रज्ञानघन इत्याद्युपपन्नम् । तस्मिन्नुक्तहेतुत्वाच्च ।

तस्यायं प्राणो ममायमिति देशपरिच्छेदप्रतिभानादेकलक्षणत्वाभावान्न प्राणस्याव्याकृतत्वमित्याशङ्क्याऽऽह—यद्यपीति । परिच्छिन्नाभिमानवतां मध्ये प्रत्येकं ममायमिति प्राणाभिमाने सति प्राणस्य यद्यपि व्याकृततैव भवति तथाऽपि सुषुप्त्यवस्थायां पिण्डेन परिच्छिन्नो यो विशेषस्तद्विषयो ममेत्यभिमानस्तस्य निरोधस्तस्मिन्भवतीति प्राणोऽव्याकृत एवेति योजना । प्रतिबुद्धदृष्ट्या विशेषाभिमानविषयत्वेन व्याकृतत्वेऽपि सुषुप्तदृष्ट्या तदुपसंहारादव्याकृतत्वं प्राणस्याविरुद्धमिति भावः । विशेषाभिमाननिरोधे प्राणस्याव्याकृतत्वं क्व दृष्टमित्याशङ्क्याऽऽह—यथेति । परिच्छिन्नाभिमानिनां प्रणलयो मरणं तत्राभिमाननिरोधे प्राणो नामरूपाभ्यामव्याकृतो यथेष्यते तथैव प्राणाभिमानिनोऽपि तदभिमाननिरोधेनाविशेषापत्तिः सुषुप्तिः । तत्राव्याकृतता प्राणस्य

---

१ ग. छ. °त्वावग° । २ घ. ज. झ. ट. 'तेः । इतोऽ । ३ घ. ङ. ज. °लप° । ४ घ. ङ. ट. °सदृष्ट्या तथा । ५ घ. ङ. च. य. 'णः प° । ६ झ. 'मानवतां प्रा° । ७ क. °स्मिन्नेतस्मिन्नु° । ८ ख. °दुभावाच्च । ९ झ. °त्वात्तच्च । १० क °योऽयं म° । ११ ग. छ. झ. °णोऽव्याव्या° । १२ छ. °नविरो° ।

प्रागुक्तदृष्टान्तेनाविशिष्टा । ततो विशेषाभिमाननिरोधे प्राणरयाव्याकृतत्वं प्रसिद्ध-
मित्यर्थः । किंच यथाऽऽधिदैविकमव्याकृतं जगत्प्रसवबीजम् । तद्धेदं तर्ह्यव्याकृत-
मासीत्तन्नामरूपाभ्यामेव व्याक्रियत इति श्रुतेः । तथा प्राणाख्यं सुषुप्तं जागरितस्वप्न-
योर्भवति बीजम् । तथा च कार्यं प्रति प्रसवबीजरूपत्वमविशिष्टमुभयोरिति लक्षणा-
विशेषादव्याकृतप्राणयोरेकत्वार्थं प्रसिद्धिरित्याह-प्रसवेति । समानमित्यनुकर्षार्थं
चकारः । उपाधिस्वभावालोचनया सुषुप्ताव्याकृतयोरभेदमभिधायोपहितस्वभावालो-
चनयाऽपि तयोरभेदमाह— तदध्यक्षश्चेति । अव्याकृतावस्थः सुषुप्तावस्थश्च तयोरुप-
हितस्वभावयोराध्यात्मिकाधिदैविकयोरेकोऽधिष्ठाता चिद्धातुः । अतोऽपि तयोरे-
कत्वं सिध्यतीत्यर्थः । सुषुप्ताव्याकृतयोरेवमेकत्वं प्रसाध्य तस्मिन्नव्याकृते सुषुप्ते प्रागुक्तं
विशेषणं युक्तमित्याह—परिच्छिन्नेति । यद्यपि विशेषानभिव्यक्तिमात्रेणैकीभूतत्वादि
विशेषणमुपपादितं तथाऽपि परिच्छिन्नाभिमानिनामुपाधिप्रधानानां तत्र तत्राध्यक्षाणां
चोपहितानामव्याकृतेनैकत्वम् । अतोऽपि प्रागुक्तविशेषणोपपत्तिरित्यर्थः । किं-
चाध्यात्माधिदैवयोरेकत्वमिति प्रागुक्तहेतुसद्भावाच्च युक्तं सुषुप्ते प्राज्ञे प्राणात्मन्यव्या-
कृते यथोक्तं विशेषणमित्याह— पूर्वोक्तमिति । ग्रन्थगतादिशब्देन सर्वेश्वरत्वादि-
विशेषणं गृह्यते ।

कथं प्राणशब्दत्वमव्याकृतस्य । " प्राणबन्धनं हि सोम्य मनः, " इति
श्रुतेः । ननु तत्र ' सदेव सोम्य " इति प्रकृतं सद्ब्रह्म प्राणशब्दवाच्यम् ।
नैष दोषः । बीजात्मकत्वाभ्युपगमात्सतः । यद्यपि सद्ब्रह्म प्राणशब्दवाच्यं
तत्र तथाऽपि जीवप्रसवबीजात्मकत्वमपरित्यज्यैव प्राणशब्दैतत्त्वं सतः
सच्छब्दवाच्यता च यदि हि निर्बीजरूपं विवक्षितं ब्रह्माभविष्यत् " नेति
नेति ' " यतो वाचो निवर्तन्ते " " अन्यदेव तद्विदितादथो अविदितात् "
इत्यवक्ष्यत् । " न सत्तन्नासदुच्यते " इति स्मृतेः । निर्बीजतयैव चेत्सर्वे
लीनानां संपन्नानां सुषुप्तप्रलययोः पुनरुत्थानानुपपत्तिः स्यात् । मुक्तानां च
पुनरुत्पत्तिप्रसङ्गः । बीजाभावाविशेषात् ।

प्राणशब्दस्य पञ्चवृत्तौ वायुविकारे रूढत्वान्नाव्याकृतविषयत्वं रूढिविरोधादिति

---

१ ग घ. ङ. छ. ज. झ. जाग्रत्स्वप्न° । २ ग. घ. ज. झ. °स्य सि° । ३ क. °र्थाख्या° । ४ छ. °भावपर्यालो° । ५ ग. घ. ङ. ज. झ. °योरा° । ६ ग. घ. ङ. छ ज. °रेक° । ७ ख. °दिति वि° । ८ अ. तत्रा° । ९ ग. छ. ज. °तोऽप्यस्ति प्रा° । १० ङ. °वतयो° । ११ ग झ °तुसंभवा° । १२ घ. ङ. °श्वरादि° । १३ च. °कृतस° । १४ च. °पि जगत्प्रस° । झ. °पि जगज्जीव° । १५ ज. °सर्वं बी° । १६ घ. °द्वदवाच्यत्वं । १७ क °दि नि° । १८ घ. °बीजं रू° । १९ छ. ज. °तादधीत्य° । २० झ. °स्मृतिः । २१ ख. °ति सं° । २२ घ. ङ. ज. ढ. °प्तल° । २३ घ. ढ. °तू । आत्मज्ञा° ।

शङ्कते—कथमिति । अन्यत्र रूढत्वेऽपि श्रौतप्रयोगवशादव्याकृतविषयत्वं प्राणशब्दस्य युक्तमिति परिहरति—प्राणबन्धनमिति । प्रकरणस्य ब्रह्मविषयत्वाद्ब्रह्मण्येव प्रकृते वाक्ये प्राणशब्दस्य प्रयोगान्नाव्याकृतविषयत्वं तस्य युक्तं प्रकरणविरोधादिति शङ्कते—नन्विति । प्रकरणस्य ब्रह्मविषयत्वेऽपि ब्रह्मणः सल्लक्षणस्य शबलत्वाङ्गीकारादस्मिन्नपि वाक्ये तत्रैव प्राणशब्दप्रयोगाद्युक्तं तस्याव्याकृतविषयत्वमित्युत्तरमाह—नैष दोष इति । संग्रहवाक्यं[3] प्रपञ्चयति—यद्यपीति । तत्रेति प्राणबन्धनवाक्यं परामृश्यते । जीवशब्दः सर्वस्यैव कार्यजातस्योपलक्षणम् । प्रकरणवाक्ययोरुभयोरपि[5] परिशुद्धब्रह्मविषयत्वे का क्षतिरित्याशङ्क्य परिशुद्धस्य ब्रह्मणः शब्दप्रवृत्तिनिमित्तागोचरत्वात्तत्र शब्दवाच्यत्वानुपपत्तेर्मैवमित्याह—यदि हीति । न केवलं निरुपाधिकं निर्विशेषं ब्रह्म वाङ्मनसयोरगोचरमिति श्रुतेरेव निर्धार्यते किंतु स्मृतेरपीत्याह—न सदिति । किंच कार्यजातं प्रति बीजभूताज्ञानरहिततया शुद्धत्वेनैवास्मिन्प्रकरणे ब्रह्म विवक्षितं चेत्तर्हि सता सोम्य तदा संपन्नो भवतीति जीवानां सत्प्राप्तिश्रवणाद्ब्रह्मणः सच्छब्दितस्य शुद्धत्वे सुषुप्त्यादौ[8] तत्र लीनानामेकीभूतानां जीवानां पुनरुत्थानं नोपपद्यते दृश्यते च पुनरुत्थानम् । तेन शबलमेव ब्रह्मात्र विवक्षितमित्याह—निर्बीजतयेति । सुषुप्त्यादौ शुद्धे ब्रह्मणि संपन्नानामपि पुनरुत्थाने[10] मोक्षानुपपत्तिदोषमाह—मुक्तानां चेति । न तेषां पुनरुत्थानं हेत्वभावादित्याशङ्क्य सुषुप्तानां प्रलीनानां च न तर्हि पुनरुत्थानं हेत्वभावस्य तुल्यत्वादित्याह—बीजाभावेति ।

ज्ञानदाह्यबीजाभावे च ज्ञानानर्थक्यप्रसङ्गः । तस्मात्सबीजत्वाभ्युपगमेनैव[11] सतः प्राणत्वव्यपदेशः[12][13] सर्वश्रुतिषु च कारणत्वव्यपदेशः । अत एव "अक्षरात्परतः परः" । "सबाह्याभ्यन्तरो ह्यजः" । "यतो वाचो निवर्तन्ते" । "नेति नेति" इत्यादिना बीजत्ववापनयनेन[14][15] व्यपदेशः । तामबीजावस्थां तस्यैव प्राज्ञशब्दवाच्यस्य तुरीयत्वेन देहादिसंबन्धरहितां[16] पारमार्थिकीं पृथग्वक्ष्यति । बीजावस्थाऽपि न किंचिदवेदिषमित्युत्थितस्य प्रत्ययदर्शनाद्देहेऽनुभूयत एवेति त्रिधा देहे व्यवस्थित इत्युच्यते ॥ २ ॥

नन्वनाद्यनिर्वाच्यमज्ञानं संसारस्य बीजभूतं नास्त्येव । यद्ब्रह्मणो विशेषणं भवति । अग्रहणमिथ्याज्ञानतत्संस्काराणामज्ञानशब्दवाच्यत्वात्तत्राऽऽह—ज्ञानेति । अज्ञोऽहमि-

---

१ छ. °कृतवा° । २ छ. °क्ये प्रा° । ३ छ. विवृणोति । ४ क. °थोर° । ५ ज. °पि शु° । ६ ग. झ. सुप्त्या° । ७ ग. झ. °षुतादौ । ८ घ. ङ. ज. शुद्धब्र° । ९ ख. °ज्ञानां पु° । १० क. घ ङ. ज. मोक्षत्वानु° । ११ घ. °स्माद्बीज° । १२ ग. च. °णव्य° । १३ छ. °शः । अत । १४ ख. घ. ज. झ. ठ. °जत्वाप° । १५ घ. ङ. छ. ज. झ. ट °पनयेन । १६ झ. °न्यजाग्रदादिर° ।

त्यज्ञानमपरोक्षमग्रहणस्य च ग्रहणप्रागभावस्य नापरोक्षत्वमिन्द्रियसंनिकर्षाभावादनुपलब्धिगम्यत्वाच्च भ्रान्तितत्संस्कारयोश्चाभावेतरकार्यत्वादुपादानापेक्षणादात्मनश्च केवलस्यातद्धेतुत्वात्तदुपादानत्वेनानाद्यज्ञानसिद्धिः । किंच देवदत्तप्रमा तन्निष्ठप्रमाप्रागभावातिरिक्ताऽनादिप्रध्वंसिनी प्रमाणत्वाद्यज्ञदत्तप्रमावत् । न च तदभावे सम्यग्ज्ञानार्थवत्त्वम् । क्षणिकत्वेन भ्रान्तेस्तदानिवर्त्यत्वात्संस्कारस्य च सत्यपि सम्यग्ज्ञाने क्वचिदनुवृत्तिदर्शनान्न चाग्रहणस्य तन्निवर्त्यत्वम् । ज्ञानस्य तन्निवृत्तित्वात् । अतो ज्ञानदाह्यं संसारबीजभूतमनाद्यनिर्वाच्यमज्ञानं ज्ञानस्यार्थवत्त्वायाऽऽश्रयेयम् । अन्यथा तदानर्थक्यप्रसङ्गादित्यर्थः । शुद्धस्य ब्रह्मणो वाक्यप्रकरणाभ्यां विवक्षितत्वाभावे फलितमाह—तस्मादिति । ब्रह्मणः शबलस्यैव प्राकरणिकत्वाद्वाक्येऽपि तस्मिन्प्राणशब्दाद्युक्तं प्राणशब्दस्याव्याकृतविषयत्वमिति भावः । यतोऽनाद्यनिर्वाच्याज्ञानशबलस्यैव कारणत्वं ब्रह्मणो विवक्ष्यत अत एव कारणत्वनिषेधेन परिशुद्धं ब्रह्म श्रुतिषूपदिश्यते । तदेतदाह—अत एवेति । अक्षरमव्याकृतं तच्च कार्यापेक्षया परम् । तस्मात्परोऽयं परमात्मा स हि कार्यकारणाभ्यामस्पृष्टो वर्तते । बाह्यं कार्यमभ्यन्तरं कारणमिति । ताभ्यां सह तत्कल्पनाधिष्ठानत्वेन वर्तमानाश्चिद्धातुः । तथा च स चिद्धातुरतज्जन्मादिसमस्तविक्रियाशून्यत्वेन कूटस्थः श्रुतिस्मृत्योर्व्यपदिश्यते । यतो ब्रह्मणः सकाशाद्वाचः सर्वा मनसा सहावकाशमप्राप्य निवर्तन्ते । तद्ब्रह्माऽऽनन्दरूपं विद्वान्न बिभेति । नेति नेतीति बीप्सया सर्वमारोपितमपाक्रियते । आदिशब्देनास्थूलादिवाक्यं गृह्यते । बीजत्वनिरासेन शुद्धं ब्रह्म व्यपदिश्यते चेद्बीजत्वं शबलस्यैवेति सिध्यतीत्यर्थः । आचार्येणानुक्तत्वान्न कारणातिरिक्तं शुद्धं ब्रह्मास्तीत्याशङ्क्य नान्तःप्रज्ञमित्यादिवाक्यशेषान्नैवमित्याह—तामिति । उक्तन्यायेन वस्तुव्यवस्थायामव्याकृतस्य देहेऽनुभवाभावान्त्रिधा देहे व्यवस्थित इति कथमुक्तमित्याशङ्क्याऽऽह—बीजेति ॥ २ ॥

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥ ३ ॥
स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसम् ।
आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥ ४ ॥

उक्तार्थौ श्लोकौ ॥ ३ ॥ ४ ॥

---

१ क. °दानतापे° । २ ख. °त्वादु° । ३ ग. झ. °ष्ठप्रा° । ४ छ. °त्वात्तसं° । ५ च. छ. °र्थमाभ्य° । ६ छ. °तुरजो जन्मा° । ७ छ. °ति च वी° । ८ ङ. ज. शुद्धब्र° ।

विश्वादीनां त्रयाणां त्रिधा देहे व्यवस्थितिं प्रतिपाद्य तेषामेव त्रिधा भोगं निगमयति—विश्वो हीति ॥ ३ ॥

भोगप्रयुक्तां तृप्तिमधुना त्रेधा विभजते—स्थूलमिति । उदाहृतश्लोकयोर्व्याख्यानापेक्षां वारयति—उक्तार्थाविति ॥ ४ ॥

त्रिषु धामसु + यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥ ५ ॥

त्रिषु धामसु जाग्रदादिषु स्थूलप्रविविक्तानन्दाख्यं भोज्यमेकं त्रिधाभूतम् । यश्च विश्वतैजसप्राज्ञाख्यो भोक्तैकः सोऽहमित्येकत्वेन प्रतिसंधानाद्द्रष्टृत्वाविशेषाच्च प्रकीर्तितः । यो वेदैतदुभयं भोज्यभोक्तृतयाऽनेकधा भिन्नं स भुञ्जानो न लिप्यते । भोज्यस्य सर्वस्यैकस्य भोक्तुर्भोज्यत्वात् । न हि यस्य यो विषयः स तेन हीयते वर्धते वा । न ह्यग्निः स्वविषयं दग्ध्वा काष्ठादि तद्वत् ॥ ५ ॥

प्रकृतभोक्तृभोग्यपदार्थद्वयपरिज्ञानस्यावान्तरफलमाह—त्रिष्विति । पूर्वार्धं व्याचष्टे—जाग्रदादिष्विति । भोग्यत्वेनैकत्वेऽपि त्रैविध्यमवान्तरभेदादुन्नेयम् । भोक्तुरेकत्वे हेतुमाह—सोऽहमिति । योऽहं सुषुप्तः सोऽहं स्वप्नं प्राप्तः । यश्च स्वप्नमद्राक्षं सोऽहमिदानीं जागर्मीत्येकत्वं प्रतिसंधीयते । न च तत्र बाधकमस्ति । तद्युक्तं भोक्तुरेकत्वमित्यर्थः । किंचाज्ञानं तत्कार्यं च प्रति प्राज्ञादिषु द्रष्टृत्वस्याविशिष्टत्वाद्द्रष्टृभेदे च प्रमाणाभावाद्युक्तं तदेकत्वमित्याह—द्रष्टृत्वेति । द्वितीयार्धं विभजते—यो वेदेति । कथमेतावता भोगप्रयुक्तदोषराहित्यं तत्राऽऽह—भोज्यस्येति । यद्यपि भोक्तुरेकस्यैव सर्वं भोग्यमित्यवगतं तथाऽपि कथं सर्वं भुञ्जानो भोगप्रयुक्तदोषान्न भवतीत्याशङ्क्याऽऽह—न हीति । उक्तमर्थं दृष्टान्तेन स्पष्टयति—न ह्यग्निरिति । स्वविषयान्काष्ठादीन्दग्ध्वा न हीयते वर्धते वाऽग्निरिति संबन्धः ॥ ५ ॥

प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणश्चेतोभून्पुरुषः पृथक् ॥ ६ ॥

सतां विद्यमानानां स्वेनाविद्याकृतनामरूपमायास्वरूपेण सर्वभावानां विश्वतैजसप्राज्ञभेदानां प्रभव उत्पत्तिः । वक्ष्यति च—"वन्ध्यापुत्रो न

+ भोज्यं भक्ष्य इति सूत्रानुसारेणायमेव पाठः समीचीन इति भाति ।

१ ङ. ह्म. त्रिधा । २ ख. घ. ङ. ज. ञ. ट. °द्भोज्यं भो° । ३ ह्म. भोग्यस्य । ४ घ. °र्थप° । ५ घ. °मू । तद्भोक्तु° । ६ घ. ङ. ज. °क्तं च त° । ७ घ. ङ. °ते चामि° ।

तत्त्वेन मायया वाऽपि जायते " इति । यदि ह्यसतामेव जन्म स्याद्ब्रह्मणो व्यवहार्यस्य ग्रहणद्वाराभावादसत्त्वप्रसङ्गः । दृष्टं च रज्जुसर्पादीनामविद्याकृतमायाबीजोत्पन्नानां रज्ज्वाद्यात्मना सत्त्वम् । न हि निरास्पदा रज्जुसर्पमृगतृष्णिकादयः क्वचिदुपलभ्यन्ते केनचित् । यथा रज्ज्वां प्राक्सर्पोत्पत्तेः रज्ज्वात्मना सर्पः सन्नेवाऽऽसीत् । एवं सर्वभावानामुत्पत्तेः प्राक्प्राणबीजात्मनैव सत्त्वम् । इत्यतः श्रुतिरपि वक्ति—" ब्रह्मैवेदम् " " आत्मैवेदमग्र आसीत् " इति । सर्वं जनयति प्राणश्चेतोंशूनंशव इव रवेश्चिदात्मकस्य पुरुषस्य चेतोरूपा जलार्कसमाः प्राज्ञतैजसविश्वभेदेन देवतिर्यगादिदेहभेदेषु विभाव्यमानाश्चेतोंशवो ये तान्पुरुषः पृथग्विषयभावविलक्षणानग्निर्विस्फुलिङ्गवत्सलक्षणाञ्जलार्कवच्च जीवलक्षणांस्त्वत्तरान्सर्वभावान्प्राणो बीजात्मा जनयति यथोर्णनाभिः । " यथाऽग्नेर्विस्फुलिङ्गाः " इत्यादिश्रुतेः ॥ ६ ॥

एष योनिरित्यत्र प्राज्ञस्य प्रपञ्चकारणत्वं प्रतिज्ञातं तत्र सत्कार्यमसत्कार्यं प्रति वा कारणत्वमिति संदेहे निर्धारयितुमारभते—प्रभव इति । तत्रावान्तरभेदमाह—सर्वमिति । पुरुषो हि सर्वमचेतनं जगदुपाधिभूतं तमःप्रधानं गृहीत्वा जनयति । अत एव पुरुषे कारणत्वादि प्राणपदं प्रयुज्यते । एवं स च चैतन्यप्रधानश्चेतसश्चैतन्यस्यांशुवदवस्थितान्प्रतिबिम्बकल्पाञ्जीवानाभासभूतानुत्पादयति । एवं चेतनाचेतनात्मकमशेषं जगदसंकीर्णं संपादयतीत्यर्थः । ननु सतां भावानां सत्त्वादेव प्रभवो न संभवत्यतिप्रसङ्गादित्याशङ्क्य पूर्वार्धं व्याचष्टे—सतामिति । स्वेनाधिष्ठानात्मना विद्यमानानामेवाविद्याकृतं मायामयमारोपितस्वरूपं तेन प्रभवः संभवतीत्यर्थः । असज्जन्मनिरसनमन्तरेण कथं सज्जन्म निर्धारयितुं शक्यमित्याशङ्क्याऽऽह—वक्ष्यतीति । जन्मनः पूर्वं सर्वस्य सत्त्वे च कारणव्यापारसाध्यत्वासिद्धेर्मिथ्यात्वे च कथं सतामेव प्रभवो भावानामित्याशङ्क्याऽऽह—यदीति । कार्यप्रपञ्चस्यासत्त्वे कारणस्य ब्रह्मणः स्वारस्येन व्यवहार्यत्वाभावात्तस्य ग्रहणे द्वारभूतस्य लिङ्गस्याभावादसत्त्वमेव सिध्येत् । कार्येण हि लिङ्गेन कारणं ब्रह्मादृष्टमपि सदित्येव गम्यते । तच्चेदसद्भवेन्न तस्य कारणेन संबन्धधीरित्यसदेव कारणमपि स्यादित्यर्थः । कार्यकारणयोरुभयोरपि भवत्वसत्त्वमित्याशङ्क्याऽऽह—दृष्टं चेति । अविद्यया ऽनाद्यनिर्वाच्यया कृताश्च ते मायाबीजादुत्पन्नाश्च तेषामविद्यैव मायेत्यङ्गीकारात्तेषां रज्ज्वादौ कल्पितसर्पादीनामधिष्ठान-

---

१ झ. सर्वेषां भा° । २ झ विभज्यमा° । ३ झ. °थक्सृजति विष° । ४ च. °वज्जी° । ५ घ. ङ. छ. °क्षणानितरांस्तु सर्व° । ६ ख. घ ङ. ज झ. °थाऽग्नेः क्षुद्रा विस्फु° । ७ ग. छ. झ. °ते । सं° । ८ घ ज झ. °पितं स्व° । ९ ज. झ. °र्वस° । १० छ. 'रकल्या' । ११ क. ख. °ध्ये क° ।

भूतरज्ज्वादिरूपेण सत्त्वं दृष्टमिति योजना । विमतं सदुपादानं काल्पितत्वाद्रज्जुसर्पवदित्यर्थः । दृष्टान्तस्य साध्यविकलत्वं शङ्कित्वा परिहरति— न हीति । विवक्षितं दृष्टान्तमनूद्य दार्ष्टान्तिकमाह—यथेत्यादिना । प्राणशब्दितं बीजमज्ञातं ब्रह्म सल्लक्षणं तदात्मनेति यावत् । तदेवमचेतनं सर्वं जगत्प्रागुत्पत्तेर्बीजात्मना स्थितं प्राणो बीजात्मा व्यवहारयोग्यतया जनयतीत्युपसंहरति—इत्यत इति । चतुर्थं पादं प्रतीकमादाय व्याकरोति—चेतोंशूनित्यादिना । रवेरंशवो यथा वर्तन्ते तथा पुरुषस्य स्वयंचैतन्यात्मकस्य चेतोरूपाश्चैतन्याभासाः जीवाश्चेतोंशवो निर्दिश्यन्ते । तान्पुरुषो जनयतीत्युत्तरत्र संबन्धः । तेषां चिदात्मकात्पुरुषात्तत्त्वतो भेदाभावं विवक्षित्वा विशिनष्टि— जलार्केति । भेदधीस्तु तेषामुपाधिभेदादित्याह — प्राज्ञेति । पृथगिति सूचितं पुरुषस्य जीवसर्जने हेतुं कथयति—विषयेति । यथाऽग्निना समानरूपा विस्फुलिङ्गा जन्यन्ते तथा चिदात्मना समानस्वभावा जीवास्तेनोत्पाद्यन्ते । विषयविलक्षणत्वात् । न प्राणेन बीजात्मना तेषामुत्पादनम् । न चोत्पाद्यानां जीवानामुत्पादकाच्चिदात्मनस्तत्त्वतो भिन्नत्वम् । जलपात्रप्रतिबिम्बितादित्यादीनां बिम्बभूतात्ततस्तत्त्वतो भेदाभावात्तान्विश्वादीन्पुरुषश्चित्प्रधानो जनयतीत्यर्थः । विषयभावेन व्यवस्थितान्पुनर्भावान्प्राणो जनयतीति तृतीयपादार्थमुपसंहरति—इतरानिति ॥ ६ ॥

विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥ ७ ॥

विभूतिर्विस्तार ईश्वरस्य सृष्टिरिति सृष्टिचिन्तका मन्यन्ते न तु परमार्थचिन्तकानां सृष्टेरादर इत्यर्थः । " इन्द्रो मायाभिः पुरुरूप ईयते " इति श्रुतेः । न हि मायाविनं सूत्रमाकाशे निक्षिप्य तेन सायुधमारुह्य चक्षुर्गोचरतामतीत्य युद्धेन खण्डशश्छिन्नं पतितं पुनरुत्थितं च पश्यतां तत्कृतमायादिसतत्त्वचिन्तायामादरो भवति । तथैवायं मायावेनः सूत्रप्रसारणसमः सुषुप्तस्वप्नादिविकाससस्तदारूढमायाविसमश्च तत्स्थः प्राज्ञतैजसादिः सूत्रतदारूढाभ्यामन्यः परमार्थमायावी । स एव भूमिष्ठो मायाच्छन्नोऽदृश्यमान एव स्थितो यथा तथा तुरीयाख्यं परमार्थतत्त्वम् । अतस्तच्चिन्तायामेवाऽऽदरो मुमुक्षूणामार्याणां न निष्प्रयोजनायां सृष्टावादर इत्यतः सृष्टिचिन्तकानामेवैते विकल्पा

---

१ क. ग. °कल्पत्वं । २ क. °तुर्थपादप्र° । ३ क. °साश्चे° । ४ ग. झ. °रसं° । ५ क. °षात्पुरुषतत्त्व° । ६ ख. °वास्ते° । ७ ज. °नोत्पाद्य° । ८ क. ख. °स्ततो । ९ क. च. झ. °वास्वरू° । १० क. इत्यादिश्रु° । ११ झ. °द्धे रुद्गेन ख° । १२ घ. ज. पातितं । १३ च. °यास° । १४ क. भविष्यति । १५ छ. °काशस्त° । १६ क. तत्स्थप्रा° ।

इत्याह--स्वप्नमायासरूपेति । स्वप्नरूपा मायासरूपा चेति ॥ ७ ॥

चेतनाचेतनात्मकस्य जगतः सर्गे प्रस्तुते स्वमतविवेचनार्थं मतान्तरमुपन्यस्यति-विभूतिं प्रसवामीति । ईश्वरस्य विभूतिर्विस्तारः । स्वकीयैश्वर्यरूपापनं सृष्टिरिति पक्षे सृष्टेर्वस्तुत्वशङ्कायां पक्षान्तरमाह--स्वप्नेति । कुतः सृष्टिचिन्तकानामेतन्मतं तत्त्वं-विदामेव किं न स्यात्तत्राऽऽह--न त्विति । सृष्टेरपि वस्तुत्वाद्वस्तुचिन्तकानामपि तत्राऽऽदरो भविष्यतीत्याशङ्क्याऽऽह--इन्द्र इति । मायामयी सृष्टिरादरविषया न भवतीत्यत्र दृष्टान्तमाह--न हीति । मायादीत्यादिशब्देन तत्कार्यं गृह्यते । दृष्टान्त-निविष्टमर्थं दार्ष्टान्तिके योजयति--तथैवेति । तर्हि परमार्थचिन्तकानां कुत्राऽऽदर इत्याशङ्क्य सदृष्टान्तमुत्तरमाह-सूत्रेत्यादिना । मायाच्छन्नत्वमदृश्यमानत्वे हेतुः । तुरीयाख्यं जाग्रत्स्वप्नसुषुप्तेभ्यो विश्वतैजसप्राज्ञेभ्यश्चातिरिक्तं तदस्पृष्टमिति शेषः । परमार्थतत्त्वचिन्ता हि सम्यग्धीद्वारा फलवती न सृष्टेः । ततः सृष्टावनादरस्तत्त्वनि-ष्ठानामित्याह--नेति । परमार्थचिन्तकानां सृष्टावनादरादपरमार्थनिष्ठानामेव सृष्टौ विशेषचिन्तेत्युक्तेऽर्थे द्वितीयार्धमवतारयति--इत्यत इति । जाग्रद्भूतानामर्थानामेव स्वप्ने प्रथनात्तस्य सत्यत्वं मायायाश्च मण्यादिलक्षणायाः सत्यत्वाङ्गीकारादनयोर्वि-कल्पयोः सिद्धान्ताद्वैषम्यमुन्नेयम् ॥ ७ ॥

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥ ८ ॥

इच्छामात्रं प्रभोः सत्यसंकल्पत्वात्सृष्टिर्घटादिः संकल्पनामात्रं न संकल्प-नातिरिक्तम् । कालादेव सृष्टिरिति केचित् ॥ ८ ॥

सृष्टिचिन्तकानामेव सृष्टिविषये विकल्पान्तरमुत्थापयति-इच्छामात्रमिति । ज्योति-र्विदां कल्पनाप्रकारमाह--कालादिति । परमेश्वरस्येच्छामात्रं सृष्टिरित्यत्र हेतुमाह--सत्येति । यथा लोके कुलालादेः संकल्पनामात्रं घटादिकार्यं न तदतिरेकेण घटादि-कार्यसृष्टिरिष्टा । नामरूपाभ्यामन्तरेव कार्यं संकल्प्य बहिस्तन्निर्माणाभ्युपगमात् । तथा भगवतः सृष्टिः संकल्पनामात्रा न तदतिरिक्ता काचिदस्तीति केषांचिदीश्वरवा-दिनां मतमित्यर्थः ॥ ८ ॥

---

१ च. इत्यत्र आह । २ क. ङ. ञ. °यास्वरू° । ३ क. °प्रस्वरू° । ४ क. °यास्वरू । ५ घ. ङ. ञ. °त्त्वविदेनाम° । ६ घ. ङ. ज. °दरणाद° । ७ ग. छ. ञ. °श्च° मन्त्रादि° । ८ च. ज. °टादिसं° । ९ ग. छ. ञ. °मुपन्यस्याति । १० ग. छ ञ. °रश्चेश्व° । ११ ग. ञ. °ल्पमा° ।

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥ ९ ॥

भोगार्थं क्रीडार्थमिति[1] चान्ये सृष्टिं[2] मन्यन्ते । अनयोः पक्षयोर्दूषणं देवस्यैष स्वभावोऽयमिति । देवस्य स्वभावपक्षमाश्रित्य सर्वेषां वा पक्षाणामाप्तकामस्य का स्पृहेति । नहि रज्ज्वादीनामविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणं[3] शक्यं वक्तुम् ॥ ९ ॥

यथा तथा वाऽस्तु सृष्टिस्तस्यास्तु किं प्रयोजनमित्यत्र विकल्पद्वयमाह[4]—भोगार्थमिति । सिद्धान्तमाह—देवस्येति । कः स्वभावो नामेत्युक्ते नैसर्गिकोऽपरोक्षो मायाशब्दार्थस्तस्येत्याह[5]— अयमिति[6] । सर्वपक्षाणामपवादं सूचयति—आप्तेति । देवस्य परमेश्वरस्य स्वभावः सृष्टिरिति स्वभावपक्षं नैसर्गिकमायाविनिर्मिता सृष्टिरिति मतं सिद्धान्ततयाऽऽश्रित्य चतुर्थपादेन दूषणमुच्यते । पक्षयोरनयोरिति योज्यम् । ईश्वरस्येश्वरत्वख्यापनं[7] सृष्टिरित्येकः पक्षः । स्वप्नरूपा मायास्वरूपा[8] वा सृष्टिरिति पक्षद्वयमीश्वरस्य सत्यसंकल्पस्य सृष्टिरिति पक्षान्तरम् । कालादेव जगतः[9] सृष्टिर्नेश्वरात्[10] । ईश्वरस्तूदासीनः[11] । तत्र विकल्पान्तरं भोगार्थं क्रीडार्थं वा सृष्टिरिति फलगतं च विकल्पद्वयम् । तेषामेतेषां सर्वेषामेव पक्षाणां दूषणं चतुर्थपादेनोक्तमिति पक्षान्तरमाह[12]—सर्वेषामिति । नो खल्वाप्तकामस्य परस्याऽऽत्मनो मायां विना विभूतिख्यापनमुपयुज्यते । न च स्वप्नमायाभ्यां सारूप्यमन्तरेण[13] स्वप्नमायासृष्टिरेष्टुं शक्यते । अवस्तुनोरेव तयोस्तच्छब्दप्रयोगात् । न च परमानन्दस्वभावस्य परस्य विना मायामिच्छा संगच्छते । न हि तस्य स्वतोऽविक्रियस्येच्छादिमत्त्वं युक्तम् । न च मायामन्तरेण भोगक्रीडे तस्योपपद्येते । ततो मायामयी भगवतः सृष्टिरित्यर्थः । यदुक्तं कालात्प्रसूतिं भूतानामिति तत्राऽऽह—नहीति । अधिष्ठानभूतरज्ज्वादीनां स्वभावशब्दितस्वाज्ञानादेव सर्पाद्याभासत्वं तथा परस्य स्वमायाशक्तिवशादाकाशाद्याभासत्वम् । आत्मन आकाशः संभूत[14] इत्यादिश्रुतेः । न तु कालस्य भूतकारणत्वं प्रमाणाभावादित्यर्थः ॥ ९ ॥

चतुर्थः[15] पादः क्रमप्राप्तो वक्तव्य इत्याह[16]—नान्तःप्रज्ञमित्यादिना[17] । सर्व-

---

१ घ. ङ. ज. 'ति च सृ° । झ. °ति सृ° । २ घ. ज. °वस्वं° । ३ ख. °रणत्वं श° । ४ ग. घ. ङ. ज. °मिति तत्र । ५ ग. झ. °स्तथेत्या° । ६ क. ख. ग. छ. झ. ञ. °ति । पूर्वं° । ७ घ. °रस्येश्व° । ८ घ. ङ. झ. °त्वस्य ख्या° । ९ ज. °प्ररू° । १० घ. ङ. ज. °यासरू° । ११ छ. °गत्सृष्टि° । १२ ग. घ. ज. °तं वि° । १३ ग. छ. झ. °न । १४ घ. ट. °ण माया रूपसृष्टेष्टुं । १५ क. ख. इति । १६ ङ, ज. झ. °तुर्थपा° । १७ क. °दि । स° ।

शब्दप्रवृत्तिनिमित्तशून्यत्वात्तस्य शब्दानाभिधेयत्वमिति विशेषप्रतिषेधेनैव च तुरीयं निर्दिदिक्षति। शून्यमेव तर्हि तत्। न। मिथ्याविकल्पस्य निर्निमित्तत्वानुपपत्तेः। न हि रज्जुस्थाणुपुरुषमृगतृष्णिकादिविकल्पाः शुक्तिकारज्जुस्थाणुपरादिव्यतिरेकेणावस्त्वास्पदाः शक्याः कल्पयितुम्।

पादत्रये व्याख्याते व्याख्येयत्वेन क्रमवशात्प्राप्तं चतुर्थं पादं व्याख्यातुमुत्तरग्रन्थप्रवृत्तिरित्याह–चतुर्थ इति। ननु पादत्रयवद्विधिमुखेनैव चतुर्थः पादोऽपि व्याख्यायतां किमिति निषेधमुखेन व्याख्यायते तत्राऽऽह––सर्वेति। सर्वाणि शब्दप्रवृत्तौ निमित्तानि षष्ठीगुणादीनि तैः शून्यत्वात्तुरीयस्य वाच्यत्वायोगान्निषेधद्वारैव तान्निर्देशः संभवतीत्यर्थः। साक्षाद्वाच्यत्वाभावं द्योतयितुं निर्दिदिक्षतीत्युक्तम्। यदि चतुर्थं विधिमुखेन निर्देष्टुं न शक्यं तर्हि शून्यमेव तदापद्येत। तन्निषेधेनैव निर्दिश्यमानत्वात्। तथाविधं नास्त्यर्थवदिति शङ्कते–शून्यमेवेति। न तुरीयस्य शून्यत्वमनुमातुं युक्तम्। विमतं सदधिष्ठानं कल्पितत्वात्। तथाविधरजतादिवदित्यनुमानात्तुरीयस्य सत्त्वसिद्धेरित्युत्तरमाह–तन्नेति। दृष्टान्तं साधयति–न हीति। रजतादीनां सदनुविद्धबुद्धिबोध्यत्वादवस्त्वास्पदत्वायोगात्; तद्वदेव प्राणादिविकल्पानामपि नावस्त्वास्पदत्वं सिध्यतीत्यर्थः।

एवं तर्हि प्राणादिसर्वविकल्पास्पदत्वात्तुरीयस्य शब्दवाच्यत्वमिति न प्रतिषेधैः प्रत्याय्यत्वमुदकाधारादेरिव घटादेः। न प्राणादिविकल्पस्यासत्त्वाच्छुक्तिकादिष्विव रजतादेः। न हि सदसतोः संबन्धः शब्दप्रवृत्तिनिमित्तभावस्तुत्वात्। नापि प्रमाणान्तरविषयत्वं स्वरूपेण गवादिवत्। आत्मनो निरुपाधिकत्वाद्गवादिवन्नापि जातिमत्त्वमद्वितीयेन सामान्यविशेषाभावात्। नापि क्रियावत्त्वं पाचकादिवदविक्रियत्वात्। नापि गुणवत्त्वं नीलादिवन्निर्गुणत्वात्।

यद्यधिष्ठानत्वं तुरीयस्येष्टं तर्हि वाच्यत्वमधिष्ठानत्वादुपटादिवदिति प्रक्रमभङ्गः स्यादिति

---

१ घ. ङ. ज. °त्वात्परस्य°। २ घ. ङ. °व तु°। ३ ख. घ. ङ. ज °क्षिर°। ४ घ. ङ. छ. झ. °तुर्थपा°। ५ ग. °तुर्थपा°। ६ घ. ट. °रैत°। ७ घ. °त्यर्थस्तस्माल्लक्ष्याद्वा°। ङ. °त्यर्थस्तस्मात्साक्षा°। ८ क. ङ. झ. °न न निर्देष्टुं श°। ९ ख. °द्धिप्रबो°। १० च °काद्याधारस्येव। ११ घ. ट. °रवस्तुवि°। १२ क. ङ. झ. °तु। नापि क्रियावत्त्वं पाचकादिवत्। नापि गुणवत्त्वं नीलादिवत्। अतो। १३ झ. °ष्ठानं तु°। १४ छ. झ. °रस्य°। १५ ङ. °त्याधिष्ठानक°।

चोदयति—एवं तर्हीति । किं प्रातिभासिकमधिष्ठानत्वं हेतूकृतं किंवा तात्त्विकम् । नाऽऽद्यः । तस्य तात्त्विकवाच्यत्वासाधकत्वात् । अतात्त्विके तु वाच्यत्वे प्रक्रमो न विरुध्येत । न द्वितीयः । शुक्त्यादिषु कल्पितरजतादेरवस्तुत्ववत्तुरीयेऽपि कल्पितप्राणादेरवस्तुत्वात्तत्प्रतियोगिकाधिष्ठानत्वस्य तात्त्विकत्वायोगादिति दूषयति—न प्राणादीति । किंच वाच्यत्वे तुरीयस्य निरुच्यमाने तत्र शब्दप्रवृत्तौ निमित्तं वक्तव्यम् । तच्च षष्ठी वा रूढिर्वा जातिर्वा क्रिया वा गुणो वेति विकल्प्य प्रथमं प्रत्याह—न हीति । तुरीयातिरिक्तस्यावस्तुत्वात्तस्य तुरीयस्य च वस्तुभूतसंबन्धासिद्धेर्विषयाभावे कुतः षष्ठीत्यर्थः । द्वितीयं दूषयति—नापीति । विशिष्टरूपेण विषयत्वेऽपि स्वरूपेण निरुपाधिकात्मना तदविषयत्वान्नात्र गवादाविव रूढिरवतरतीत्यर्थः । न तृतीयः । गवादाविवाद्वितीये तुरीये सामान्यविशेषभावस्याभिधातुमयोग्यत्वादिति मत्वाऽऽह—गवादिवादिति । न चतुर्थः । पाचकादाविव क्रिये तुरीये क्रियावत्त्वस्य शब्दप्रवृत्तिनिमित्तस्य वक्तुमयुक्तत्वादित्याह—नापि क्रियावत्त्वमिति । न पञ्चमः । उत्पलादौ नीलादिशब्दवन्निर्गुणे तुरीये गुणवत्त्वस्य शब्दप्रवृत्तिनिमित्तस्य वक्तुमयुक्तत्वादित्याह—नापीति ।

अतो नाभिधानेन निर्देशमर्हति । शशविषाणादिसमत्वान्निरर्थकत्वं तर्हि । न । आत्मत्वावगमे तुरीयस्यानात्मतृष्णाव्यावृत्तिहेतुत्वाच्छुक्तिकावगम इव रजततृष्णायाः । न हि तुरीयस्याऽऽत्मत्वावगमे सत्यविद्यातृष्णादिदोषाणां संभवोऽस्ति । न च तुरीयस्याऽऽत्मत्वानवगमे कारणमस्ति । सर्वोपनिषदां तादर्थ्येनोपक्षयात् । "तत्त्वमसि" । "अयमात्मा ब्रह्म" । "तत्सत्यम् । स आत्मा" "यत्साक्षादपरोक्षाद्ब्रह्म" । "स बाह्याभ्यन्तरो ह्यजः," "आत्मैवेदं सर्वम्" इत्यादीनाम् ।

तदेवं तुरीयस्य वाच्यत्वानुमानं शब्दप्रवृत्तिनिमित्तानुपलब्धिबाधितमिति फलितमाह—अत इति । यदि तुरीयस्य नास्ति विशिष्टजात्यादिमत्त्वं तर्हि नरविषाणादिदृष्टेरिव तद्दृष्टेरपि निष्फलत्वम् । विशिष्टजात्यादिमतो राजादेरुपासनस्य फलवत्त्वोपलम्भादिति शङ्कते—शशविषाणादीति । यथा शुक्तिरियमित्यवगमे रजतादिविषयतृष्णा व्यावर्तते तथा तुरीयं ब्रह्माहमित्यात्मत्वेन तुरीयस्य साक्षात्कारे सत्यना म-

---

१ झ. °छानं हे° । २ छ. °रुच्यते । न । ३ ग. झ. तत्र ष° । ४ छ. °त्वात्तुरी° । ५ घ ज. °स्य च । ६ ज. वाविक्रि° । ७ ग. झ. °स्य दर्शयितुम° । ८ घ. ज. °गुणतु° । ९ घ. छ. ज. °मयोग्यत्वा° । १० झ. °यस्य तृष्णादिव्या° । ११ च. °स्यातद्व्या° । १२ घ. ङ. ज. °ष्णानिवृ° । १३ घ. °षादिर्स° । १४ ग. झ. °दिवत्तद्दृष्टे° । १५ घ. छ. ज. °षया तृ° । १६ क. ख. °वर्त्यते ।

विषया तृष्णा व्यवच्छिद्यते । तदेवमात्मत्वेन तुरीयावगमस्य सर्वाकाङ्क्षानिवर्तकत्वादनर्थकत्वशङ्का न युक्तेति परिहरति—नेत्यादिना । तुरीयस्याऽऽत्मत्वावगमे सति सर्वानर्थहेतुतृष्णादिदोषनिवृत्तिलक्षणं फलमुक्तं विद्वदनुभवेन साधयति—न हीति । ननु तुरीयमशेषविशेषशून्यं नाऽऽत्मत्वेनावगन्तुं शक्यते तद्धेत्वभावादिति तत्राऽऽह—न चेति । सर्वोपनिषदामित्युक्तमेवोदाहरणलेशेन दर्शयति—तत्त्वमसीति ।

सोऽयमात्मा परमार्थापरमार्थरूपश्चतुष्पादित्युक्तस्तस्यापरमार्थरूपमविद्याकृतं रज्जुसर्पादिसममुक्तं पादत्रयलक्षणं बीजाङ्कुरस्थानीयम् । अथेदानीमबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाऽऽह—

(उपनिषद्)

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ७ ॥

नान्तःप्रज्ञमित्यादि । नन्वात्मनश्चतुष्पात्त्वं प्रतिज्ञाय पादत्रयकथनेनैव चतुर्थस्यान्तःप्रज्ञादिभ्योऽन्यत्वे सिद्धे नान्तःप्रज्ञमित्यादिप्रतिषेधोऽनर्थकः । न । सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूपप्रतिपत्तिवैत्र्यवस्थस्यैवाऽऽत्मनस्तुरीयत्वेन प्रतिपिपादयिषितत्वात् । तत्त्वमसीतिवत् ।

निषेधमुखेनैव तुरीयस्य प्रतिपादनं न विधिमुखेनेत्युपपाद्य वृत्तानुवादपूर्वकमुत्तरग्रन्थमवतारयति—सोऽयमित्यादिना । बीजाङ्कुरस्थानीयं मिथो हेतुहेतुमद्भावेन व्यवस्थितमित्यर्थः । अबीजात्मकं कार्यकारणविनिर्मुक्तमिति यावत् । तत्र हेतुं सूचयति—परमार्थेति । तस्य विधिमुखेन निर्देशानुपपत्तिं प्रागुक्तामभिप्रेत्याऽऽह—सर्पादीति । किमुत्तरेण ग्रन्थेन तुरीयं प्रतिपाद्यते किंवा तस्य स्थानत्रयवैलक्षण्यं विवक्ष्यते । प्रथमे प्रतिपादकस्य विधानाव्यतिरेकादन्यनिषेधानर्थक्यम् । द्वितीयेऽपि तदानर्थक्यमापद्येत । अनुक्त्यैवोक्तादन्यत्वसिद्धेरिति मन्वानः शङ्कते—नन्विति । न तावत्तुरीयं विधिमुखेन बोध्यम् । तस्य स्वप्रकाशत्वात् । तस्मिन्प्रकाशाद्यनुदयात् । तथाऽपि समारोपितवि-

---

१ क. ग. ङ. °कृत्रु° । २ च. °वदेव व्य° । ३ ब. क. ज. °सिद्धिरि° ।

श्वादिरूपेण प्रतिपन्नं तन्निषेधेन बोध्यते । तदनिषेधे तस्य यथावदप्रथनात् । अतो न निषेधानर्थक्यमिति परिहरति--न सर्पादीति । तुरीयस्य पादत्रयविलक्षणस्यार्थादेव सिद्धावपि जीवात्मनः स्थानत्रयविशिष्टस्य तुरीयं ब्रह्मस्वरूपमिति नोपदेशमन्तरेण सिध्यतीति तुरीयग्रन्थोऽर्थवानित्यर्थः । यथा विधिमुखेन प्रवृत्तेन तत्त्वमसीति वाक्येन स्थानत्रयसाक्षिणस्त्वंपदलक्ष्यस्य तत्पदलक्ष्यब्रह्मता लक्षणया बोध्यते तथा निषेधशास्त्रेणापि तात्पर्यवृत्त्या जीवस्य तुरीयब्रह्मत्वं प्रतिपादयितुं दृष्टान्तमाह--तत्त्वमसीति ।

यदि हि व्यवस्थात्मविलक्षणं तुरीयमन्यत्तत्प्रतिपत्तिद्वाराभावाच्छास्त्रोपदेशानर्थक्यं शून्यतापत्तिर्वा ।

ननु स्थानत्रयविशिष्टस्याऽऽत्मनो नैव तुरीयात्मत्वं तुरीयग्रन्थेन प्रतिपाद्यते । तुरीयस्य विशिष्टाद्विलक्षणत्वेनात्यन्तभिन्नत्वात्तत्राऽऽह—यदि हीति । प्रातिभासिकवैलक्षण्येऽपि विशिष्टोपलक्ष्ययोरात्यन्तिकवैलक्षण्याभावान्न तात्त्विकं तुरीयस्य विशिष्टादन्यत्वम् । अन्यथाऽत्यन्तभिन्नयोर्मिथःसंस्पर्शविरहिणोरुपायोपेयभावायोगात्तुरीयप्रतिपत्तौ विशिष्टस्य द्वारत्वाभावादन्यस्य च तत्प्रतिपत्तिद्वारस्यादर्शनात्तुरीयाप्रतिपत्तिरेव स्यादित्यर्थः । शास्त्रात्तत्प्रतिपत्तिः स्यादिति चेन्नेत्याह—शास्त्रेति । तद्विशिष्टरूपमनूद्य विशेषणांशापोहेन तस्य तुरीयत्वमुपदिशति । भेदे चाऽऽत्यन्तिके तदानर्थक्यान्न शास्त्रात्तत्प्रतिपत्तिरित्यर्थः । मा तर्हि तुरीयप्रतिपत्तिर्भूदिति चेत्तत्राऽऽह— शून्येति । विशिष्टस्यैव प्रतिपत्त्या तुरीयस्याप्रतिपत्तौ प्रतिपन्नस्य विश्वादेर्विशिष्टस्य प्रत्युदस्तत्वादन्यस्य चाप्रतिपन्नत्वान्नैरात्म्यधीरेवाऽऽपद्येतेत्यर्थः ।

रज्जुरिव सर्पादिभिर्विकल्प्यमाना स्थानत्रयेऽप्यात्मैक एवान्तःप्रज्ञादित्वेन विकल्प्यते यदा तदाऽन्तःप्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेवाऽऽमन्यनर्थप्रपञ्चनिवृत्तिलक्षणं फलं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम् ।

भेदपक्षश्चेद्यथोक्तदोषशान्न संभवति तर्हि मा भूत् । अभेदपक्षोऽपि कथं निर्वहतीति चेत्तत्र किं फलं पर्यनुयुज्यते किंवा प्रमाणान्तरमथवा साधनान्तरमिति विकल्प्याऽऽद्यं दूषयति—रज्जुरिवेति । यथा रज्जुरधिष्ठानभूतसर्पधारादिभिर्विकल्प्यते तथैक एवाऽऽत्मा स्थानत्रयेऽपि यदाऽन्तःप्रज्ञत्वादिना विकल्प्यमानो बहुधा भासते

---

१ ज. °यं रू° । २ घ. ङ. ज. °मुखप्र° । ३ ग. °र्शनवि° । ४ ख. छ. °व । शा° । ५ घ. ङ. च. °प्तम° । ६ क. °र्भूयादि° । ७ घ. छ. ज. ट. °कल्पमा° । ८ घ. ङ. च. ज. °श्रय आत्मै° । ९ ट. कल्पते । १० ङ. च. ज. झ. °क्षणं फ° ।

तदा तदनुवादेनान्तःप्रज्ञत्वादिप्रतिषेधजनितं यत्प्रमाणरूपविज्ञानं तदुत्पत्तिसमानकालमेवाऽऽत्मन्यनर्थनिवृत्तिरूपं फलं सिद्धमिति न फलपर्यनुयोगोऽवकाशवानित्यर्थः। शब्दस्य संसृष्टपरोक्षज्ञानहेतोरसंसृष्टापरोक्षज्ञानहेतुत्वायोगात्तुरीयज्ञाने प्रमाणान्तरमेष्टव्यमिति पक्षं प्रत्याह-तुरीयेति । तस्य हि साक्षात्कारे न शब्दातिरिक्तं प्रमाणमन्वेष्टव्यम् । शब्दस्य विषयानुसारेण प्रमाहेतुत्वात् । विषयस्य तुरीयस्यासंसृष्टापरोक्षत्वादित्यर्थः । तुरीयसाक्षात्कारे प्रसंख्यानाख्यं साधनान्तरमेष्टव्यमिति पक्षं प्रतिक्षिपति— साधनान्तरं वेति । प्रसंख्यानस्याप्रमाणत्वान्न प्रमारूपसाक्षात्कारं प्रति हेतुतेति भावः ।

रज्जुसर्पविवेकसमकाल इव रज्ज्वां सर्पनिवृत्तिफले सति रज्ज्वधिगमस्य येषां पुनस्तमोपनयव्यतिरेकेण घटाधिगमे प्रमाणं व्याप्रियते तेषां छेद्यावयवसंबन्धवियोगव्यतिरेकेणान्यतरावयवेऽपि च्छिदिर्व्यापियत इत्युक्तं स्यात् ।

यथा रज्जुरियं सर्पो नेति विवेकधीसमुदयदशायामेव रज्ज्वां सर्पनिवृत्तिफले सिद्धे रज्जुसाक्षात्कारस्य फलान्तरं प्रमाणान्तरं साधनान्तरं वा न मृग्यते बलवत्त्वात्तथेहापीत्याह—रज्ज्वामिति । विषयगतं प्राकट्यं प्रमाणफलं नाध्यस्तनिवृत्तिरित्याशङ्क्याऽऽह-येषामिति । स्वविषयाज्ञानापनयनाय प्रवृत्ता प्रमाणक्रिया स्वविषये भावरूपमतिशयमाधत्ते चेदपनयार्थक्रियात्वाविशेषाच्छिदिरपि च्छेद्यसंयोगापनयनातिरिक्तमतिशयमादधात्। न च संयोगविनाशातिरिक्ते विभागे संप्रतिपत्तिरस्ति । प्राकट्यस्य च प्रकाशत्वे ज्ञानवन्नार्थनिष्ठत्वमप्रकाशत्वे तेनार्थेन नार्थोऽस्तीति भावः ।

यदा पुनर्घटतमसोर्विवेककरणे प्रवृत्तं प्रमाणमनुपादित्सिततमोनिवृत्तिफलावसानं छिदिरिव च्छेद्यावयवसंबन्धविवेककरणे प्रवृत्ता तदवयवद्वैधीभावफलावसाना तदा नाऽऽन्तरीयकं घटविज्ञानं न तत्प्रमाणफलम् ।

अज्ञाननिवर्तकमेव प्रमाणमिति पक्षे विषयस्फुरणे कारणाभावाद्विषयसंवेदनं न

---

१ ज. दिनिषे° । २ क. घ. छ. ट. °रूपं वि° । ३ ख. ग. °त्पत्त्या स° । ४ ङ. °समका° । ५ ग. झ. °वाऽऽत्मान° । ६ झ °न्तरं प्रष्ट° । ७ क. °रिक्तप्र° । ८ घ. ङ. ज. °न्वेष्टव्यम् । ९ क. ग. °माणहे° । १० ग. झ. °न्तरं प्रष्ट° । ११ ज. °रमन्वेष्ट° । १२ छ. प्राक्षि° । १३ क. °रूपं प्र° । १४ घ. ङ. ज. °ते तर्हि ते° । १५ ग. छ. सर्पादिनि° । १६ घ ज. °नयाय । १७ । ङ. ज. °नयाति° । १८ झ. °यप्राशस्त्यं द° . १९ क. °त्वे स्यात्तेना° । २० घ. °वृत्तम° । २१ क. छ. °तमसो नि° । २२ ख. घ. ज. 'विभेदत्व° ।

स्यादित्याशङ्क्याऽऽह—यदेति । घटो हि तमसा समावृतो व्यवहारायोग्यस्तिष्ठति तस्य तमसो निष्कम्य व्यवहारयोग्यत्वापादने प्रत्यक्षादिप्रमाणं प्रवर्तते । तच्चानुपादित्सितस्यानिष्टस्याप्रमेयस्य तमसो निवृत्तिलक्षणे यदा पर्यवस्यति तदा घटसंवेदनमार्थिकं प्रमाणफलं न भवति । यथा छिदिक्रिया छेद्यस्य तरोरवयवयोर्मिथः संयोगनिरसने प्रवृत्ता सती तयोरेव च्छेद्यावयवयोर्द्वैधीभावे फले पर्यवस्यति न त्वन्यतरावयवेऽपि च्छिदिर्व्याप्रियते तथेहापि तमोनिवृत्तौ प्रमाणं निर्वृणोति । घटस्फुरणं त्वार्थिकम् । न च तस्य स्थायित्वमभिज्ञकप्रमातृव्यापारस्थास्थिरत्वादित्यर्थः ।

न च तद्दृष्ट्यात्मन्यध्यारोपितान्तःप्रज्ञत्वादिविवेककरणे प्रवृत्तस्य प्रतिषेधविज्ञानेनप्रमाणस्यानुपादित्सितान्तःप्रज्ञत्वादिनिवृत्तिव्यतिरेकेण तुरीये व्यापारोपपत्तिः । अन्तःप्रज्ञत्वादिनिवृत्तिसमकालमेव प्रमातृत्वादिभेदनिवृत्तेः । तथा च वक्ष्यति—" ज्ञाते द्वैतं न विद्यते " इति । ज्ञानस्य द्वैतनिवृत्तिक्षणव्यतिरेकेण क्षणान्तरानवस्थानात् ।। अवस्थाने चानवस्थाप्रसङ्गाद्द्वैतानिवृत्तिः ।

किंच घटादेर्जडस्य संविदपेक्षत्वात्तत्र संविदो मानफलत्वेऽपि नाऽऽत्मन्यजडे संविदेकताने मानस्याऽऽरोपितधर्मनिवर्तकत्वमन्तरेण संविज्जनकत्वव्यापारः संभवतीत्याह—न चेति । तुरीयात्मनि संवेदनजनेनव्यापारो न प्रमाणस्य प्रकल्प्यते । तस्य संविदात्मकत्वादारोपितनिवृत्तिव्यतिरेकेण मानजन्यफलंसंविदनपेक्षत्वादित्युक्तम् । तत्रैव हेत्वन्तरमाह—अन्तःप्रज्ञत्वादीति । आश्रयाभावेनाऽऽश्रितप्रमाणाभावादनन्तरक्षणे तस्य व्यापारानुपपत्तिरित्यत्र वाक्यशेषमनुकूलयति—तथा चेति । किंच ज्ञानाधीनद्वैतनिवृत्त्यवच्छिन्नक्षणातिरेकेण न क्षणान्तरे ज्ञानं स्थातुं पारयति नचास्थिरं ज्ञानं व्यापाराय पर्याप्तम् । तथा च ज्ञानस्य द्वैतनिवृत्तिव्यतिरेकेण नाऽऽत्मनि व्यापारोऽस्तीत्याह— ज्ञानस्येति । ननु ज्ञानं द्वैतनिवर्तकमपि न स्वात्मानं निवर्तयति । निवर्त्यनिवर्तकभावस्यैकत्र विरोधात् । अतो यावन्निवर्तकं स्थास्यति तावाऽऽह—अवस्थाने चेति । निवर्तकस्य ज्ञानस्य द्वैतनिवृत्तेरनन्तरमपि निवर्तकान्तरमपेक्ष्यावस्थाने च तस्य तस्य निवर्तकान्तरैरप्यपेक्षत्वादाद्यस्यापि विज्ञानस्य निवर्तकत्वासिद्धिः । न च ज्ञानस्य स्वनिवर्तकत्वानुपपत्तिः स्वपरविरोधिनां भावानां बहुलमुपलम्भादित्यर्थः ।

१ ख. ज्ञ. तत्रानु° । २ ज्ञ. °दत्राप्या° । ३ न. °स्य निषे° । ४ छ. °नस्य प्र° । ५ घ. °रीयव्या° । ६ छ. °नकव्या° । ७ ज. °स्य क° । ८ ग. °त्मत्वा° । ९ ख. °लस्य सं° । १० छ. ज. °संवेद° । ११ क. न. ज्ञा° । १२ घ क. ज. °ने त° । १३ ज्ञ. °स्य नि° । १४ ख. घ. ट. °रसंव्या° । ग. ज. ङ. छ. ज. °रसव्य° । १५ ग. °त्वादनवस्थाऽन्त्यस्य स्वनिवर्त(क)त्वाङ्गीकारे विज्ञानत्वाविशेषादाद्यस्यापि विज्ञानस्य निवर्तकत्वसिद्धिः । १६ ख. ग. छ. ज्ञ. °बहूनामु° ।

तस्मात्प्रतिषेधविज्ञानप्रमाणव्यापारसमकालैवाऽऽत्मन्यध्यारोपितान्तःप्रज्ञ-त्वादिअनर्थनिवृत्तिरिति सिद्धम् । नान्तःप्रज्ञमिति तैजसप्रतिषेधः । न बहिष्प्र-ज्ञमिति विश्वप्रतिषेधः । नोभयतःप्रज्ञमिति जाग्रत्स्वप्नयोरन्तराले[1]ऽवस्थाप्र-तिषेधः । न प्रज्ञानघनमिति सुषुप्तावस्थाप्रतिषेधः । बीजभावाविवेकरूपत्वात् । न प्रज्ञमिति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः । नाप्रज्ञमित्यचैतन्यप्रतिषेधः ।

ज्ञानस्य जन्मातिरिक्तव्यापाराभावात्तज्जन्मनश्च द्वैतनिषेधेनै[2]वोपक्षयात्क्षणान्तरे विषयस्फुरणजननायानवस्थानादारोपितात्तद्धर्मानिवृत्त्यैव ज्ञानं पर्यवसितमित्युपसंहरति—तस्मादिति । प्रतिषेधजनितं[3] विज्ञानमेव प्रमाणम् । तस्य व्यापारो जन्मैव । तेन समानकालैवानर्थनिवृत्तिरिति योजना । तत्र हेतुमाह—बीजभावेति । सुषुप्तं हि स्वप्नजा-गरिते प्रति बीजभावस्तस्याशेषविशेषविज्ञानाभावरूपत्वाद्विशेषैर्विज्ञानानां सर्वेषां घनमेकं साधारणमविभक्तं सुषुप्तमिति तत्प्रतिषेधो नेत्यादिना संभवतीत्यर्थः ।

कथं पुनरन्तःप्रज्ञत्वादीनामात्मनि गम्यमानानां रज्ज्वादौ सर्पादिवत्प्रति-षेधादसत्त्वं गम्यत इत्युच्यते । ब्रह्मस्वरूपाविशेषेऽपीतरेतरव्यभिचाराद्रज्ज्वा-दाविव सर्पधारादिविकल्पितभेदवत्सर्वत्राव्यभिचाराज्ज्ञस्वरूपस्य सत्यत्वं सुषुप्ते व्यभिचरतीति चेन्न । सुषुप्तस्यानुभूयमानत्वात् । " न हि विज्ञातु-र्विज्ञातेर्विपरिलोपो विद्यते " इति श्रुतेः ।

युक्तं सर्पादीनां रज्ज्वादौ भ्रान्तिप्रतिपन्नानां प्रतिषेधादसत्त्वम् । आत्मनि तु प्रमा[4]णेन गम्यमानानामन्तःप्रज्ञत्वादीनां न प्रतिषेधो युज्यते मानविरोधादिति शङ्क-ते—कथमिति । प्रामाणिकत्वस्यासिद्धत्वाद्युक्तमन्तःप्रज्ञत्वादीनाममत्यत्वमिति परिह-रति—उच्यत इति । विमतमसत्यं व्यभिचारित्वात्संप्रतिपन्नवदित्याह—ज्ञस्व-रूपेति । तस्याविशेषोऽव्यभिचारस्तत्र रज्ज्वादाविवेत्युदाहरणम् । अन्तःप्रज्ञत्वादी-नामितरेतरव्यभिचारे निदर्शनं सर्पधारादीति । विमतं सत्यमव्यभिचारित्वाद्रज्ज्वादि-वदित्याह—सर्वत्रेति । तस्य च सत्यत्वे सर्वकल्पनाधिष्ठानत्वसिद्धिरिति भावः । अव्यभिचारित्वहेतोरसिद्धिं शङ्कते—सुषुप्त इति । न तत्र चैतन्यस्य व्यभिचारः सुषुप्तस्य स्फुरणव्याप्ततया साधकस्फुरणस्याऽऽवश्यकत्वादित्याह—न सुषुप्तस्येति । सुषुप्ते साधकस्फुरणस्य सत्त्वे प्रमाणमाह—न हीति ।

---

१ क. ख. °ऽवस्थे° । २ ग. ङ. °षेधनेनै° । ३ घ. ङ. छ. ज. °नितवि° । ४ ग. °ज्ञा° । ५ क. ख. °ति च ध्रु° । ६ ग. ङ. °माणग° । ७ ङ. °णेनोपग° । ८ ग. छ. ज. °ते प्रमाणवि° । ९ ङ. °सत्त्वं व्य° ।

अत एवादृष्टम् । यस्माददृष्टं तस्मादव्यवहार्यम् । अग्राह्यं कर्मेन्द्रियैः । अलक्षणमलिङ्गमित्येतदननुमेयमित्यर्थः । अत एवाचिन्त्यम् । अत एवाव्यपदेश्यं शब्दैः । एकात्मप्रत्ययसारं जाग्रदादिस्थानेष्वेकोऽयमात्मेत्यव्यभिचारी यः प्रत्ययस्तेनानुसरणीयम् ।

निषेधशास्त्रालोचनया निर्विशेषत्वं तुरीयस्योक्तं तदेव हेतूकृत्य ज्ञानेन्द्रियाविषयत्वमाह—अत एवेति । दृष्टस्यैवार्थक्रियादर्शनादृष्टत्वादर्थक्रियारहित्यमिति विशेषणान्तरमाह—यस्मादिति । अदृष्टमित्यनेनाग्राह्यमित्यस्य पौनरुक्त्यं परिहरति—कर्मेन्द्रियैरिति । अलक्षणमित्ययुक्तम् । सत्यं ज्ञानमनन्तमित्यादिलक्षणोपलम्भादित्याशङ्क्याऽऽह —अलिङ्गमिति । को ह्येवान्यात्कः प्राण्यादित्यादिलिङ्गोपन्यासविरुद्धमेतदित्याशङ्क्याऽऽह—अननुमेयमिति । प्रत्यक्षानुमानाविषयत्वमयुक्तं विशेषणान्तरमाह—अत एवेति । मनोविषयत्वाभावादेव शब्दाविषयत्वम् । शब्दप्रवृत्तेस्तत्प्रवृत्तिपूर्वकत्वादित्याह—अत एवेति । तर्हि यथोक्तं वस्तु नास्त्येव प्रमाणाभावादित्याशङ्क्याऽऽह—एकात्मेति ।

अथ वैक आत्मप्रत्ययः सारं प्रमाणं यस्य तुरीयस्याधिगमे तत्तुरीयमेकात्मप्रत्ययसारम् । "आत्मेत्येवोपासीत" इति श्रुतेः ।

परोक्षार्थविषयतया विशेषणं व्याख्यायापरोक्षार्थतयाऽपि व्याकरोति—अथवेति । अपरोक्षात्मप्रत्ययस्याऽऽत्मनि प्रमाणत्वे बृहदारण्यकश्रुतिमुदाहरति—आत्मेत्येवेति । यच्चाऽऽप्नोतीत्यादिना परिपूर्णत्वादिलक्षणस्तावदात्मोक्तः स च वाङ्मनसातीतः श्रुतिभ्योऽवगतस्तमेवैकरसं परमात्मानं प्रत्यक्त्वेन गृहीत्वा तन्निष्ठस्तिष्ठतीत्यात्मनोऽवस्थात्रयातीतस्य तुरीयस्यापरोक्षनित्यदृष्टित्वं श्रुतितो दृष्टमित्यर्थः ।

अन्तःप्रज्ञत्वादिस्थानिधर्मा(र्म)प्रतिषेधः कृतः । प्रपञ्चोपशमामिति जाग्रदादिस्थानधर्माभाव उच्यते । अत एव शान्तं शिवं यतोऽद्वैतं भेदविकल्परहितं चतुर्थं तुरीयं मन्यन्ते । प्रतीयमानपादत्रयैरूपवैलक्षण्यात् । स आत्मा स विज्ञेय इति प्रतीयमानसर्पभूछिद्रदण्डादिव्यतिरिक्ता यथा रज्जुस्तथा तत्त्वमसीत्यादिवाक्यार्थ आत्माऽदृष्टो द्रष्टा "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इत्यादिभिरुक्तो यः स विज्ञेय इति भूतपूर्वगत्या ज्ञाते द्वैताभावः ॥ ७ ॥

विशेषणान्तरस्य पुनरुक्तिं परिहरन्नर्थभेदमाह—अन्तरिति । स्थानिधर्माय स्थान-

---

१ क. ख. °या व्या° । २ घ. ङ. ज. °श्रुतिं प्रमाणयति । ३ क. शान्तमविक्रियं शि° । ४ छ. °यवै° । ५ च. °दिश्रुतिभि° ।

धर्मस्य च प्रतिषेधोऽन्तः(तः)शब्देन परामृश्यते । शान्तं रागद्वेषादिरहितमविक्रियं कूटस्थमित्यर्थः । शिवं परिशुद्धं परमानन्दबोधरूपमिति यावत् । यस्मादद्वैतभावोपलक्षितं तस्माच्चतुर्थमित्याह—यत इति । अद्वैतमित्येतद्व्याचष्टे—भेदेति । संख्याविशेषविषयत्वाभावे कथं चतुर्थत्वमित्याशङ्क्याऽऽह—प्रतीयमानेति । चतुर्थतुरीययोर्व्याख्यानव्याख्येयत्वेनापौनरुक्त्यं तस्योक्तविशेषणत्वेऽपि मम किमायातमित्याशङ्क्याऽऽह—स आत्मेति । आत्मनि यथोक्तविशेषणानि न प्रतिभान्तीत्याशङ्क्याऽऽह—स विज्ञेय इति । तदेव व्याचष्टे—प्रतीयमानेति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादिवाक्ये प्रतीकोपादानेन दर्शयति—न हि द्रष्टुरिति । आत्मन्यव्यवहार्ये कुतो विज्ञेयत्वमित्याशङ्क्य भूतपूर्वमविद्यावस्थायां या ज्ञेयत्वाख्याऽवगतिस्तयेदानीमपि विज्ञेयत्वमुक्तमित्याह—भूतेति । विद्यावस्थायामेव किमिति ज्ञातृज्ञानज्ञेयविभागो न भवति तत्राऽऽह—ज्ञात इति । ज्ञानेन तत्कारणस्याज्ञानस्यापनीतत्वादित्यर्थः ॥ ७ ॥

अत्रैते श्लोका भवन्ति—

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ १० ॥

प्राज्ञतैजसविश्वलक्षणानां सर्वदुःखानां निवृत्तेरीशानस्तुरीय आत्मा । ईशान इत्यस्य पदस्य व्याख्यानं प्रभुरिति । दुःखनिवृत्तिं प्रति प्रभुर्भवतीत्यर्थः । तद्विज्ञाननिमित्तत्वाद्दुःखनिवृत्तेः । अव्ययो न व्येति स्वरूपान्न व्यभिचरतीति यावत् । एतत्कुतः । यस्मादद्वैतः सर्वभावानां रज्जुसर्पवन्मृषात्वात्स एष देवो द्योतनात्तुरीयश्चतुर्थो विभुर्व्याप्तेः स्मृतः ॥ १० ॥

नान्तःप्रज्ञत्वादिति(मित्यादि)श्रुत्युक्तेऽर्थे तद्विवरणरूपाञ्श्लोकानवतारयति—अत्रेति । विविधं स्थानत्रयमस्माद्भवतीति व्युत्पत्त्या तुरीयो विभुरुच्यते । न हि तुरीयातिरेकेण स्थानत्रयमात्मानं धारयति । सर्वदुःखानामाध्यात्मिकादिभेदभिन्नानां तद्धेतूनां तदाधाराणामिति यावत् । ईशानपदं प्रयुज्य प्रभुपदं प्रयुञ्जानस्य पौनरुक्त्यमित्याशङ्क्याऽऽह—ईशान इति । तुरीयस्य दुःखनिवृत्तिं प्रति सामर्थ्यस्य नित्यत्वान्न कदाचिदपि दुःखं स्यादित्याशङ्क्याऽऽह—तद्विज्ञानेति । संसृष्टरूपेण व्ययोऽस्तीत्याशङ्क्य विशिनष्टि—स्वरूपादिति । तत्र प्रश्नपूर्वकमद्वितीयत्वे हेतुमाह—एतत्कुत इति । अतो

---

१ ग. ज्ञ. °भक्तिं । २ ग. ज्ञ. °न्दमि° । घ. ङ. °न्दरू° । ३ ज्ञ. °र्थमि° । ४ ङ. च. ज्ञ. प्रभव° । ५ घ. संस्पृष्ट° । ग. ज्ञ. संसृष्टिरू° । ६ ग. ङ. °ह—कुत ।

द्वितीयस्य व्ययहेतोरभावादिति शेषः । विश्वादीनां दृश्यमानत्वात्तुरीयस्याद्वितीयत्वासिद्धिरित्याशङ्क्याऽऽह-सर्वभावानामिति । अवस्थात्रयातीतस्य तुरीयस्योक्तलक्षणत्वं विद्वदनुभवसिद्धमिति सूचयति-स्मृत इति ॥ १० ॥

कार्यकारणबद्धौ तावित्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥ ११ ॥

विश्वादीनां सामान्यविशेषभावौ निरूप्यते तुर्ययाथात्म्यावधारणार्थम् । कार्यं क्रियत इति फलभावः । कारणं करोतीति बीजभावः । तत्त्वाग्रहणान्यथाग्रहणाभ्यां बीजफलभावाभ्यां तौ यथोक्तौ विश्वतैजसौ बद्धौ संगृहीताविष्येते । प्राज्ञस्तु बीजाभावेनैव बद्धः । तत्त्वाप्रतिबोधमात्रमेव हि बीजं प्राज्ञत्वे निमित्तम् । ततो द्वौ तौ बीजफलभावौ तत्त्वाग्रहणान्यथाग्रहणे तुर्ये न सिध्यतो न विद्येते न संभवत इत्यर्थः ॥ ११ ॥

विश्वादिष्ववान्तरविशेषनिरूपणद्वारेण तुरीयमेव निर्धारयति-कार्येति । श्लोकस्य तात्पर्यमाह-विश्वादीनामिति । विश्वतैजसयोरुभयबद्धत्वं सामान्यं प्राज्ञस्य कारणमात्रबद्धत्वं विशेषः । अथेदं निरूपणं कुत्रोपयुज्यते तत्राऽऽह-तुर्येति । प्राज्ञस्य कारणमात्रबद्धत्वं साधयति-तत्त्वाप्रतिबोधेति । त्रयाणामवान्तरविशेषे स्थिते प्रकृते तुरीये किमायातमित्याशङ्क्याऽऽह—तत इति । तयोस्तस्मिन्नविद्यमानत्वं चिदेकताने तयोर्निरूपयितुमशक्यत्वादित्याह—न संभवत इति ॥ ११ ॥

नाऽऽत्मानं न परांश्चैव न सत्यं नापि चानृतम् ।
प्राज्ञः किंचन संवेत्ति तुर्यं सत्सर्वदृक्सदा ॥ १२ ॥

कथं पुनः कारणबद्धत्वं प्राज्ञस्य तुरीये वा तत्त्वाग्रहणान्यथाग्रहणलक्षणौ बन्धौ न सिध्यत इति । यस्मादात्मविलक्षणमविद्याबीजप्रसूतं बाह्यं द्वैतं प्राज्ञो न किंचन संवेत्ति यथा विश्वतैजसौ ततश्चासौ तत्त्वाग्रहणेन तमसाऽन्यथाग्रहणबीजभूतेन बद्धो भवतीति । यस्मात्तुरीयं तत्सर्वदृक्सदा तुरीयादन्यस्याभावात्सर्वदा सदैवेति सर्वं च तद्दृक्चेति सर्वदृक्तस्मान्न तत्त्वाग्रहणलक्षणं बीजम् । तत्र तत्प्रसूतस्यान्यथाग्रहणस्याप्यत एवाभावो न हि सवितरि सदाप्रकाशा-

---

१ क. °स्थानत्र° । २ छ. झ. तुरीयया° । ३ छ. °श्चाद्यवा° । ४ ग. ङ. °भयोरुभय° । ५ ख. °ति तत्राऽऽह-नाऽऽत्मानमिति । य° । ६ झ. °तं वेत्ति प्रा° । ७ ङ. छ. ज. °वतीति ।

त्मके तद्विरुद्धप्रकाशनमन्यथाप्रकाशनं वा संभवति । " न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते " इति श्रुतेः । अथवा जाग्रत्स्वप्नयोः सर्वभूतावस्थः सर्ववस्तुदृगाभासस्तुरीय एवेति सर्वदृक्सदा । " नान्यदतोऽस्ति द्रष्टृ " इत्यादिश्रुतेः ॥ १२ ॥

प्राज्ञस्य कारणबद्धत्वं साधयति–नाऽऽत्मानमिति । तुरीयस्य कार्यकारणाभ्यामसंस्पृष्टत्वं स्पष्टयति–तुर्यमिति । श्लोकव्याव्यर्थमाशङ्कामाह–कथमिति । वाशब्दात्कथमित्यस्यानुवृत्तिः सूच्यते । प्रथमचोद्योत्तरत्वेन पादत्रयं व्याचष्टे–यस्मादिति । विलक्षणमनात्मानमिति यावत् । अनृतमित्यस्य व्याख्यानमविद्याबीजप्रसूतमिति । द्वैतं द्वितीयमसत्यमित्यर्थः । वैधर्म्योदाहरणम्–यथेति । प्राज्ञस्य विभागविज्ञानाभावे फलमाह–ततश्चेति । यथोक्ते तमसि कार्यलिङ्गमनुमानं सूचयति–अन्यथेति । द्वितीयं चोद्यं चतुर्थपाद्व्याख्यानेन प्रत्याख्यास्यति–यस्मादित्यादिना । सदैव तुरीयादन्यस्याभावात्तुरीयमेव सर्वं तच्च सदा दृग्रूपमिति यस्मात्तस्मादिति योजना । तत्रेति । परिपूर्णचिदेकतानं तुरीयं परामृश्यते । अत एवेति । कारणाभावे कार्यानुपपत्तेरित्यर्थः । तुरीये तत्त्वाग्रहणान्यथाग्रहणयोरसंभवं दृष्टान्तेन साधयति–न हीति । यत्तु तुरीयस्य सदा दृगात्मत्वमुक्तं तत्र प्रमाणमाह––न हि द्रष्टुरिति । चतुर्थपादं प्रकारान्तरेण योजयति–अथवेति । तत्रापि श्रुतिमनुकूलयति–नान्यादिति ॥ १२ ॥

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥ १३ ॥

निमित्तान्तरमाशङ्क्य निवृत्त्यर्थोऽयं श्लोकः । कथं द्वैताग्रहणस्य तुल्यत्वात्कारणबद्धत्वं प्राज्ञस्यैव न तुरीयस्येति प्राप्ताऽऽशङ्का निवर्त्यते । यस्माद्बीजनिद्रायुतस्तत्त्वाप्रतिबोधो निद्रा । सैव च विशेषप्रतिबोधप्रसवस्य बीजम् । सा बीजनिद्रा । तया युतः प्राज्ञः । सदा दृक्स्वभावत्वात्तत्त्वाप्रतिबोधलक्षणा निद्रा तुरीये न विद्यते । अतो न कारणवन्त्वस्तस्मिन्नित्यभिप्रायः ॥ १३ ॥

अनुमानप्रयुक्तां तुरीयेऽपि कारणबद्धत्वाशङ्कां परिहरति – द्वैतस्येति । श्लोकस्य तात्पर्यं गृह्णाति–निमित्तान्तरेति । विमतं कारणबद्धं द्वैताग्रहणत्वात्प्राज्ञवदित्यनुमानमेव दर्शयन्निमित्तान्तरमेव स्फोरयति—कथमिति । अनुमानकृताशङ्कानिवर्तकत्वेन

---

१ क. छ. वा भ° । २ क. °संसृष्ट° । ३ घ. ङ. छ. ज. °कस्य व्या° । ४ ग. ङ. छ. ज. झ. °ङ्गकम° । ५ °ञ. ज. °तीयचो° । ६ घ. ङ. °त्याह—य° । ७ च. °तुरी° । ८ झ. °प्राप्तश° । ९ ग. युक्तः प्रा° । १० ग. ङ. छ. झ. °र्थं संगृ° ।

श्लोकमवतारयति—प्राप्नोतीति। प्राङ्मध्योत्तरभाविप्रबोधादिकार्यापेक्षया नियतपूर्वभावित्वं कारणबद्धत्वप्रयोजकम्। न च तुरीयस्य तदस्तीत्यप्रयोजको हेतुरित्याह—यस्मादिति। किंच तुरीयस्यं विशुद्धचिद्धातुत्वप्रसाधनप्रमाणबाधात्कालात्ययापदिष्टो हेतुरित्याह—सदेति। न च पूर्वोक्तोपाधेः साधनव्याप्तिस्तुरीयस्योत्तरभाविकार्यापेक्षया नियतप्राग्भावित्वाभावादिति मत्वाऽऽह—तत्त्वेति। दोषद्वयवत्त्वेनानुमानस्यामानत्वे फलितमाह—अतो नेति॥ १३॥

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः॥ १४॥

स्वप्नोऽन्यथाग्रहणं सर्प इव रज्ज्वाम्। निद्रोक्ता तत्त्वाप्रतिबोधलक्षणं तम इति। ताभ्यां स्वप्ननिद्राभ्यां युक्तौ[1] विश्वतैजसौ। अतस्तौ[2] कार्यकारणबद्धाविति युक्तौ। प्राज्ञस्तु स्वप्नवर्जि[3]तकेवलयैव निद्रया युत इति कारणबद्ध इत्युक्तम्। नोभयं पश्यन्ति तुरीये निश्चिता ब्रह्मविदो विरुद्धत्वात्सवितरीव तमः। अतो न कार्यकारणबद्ध इत्युक्तस्तुरीयः॥ १४॥

कार्यकारणबद्धौ तावित्यादिश्लोकोक्तमर्थमनुभवावष्टम्भेन प्रपञ्चयति—स्वप्नेति। ननु तैजसस्यैव स्वप्नं[4]प्रयुक्तत्वं युक्तं न तु विश्वस्य प्रबुध्यमानस्य तद्योगो युज्यते प्रबुध्यमानत्वव्याघातात्[5]। कथमविशेषेण विश्वतैजसौ स्वप्ननिद्रायुताविति। तत्र स्वप्नशब्दार्थमाह—स्वप्न इति। यथा रज्ज्वां सर्पो गृह्यमाणोऽन्यथा गृह्यते तथाऽऽत्मनि देहादि[6]ग्रहणमन्यथाग्रहणम्। आत्मनो देहादिवैलक्षण्यस्य श्रुतियुक्तिसिद्धत्वात्तेन स्वप्नशब्दितेनान्यथाग्रहणेन संसृष्टत्वं विश्वतैजसयोरविशिष्टमित्यर्थः। तथा निद्राणस्यैव निद्रा युक्ता न तु प्रबोधवतो विश्वस्येत्याशङ्क्याऽऽह—निद्रेति। उक्ताभ्यां स्वप्ननिद्राभ्यां विश्वतैजसयोर्वैशिष्ट्यं निगमयति—ताभ्यामिति। तयोरन्यथाग्रहणेनाग्रहणेन च वैशिष्ट्यं प्रागपि सूचितमित्याशङ्क्याऽऽह—अत इति। द्वितीयं पादं विभजते—प्राज्ञस्त्विति। द्वितीयार्धं व्याचष्टे—नोभयमिति। तुरीये निद्रास्वप्नयोरदर्शने[10] हेतुमाह—विरुद्धत्वादिति। अज्ञानतत्कार्ययोर्नित्यविज्ञप्तिरूपे तुरीये विरुद्धत्वादनुपलब्धिरित्यत्र दृष्टान्तमाह—सवितरीवेति। तुरीये वस्तुतो नाविद्यातत्कार्ययोः संगतिरस्ती[11]त्यङ्गीकृत्य प्रागपि सूचितमित्याह—अतो नेति॥ १४॥

---

१ ग. °स्य शु°। २ च युतौ। ३ झ. अतः का°। ४ च. °तया के°। ५ ग. ङ. ज. झ. °प्रयु°। ६ ग. झ. °त्। तत्र क°। ७ छ. देहेन्द्रियादि°। ८ क. ख. छ. °शिष्टयमुपेत्य प्रा°। ९ घ. °तीयपा°। १० ग. झ. °र्शनहे°। ११ घ. ङ. ज. °स्तीति प्रा°।

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ १५ ॥

कदा तुरीये निश्चितो भवतीत्युच्यते । स्वप्नजागरितयोरन्यथा रज्ज्वां सर्प इव गृह्णतस्तत्त्वं स्वप्नो भवति । निद्रा तत्त्वमजानतस्तिसृष्ववस्थासु तुल्या । स्वप्ननिद्रयोस्तुल्यत्वाद्विश्वतैजसयोरेकराशित्वम् । अन्यथाग्रहणप्राधान्याच्च गुणभूता निद्रेति तस्मिन्विपर्यासः स्वप्नः । तृतीये तु स्थाने तत्त्वाज्ञानलक्षणो निद्रैव केवला विपर्यासः । अतस्तयोः कार्यकारणस्थानयोरन्यथाग्रहणाग्रहणलक्षणाविपर्यासे कार्यकारणबन्धरूपे परमार्थतत्त्वप्रतिबोधतः क्षीणे तुरीयं पदमश्नुते तदोभयलक्षणं बन्धरूपं तत्रापश्यंस्तुरीये निश्चितो भवतीत्यर्थः ॥ १५ ॥

कदा तर्हि स्वप्नो भवतीत्यपेक्षायामाह—अन्यथेति । निद्रा तर्हि कदेति संदिहानं प्रत्याह—निद्रेति । तुरीयप्रतिपत्तिसमयं संगिरते—विपर्यास इति । श्लोकव्यावर्त्यामाकाङ्क्षां दर्शयति—कदेति । कदा स्वप्ननिष्ठो भवति कदा निद्रानिष्ठः स्यादित्यपि द्रष्टव्यम् । प्रश्नत्रयस्योत्तरं श्लोकेन दर्शयति—उच्यत इति । तत्र कदा स्वप्नो भवतीति प्रश्नं परिहरति—स्वप्नेति । अवस्थाद्वये स्वप्नद्रष्टुरित्यर्थः । द्वितीयं प्रश्नं समावत्ते—निद्रेति । विश्वादिषु त्रिषु तयोरिति द्विवचनं कथमित्याशङ्क्याऽऽह—स्वप्ननिद्रयोरिति । विश्वतैजसाभ्यामेको राशिः । प्राज्ञो द्वितीयः । ततः श्लोके द्विवचनमविरुद्धमित्यर्थः । प्रथमे राशौ विपर्यासस्वरूपं कथयति—अन्यथेति । द्वितीये राशौ विपर्यासविशेषं दर्शयति—तृतीये त्विति । द्वितीयार्धगतान्यक्षराणि व्याकरोति—अत इति । द्विवचनस्योपपन्नत्वाद्विपर्यासस्य च विभागेन निर्धारितत्वादित्यर्थः । तृतीयं प्रश्नं प्रतिविधत्ते—तदेति । तत्त्वप्रबोधाद्विपर्यासक्षयावस्थायामित्यर्थः ॥ १५ ॥

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ १६ ॥

योऽयं संसारी जीवः स उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मनाऽन्यथाग्रहणलक्षणेन चानादिकालप्रवृत्तेन मायालक्षणेन स्वप्नेन ममायं

---

१ घ. ङ. ञ. °से द्वयोः । २ ज. °त्वाग्रहणल° । ३ ग. ज. °माशङ्क्षां द° । ४ ङ. छ. °दा वा नि । ५ ख. °रं द° । ६ घ. ङ. ज. झ. ट. द्रष्टरीत्य° । ७ घ. ज. °यः । श्लो° । ८ ग. झ. तीयरा° ।

पिता पुत्रोऽयं नष्टो क्षेत्रं पशवोऽहमेषां स्वामी सुखी दुःखी क्षधितोऽहमनेन वर्धितश्चानेनेत्येवंप्रकारान्स्वप्नान्स्थानद्वयेऽपि पश्यन्सुप्तो यदा वेदान्तार्थतत्त्वाभिज्ञेन परमकारुणिकेन गुरुणा नास्त्येवं त्वं हेतुफलात्मकः किंतु तत्त्वमसीति प्रतिबोध्यमानो यदा तदैवं प्रतिबुध्यते । कथं नास्मिन्बाह्यमाभ्यन्तरं वा जन्मादिभावविकारोऽस्त्यतोऽजं सबाह्याभ्यन्तरसर्वभावविकारवर्जितमित्यर्थः । यस्माज्जन्मादिकारणभूतं नास्मिन्नविद्यातमोबीजं निद्रा विद्यत इत्यनिद्रम् । अनिद्रं हि तत्तुरीयमत एवास्वप्नम् । तन्निमित्तत्वादन्यथाग्रहणस्य । यस्माच्चानिद्रमस्वप्नं तस्मादजमद्वैतं तुरीयमात्मानं बुध्यते तदा ॥ १६ ॥

कदा तत्त्वप्रतिबोधो विपर्यासक्षयहेतुर्भवतीत्यपेक्षायामाह–अनादीति । प्रतिबुध्यमानं तत्त्वमेव विशिनष्टि–अजमिति । जीवशब्दवाच्यमर्थं निर्दिशति–योऽयमिति । परमात्मैव जीवभावमापन्नः संसरतीत्यर्थः । तस्य कथं जीवभावापत्तिरित्याशङ्क्य कार्यकारणबद्धत्वादित्याह–स इति । परमात्मोभयलक्षणेन स्वापेन सुप्तो जीवो भवतीत्यन्वयः । स्वापस्योभयलक्षणत्वमेव प्रकटयति–तत्त्वेत्यादिना । मायालक्षणेनेत्युभयत्र संबध्यते । सुप्तमेव व्यनक्ति–यमेत्यादिना । स्वापपरिगृहीतस्यैव प्रतिबोधनावकाशो भवतीत्याह–यदेति । यदा सुप्तस्तदा बुध्यत इति शेषः । प्रतिबोधकं विशिनष्टि–वेदान्तार्थेति । कथं प्रतिबोधनं तदाह–नासीति । अनुभूयमानत्वमेवमित्युच्यते । यदोक्तविशेषणेन गुरुणा प्रतिबुध्यमानः शिष्यस्तदाऽसावेवं वक्ष्यमाणप्रकारेण प्रतिबुद्धो भवतीत्युक्तम् । तमेव प्रकारं प्रश्नपूर्वकं द्वितीयार्धव्याख्यानेन विशदयति–कथमित्यादिना । अस्मिन्निति सप्तम्या बोध्यात्मरूपं परामृश्यते । बाह्यं कार्यमाभ्यन्तरं कारणं तच्चोभयमिह नास्ति । ततो जन्मादेर्भावविकारस्य नात्रावकाशः संभवतीत्यर्थः । अवतारितं विशेषणं सप्रमाणं योजयति–सबाह्येति । अजत्वादेवानिद्रं कार्याभावे कारणस्य प्रमाणाभावेन वक्तुमशक्यत्वादिति मत्वाऽऽह—यस्मादिति । अनिद्रत्वं हेतुं कृत्वा विशेषणान्तरं दर्शयति–अत एवेति । अग्रहणान्यथाग्रहणसंबन्धवैधुर्यं हेतुं कृत्वा विशेषणद्वयमित्याह—यस्माच्चेति । तत्त्वमेवंलक्षणमस्तु ।

---

१ च °सा ममैतत्क्षेत्रं । २ ज °स्येव हे° । ३ छ. °दैव प्र° । ४ झ. °न्तरो ह्यज इति श्रुतेः स° । ङ. °न्तर इति श्रुतेः स° । ५ घ. ङ. ज. झ °निद्रं हि । ६ ङ. झ. हि तुरी° । ७ छ. °त्वबो° । ८ घ. ङ. ज. °र्थं दर्शयति । ९ छ. °भावाप° । १० ग. छ. झ °नः सन्संस° । ११ घ. संसारीत्य° । १२ क. घ. झ. सुषुप्त° । १३ क. घ. सुषुप्त° । १४ ग. छ. झ. °तिबोध्य° । १५ ङ. °माभ्यन्त° । १६ ज. झ. °न्मादिभाव° । १७ झ. °रितवि° ।

आत्मनः किमायातमित्याशङ्क्याऽऽह— तुरीयमिति । तदा विशिष्टेनाऽऽचार्येण विशिष्टं शिष्यं प्रति प्रतिबोधनावस्थायामित्यर्थः ॥ १६ ॥

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १७ ॥

प्रपञ्चनिवृत्त्या चेत्प्रतिबुध्यतेऽनिवृत्ते प्रपञ्चे कथमद्वैतमिति । उच्यते । सत्यमेवं स्यात्प्रपञ्चो यदि विद्येत । रज्ज्वां सर्प इव कल्पितत्वान्न तु स विद्यते । विद्यमानश्चेन्निवर्तेत न संशयः । न हि रज्ज्वां भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन्विवेकतो निवृत्तः । नैव माया मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बन्धापगमे विद्यमाना सती निवृत्ता । तथेदं प्रपञ्चाख्यं मायामात्रं द्वैतं रज्जुवन्मायाविवच्चाद्वैतं परमार्थतस्तस्मान्न कश्चित्प्रपञ्चः प्रवृत्तो निवृत्तो वाऽस्तीत्यभिप्रायः ॥ १७ ॥

तुरीयमद्वैतमित्युक्तं तदयुक्तं प्रपञ्चस्य द्वितीयस्य सत्त्वादित्याशङ्क्याऽऽह—प्रपञ्च इति । प्रपञ्चनिवृत्त्या तुरीयप्रतिबोधात्तदद्वितीयत्वमविरुद्धमिति सैद्धान्तिकीमाशङ्कां पूर्ववाद्यनुवदति—प्रपञ्चेति । तर्हि पूर्वं प्रपञ्चनिवृत्तेरनिवृत्तस्य तस्य सत्त्वान्नाद्वैतं सद्धेतुमर्हतीति पूर्ववाद्येव ब्रवीति— अनिवृत्त इति । सिद्धान्ती । श्लोकेनोत्तरमाह— उच्यत इति । किं प्रपञ्चस्य वस्तुत्वमुपेत्याद्वैतानुपपत्तिरुच्यते किंवाऽवस्तुत्वमिति विकल्प्याऽऽद्येऽद्वैतानुपपत्तिमङ्की करोति— सत्यमिति । अद्वैतं तर्हि कथमुपपद्येतेत्याशङ्क्य प्रपञ्चस्यावस्तुत्वपक्षे तदुपपत्तिरित्याह— रज्ज्वामिति । यथा सर्पो रज्ज्वां कल्पितो वस्तुतो नास्ति तथा प्रपञ्चोऽपि कल्पितत्वाच्चैव वस्तुतो विद्यते । तथा च तात्त्विकमद्वैतमविरुद्धमित्यर्थः । उक्तमर्थं व्यतिरेकमुखेन(ण) साधयति—विद्यमानश्चेदिति । यद्यात्मनि कारणाधीनः सन्प्रपञ्चो विद्येत तदा कृतकस्यानित्यत्वनियमात्तन्निवृत्तिरवश्यंभाविनी । कार्यस्य च निवृत्तिर्नाम कारण(णा)संसर्गस्ततः सति कारणे प्रपञ्चनिवृत्तेरनात्यन्तिकत्वादद्वैतानुपपत्तिराशङ्क्येत । न च कारणाधीनः सन्प्रपञ्चोऽस्ति । तस्य कल्पितत्वेनावस्तुत्वादित्यर्थः । प्रपञ्चस्य मायया विद्यमानत्वं न तु वस्तुत्वमित्युदाहरणाभ्यामुपपादयति—न हीत्यादिना । सर्पो हि रज्ज्वां भ्रान्त्या कल्पितो

---

१ घ. ङ ज. °शिष्टशि° । २ घ. ङ. ज °बोधिताव° छ. बोधाव° ३ घ. °ते । एवमनि° । ४ ब. °त तदा र° । ५ च. °ते । वर्तमा° । ६ घ. ङ. ज. न । ७ ख. घ. ङ. ज. °तं तु प° । ८ च. झ. °मद्वयमित्ययु° ९ च. झ °श्वविनि° । १० ख. 'वादी ब्र° ११ घ. ङ. छ. °पद्यन इत्या° । १२ क °त्वाच्च व° । १३ ग. झ. विद्यते । १४ घ. ङ. ज. °स्य नि° । १५ घ. ङ. ज.°ल्पितत्वेन ना° ।

नायं सर्पो रज्जुरेष एवेति विवेकाधिया निवृत्तो नैव वस्तुतो विद्यते । बाधितस्य कालत्रयेऽपि सत्त्वाभावात् । माया चेन्द्रजालशब्दवाच्या मायाविना प्रदर्शिता पार्श्वस्थानां मायादर्शनवतां चक्षुर्गतस्य यथार्थदर्शनप्रतिबन्धकस्यापगमे सति समुत्पन्नसम्यग्दर्शनतो निवृत्ता सती नैव वस्तुतो विद्यमाना भवितुमुत्सहेत । यथेदमुदाहरणद्वयं तथेदं द्वैतं प्रपञ्चाख्यं मायामात्रं न परमार्थतोऽस्तीत्यर्थः । प्रपञ्चस्यासत्त्वे शून्यवादः स्यादित्याशङ्क्याऽऽह—रज्जुवदिति । प्रपञ्चस्य कालत्रयेऽपि सत्त्वाभावे तात्त्विकमद्वैतमविरुद्धमित्युपसंहरति—तस्मादिति ॥ १७ ॥

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ १८ ॥

ननु शास्ता शास्त्रं शिष्य इति विकल्पः कथं निर्वृत्त इत्युच्यते । विकल्पो विनिवर्तेत यदि केनचित्कल्पितः स्यात् । यथाऽयं प्रपञ्चो मायारज्जुसर्पवत्तथाऽयं शिष्यादिभेदविकल्पोऽपि प्राक्प्रतिबोधादेवोपदेशनिमित्तोऽत्र उपदेशादयं वादः शिष्यः शास्ता शास्त्रमिति । उपदेशकार्ये तु ज्ञाने निर्वृत्ते ज्ञाते परमार्थतत्त्वे द्वैतं न विद्यते ॥ १८ ॥

प्रकारान्तरेणाद्वैतानुपपत्तिमाशङ्क्य परिहरति—विकल्प इति । यदि केनचिद्धेतुना तत्त्वज्ञानेन कार्येण शास्त्रादिविकल्पो हेतुतयाँ विकल्पितस्तथाऽप्यसौ बाधितो निवर्तेत न तु तात्त्विकमद्वैतं विरोद्धुमर्हति । तत्त्वज्ञानात्प्रागवस्थायामेव तत्त्वोपदेशं निमित्तीकृत्य यतः शास्त्रादिभेदोऽनूद्यते । उपदेशप्रयुक्ते तु ज्ञाने निर्वृत्ते न किंचिदपि द्वैतमस्तीत्यद्वैतमविरुद्धमित्यर्थः । श्लोकव्यावर्त्यमाशङ्क्याह—नान्विति । तदनिवृत्तौ नाद्वैतसिद्धिर्न च शास्त्रादिभेदस्य कल्पितत्वादविरोधः । तथा सति धूमाभासवत्तत्त्वज्ञानहेतुत्वानुपपत्तिरित्यर्थः । धूमाभासस्याव्याप्तस्यातद्धेतुत्वेऽपि कल्पितस्य शास्त्रादेस्तत्त्वज्ञानहेतुत्वं प्रतिबिम्बादिवदुपपन्नमित्युत्तरमाह— उच्यत इति । शिष्यः शास्ता शास्त्रमित्ययं विकल्पो विभागः सोऽपि निवृत्तिप्रतियोगित्वादवस्तुत्वाज्ज्ञानबाध्यत्वादद्वैताविरोधीत्यर्थः । शिष्यादिविभागस्य कल्पितत्वं दृष्टान्तेन स्पष्टयति— यथेति । मायाविना प्रयुक्ता माया यथा कल्पितेष्यते यथा च सर्पधारादिर्विकल्पितस्तथाऽयं प्रपञ्चः सर्वोऽपि कल्पितो वस्तु न भवतीति प्रपञ्चितं . तथैव प्रपञ्चैकदेशः शिष्यादिरपि ज्ञानात्प्राक्कल्पितः सन्नज्ञानकृतो मिथ्येत्यर्थः । किमिति ज्ञानात्पूर्वमसौ कल्प्यते तत्राऽऽह—उपदेशेति । उपदेशमुद्दिश्य यथोक्तविभागवचनमित्युक्तमुपसंहरति—अत

---

१ ख. °स्तुतः । बा° । २ घ. ङ. ज. माथेन्द्र° । ३ छ. °बन्धाप° । ४ ख. च. निवर्तत इ° । ५ छ. °या क° । ६ छ. यदि । ७ ग. घ. ङ. °पत्तेरि° । ८ ङ. °तश्चा° । ९ ग. ङ. °हितोऽत्र ते ।

इति । उपदेशात्प्रागिव तस्मादूर्ध्वमपि भेदोऽनुवर्तताम्मित्याशङ्क्य विरोधिसद्भावान्नै-वमित्याह—उपदेशेति ॥ १८ ॥

(उपनिषद्)।

सोऽयमात्माऽध्यक्षरमोंकारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥ ८ ॥

अभिधेयप्रधान ओंकारश्चतुष्पादात्मेति व्याख्यातो यः सोऽयमात्माऽध्यक्षरमक्षरमधिकृत्याभिधानप्राधान्येन वर्ण्यमानोऽध्यक्षरम् । किं पुनस्तदक्षरमित्याह । ओंकारः । सोऽयमोंकारः पादशः प्रविभज्यमानोऽधिमात्रं मात्रामधिकृत्य वर्तत इत्यधिमात्रम् । कथमात्मनो ये पादास्त ओंकारस्य मात्राः । काःतताः । अकार उकारो मकार इति ॥ ८ ॥

तत्त्वज्ञानसमर्थानां मध्यमानामुत्तमानां चाधिकारिणामध्यारोपापवादाभ्यां पारमार्थिकं तत्त्वमुपदिष्टम् । इदानीं तत्त्वग्रहणासमर्थानामधमाधिकारिणामोंध्यानविधानायाऽऽरोपदृष्टिमेवावष्टभ्य व्याचष्टे—अभिधेयेत्यादिना । अध्यक्षरमित्येतद्व्याकरोति—अक्षरमिति । अध्यक्षरमित्यत्र किं पुनस्तदक्षरमिति प्रश्नपूर्वकं व्युत्पादयति—किं पुनरित्यादिना । तस्य विशेषणान्तरं दर्शयति—सोऽयमिति । आत्मा हि पादशो विभज्यते मात्रामधिकृत्य पुनरोंकारो व्यवतिष्ठते तत्कथं पादशो विभज्यमानस्याधिमात्रत्वमिति पृच्छति—कथमिति । पादानां मात्राणां चैकत्वादेतदविरुद्धमित्याह—आत्मन इति ॥ ८ ॥

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ॥ ९ ॥

तत्र विशेषनियमः क्रियते । जागरितस्थानो वैश्वानरो यः स ओंकारस्याकारः प्रथमा मात्रा । केन सामान्येनेत्याह । आप्तेरादिमत्त्वाद्वाप्तिरकारेण सर्वा वाग्व्याप्ता । " अकारो वै सर्वा वाक् " इति श्रुतेः । तथा वैश्वानरेण जगत् । "तस्य ह वैतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुतेजाः" इत्यादिश्रुतेः । अभिधानाभिधेययोरेकत्वं चावोचाम । आदिरस्य विद्यत इत्यादिमद्यथैवाऽऽदिमद्-

---

१ च. वर्तमा° । २ ग. ङ. ज. °रमा° । ३ क. ख. °मात्मध्या° । ४ घ. ङ. ज. °रमेतद्व्या° । ५ घ. ङ. ज. °रोऽयमव° । ६ छ. °त्वादाप्नो° । ७ घ. ज. °थमा° ।

कारा[1]ख्यमक्षरं तथैव वैश्वानरस्तस्माद्वा सामान्यादकारत्वं वैश्वानरस्य । तदेकत्वविदः फलमाह—आप्नोति ह वै सर्वान्कामानादिः प्रथमश्च भवति महतां य एवं वेद यथोक्तमेकत्वं वेदेत्यर्थः ॥ ९ ॥

पादानां मात्राणां च मध्ये विश्वाख्यं[2]विशेषस्याकारविशेषत्वं [3]निगमयंति—तत्रेति । विश्वाकारयोरेकत्वं सादृश्ये सत्यारोपयितुं शक्यमन्यत्र सत्येव तस्मिन्नारोपसंदर्शनात्तथा च किं तदारोपप्रयोजकं सादृश्यमिति पृच्छति—केनेति । सामान्योपन्यासपरां श्रुतिमवतारयति—आहेति । व्याप्तिमेवाकारस्य श्रुत्युपन्यासेन व्यनक्ति—अकारेणेति । अध्यात्माधि[4]दैविक[5]योरेकत्वं पूर्वमुक्तमुपेत्य विश्वस्य वैश्वानरस्य जगद्व्याप्तिं श्रुत्यवष्टम्भेन स्पष्टयति—तथेति । किं च सामान्यद्वारा वाच्यवाचकयोरेकत्वमारोप्यं न भवति तयोरेकत्वस्य प्रागेवोक्तत्वादित्याह—अभिधानेति । सामान्यान्तरमाह—आदिरिति । तदेव स्फुटयति—यथैवेति । उकारो मकारश्चेत्युभयमपेक्ष्य[6] प्रथमपाठादादिमत्त्वमकारस्य द्रष्टव्यम् । विश्वस्य पुनरादिमत्त्वं तैजसप्राज्ञावपेक्ष्याऽऽद्यस्थाने वर्तमानत्वादित्यर्थः । उक्तस्य सामान्यान्तरस्य फलं दर्शयति—तस्मादिति । किमर्थमित्थं सामान्यद्वारा तयोरेकत्वमुच्यते तद्विज्ञानस्य फलवत्त्वादित्याह—तदेकत्वेति । सादृश्यविकल्पादेव फलविकल्पः ॥ ९ ॥

स्वप्नस्थानस्तैजस[7] उकारो द्वितीया[8] मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥ १० ॥

स्वप्नस्थानस्तैजसो यः स ओंकारस्योकारो द्वितीया[9] मात्रा । केन सामान्येनेत्याह—उत्कर्षात् । अकारादुत्कृष्ट इव ह्युकारस्तथा तैजसो विश्वादुभयत्वाद्वाऽऽकारयकारयोर्मध्यस्थ उकारस्तथा विश्वप्राज्ञयोर्मध्ये तैजसोऽत्र उभयभाक्त्वसा[10]मान्यात् । विद्वत्फलमुच्यते—उत्कर्षति ह वै ज्ञानसततिम् । विज्ञानसंततिं वर्धयतीत्यर्थः । समानस्तुल्यश्च मित्रपक्षस्येव शत्रुपक्षाणा-

---

१ झ. °राक्ष° । २ ग. झ. छ. °ख्यस्या° । ३ छ. काराख्यवि° । ४ घ. ङ. झ. नियम° । ५ घ. °जकसा° । ६ घ. ङ. ज. °दैवतयो° । ७ घ. °स्य च प्र° । ८ ज. °रा द्वयो° । ९ ग. छ. झ. फले वि° । १० घ. ज. °तीयमा° । ११ छ. ज. °तीयमा° । १२ ख. °सम्याद्वि° ।

मेध्यप्रद्वेष्यो[1] भवति । अब्रह्मविदस्य[2] कुले न भवति य एवं वेद ॥ १० ॥

द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वं व्यपदिशति-स्वप्नेत्यादिना । यथा प्रथमपादस्य प्रथममात्रायाश्चैकत्वं सामान्यं पुरस्कृत्योक्तं तथा द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वं सत्येव सामान्ये वक्तव्यं तदभावे तदारोपायोगादिति पृच्छति-केनेति । सामान्योपन्यासपूर्वकमेकत्वारोपं साधयति—आहेति । अकारस्य सर्ववाग्व्याप्यत्वे[3]नोत्कृष्टत्वस्य स्पष्टत्वात्कथं तस्मादुकारस्योत्कर्षो वर्ण्यते तत्राऽऽह—अकारादिति । अकारस्योत्कर्षे वास्तवेऽपि पाठक्रमादुकारस्यौत्कर्षवत्त्वमौपचारिकमिवकारश्चामुमर्थमुपोद्बलयति । यथाऽकारादुकारस्योत्कर्षो दर्शितस्तथा विश्वात्तैजसस्योत्कर्षो वक्तव्यः । सूक्ष्माभिमानिनः स्थूलाभिमानिनः सकाशादुत्कर्षस्य युक्तत्वादित्याह—तथेति । उकारतैजसयोर्न प्रत्येकमुभयत्वमेकत्वस्योभयत्वव्याघाता[4]दित्याशङ्क्य व्याकरोति—अकारेति । मध्यस्थत्वादुकारतैजसयोरुभयभाक्त्वं सामान्यं तस्मात्तयोरेकत्वं शक्यमारोपयितुमित्याह—अत इति । यथोक्तैकत्वविज्ञानं फलवत्त्वादुपादेयमिति सूचयति—विद्वदिति । ज्ञानसंततेरुत्कर्षो नाम कुतश्चित्तस्याभेदावेदनं तस्येष्टत्वाभावे कथं फलवत्त्वमित्याशङ्क्य व्याचष्टे-विज्ञानेति । पक्षद्वयतुल्यत्वमेव प्रकटयति—अप्रद्वेष्य इति । सादृश्यभेदेन फलभेदमावेद्य द्विविधसादृश्यप्रयुक्तैकत्वावज्ञानफलमाह—अब्रह्मविदिति ॥ १० ॥

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया[11] मात्रा मितेरपीतेर्वा[12] मिनोति ह वा इदꣳ सर्वमपीतिश्च भवति य एवं वेद ॥ ११ ॥

सुषुप्तस्थानः प्राज्ञो यः[13] सः ओंकारस्य मकारस्तृतीया[11] मात्रा । केन[14] सामान्येनेत्याह सामान्यमिदमत्र-मितेर्मितिर्मानं मीयते इव हि विश्वतैजसौ प्राज्ञेन मलयोत्पत्त्योः प्रवेशनिर्गमाभ्यां प्रस्थेनेव यवाः । तथोंकारसमासौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इवाकारोकारौ मकारे । अपीतेर्वा । अपीतिरप्यस्यैं[15] एकीभावः । ओंकारोच्चारणेऽन्त्येऽक्षर एकीभूताविवाकारोकारौ[16] । तथा विश्वतैजसौ

---

१ घ. °भप्रद्वे° । २ झ. °विच्चास्य । ३ झ. °ग्व्यापारत्वे° । ४ घ. ङ. ज. °स्योक्तार्थत्वमौ° । ५ क. ख. °कारोत्क° । ६ घ. ङ झ. °कस्यो° । ७ ग. °यत्वे व्या° । ८ ख. °त्वस्य व्या° । ९ ङ. घ. ङ. ज. ट. °लत्वमि° । १० छ. °कत्वज्ञा° । ११ झ. °तीयमा° । १२ च. झ. स म° । घ. ज. °स मकार ओंकारस्य तृती° । १३ ज. °तीयमा° । १४ ज. साम्येने° । १५ च. °यश्चैकी° । १६ घ. °णेऽन्त्याक्ष° ।

सुषुप्तकाले प्राज्ञे । अतो नु सामान्यादेकत्वं प्राज्ञमकारयोः । विद्वत्फलमाह—मिनोति ह वा इदं सर्वं जगद्याथात्म्यं जानातीत्यर्थः । अपीतिश्च जगत्कारणात्मा भवतीत्यर्थः । अत्रावान्तरफलवचनं प्रधानसाधनस्तुत्यर्थम् ॥ ११ ॥

तृतीयपादस्य तृतीयमात्रायाश्चैकत्वमुपन्यस्यति—सुषुप्तेति । पूर्ववदेकत्वप्रयोजकमत्रापि प्रश्नपूर्वकमुपवर्णयति—केने-यादिना । मानमेव विवृणोति—मीयेते इति । ओमित्योंकारस्य नैरन्तर्येणोच्चारणे सत्यकारोकारौ प्रथमं मकारे प्रविश्य पुनस्तस्मान्निर्गच्छन्ताविवोपलभ्येते तेन मकारेऽपि मानसामान्यमिति वक्तव्यमित्यर्थः । एकीभावमेव स्फोरयति—ओंकारेति । मकारवत्प्राज्ञेऽपि तदस्ति सामान्यमित्याह—तथेति । उक्तस्यापि सामान्यस्य फलमाह—अतो वेति । सामान्यद्वयद्वारेण प्राज्ञमकारयोरेकत्वज्ञानं नाविवक्षितं फलवत्त्वादित्याह—विद्वादिति । अविदुषोऽपि जगद्विषयज्ञानमस्तीत्याशङ्क्य विशिनष्टि—जगद्याथात्म्यमिति । तद्याथात्म्यं चाव्याकृतत्वं प्रलयमवनमनिष्टत्वान्न फलमित्याशङ्क्याऽऽह—जगदिति । तत्र तत्रैकत्वज्ञाने फलभेदकथनादुपासनाभेदमाशङ्क्याङ्गेषु फलभेदश्रुतेरर्थवादत्वमुपेत्याह—अत्रेति । पादानां मात्राणां च क्रमादेकत्वावज्ञाने फलकथनं सर्वान्नादान्मात्राश्च सर्वाः स्वात्मन्यन्तर्भाव्य प्रधानस्य ब्रह्मध्यानस्य साधनं यदोंकाराख्यमक्षरं तस्य स्तुतावुपयुज्यते तेन च तदेवैकमुपासनमितरस्य तदङ्गत्वान्नोपास्तिभेदकत्वमित्यर्थः ॥ ११ ॥

अत्रैते श्लोका भवन्ति—

विश्वस्यात्वविवक्षायामादित्वसामान्यमुत्कटम् ।
मात्रासंप्रतिपत्तौ स्यादादित्वसामान्यमेव च ॥ १९ ॥

विश्वस्यात्वमकारमात्रत्वं यदा विवक्ष्यते तदाऽऽदित्वसामान्यमुक्तन्यायेनोत्कटमुद्भूतं दृश्यत इत्यर्थः । अत्वविवक्षायामित्यस्य व्याख्यानं मात्रासंप्रतिपत्ताविति । विश्वस्याकारमात्रत्वं यदा संप्रतिपद्यत इत्यर्थः । आदित्वसामान्यमेव चोत्कटमित्यनुवर्तते चशब्दात् ॥ १९ ॥

पादानां मात्राणां च ऐक्यनिमित्तां श्रुत्यापन्नस्तं तत्र श्रुत्यर्थविवरणरूपान्पूर्ववदेव श्लोकानवतारयति—अत्रेति । तत्र प्रथमं मात्रायाश्चाकारापाद्यमुक्तं सामान्यद्वयं विशदयति—विश्वस्येति । उक्तन्यायेऽऽदित्वादाविति शेषः । पुनरुक्तिपरिहारद्वारा विवक्षितमर्थमाह—अतश्चेति । अनुक्तिद्योतकं दर्शयति—चशब्देति ॥ १९ ॥

---

१ घ. ङः 'घुप्तिका' । २ घ. ङ. च. 'न्यमभिव्यक्तमे' । ३ ङ. 'यविज्ञ' । ४ ग. घ. ङ. ञ. झ. 'ङ्गे फलश्रु' । ५ ग. ङ. छ. ज. 'दङ्ग' । ६ ग. 'लभेदक' । ७ ख. 'रस्यापि त' । ८ क. ख. ज. 'दा विवक्ष्यते स' । ९ ङ. 'थमा ना' ।

तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम् ।
मात्रासंप्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥ २० ॥

तैजसस्योत्वविज्ञान उकारत्वविवक्षायामुत्कर्षो दृश्यते स्फुटं स्पष्टं इत्यर्थः। उभयत्वं च स्फुटमेवेति । पूर्ववत्सर्वम् ॥ २० ॥

द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वारोपप्रयोजकद्वयं श्रुत्युक्तं व्यनक्ति—तैजसस्येति । स्फुटमिति क्रियाविशेषणम् । तथाविधमित्यस्यार्थं स्फुटमित्याह—स्फुटमेवेति । उक्तविज्ञान इत्यस्य व्याख्यानं मात्रासंप्रतिपत्ताविति तस्य व्याख्यानं सर्वमित्युच्यते तत्पूर्ववदूद्रष्टव्यमित्युच्यते—पूर्ववदिति ॥ २० ॥

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् ।
मात्रासंप्रतिपत्तौ तु लयसामान्यमेव च ॥ २१ ॥

मकारत्वे प्राज्ञस्य मितिलयावुत्कृष्टे सामान्ये इत्यर्थः ॥ २१ ॥

तृतीयपादस्य तृतीयमात्रायाश्चैकत्वाध्यासे सामान्यद्वयं श्रुत्या दर्शितं विशदयति—मकारेति । अक्षरार्थस्य पूर्ववदेव सुज्ञानत्वात्तात्पर्यार्थमाह—मकारत्व इति ॥२१॥

त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः ।
स पूज्यः सर्वभूतानां वन्द्यश्चैव महामुनिः ॥ २२ ॥

यथोक्तस्थानत्रये तुल्यमुक्तं सामान्यं वेत्त्येवमेवैतादिति निश्चितो यः स पूज्यो वन्द्यश्च ब्रह्मविल्लोके भवति ॥ २२ ॥

विश्वादीनामकारादीनां च यत्तुल्यं सामान्यमुक्तं तद्विज्ञानं स्तौति—त्रिष्विति । यथोक्तस्थानत्रयं जागरितं स्वप्नं सुषुप्तं चेति त्रितयं तुल्यं पादानां मात्राणां चेति शेषः । उक्तं सामान्यमाह्रितुत्कर्षो मितिरित्यादि । महामुनिरित्यस्यार्थमाह—ब्रह्मविदिति ॥ २२ ॥

अकारो नयते विश्वमुकारश्चापि तैजसम् ।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ॥ २३ ॥

---

१ छ. ज. °ष्टमित्य° । २ ङ. °वेत्यर्थः । पू° । ३ ज. °वत् ॥ २० ॥ ४ छ. °स्यार्थः स्फु° । ५ छ. झ. °मित्याह पू° । ६ घ. ज. °मेव त° । ७ ख. ग. छ. झ. °धोक्तं स्था° ।

यथोक्तैः सामान्यैरात्मपादानां मात्राभिः सहैकत्वं कृत्वा यथोक्तोंकारं प्रतिपद्य यो ध्यायति तमकारो नयते विश्वं प्रापयति । अकारालम्बनोंकारं विद्वान्वैश्वानरो भवतीत्यर्थः । तथोकारस्तैजसम् । मकारश्चापि पुनः प्राज्ञं चशब्दान्नयत इत्यनुवर्तते । क्षीणे तु मकारे बीजभावक्षयादमात्र ओंकारे गतिर्न विद्यते क्वचिदित्यर्थः ॥ २३ ॥

पूर्वोक्तसामान्यज्ञानवतो ध्याननिष्ठस्य फलविभागं दर्शयति--अकार इति । यत्र तु पादानां मात्राणां च विभागो नास्ति तस्मिन्नोंकारे तुरीयात्मनि व्यवस्थितस्य प्राप्तृप्राप्तव्यप्राप्तिविभागो नास्तीत्याह — नामात्र इति । ओंकारध्यायिनमकारो विश्वं प्रापयतीत्युक्तमयुक्तम् । विश्वप्राप्तेर्ध्यानमन्तरेण सिद्धत्वात् । अकारस्य चाध्येयस्योक्तफलप्रापकत्वायोगादित्याशङ्क्याऽऽह— अकारेति । तदालम्बनं तत्प्रधानमिति यावत् । अकारप्रधानमोंकारं ध्यायतो यथा वैश्वानरप्राप्तिस्तथोंकारप्रधानं तमेव ध्यायतस्तैजसस्य हिरण्यगर्भस्य प्राप्तिर्भवतीत्याह—तथेति । यश्च मकारप्रधानमोंकारं ध्यायति तस्य प्राज्ञाव्याकृतप्राप्तिर्युक्तेत्याह--मकारश्चेति । क्रियापदानुवृत्तिरुभयत्र विवक्षिता । चतुर्थपादं व्याचष्टे-- क्षीणे त्विति । स्थूलप्रपञ्चो जागरितं विश्वश्चेत्येतत्त्रितयमकारमात्रं सूक्ष्मप्रपञ्चः स्वप्नस्तैजसश्चेत्येतत्त्रितयमुकारमात्रं प्रपञ्चद्वयकारणं सुषुप्तं प्राज्ञश्चेत्येतत्त्रितयं मकारमात्रं तत्रापि पूर्वं पूर्वमुत्तरोत्तरभावमापद्यते । तदेवं सर्वमोंकारमात्रमिति ध्यात्वा स्थितस्य यदेतावन्तं कालमोमिति रूपेण प्रतिपन्नं तत्परिशुद्धं ब्रह्मैवेत्याचार्योपदेशसमुत्थसम्यग्ज्ञानेन पूर्वोक्तसर्वविभागनिमित्ताज्ञानस्य मकारत्वेन गृहीतस्य क्षये ब्रह्मण्येव शुद्धे पर्यवसितस्य न क्वचिद्गतिरुपपद्यते परिच्छेदाभावादित्यर्थः ॥ २३ ॥

(उपनिषद्)-

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोंकार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद ॥ १२ ॥

(इति माण्डूक्योपनिषत्समाप्ता) ।

अमात्रो मात्रा यस्य नास्ति सोऽमात्र ओंकारश्चतुर्थस्तुरीय आत्मैव केवलोऽभिधानाभिधेयरूपयोर्वाङ्मनसयोः क्षीणत्वादव्यवहार्यः । प्रपञ्चोपशमः

---

१ घ. ङ. °म्बनमोंका° । २ ख. ग. छ. झ. तस्मिन्नोंका° । ३ घ. ङ. ञ. °स्य ध्या° । ४ ञ. °सहि° । ५ ग. ज. 'भप्रा° । ६ ख. ज. झ. प्राज्ञस्याव्याकृतस्य प्रा° । ७ छ. °प्तिर्भवतीत्या° । ८ घ. ङ. ञ. °देव स° । ९ ख. 'वत्काल° । १० ग. छ. झ. 'त्ययदर्श' । ११ क. छ. 'द य एवं वेद ॥ १२ ॥

शिवोऽद्वैतः संवृत एवं यथोक्तविज्ञानवता प्रयुक्त ओंकारस्त्रिमात्रस्त्रिपादः। आत्मैव संविशत्यात्मना स्वेनैव स्वं पारमार्थिकमात्मानं य एवं वेद। परमार्थदर्शिनां ब्रह्मविदां तृतीयं बीजभावं दग्ध्वाऽऽत्मानं प्रविष्ट इति न पुनर्जायते तुरीयस्याबीजत्वात् न हि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पो बुद्धिसंस्कारात्पुनः पूर्ववत्तद्विवेकिनामुत्थास्यति। मन्दमध्यमधियां तु प्रतिपक्षसाधकभावानां सन्मार्गगामिनां(णां) संन्यासिनां मात्राणां पादानां च वस्तुसामान्यविदां यथावदुपास्यमान ओंकारो ब्रह्मप्रतिपत्तय आलम्बनी भवति। तथा च वक्ष्यति—"आश्रमास्त्रिविधा हीनाः" इत्यादि ॥ १२ ॥

(इति माण्डूक्यमूलमन्त्रभाष्यम्)।

प्रत्यक्चैतन्यमोंकारसंवेदनं त्रिमात्रेणोंकारेणाध्यस्तेन तादात्म्यादोंकारो निरुच्यते। तस्य परेण ब्रह्मण्यैक्यममात्रादिश्रुत्या विवक्ष्यते तामवतार्य व्याकरोति—अमात्र इत्यादिना। केवलत्वमद्वितीयत्वम्। विशेषणान्तरमुपपादयति—अभिधानेति। अभिधानं वागभिधेयं मनश्चित्तातिरिक्तार्थाभावस्याभिधास्यमानत्वात्तयोर्मूलाज्ञानक्षयेण क्षीणत्वादिति हेत्वर्थः। अव्यवहार्यश्चेदात्मा नास्त्येवेत्याशङ्क्य विकारजातविनाशावधित्वेनाऽऽत्मनोऽवशेषान्नैवमित्याह—प्रपञ्चेति। तस्य च सर्वानर्थाभावोपलक्षितस्य परमानन्दत्वेन पर्यवसानं सूचयति—शिव इति। तस्यैव सर्वद्वैतकल्पनाधिष्ठानत्वेनावस्थानमभिप्रेत्याऽऽह—अद्वैत इति। ओंकारस्तुरीयः सन्नात्मैवेति यदुक्तं तदुपसंहरति—एवमिति। यथोक्तं विज्ञानं पादानां मात्राणां चैकत्वम्। न च पादा मात्राश्च तुरीयात्मन्योंकारे सन्ति पूर्वपूर्वविभागश्चोत्तरोत्तरान्तर्भावेन क्रमादात्मनि पर्यवस्यतीत्येवंलक्षणतद्वता प्रयुक्तः सन्नोंकारो मात्रा. पादाश्च स्वस्मिन्नन्तर्भाव्यावस्थितस्याऽऽत्मनो भेदमसहमानस्तद्रूपो भवतीत्यर्थः। उक्तैक्यज्ञानस्य फलमाह—संविशतीति। सुषुप्ते ब्रह्मप्राप्तस्य पुनरुत्थानवन्मुक्तस्यापि पुनर्जन्म स्यादित्याशङ्क्याऽऽह—परमार्थेति। सुषुप्तस्य पुनरुत्थानं बीजभूताज्ञानस्य सत्त्वादुपपद्यते। इह तु बीजभूतमज्ञानं तृतीयं सुषुप्ताख्यं दग्ध्वैव तेषामात्मानं तुरीयं प्रविष्टो विद्वानिति नासौ पुनरुत्थानमर्हति। कारणमन्तरेण तदयोगादित्यर्थः। तुरीयमेव पुनरुत्थानबीजभूतं भविष्यती-

---

१ ज. झ. संवृत्त। च. संप्रवृत्त। २ ङ. घ. झ °दर्शां ब्रह्मवित्तमी°। ३ च. सर्पबु°। ४ ख. घ. ङ. ज. हीन इ°। ५ ङ. झ. °दपूर्ववद° ६ छ निरूप्यते। ७ ङ. ब्रह्मैक्य°। ८ ग. झ. °शे क्षी°। ९ क. ख. घ. ङ. छ. ज. °नोऽवशे°। १० ङ. झ. सुप्तस्य।

त्याशङ्क्य कार्यकारणविनिर्मुक्तस्य तस्य तदयोगान्मैवमित्याह–तुरीयस्येति । मुक्तस्यापि पूर्वसंस्कारात्पुनरुत्थानमाशङ्क्य दृष्टान्तेन निराचष्टे–न हीति । पूर्ववदित्यविवेकावस्थायामिवेत्यर्थः । तद्विवेकिनां रज्जुसर्पविवेकविज्ञानवतामिति यावत् । बुद्धिसंस्काराँदित्यत्र बुद्धिशब्देन सर्पभ्रान्तिर्गृह्यते । उत्तमाधिकारिणामोंकारद्वारेण परिशुद्धब्रह्मात्मैक्यविदामपुनरावृत्तिलक्षणमुक्तं फलम् । इदानीं मन्दानां मध्यमानां च कथं ब्रह्मप्रतिपत्त्या फलप्राप्तिरित्याशङ्क्याऽऽह–मन्देति । तेषामपि क्रममुक्तिरविरुद्धेत्यर्थः । तत्रैव वाक्यशेषानुकूल्यं कथयति–तथा चेति ॥ १२ ॥

(इति माण्डूक्यमूलमन्त्रभाष्यटीका समाप्ता) ।

पूर्ववत्––

अत्रैते श्लोका भवन्ति––

(गौडपादीयश्लोकाः) ।

ओंकारं पादशो विद्यात्पादा मात्रा न संशयः ।
ओंकारं पादशो ज्ञात्वा न किंचिदपि चिन्तयेत् ॥ २४ ॥

यथोक्तैः सामान्यैः पादा एव मात्रा मात्राश्च पादास्तस्मादोंकारं पादशो विद्यादित्यर्थः । एवमोंकारे ज्ञाते दृष्टार्थमदृष्टार्थं वा न किंचित्प्रयोजनं चिन्तयेत्कृतार्थत्वादित्यर्थः ॥ २४ ॥

यथा पूर्वमाचार्येण श्रुत्यर्थप्रकाशकाः श्लोकाः प्रणीतास्तथोत्तरेऽपि श्लोकाः श्रुत्युक्तेऽर्थ एव संभवन्तीत्याह––पूर्ववदिति । ओंकारस्य पादशो विद्या कीदृशीत्याशङ्क्याऽऽह––पादा इति । पादानां मात्राणां चान्योन्यमेकत्वं कृत्वा तद्विभागविधुरमोंकारं ब्रह्मबुद्ध्या ध्यायतो भवति कृतार्थतेति दर्शयति––ओंकारमिति । तस्मात्पादानां मात्राणां चान्योन्यमेकत्वादित्यर्थः । तदेकत्वं पुरस्कृत्योंकारमुभयविभागशून्यं ब्रह्मबुद्ध्या जानीयादित्याह––ओंकारमिति । उत्तरार्धस्य तात्पर्यमाह–एवमिति ॥ २४ ॥

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥ २५ ॥

युञ्जीत समादध्याद्यथाव्याख्याते परमार्थरूपे प्रणवे चेतो मनः । यस्मा-

---

१ ग. ज झ तद° । २ क °रादित्य° । ३ घ. ङ च. ब्रह्मैक्य° । ४ ग. छ. झ. °क्षणं फलमुक्तम् । इ° । ५ ग. घ. °मनुक° । ६ छ. °कारे पा° । ७ च. न चिन्तयेन्न किं° । ८ घ. °का: प्र° । ९ क. एवं । १० क. ख. °कत्वात्तद्वि° ।

त्प्रणवो[1] ब्रह्म निर्भयम् । न हि तत्र सदा युक्तस्य भयं विद्यते क्वचित् । " विद्वान्न बिभेति कुतश्चन " इति श्रुतेः ॥ २५ ॥

प्रणवानुसंधानकुशलस्य प्रणवज्ञानेनैव[2] सर्वद्वैतापवादकेन कृतार्थता भवतीत्युक्तम् । इदानीं तदनभिज्ञस्य परोपदेशमात्रशरणस्य ध्यानकर्तव्यतां कथयति—युञ्जीतेति । ननु मनःसमाधानं ब्रह्मणि कर्तव्यम् । किमिति प्रणवे तत्कर्तव्यतोच्यते तत्राऽऽह—प्रणव इति । संप्रति प्रणवे समाहितचित्तस्य फलं दर्शयति—प्रणवे नित्येति । समाधानविषयमाह—यथेति । तुरीयरूपं[3] यथा(थेत्यु)च्यते तत्र हेतुमाह—यस्मादिति । तदेव साधयति—न हीति । तत्र तैत्तिरीयकश्रुत्यानुकूल्यमाह—विद्वानिति ॥ २६ ॥

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः ।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ॥ २६ ॥

परापरे ब्रह्मणि प्रणवः परमार्थतः क्षीणेषु मात्रापादेषु पर एवाऽऽत्मा ब्रह्मेति[4] न पूर्वं कारणमस्य विद्यत इत्यपूर्वः[5] । नास्यान्तरं भिन्नजातीयं किंचिद्विद्यत इत्यनन्तरः । तथा बाह्यमन्यन्न विद्यत इत्यबाह्यः । अपरं कार्यमस्य न विद्यत इत्यनपरः । सबाह्याभ्यन्तरो ह्यजः सैन्धवघनवदित्यर्थः ॥२६॥

कीदृशस्तर्हि प्रणवो मन्दानां मध्यमानां चाधिकारिणां ध्येयो भवतीत्याशङ्क्याऽऽह—प्रणवो हीति । उत्तमाधिकारिणां कीदृशस्तर्हि प्रणवः सम्यग्ज्ञानगोचरो भवति तत्राऽऽह—अपूर्व[6] इति । परापरब्रह्मात्मना प्रणवो मन्दमध्यमाधिकारिणोर्ध्येयतामुपगच्छतीति पूर्वार्धं व्याचष्टे—परेति । उत्तमाधिकारिणस्तु सर्वविशेषशून्यमेकरसं प्रत्यग्भूतं यद्ब्रह्म तद्रूपेण प्रणवः सम्यग्ज्ञानाधिगम्यो भवतीत्युत्तरार्धं विभजते—परमार्थत इत्यादिना । उक्तेऽर्थे[7] प्रमाणं सूचयति—सबाह्येति ॥ २६ ॥

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥ २७ ॥

आदिमध्यान्ता उत्पत्तिस्थितिप्रलयाः[8] सर्वस्यैव मायाहस्तिरज्जुसर्पमृगतृष्णिकास्वप्नादिवदुत्पद्यमानस्य विषयादिप्रपञ्चस्य यथा मायाव्यादयः[9] । एवं

---

१ झ. °वो नि° । २ झ. समायु° । ३ घ. ङ. झ. °ज्ञानेन स° । ४ छ. ध्यानं क° । ५ क. ख. मनसः स° । ६ ग. घ. ङ. छ. ज. °रीयं रू° । ७ ग. °ति पु° । ८ च. °र्वं कर° । ९ क. पूर्वं । १० ग. °रिणो ध्येय° । घ. °रिणां ध्येय° । ११ छ. उक्तार्थे । १२ घ. छ. ज. झ. °तिल° । १३ च. °याख्याद° ।

हि प्रणवमात्मानं मायाव्यादिस्थानीयं ज्ञात्वा तत्क्षणादेव तदात्मभावं व्यश्नुत इत्यर्थः ॥ २७ ॥

यदोंकारस्य प्रत्यगात्मत्वमापन्नस्य तुरीयस्यापूर्वत्वमनन्तरत्वमित्यादिविशेषणमुक्तं तत्र हेतुमाह— सर्वस्येति । यथोक्तविशेषणं प्रणवं प्रत्यञ्चं प्रतिपद्य कृतकृत्यो भवतीत्याह—एवं हीति । पूर्वार्धं व्याकरोति—आदीति । सर्वस्यैवोत्पद्यमानस्योत्पत्तिस्थितिलया यथोक्तप्रणवाधीना भवन्ति । अतस्तस्योक्तं विशेषणं युक्तमित्यर्थः । तत्र परिणामवादं व्यावर्त्य विवर्तवादं द्योतयितुमुदाहरति—मायेति । अनेकोदाहरणमुत्पद्यमानस्यानेकविधत्वबोधनार्थं प्रणवस्य प्रत्यगात्मत्वं प्राप्तस्याविकृतस्यैव स्वमायाशक्तिवशाज्जगद्धेतुत्वमित्यत्र दृष्टान्तमाह—यथेति । यथा मायावी स्वगतविकारमन्तरेण मायाहस्त्यादेरिन्द्रजालस्य स्वमायावशादेव हेतुः । यथा वा रज्ज्वादयः स्वगतविकारविरहिणः स्वाज्ञानादेव सर्पादिहेतवस्तथाऽयमात्मा प्रणवभूतो व्यवहारदशायां स्वाविद्यया सर्वस्य हेतुर्भवति । अतो युक्तं तस्य परमार्थावस्थायां पूर्वोक्तविशेषणवत्त्वमित्यर्थः । द्वितीयार्धं विभजते— एवं हीति । पूर्वोक्तविशेषणसंपन्नमिति यावत् । ज्ञानस्य मुक्तिहेतोः सहायान्तरापेक्षा नास्तीति सूचयति—तत्क्षणादेवेति । तदात्मभावमित्यत्र तच्छब्देनापूर्वादिविशेषणं परमार्थवस्तु परामृश्यते ॥ २७ ॥

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम् ।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥ २८ ॥

सर्वप्राणिजातस्य स्मृतिप्रत्ययास्पदे हृदये स्थितमीश्वरं प्रणवं विद्यात्सर्वव्यापिनं व्योमवदोंकारमात्मानमसंसारिणं धीरो बुद्धिमान्मत्वा न शोचति । शोकनिमित्तानुपपत्तेः । "तरति शोकमात्मवित्" इत्यादिश्रुतिभ्यः ॥ २८ ॥

ब्रह्मबुद्ध्या प्रणवमभिध्यायतो हृदयाख्यं देशमुपदिशति—प्रणवमिति । परमार्थदर्शिनस्तु देशाद्यनवच्छिन्नवस्तुदर्शनादार्थिकं शोकाभावं तत्र को मोहः कः शोक इत्यादिश्रुतिसिद्धमनुवदति—सर्वव्यापिनमिति । हृदयदेशे प्रणवभूतस्य ब्रह्मणो ध्येयत्वे हेतुं सूचयति—स्मृतिप्रत्ययेति । बुद्धिमानिति विवेकित्वमुच्यते । मत्वेति

---

१ घ. ङ. ज. °याख्यादि° । २ घ. ङ. ज. °र्वम° । ३ घ. प्रत्ययं । ४ ग. घ. ङ. ज. झ. °र्थः । प° । ५ ज. 'दं द्यो° । ६ छ व्यावृत्य । ७ क. °प्रत्मत्वा° । ८ घ. मायया हृ° । ९ ग. छ. °स्यादी-द्र° । १० घ. छ. °था २° । ११ च. ङ. ज. झ. च । १२ ग. °त्मा प्रागनुभू° । १३ घ. ङ. छ. ज. हृदये स्थि° । १४ झ. °र्वस्य प्रा° । १५ क. इति श्रु° । १६ घ. ङ. ञ. °र्शिनो दे° । १७ क. °र्थिकशो° ।

साक्षात्कारसंपत्तिर्विवक्ष्यते । विवेकद्वारा तत्त्वसाक्षात्कारे सति शोकनिवृत्तौ हेतुमाह-शोकेति । तस्थं हि निमित्तमात्माज्ञानम् । तस्याऽऽत्मसाक्षात्कारतो निवृत्तौ शोकानुपपत्तिरित्यत्र प्रमाणमाह-तरतीति । आदिशब्देन भिद्यते हृदयग्रन्थिरित्यादिश्रुतिर्गृह्यते ॥ २८ ॥

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥ २९ ॥

इति माण्डूक्योपनिषदर्थाविष्करणपरायां(सु) गौडपादीयकारिकायां(सु) प्रथममागमप्रकरणम् ॥ १ ॥

ॐ तत्सत् ।

अमात्रस्तुरीय ओंकारो मीयतेऽनयेति मात्रा परिच्छित्तिः साऽनन्ता यस्य सोऽनन्तमात्रः । नैतावत्त्वमस्य परिच्छेत्तुं शक्यत इत्यर्थः । सर्वद्वैतोपशमत्वादेव शिवः । ओंकारो यथाव्याख्यातो विदितो येन स परमार्थतत्त्वस्य मननान्मुनिः । नेतरो जनः शास्त्रविदपीत्यर्थः ॥ २९ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतावागमशास्त्रविवरणे गौडपादीयकारिकासहितमाण्डूक्योपनिषद्भाष्ये प्रथममागमप्रकरणम् ॥ १ ॥

ॐ तत्सत् ।

ओंकारं तुरीयमात्मत्वेन प्रतिपन्नस्तं स्तौति-अमात्र इति । यथोक्तप्रणवप्रतिपत्तिविहीनस्तु जननमरणमात्रभागी न पुरुषार्थभाग्भवतीति विद्यारहितं निन्दति-नेतर इति । पादविभागस्य मात्राविभागस्य चाभावादोंकारस्तुरीयः सन्नमात्रो भवतीत्याह-अमात्र इति । ननु कथमनन्ता परिच्छित्तिरोंकारस्य तुरीयस्योच्यते । न हि तत्र परिच्छित्तिरेवास्तीत्याशङ्क्याऽऽह-नैतावत्त्वमिति । अनर्थात्मकद्वैतसंस्पर्शाभावादप्रतिबन्धेन परमानन्दत्वं तस्मिन्नाविर्भवतीत्यभिप्रेत्याऽऽह-सर्वेति । यथाव्याख्यातः पूर्वार्धेनोक्तविशेषणवानित्यर्थः । ननु यथोक्तप्रणवपरिज्ञानरहितस्यापि शास्त्र-

---

१ ग. ङ. छ. °वक्षिता । वि° । २ घ. छ. ज. °रा सा । ३ छ. °स्य नि° । ४ घ. °त्कारान्नि° । ५ घ. °शमादे° । ६ ज. °भवत्त्वादे° । ७ छ. °कारतु° । ८ ख. ङ. °वमात्रमा° । ९ क. °पन्नो यः । १० ख. °ति—स मुनिरिति । अ° । ११ ख. °भाङ् न पु° । १२ छ. °वज्ञा° ।

परिज्ञानवत्त्वान्न जन्मोपलक्षितसंसारभाक्त्वेन पुरुषार्थासिद्धिः। मैवम्। शास्त्रविदोऽपि तत्त्वज्ञानाभावे मुख्यपुरुषार्थासिद्धि(द्धे)रित्यभिप्रेत्याऽऽह—नेतर इति। तदेव प्रणवद्वारेण निरुपाधिकमात्मानमनुसंदधानस्य पुरुषार्थपरिसमाप्तिर्नेतरेषां बहिर्मुखाना(णा)मिति स्थितम्॥ २९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितायां माण्डूक्योपनिषदाविष्करणपरगौडपादीयकारिकाभाष्यटीकायां प्रथममागमप्रकरणम्॥ १॥

ॐ तत्सत्।

अथ गौडपादीयकारिकायां(सु) वैतथ्याख्यं द्वितीयं प्रकरणम्।

हरिः ॐ।

वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः।
अन्तःस्थानात्तु भावानां संवृतत्वेन हेतुना॥ १॥

ॐ। ज्ञाते द्वैतं न विद्यत इत्युक्तम्। एकमेवाद्वितीयमित्यादिश्रुतिभ्यः। आगममात्रं तत्। तत्रोपपत्त्याऽपि द्वैतस्य वैतथ्यं शक्यतेऽवधारयितुमिति द्वितीयं प्रकरणमारभ्यते—वैतथ्यमित्यादिना। वितथस्य भावो वैतथ्यम्, असत्यत्वमित्यर्थः। कस्य। सर्वेषां बाह्याध्यात्मिकानां भावानां पदार्थानां स्वप्न उपलभ्यमानानाम्। आहुः कथयन्ति। मनीषिणः प्रमाणकुशलाः। वैतथ्ये हेतुमाह—अन्तःस्थानात्। अन्तः शरीरस्य मध्ये स्थानं येषाम्। तत्र हि भावा उपलभ्यन्ते पर्वतहस्त्यादयो न बहिः शरीरात्। तस्मात्ते वितथा भवितुमर्हन्ति। नन्वपवरकाद्यन्तरुपलभ्यमानैर्घटादिभिरनैकान्तिको हेतुरित्याशङ्क्याऽऽह—संवृतत्वेन हेतुनेति। अन्तः संवृतस्थानादित्यर्थः। न ह्यन्तः संवृते देहान्तर्नाडीषु पर्वतहस्त्यादीनां संभवोऽस्ति। न हि देहे पर्वतोऽस्ति॥ १॥

---

१ च. °तीयं ब्रह्मेत्या°। २ च. °भ्यः, न, आ°। ३ घ. ज. झ. °तवै°। ४ ज. झ. °तीयप्र°। ५ छ. °रभते। ६ ख. झ. °ते। वि। ७ च. °ह्यात्मि°। झ. °ह्याध्यात्मिक°। ८ ङ. °कादीनां। ९ ज. °नां स्व°। १० झ. °रम°। ११ च. येषां ते त°। १२ घ. °वृते स्था°। १३ क. °नां भावोऽ°।

ॐ । आगमप्राधान्येनाद्वैतं प्रतिपादयतां[1] तत्प्रत्यनीकस्य[2] द्वैतस्य मिथ्यात्वमर्थादु[3]क्तम् । इदानीं तन्मिथ्यात्वमुपपत्तिप्राधान्येनापि प्रतिपत्तुं सुशकमिति दर्शयितुं प्रकरणान्तरमवतारयन्नादौ दृष्टान्तसिद्ध्यर्थं तस्मिन्वृद्धसंमतिमाह—वैतथ्यमिति । न केवलमागमोक्तिवशादेव स्वप्नमिथ्यात्वं किंतु युक्तितोऽपीत्याह—अन्तःस्थानामिति । पूर्वोत्तरप्रकरणयोः संबन्धसिद्ध्यर्थं पूर्वप्रकरणे वृत्तं संक्षिप्यानु[4]वदति—ज्ञात इति । आदिशब्देन यत्र हि द्वैतमिव भवतीत्यादिश्रुतिर्गृह्यते । तर्हि द्वैतमिथ्यात्वस्य प्रागेव सिद्धे[5]त्वादुत्तरं प्रकरणमनर्थकमित्याशङ्क्याऽऽह—आगमेति । यद्द्वैतं[6]मिथ्यात्वं पूर्वमुक्तं तदागममात्रम् । आगमप्राधान्येनाधिगतम् । न युक्तितः सिद्धम् । तस्मिन्नागमतोऽवगते युक्तिप्राधान्येनापि तन्मिथ्यात्वमवगन्तव्यमिति प्रकरणान्तरं प्रारब्धमित्यर्थः । प्रमाणानुग्राहकत्वात्तर्कस्यानुग्राह्यभा[7]णस्य प्रधानत्वात्तदधीनविचारानन्तरं तर्काधीनविचारस्य लाघवाशाद्युक्तं पौर्वापर्यं पूर्वोत्तरप्रकरणयोरित्युक्तम् । संप्रति श्लोकाक्षराणि योजयति—वितथस्येत्यादिना । बाह्या घटादयः । सुखादयस्त्वाध्यात्मिका भावाः । शरीरा[8]न्तरवस्थानं स्वा[9]प्नानां भावानामित्यत्रानुभवं प्रमाणयति—तत्र हीति । तेषामन्तरुपलम्भमानत्वेऽपि न वैतथ्यं व्यभिचारादित्याशङ्कामनू[10]द्य परिहरति—नान्वित्यादिना । हेत्वन्तरशङ्कां वारयति—अन्तरिति । यद्यपि देहान्तः संकु[11]चिते देशे स्वा[12]प्ना भावा भवन्ति तथाऽपि कथं तेषां मृषात्वमित्यत आह—न हीति । अन्तरित्युक्तं स्फुटयति—संवृत इति । तमेव संकुचितं देशं विशेषणान्तरेण स्फोरयति—देहान्तर्नाडी[13]ष्विति । उक्तमर्थं कैमुतिकन्यायेन स्फुटयति—न हीति । यदा देहेऽपि पर्वतादयो न संभाव्यन्ते तदा तदन्तर्वर्तिनी[14]षु नाडी[15]ष्वतिसूक्ष्मासु तेषां संभावना नास्तीति किमु वक्तव्यमित्यर्थः । स्वा[16]प्ना भा[17]वाः सत्या न भवन्ति, उचितदेशशून्यत्वाद्रज्जतमुनंगादिवदिति भावः ॥ १ ॥

अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥ २ ॥

स्वप्नदृश्यानां भावा[18]नामन्तः संवृतस्थानमित्येतदसिद्धम् । यस्मात्सा-

---

१ ग. °यतां त° । २ झ. °स्य मि° । ३ घ. °र्थाद्वक्तव्यम् । ४ झ. °प्यानुद्रवति । ५ ङ. °त्याद्या श्रु° । ६ ग. झ. यद्द्वैतं वैतथ्यं पू° । ७ ङ. °तस्य मि° । ८ क. °नानु° । ९ क. °कर्तानु° । १० झ. °प्रधानस्य° । ११ ग. झ. °न्तराव° । १२ छ. स्वप्नानां । १३ घ. ङ. °चितदे° । १४ छ. स्वप्ना । १५ ङ. स्वप्रा । १६ क. भावा आगममात्रं स° । १७ क. °देहशू° । १८ छ. °मन्तःस्थवृ° । १९ घ. °त्प्राच्यादिष्व ।

[1]च्येषु [2]सुप्त उदक्षु स्वप्नान्पश्यन्निव दृश्येत[3]। [4]इत्येतदाशङ्क्याऽऽह। [5]न देहाद्बहिर्देशान्तरं गत्वा स्वप्नान्पश्यति। यस्मात्सुप्तमात्र एव देहदेशाद्योजनशतान्तरिते मासमात्र[6]प्राप्ये देशे स्वप्नान्पश्यन्निव दृश्यते। न च तद्देशप्राप्तिरागमनस्य दीर्घः कालोऽस्ति। अतोऽदीर्घत्वाच्च कालस्य न स्वप्नदृग्देशान्तरं गच्छति। किंच प्रतिबुद्धश्च वै सर्वः स्वप्नदृक्स्वप्नदर्शनदेशे न विद्यते। यदि च स्वप्ने देशान्तरं गच्छेद्यस्मिन्देशे स्वप्नान्पश्येत्तत्रैव प्रतिबुध्येत न चैतदस्ति। रात्रौ [10]सुप्तोऽहनीव[12] भावान्पश्यति बहुभिः संगतो यैश्च संगतो भवति तैर्गृह्येत। न च गृह्यते गृहीतश्चेत्त्वामद्य तत्रोपलब्धवन्तो वयमिति ब्रूयुः। न चैतदस्ति तस्मान्न देशान्तरं गच्छति स्वप्ने ॥ २ ॥

[13]

देहाद्बहिरेव देशान्तरं गत्वा स्वाप्नानां भावानामुपलम्भात्तेषां देहान्तः संवृत नाडीप्रदेशे दर्शनमसंप्रतिपन्नमित्याशङ्क्य[14] च परिहरति—अदीर्घत्वाच्चेति। बहिः स्वप्नोपलब्धिपक्षे दोषान्तरमाह—प्रतिबुद्धश्चेति. व्यावर्त्यमाशङ्कामनुवदति—स्वप्नेति। तेषां देहान्तः संकुचिते नाडीदेशे स्थितिदर्शनान्मिथ्यात्वमित्येतदप्यसंप्रतिपन्नमित्यत्र हेतुमाह—यस्मादिति। पश्यन्निवेति स्वप्नदर्शनस्य निरूपणे सत्याभासत्वमिवशब्देन द्योत्यते। एतच्छब्देन चोद्यं परामृश्यते। स्वप्नद्रष्टा गत्वा स्वप्नान्न पश्यतीत्यत्र हेतुमाह— यस्मादिति। इवशब्दस्तु पूर्ववत्। तथाऽपि कथं बहिः स्वाप्नोपलम्भो न भवतीति निर्धारितमित्याशङ्क्याऽऽह—न चेति। स्वप्नः सत्यो न भवति उचितकालविकलत्वात्संप्रतिपन्नवदित्यभिप्रेत्य फलितमाह— अत इति। इतश्च न [16]देहाद्बहिर्देशान्तरे स्वप्नदर्शनमित्याह—किंचेति। सर्वोऽपि स्वप्नद्रष्टा देशान्तरे स्वप्नान्पश्यन्नकस्मादेव प्रतिबुद्धो न तत्रास्ति किंतु शयनदेशे वर्तते तथाऽपि गत्वा स्वप्नदर्शने काऽनुपपत्तिरित्याशङ्क्याऽऽह— यदि चेति। अन्तरेव स्वप्नदर्शनमिति स्थिते स्वप्नमिथ्यात्वमुचितकालशून्यत्वादित्युक्तं प्रपञ्चयति—रात्राविति। यद्यपि [18]रात्रौ निद्रामुपगतस्तथाऽपि भावानहनि पश्यन्निव तिष्ठति [19]सुप्तः संहृतचक्षुरादिकरणोऽपि पश्यति। [20]शयानोऽपि पर्यटनं प्रतिपद्यते। यद्यपि सहायविहीनः सुप्तस्तथाऽपि बहुभिः [21]सहायैः स्वप्नानुपलभते। तस्मादुचितस्य कालस्य [22]करणस्य सहकारिण-

---

१ ज. °च्ये सु°। २ ग. °सुषुप्त°। ३ ज. °त न च दे°। ४ झ. इत्याश°। ५ छ. न बहिर्देहा°। ६ च. °प्राप्यदे°। ७ छ. °देशे प्रा°। ८ छ. °लो अ°। ९ छ. ऽबु°। १० ख. सुषुप्तोऽ°। ११ च. °हनि भा°। १२ छ. ज. °व च भा°। १३ घ. संवृत्तेन। १४ ग. झ. °शङ्कां प°। १५ ग. °त्याह। १६ ङ. देशाद्ब°। १७ ख. ग. झ. सुप्तः। १८ घ. °दिवार°। १९ ग. °नो प°। २० क. ग. सहायः। २१ घ. झ. °स्य कार°।

श्रयाभावेऽपि स्वप्नदर्शनात्तस्मिन्मिथ्यात्वं सिद्धमित्यर्थः । स्वप्नमिथ्यात्वे हेत्वन्तरमाह—वैश्येति । सहदर्शिभिरगृह्यमाणत्वं स्वप्नद्रष्टुरसंप्रतिपन्नमित्याशङ्क्याऽऽह—गृहीतश्चेदिति । पुरुषान्तरसंवादादर्शनात्तद्देशान्तरप्राप्तिद्वारा स्वप्नदर्शनमिति वक्तुमशक्यत्वादन्तरेव स्वप्नदर्शनमित्युचितदेशकालाभावात्तन्मिथ्यात्वं सिद्धमित्युपसंहरति—तस्माच्चेति ॥ २ ॥

अभावश्च रथादीनां श्रूयते न्यायपूर्वकम् ।
वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितम् ॥ ३ ॥

इतश्च स्वप्नदृश्या भावा वितथाः । यतोऽभावश्चैव रथादीनां स्वप्नदृश्यानां श्रूयते न्यायपूर्वकं युक्तितः श्रुतौ "न तत्र रथाः" इत्यत्र । देहान्तःस्थानसंवृतत्वादिहेतुना प्राप्तं वैतथ्यं तदनुवादिन्या श्रुत्या स्वप्ने स्वयंज्योतिष्ट्वप्रतिपादनपरया प्रकाशितमाहुर्ब्रह्मविदः ॥ ३ ॥

स्वप्नदृश्यानां भावानां मिथ्यात्वे हेत्वन्तरमाह—अभावश्चेति । न तत्र रथा न रथयोगा न पन्थानो भवन्तीत्यादिश्रुत्या स्वप्ने स्वयंज्योतिष्ट्वमात्मनो दर्शयन्त्या तत्र दृश्यानां रथादीनामभावो योग्यदेशाद्यभावद्योतकन्यायपुरःसरं श्रूयते । अतस्तेन न्यायेन प्राप्तमेव स्वप्नदृश्यभावानामस्ति मिथ्यात्वमन्यपरया श्रुत्या प्रकाशितमिति ब्रह्मविदो वदन्ति । तथा च स्वप्ने भावानां मिथ्यात्वं श्रुतियुक्तिभ्यां सिद्धमित्यर्थः । हेत्वन्तरपरत्वं श्लोकस्य दर्शयति—इतश्चेति । इतःशब्दार्थमेव स्फुटयति—यत इति । ज्ञेयाभावे ज्ञानाभावादर्थाज्ज्ञानस्यापि श्रुतमसत्त्वमिति वक्तुं चशब्दः । श्रूयते न तत्रेत्याद्यायां श्रुताविति संबन्धः । न्यायपूर्वकमिति व्याचष्टे—युक्तित इति । योग्यदेशाद्यभावो युक्तिः । तर्हि न्यायसिद्धेऽर्थे किमन्यपरया श्रुत्या क्रियते तत्राऽऽह—तेनेति । अन्तःशरीरमध्यस्थानं नाडीलक्षणम् । तत्रातिसूक्ष्मे संवृतत्वेन संकुचितत्वेनावस्थानं पर्वतादीनामुपलभ्यते ततश्चोचितदेशाभावो योग्यकालाभावश्चेत्यादिना प्रागुक्तेन हेतुना प्राप्तं स्वप्नदृश्यानां भावानां वैतथ्यं तदेव तदनुवादिन्या श्रुत्याऽपि प्रकाशितमित्याहुर्ब्रह्मविदः । जाग्रदवस्थायामादित्यादिप्रकाशानां वागादिज्योतिषां च विद्यमानत्वादासनादिव्यवहारस्य तन्निमित्तत्वसंभवादात्मचैतन्यनिबन्धनो व्यवहारो न निर्धारयितुं शक्यते । स्वप्ने पुनः सूर्याद्यभावेऽपि व्यवहारदर्शनात्तस्य च निमित्तापेक्ष्य (क्ष) त्वादात्मचैतन्यस्य तन्निमित्तत्वनिर्णयात्तत्राऽऽत्मनः स्वयंज्योतिष्ट्वं प्रतिपाद-

---

१ ग. ज. °त्तन्मि° । २ क. °णत्वाद्द्र° घ. °णत्वद्रष्टु° । ३ ख. °नाद्दे° । ४ घ. ङ. °वान्मि° । ५ घ ङ. °दृष्यभा° । ६ झ. °र्वैकयु° । ७ झ. °दिति हे° । ८ ख. °यन्त्यां त° । ९ ख. स्वप्ने द° । १० ग. झ. स्वप्नभा° । ११ ग. °रत्वं । १२ ख. ग. झ. °ऽध्ये स्था° । १३ ङ. °श्चोदित° । १४ ग. ज. झ. °नां वै° । १५ ग. सदेव । १६ घ. ङ. ज. °मिति ब्रह्म° । १७ झ. °दत्त्वं सं° ।

यितुं न तत्रेत्याद्या श्रुतिः । तया तत्परया न्यायसिद्धं स्वप्नमिथ्यात्वमनुवदन्त्या तदेवप्रतिपादितमपि प्रकाशितमिष्यते । तथा च श्रुतियुक्तिभ्यां प्रतिपन्नं स्वप्नमिथ्यात्वमिति दृष्टान्तसिद्धिरित्यर्थः ॥ ३ ॥

अन्तःस्थानात्तु भेदानां तस्माज्जागरिते स्मृतम् ।
यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते ॥ ४ ॥

जाग्रद्दृश्यानां भावानां वैतथ्यमिति प्रतिज्ञा । दृश्यत्वादिति हेतुः । स्वप्नदृश्यभाववदिति दृष्टान्तः । यथा तत्र स्वप्ने दृश्यानां भावानां वैतथ्यं तथा जागरितेऽपि दृश्यत्वमविशिष्टमिति हेतूपनयः । तस्माज्जागरितेऽपि वैतथ्यं स्मृतमिति निगमनम् । अन्तःस्थानात्संवृतत्वेन च स्वप्नदृश्यानां भावानां जाग्रद्दृश्येभ्यो भेदः । दृश्यत्वमसत्यत्वं चाविशिष्टमुभयत्र ॥ ४ ॥

उक्तन्यायेन दृष्टान्ते सिद्धे फलितमनुमानमाह——अन्तःस्थानादिति । भेदानामित्यत्र सूचितमनुमानमारचयति—जाग्रदिति । तृतीयेन पादेन पक्षधर्मत्वं द्वयोरस्य हेतोरुच्यते तद्दर्शयति——यथेति । द्वितीयेन पादेन प्रतिकूलप्रमाणाभावसूचकं प्रतिज्ञोपसंहारवचनं निगमनं सूचितमित्याह——तस्मादिति । सर्वद्वैतवैतथ्यवादिनां केन विशेषेण पक्षसपक्षविभागसिद्धिरित्याशङ्क्यान्तःस्थानात्तु संवृतत्वेन भिद्यत इत्यत्र विवक्षितमर्थमाह——अन्तःस्थानादिति । स्वप्नदृश्यानामन्तःस्थानं संवृतत्वं च न तथा जाग्रद्दृश्यानां तेनोचितदेशाद्यभावात्तेषां तेभ्यो वैषम्यं स्फुटम् । सिद्धं हि योग्यदेशाद्यभावेन स्वप्नस्य मिथ्यात्वमिति सपक्षत्वम् । जागरितस्य पुनरुचितदेशादिसद्भावादस्फुटमिथ्यात्वमिति पक्षत्वमित्यर्थः । तर्हि सर्वथा वैषम्यादृष्टान्तदार्ष्टान्तिकभावासिद्धिरित्याशङ्क्याऽऽह— दृश्यत्वमिति ॥ ४ ॥

स्वप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः ।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ ५ ॥

प्रसिद्धेनैव भेदानां ग्राह्यग्राहकत्वेन हेतुना समत्वेन स्वप्नजागरितस्थानयोरेकत्वमाहुर्विवेकिन इति पूर्वप्रमाणसिद्धस्यैव फलम् ॥ ५ ॥

---

१ घ. ज. °सिद्धस्त्व° । २ घ. °दपि प्र° । ३ ख. °थाऽपि श्रु° । ४ झ. °सिद्धेरि° । ५ घ. ङ. च. ज. झ. तथा जग° । ६ झ. ते ह° । ७ क. °न न च स्व° । ८ ख. घ. ङ. ज. °सत्त्वं चा° । ९ छ. °मानं र° । १० छ. व्याप्यस्यै° । ११ ग. छ. झ. सूचित° । १२ घ. °द्वैतीयेन पादेन प्रतिकूलप्रमावै° । १३ छ. °शेषेण प° । १४ ङ. झ. °स्फुटं मि° । १५ क. °रिते स्था° । १६ क. °योरैक्यत्व° ।

स्वप्नवज्जागरितस्य मिथ्यात्वे स्वप्नानिद्रायुतावित्यादौ जागरिते स्वप्नशब्दप्रयोगो युक्तो भवतीत्याह-स्वप्नेति । उभयत्रैकत्वं विद्वदभिमतमित्यत्र हेतुमाह-भेदानामिति । भेदा भिद्यमाना भावाः । तेषामवस्थाद्वयवर्तिनां ग्राह्यत्वं ग्राहकत्वमविशिष्टम् । तेन दृश्यत्वेन हेतुना प्रसिद्धमेव तेषां मिथ्यात्वेन समत्वं तेन स्थानयोरेकत्वं विवेकिनामभिप्रेतमिति यत्पूर्वमनुमानाख्यं प्रमाणं सिद्धं तस्यैव फलं साधनस्थानद्वयाविशेषरूपमनेन श्लोकेनोक्तमिति श्लोकयोजनया दर्शयति-प्रसिद्धेनैवेति ॥ ५ ॥

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ४ ॥

इतश्च वैतथ्यं जाग्रद्दृश्यानां भेदानामाद्यन्तयोरभावाद्यदादावन्ते च नास्ति वस्तु मृगतृष्णिकादि तन्मध्येऽपि नास्तीति निश्चितं लोके । तथेमे जाग्रद्दृश्या भेदाः । आद्यन्तयोरभावाद्वितथैरेव मृगतृष्णिकादिभिः सदृशत्वाद्वितथा एव तथाऽप्यवितथा इव लक्षिता मूढैरनात्मविद्भिः ॥ ६ ॥

जाग्रद्दृश्यानां भावानां मिथ्यात्वमित्यत्रानुमानान्तरमाह—आदाविति । यदि जाग्रद्दृश्या भावा मिथ्यात्वेन प्रसिद्धस्वप्नादिभिः समत्वान्मिथ्या कथं तर्हि तेषां घटः सन्पटः सन्नित्यमृषात्वेन प्रतीतिरित्याशङ्क्याऽऽह-वितथैरिति । प्रकृते जाग्रन्मिथ्यात्वे हेत्वन्तरपरत्वं श्लोकस्योपन्यस्यति-इतश्चेति । विमतं मिथ्याऽऽदेमत्वादन्तवत्त्वात्स्वप्नादिवदित्यर्थः । उक्तानुमानद्वन्द्विन्ने व्याप्तिं कथयति-यदादाविति । यदादिमदन्तवच्च तन्मिथ्या यथा मृगतृष्णिकादीत्यर्थः । व्याप्तिमतः साधनस्य पक्षधर्मतोपन्यासेन प्रतिज्ञोपसंहारवच्चैनं निगमनं दर्शयति-तथेति । अनुमानस्य घटादिषु सत्त्वग्राहकप्रत्यक्षविरोधमाशङ्क्य सद्घटवनगरमितिवत्तस्याऽऽपातिकसत्त्वविषयत्वान्मैवमित्याह—तथाऽपीति ॥ ६ ॥

सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ७ ॥

स्वप्नदृश्यवज्जागरितदृश्यानामप्यसत्त्वमिति यदुक्तं तदयुक्तम् । यस्मा-

---

१ ग. °प्रजा° । २ घ. ज. °त्यादिजा° । ३ ख. °घनं स्था° । ४ ग. ज. झ. °नद्वं° । ५ छ. °श्यानामा° । ६ झ. °वाद्यद्वि° । ७ छ. °श्या त° । ८ ख. °हिं घ° । ९ छ. °रत्वे श्लो° । १० घ. ङ. ज. °श्याऽऽद्यन्तव° । ११ क. °नजडिन्ने । १२ छ. °दावन्त इति । १३ ङ. °चने नि° । १४ क. °त्त्वसाधक° । १५ क. °रितं द° । १६ ग. घ. ज. झ. °सत्यत्वामि° ।

जाग्रद्दृश्या अन्नपानवाहनादयः क्षुत्पिपासादिनिवृत्तिं कुर्वन्तो गमनागमनादिकार्यं च सप्रयोजना दृष्टाः । न तु स्वप्नदृश्यानां तदस्ति । तस्मात्स्वप्नदृश्यवज्जाग्रद्दृश्यानामसत्त्वं मनोरथमात्रमिति । तन्न । कस्मात् । यस्मात्सप्रयोजनता दृष्टा यादन्नपानादीनां सा स्वप्ने विप्रतिपद्यते । जागरिते हि भुक्त्वा पीत्वा च तृप्तो विनिवर्तिततृट्सुप्तमात्र एव क्षुत्पिपासाद्यार्तमहोरात्रोषितमभुक्तवन्तमात्मानं मन्यते । यथा स्वप्ने भुक्त्वा पीत्वा चातृप्तोत्थितस्तथा । तस्माज्जाग्रद्दृश्यानां स्वप्ने विप्रतिपत्तिर्दृष्टा । अतो मन्यामहे तेषामप्यसत्त्वं स्वप्नदृश्यवदनाशङ्कनीयमिति । तस्मादाद्यन्तवत्त्वमुभयत्र समानमिति मिथ्यैव खलु ते स्मृताः ॥ ७ ॥

स्वप्नस्य मिथ्यात्वमाद्यन्तवत्त्वान्न भवति किंतु फलपर्यन्तत्वाभावाज्जागरितस्य फलपर्यन्तत्वान्न मिथ्यात्वमित्याशङ्क्याऽऽह—सप्रयोजनतेति । फलपर्यन्ततारहित्योपाधेः साधनव्यापकत्वे फलितमाह—तस्मादिति । जाग्रद्दृश्या भावा बहूक्त्या गृह्यन्ते । श्लोकस्य व्यावर्त्यमुद्घाट्याशङ्कामुत्थापयति—स्वप्नेति । जाग्रद्दृश्यानामिव स्वप्नदृश्यानामपि तुरीयं सप्रयोजनत्वमित्युपाधेरसंभवमाशङ्क्याऽऽह—न त्विति । अनुमानस्य सोपाधिकत्वेनाऽऽसाधकत्वे फलितमाह—तस्मादिति । हेतोः सोपाधिकत्वं दूषयति—व्यभिचरतीति । साधनव्याप्त्यादिदोषादृते नोपाधिनिरसनं सुशकमित्याह—कस्मादिति । फलपर्यन्ततारहित्योपाधेः साधनव्याप्तिमाह—यस्मादित्यादिना । तामेव विप्रतिपत्तिं प्रकटयति—जागरिते हीति । उक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेत्यादिना । उपाधेः साधनव्याप्तिं निगमयति—तस्मादिति । हेतोः सोपाधिकत्वाभावे फलितमाह—अत इति । हेतुद्वयमुपसंहरति—तस्मादिति ॥७॥

अपूर्वं स्थानिधर्मो हि यथा स्वर्गनिवासिनाम् ।
तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः ॥ ८ ॥

स्वप्नजाग्रद्भेदयोः समत्वाज्जाग्रद्भेदानामसत्त्वमिति यदुक्तं तदसत् ।

---

१ छ. °सानिं° । २ छ. °जनता दृ° । ३ च. °सत्यत्वं म° । ४ °क. तत्र क° । ५ छ. °प्रे प्र° ६ क. °त्वा चातृ । झ. °त्वा तृ । ७ छ. °मनुभु° । ८ ख. °त्वा च तृ° । घ. ङ. च. °त्वा तृ° । ९ क. °प्रेऽपि वि° । १० च °दृश्यतेऽतो° । ११ ग. झ. बहुयुक्त्या । १२ ख. °मुपपादय । १३ ज. श्यानां तु° । १४ क. °वमित्याश° । १५ छ. °कत्वे दू° । १६ क. तत्रेति । १७ क. °ल्याशङ्क्याऽऽ-ह । १८ क. °हित्सोपा° । ख. ग. झ. °हितत्वोपा° । १९ छ. °सिफलमा° । २० क. °न स्फुट्य° । २१ ग. हेतोरौपा° । २२ क. यदैवे° ।

कस्मात् । दृष्टान्तस्यासिद्धत्वात् । कथम् । न हि जाग्रद्दृष्टा एवैते भेदाः स्वप्ने दृश्यन्ते । किं तर्हि । अपूर्वं स्वप्ने पश्यति चतुर्दन्तगजमारूढमष्टभुजमात्मानं मन्यते । अन्यदप्येवंप्रकारमपूर्वं पश्यति स्वप्ने । तन्नान्येनासता सममिति सदेव । अतो दृष्टान्तोऽसिद्धः । तस्मात्स्वप्नवज्जागरितस्यासत्त्वमित्ययुक्तम् । तत्रैं स्वप्ने दृष्टपूर्वं यन्मन्यसे न तत्स्वतःसिद्धम् । किं तर्हि । अपूर्वस्थानिधर्मो हि स्थानिनो द्रष्टुरेव हि स्वप्नस्थानवतो धर्मः । यथा स्वर्गनिवासिनामिन्द्रादीनां सहस्राक्षत्वादि तथा स्वप्नदृश्योऽपूर्वोऽयं धर्मः । न स्वतःसिद्धो द्रष्टुः स्वरूपवत् । तानेवंप्रकारानपूर्वान्स्वचित्तविकल्पानयं स्थानी स्वप्नदृक्स्वप्नस्थानं गत्वा प्रेक्षते । यथैवेह लोके सुशिक्षितो देशान्तरमार्गस्तेन मार्गेण देशान्तरं गत्वा तान्पदार्थान्पश्यति तद्वत् । तस्माद्यथा स्थानिधर्माणां रज्जुसर्पमृगतृष्णिकादीनामसत्त्वं तथा स्वप्नदृश्यानामपूर्वाणां स्थानिधर्मत्वमेवेत्यसत्त्वमतो न स्वप्नदृष्टान्तस्यासिद्धत्वम् ॥ ८ ॥

दृष्टान्तस्य साध्यविकलत्वं शङ्कित्वा परिहरति- अपूर्वमिति । यथा स्वर्गनिवसनशीलानामिन्द्रादीनां सहस्राक्षत्वादिधर्मस्तथा यदिदमपूर्वस्वप्नदर्शनं मन्यसे तदपि स्थानिनः स्वप्नस्थानवतो द्रष्टुरेव धर्मः । तेन दृष्टत्वात्तस्य मिथ्यात्वसिद्धिरित्यर्थः । कथं तेनैव दृष्टत्वं तत्राऽऽह- तानयमिति । यथैवेह व्यवहारभूमौ सुशिक्षितो देशान्तरप्राप्तिमार्गस्तेन मार्गेण देशान्तरं गत्वा तत्रत्यान्पदार्थानीक्षते तथाऽयं स्वप्नद्रष्टा स्वप्नगतान्पदार्थान्यथोक्तप्रकारान्प्रतिपद्यते । ततश्च स्वप्नस्य स्थानिधर्मत्वाद्रज्जुसर्पादिवन्मिथ्यात्वमित्यर्थः । श्लोकन्यावर्त्यामाशङ्क्य मुपन्यस्यति—स्वप्नेति । समत्वमाद्यन्तवत्त्वादि। अनुमानसिद्धस्यार्थस्यानुमानदोषोक्तिमन्तरेणासत्त्वमयुक्तमिति पृच्छति—कस्मादिति । व्याप्तिभूमिं दूषयन्व्याप्तिभङ्गं दोषमाह—दृष्टान्तस्येति । असिद्धत्वं प्रश्नपूर्वकं विशदयति—कथमित्यादिना । अपूर्वदर्शनमेव विवृणोति—चतुर्दन्तमिति । अन्यदपि त्रिनेत्रत्वादि । दृष्टान्तस्य साध्यविकलत्वे सिद्धे प्रागुक्तानुमानानुपपत्तिरिति फलितमाह—तस्मादिति । दृष्टान्तसिद्धिं दूषयन्ननुमानं साधयति—तत्रेति । तार्किक-

---

१ ग. घ. ङ. च. छ. °र्दन्तं ग° । २ च. तत्रान्ते° । ३ क. °देवातो द्र° । ४ क. तत्र स्व° । ५ क. तत्तु स्वतः । ६ ख. च. छ. ज. झ. °मित्यपूर्वं स्था । ७ घ. ङ. च. ज. झ. °व स्व° । ८ क. °काशन° । ९ ज. °नीयस्व° । १० ज. झ. °शितं पे° । ११ घ. ङ. च. ज. झ. °त्वा पश्य° । १२ घ. ङ. ज. °णां च. स्था° । १३ झ. °स्राक्षादि° । १४ झ. ° पूर्वं स्व° । १५ क °ति । तथै । १६ क. °प्रप° । १७ छ. °सर्पव° । १८ छ. कस्य व्या° । १९ ग. ङ. छ. झ. °दिति । अ' २० क. पूर्व द° । २१ घ. ज. °नुपप° ।

स्वभावतः[2] सिद्धं[3] परतो वा। नाऽऽद्यः। जडस्य तदयोगादित्याह--न तादिति। द्वितीये तन्मिथ्यात्वमित्यभिप्रेत्य प्रश्नपूर्वकमाद्यपादमवतारयति--किं तर्हीति। तद्वतान्यक्षराणि व्याकरोति--स्थानिन इति। अपूर्वस्वप्नदर्शनस्य स्थानिधर्मत्वं दृष्टान्तेन साधयति[6]--यथेत्यादिना। अपूर्वदर्शनं स्वप्नद्रष्टृधर्मोऽपि चैतन्यवर्त्ति न स्यादित्याशङ्क्य बाधोपलब्धेर्मैवमित्याह--न स्वत इति। उत्तरार्धं विभजते--तानित्यादिना। अपूर्वाणां स्वप्नदृश्यानां स्थानिधर्मत्वेऽपि किमायातमित्याशङ्क्याऽऽह--तस्मादिति। स्वप्नदृष्टान्तस्य साध्यविकलत्वाभावं निगमयति--अतो नेति[10]। पूर्वस्यापूर्वस्य वा स्वप्नदर्शनस्य स्वप्नद्रष्टृधर्मत्वेन तदविद्याविलसितत्वाद्दृष्टान्ते साध्यसंप्रतिपत्तेस्तथैव जाग्रद्भेदानां मिथ्यात्वं युक्तमित्यर्थः॥ ८॥

स्वप्नवृत्तावपि[12] त्वन्तश्चेतसा[13] कल्पितं[14] त्वसत्[15]।
बहिश्चेतोगृहीतं[16] सद्दृष्टं वैतथ्यमेतयोः॥ ९॥

अपूर्वत्वाशङ्कां निराकृत्य स्वप्नदृष्टान्तस्य पुनः स्वप्नतुल्यतां जाग्रद्भेदानां प्रपञ्चयन्नाह--स्वप्नवृत्तावपि[17] स्वप्नस्थानेऽप्यन्तश्चेतसा मनोरथसकल्पितमसत्[18]। संकल्पानन्तरं[20] समकालमेवादर्शनात्तत्रैव[21] स्वप्ने बहिश्चेतसा[22] गृहीतं चक्षुरादिद्वारेणोपलब्धं घटादि सदित्येवमसत्यमिति[23] निश्चितेऽपि सदसद्विभागो दृष्टः। उभयोरप्यन्तर्बहिश्चेतःकल्पितयोर्वैतथ्यमेव[24] दृष्टम्[25]॥ ९॥

जाग्रद्दृश्यानां मिथ्यात्वं तेषु सदसद्विभागप्रतिभानविरुद्धमित्याशङ्क्य दृष्टान्तेन समाधत्ते--स्वप्नवृत्ताविति। श्लोकस्य तात्पर्यमाह--अपूर्वत्वेति। स्वप्नदृष्टान्तस्यापूर्वदर्शनत्वमयुक्तं[27] साध्यविकलत्वशङ्कां परिहरति यावत्। स्वप्नस्थाने सर्वस्य[30]

---

१ ख. छ. झ. स्वतः। २ घ. सिद्धिं किंवा प°। ३ ख. ज. झ. °द्धं किंवा प°। ४ ख. ङ. ज. झ. °त्वसिद्धिरित्य°। ५ ग. ङ. झ. °र्वस्य स्व°। ६ ग. झ. °ति। तथे°। ७ ज. °प्रदृष्ट्य°। ८ छ. °द्रष्टृध ९ ज. °त्वे कि°। १० क °ते। अपूर्वस्यानपू°। ११ क. °सिद्धा°। १२ घ. च. °ताऽप्यन्त° १३ ज. झ. °प्यन्त°। १४ घ. ज. झ. °ल्पितत°। १५ ङ च. ज. झ. °श्चेतसा गृ°। १६ च. °तं सदसतोर्वैतथ्यं दृष्टम्॥ ९॥ १७ झ. °पि स्था°। १८ ज. °सत्कल्पनान°। १९ ग.ङ च.झ.°कल्पना°। २० च. °न्तरं स्वप्नत°। २१ च. °नेव द। २२ च. °तसा गृ°। २३ छ °सत्त्वमि°। २४ च. °ततथा वैत°। २५ घ. ङ. च. ज. झ. °म्॥ ९॥ अ°। २६ घ. ज. मिथ्यात्वे। २७ ज. °र्शनात्प्रयु°। २८ घ. °नत्प्रयु°। २९ घ. ज. °ने पूर्व°। ३० ख. °र्वस्यापूर्वस्य।

मिथ्यात्वाविशेषऽपीत्यर्थः । असत्त्वं परमार्थसद्विलक्षणत्वेन मिथ्यात्वम् । तत्रापि तर्हि विभागप्रतिभासविरोधात्कुतो मिथ्यात्वमित्याशङ्क्य बाधाविशेषादित्याह—उभयोरिति ॥ ९ ॥

जाग्रद्वृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतो गृहीतं सद्युक्तं वैतथ्यमेतयोः ॥ १० ॥

सदसतोर्वैतथ्यं युक्तम् । अन्तर्बहिश्चेतःकल्पितत्वाविशेषादिति । व्याख्यातमन्यत् ॥ १० ॥

दार्ष्टान्तिकमाह—जाग्रदिति । युक्तत्वे हेतुमाह—अन्तरिति । श्लोकस्थानामक्षराणां व्याख्यानमनपेक्षितं व्याख्यातप्रायत्वादित्याह—व्याख्यातमिति ॥ १० ॥

उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि ।
क एतान्बुध्यते भेदान्को वै तेषां विकल्पकः ॥ ११ ॥

चोदकश्चाऽऽह—स्वप्नजाग्रत्स्थानयोर्भेदानां यदि वैतथ्यं क एतानन्तर्बहिश्चेतःकल्पितान्बुध्यते । को वै तेषां विकल्पकः । स्मृतिज्ञानयोः क आलम्बनमित्यभिप्रायः । न चेन्निरात्मवाद इष्टः ॥ ११ ॥

सर्वमिथ्यात्वे प्रमातृप्रमाणादिव्यवहारानुपपत्त्या विशेषमाशङ्कते—उभयोरिति । कर्तृकरणव्यवस्थानुपपत्त्याऽपि विरोधोऽस्तीत्याह—को वा इति । विकल्पको निर्मातेति यावत् । श्लोकस्य चोद्यपरत्वं प्रतिजानीते—चोदक इति । अक्षरयोजनया प्रथमार्थापत्तिविरोधं स्फोरयति—स्वप्नेति । चतुर्थपादमवतार्यार्थापत्त्यन्तरविरोधं स्फुटयति—को वै तेषामिति । कर्ता हि पूर्वानुभूतं स्मृत्वा तज्जातीयान्निर्मिमीते तेन स्मृत्यनुभवाश्रयाक्षेपेण कर्त्राक्षेपो विवक्षितस्तथा च कर्त्रादिव्यवहारानुपपत्तिः सर्वमिथ्यात्वे दुर्वारेत्यर्थः । योऽध्यात्मं प्रमाता यश्चाधिदैवं कर्तेश्वरस्तावुभावपि मिथ्येत्यङ्गीकारात्प्रमात्रादेरसत्त्वमित्याशङ्क्याऽऽह—न चेदिति । यदि प्रमाता कर्ता वा नेष्यते तर्हि नैरा-

---

१ घ. ङ. ज. असत्यत्वं । २ क. °र्थतद्वि° । ३ घ. ज. झ. °वप्यन्त° । ४ घ. ज. झ. °लिंतमस° । ५ घ. ज. झ. °श्चेतसा गृ° । ६ घ. ज. झ. °तं हि सत्सदसतोर्वैतथ्यं युक्तम् । ७ ख. घ. ङ. ज. °न्त इति । ८ च. °थ्यं तर्हि क° । ९ च. नो । १० क. °ष्ट स्यादिति ॥ ११ ॥ ११ ग. ज. झ. °त्याऽतिविरोधमा° । १२ ख. घ. ङ. छ. °विरोधमा° । १३ ग. छ. झ. °र्तृकार्य° । १४ ख. घ. ङ. °णकार्यव्य° । १५ ज. स्फोटयति । १६ ख. ग. घ. °र्थं स्फोट° । १७ क. °नुवृत्तं स्मृ° । १८ क. °तेऽनुस्मृ° । १९ घ. °दैवक° । २० घ. °सत्यत्वामि° ।

त्म्यमिष्टमेवाऽऽपद्यते । न च तदेष्टुं शक्यत आत्मनिराकरणस्य दुष्करत्वान्निराकर्तुरेवाऽऽत्मत्वादित्यर्थः ॥ ११ ॥

कल्पयत्यात्मनाऽऽत्मानमात्मा देवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ १२ ॥

स्वयं स्वमायया स्वमात्मानमात्मा देव आत्मन्येव वक्ष्यमाणं भेदाकारं कल्पयति रज्ज्वादाविव सर्पादीन् । स्वयमेव चैतान्बुध्यते भेदांस्तद्वदेवेत्येवं वेदान्तनिश्चयः । नान्योऽस्ति ज्ञानस्मृत्वाश्रयः । न च निरास्पदे एव ज्ञानस्मृती वैनाशिकानामिवेत्यभिप्रायः ॥ १२ ॥

कर्तृकार्यादिव्यवस्थानुपपत्तिं परिहरति—कल्पयतीति । करणान्तरं व्यवच्छिनत्ति—आत्मनेति । कर्मान्तरं व्यावर्तयति—आत्मानमिति । कर्त्रन्तरं निवारयति—आत्मेति । तस्य द्योतकान्तरापेक्षां प्रतिक्षिपति—देव इति । विवर्तवादं द्योतयति—स्वमाययेति । सर्वस्य मिथ्यात्वेऽपि मायया विकल्पितभेदानुरोधेन कर्तृत्वादिव्यवस्था सिध्यतीति भावः । प्रमातृप्रमाणादिव्यवहारानुपपत्तिं प्रत्याह—स एवेति । एकस्मिन्नेवाद्वितीये प्रतीचि वस्तुनि काल्पनिकभेदनिबन्धना सर्वा व्यवस्थेत्यत्र प्रमाणमाह—इति वेदान्तेति । यथा घटस्रष्टा कुलालोऽधिष्ठाता मृदोऽन्यो दृष्टो न तथेहान्योऽधिष्ठाताऽस्तीत्याह—स्वयमिति । यथा तत्र मृदाख्यमुपादानमधिष्ठातुरन्यदधिगतं न तथाऽऽत्मान्यदुपादानमस्तीत्याह—स्वमात्मानमिति । तत्र च घटं कुर्वतो भूभृगो भवत्यधारो न तथेहाऽऽधारोऽन्योऽस्तीत्याह—आत्मन्येवेति । परिणामवादं व्यावर्त्य विवर्तवादं प्रकटयितुं स्वमाययेत्युक्तं तत्र दृष्टान्तमाह—रज्ज्वादाविति । मायाद्वारेण चिदात्मनो जगन्निर्मातृत्वमुक्त्वा तस्यैव बुद्धिप्रतिबिम्बितस्य प्रमातृत्वमित्याह—स्वयमेव चेति । न च प्रमातृत्वस्य तात्त्विकत्वं रज्ज्वादौ सर्पादिदर्शनवदेव मिथ्यात्वनिर्धारणादित्याह—तद्वदिति । कर्त्रादिभेदस्य प्रमात्रादिभेदस्य च मिथ्यात्वे नेह नानाऽस्तीत्यादिश्रुतिं प्रमाणयति—इत्येवमिति । स एवेत्येवकारार्थमाह—नान्योऽस्तीति । यो जगत्स्रष्टा यश्च प्रमाता ततोऽन्यो ज्ञानस्य स्मृतेश्चाऽऽश्रयो नास्ति । चेतनभेदे मानाभावादनुभवस्मृत्योश्चैकाश्रयत्वस्य प्रसिद्धत्वादित्यर्थः । ज्ञानस्मृत्योराश्रयापेक्षया विषयापेक्षा वा नास्तीत्याशङ्क्याबाधितप्रसिद्धिविरोधान्नैवमित्याह—न चेति ॥ १२ ॥

---

१ क. तद्द्रष्टुं । २ क. °नि क° । ३ क. °मात्मदेहः स्व° । ४ छ. च तांस्त° । ५ क. °शिकर्त्र° । ६ ज. मायावि° । ख. ग. छ. झ. मायाक° । ७ क. °वहारः सि° । ८ ङ. °थाऽन्य° ९ क. °धारस्तथे° । १० ख. °स्तीह° । ११ ग. झ. °ति-एव° । १२ क. °तोऽन्यज्ञा° । १३ क. °त्वप्र° ।

विकरोत्यपरान्भावानन्तश्चित्ते व्यवस्थितान् ।
नियतांश्च बहिश्चित्त एवं कल्पयते प्रभुः ॥ १३ ॥

संकल्पान्केन प्रकारेण कल्पयतीत्युच्यते । विकरोति नाना करोत्यपरा-छौकिकान्भावान्पदार्थाञ्शब्दादीनन्यांश्चान्तश्चित्ते वासनारूपेण व्यवस्थितान-व्याकृतान्नियतांश्च पृथ्व्यादीननियतांश्च कल्पन(ना)कालान्बहिश्चित्तः संस्तथाऽ-न्तश्चित्तो मनोरथादिलक्षणानित्येवं कल्पयति । प्रभुरीश्वर आत्मेत्यर्थः॥१३॥

प्रकृतार्थां कल्पनायां विवक्षितं क्रममुपन्यस्यति—विकरोतीति । नियतांश्चेति चकारादनियतांश्चेति विवक्ष्यते। प्रतिपित्सितक्रमप्रतिपत्त्यर्थं पृच्छति—संकल्पयन्निति। श्लोकाक्षरयोजनया बुभुत्सितं क्रमं प्रत्याय[य]ति—उच्यत इत्यादिना । अन्या-श्चेति । शास्त्रीयानिति यावत् । चित्तमध्ये वासनारूपेण व्यवस्थितान्। अनभि-व्यक्तनामरूपत्वेन व्यवहारायोग्यत्वमाह—अव्याकृतानिति । कल्पनाकालान्वि-द्युदादीनस्थिरानित्यर्थः । बहिश्चित्तो बहिर्मुखो बाह्यान्व्यवहारयोग्यान्पदार्थान्कल्प-यति । अन्तश्चित्तस्तु तेभ्यो व्यावृत्तबुद्धिर्मनोरथादिलक्षणानात्मन्यवस्थितान्भावान्व्य-वहारायोग्यान्कल्पयित्वा पुनर्बहिर्व्यवहारयोग्यतायै कल्पयतीत्यर्थः । एतदुक्तं भवति । यथा लोके कुलालो वा तन्तुवायो वा घटं पटं वा कार्यं चिकीर्षुरादौ व्यवहारायोग्यां व्यक्तिं बुद्धावाविर्भाव्य पश्चात्तामेव बहिर्नामरूपाभ्यां संपादयति तथैवायमादिकर्ताऽपि लक्षणे स्वचित्ते नामरूपाभ्यामव्यक्तरूपेण स्थितान्स्रष्टव्यपदार्थान्प्रथमं सिसृक्षिताकारेणान्त-र्विभाव्य पश्चाद्बहिः सर्वप्रतिपत्तृसाधारणरूपेण संपादयतीति कल्पनायां क्रमाधिग-तिरिति ॥ १३ ॥

चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः ।
कल्पिता एव ते सर्वे विशेषो नान्यहेतुकः ॥ १४ ॥

स्वप्नवच्चित्तपरिकल्पितं सर्वमित्येतदाशङ्क्यते । यस्माच्चित्तपरिकल्पि-तैर्मनोरथादिलक्षणैश्चित्तपरिच्छेद्यैर्वैलक्षण्यं बाह्यानामन्योन्यपरिच्छेद्यत्वमिति

---

१ छ. स क° । २ च. °तीत्येवेत्यु° । ३ ज. °ना क° । ४ च. °लाद्बहि° । ५ ग. °यां वि° । ६ ग. झ. °तिपत्ति° । ७ क. ग. घ. ङ. °पिपित्ति° । ८ क. °ति कः सं° । ९ घ. ङ. ज. °त्सितक° । १० क. क. °तानभि । ११ क. °हारयो° । १२ ख. कालीनान्वि° । १३ क. °मुंखान्बाह्या° । १४ क. व्यावर्तबु° । १५ घ. ङ. ज झ. °थाना° । १६ क. त्मव्यव° । १७ क. घ. ज. °हारयो° । १८ क. °नर्व्य° । १९ छ. झ. °टं वा° । २० ख. ग. घ. ज. झ. °हारयो° । २१ ज. चित्तना° । २२ क. °पत्तिसा° । २३ छ. °त्तक° । २४ ङ, °त्येवं त° । २५ क. झ. °शङ्कते ।

सा न युक्ताऽऽशङ्का। चित्तकला हि ग्राह्यान्तस्तु चित्तपरिच्छेद्याः। नान्यश्चित्तकालव्यतिरेकेण परिच्छेदकः कालो येषां ते चित्तकालाः। कल्पनाकाल एवोपलभ्यन्त इत्यर्थः। द्वयकालाश्च भेदकाला अन्योन्यपरिच्छेद्याः। यथाऽऽगोदोहनमास्ते यावदास्ते तावद्वां दोग्धि यावद्वां दोग्धि तावदास्ते। तावानयमेतावान्स इति परःपरपरिच्छेद्यपरिच्छेदकत्वं बाह्यानां भेदानां ते द्वयकालाः। अन्तश्चित्तकाला बाह्याश्च द्वयकालाः कल्पिता एव ते सर्वे। न बाह्यो द्वयकालत्वविशेषः कल्पितत्वव्यतिरेकेणान्यहेतुकः। अत्रापि हि स्वप्नदृष्टान्तो भवत्येव ॥ १४ ॥

कल्पितानां कल्पनाकालादन्यस्मिन्काले सत्त्वाभावाज्जाग्रद्भावानां च कल्पनाकालात्कालान्तरेऽपि प्रत्यभिज्ञया सत्त्वावगमादनुपपन्नं तेषां मिथ्यात्वमित्याशङ्क्याऽऽह—चित्तेति। ये कल्पनाकालभाविनो भावा मनस्यन्तर्वर्तन्ते ये च प्रत्यभिज्ञायमानत्वेन पूर्वापरकालभाविनो बहिरेव व्यवहारयोग्या दृश्यन्ते ते सर्वे कल्पिताः सन्तो मिथ्यैव भवितुमर्हन्ति। प्रत्यभिज्ञायमानत्वलक्षणो विशेषस्तु नाकल्पितत्वप्रत्युक्तः। कल्पितेऽपि तद्दर्शनादित्यर्थः। श्लोकव्यावर्त्यामाशङ्कां दर्शयति—स्वप्नवादिति। यथा स्वप्ने दृश्यमानं सर्वं कल्पितं मिथ्यैवेष्यते तथा जागरितेऽपि दृष्टं सर्वं चित्तस्पन्दितं तेन कल्पितं मिथ्यैवेत्येतन्नाद्यापि निर्धारितमित्यत्र हेतुमाह—यस्मादिति। आत्माविद्याविवर्तेन चित्तेन तावदन्तर्विनिर्मिता मनोरथरूपा मनस्यन्तर्वर्तमाना बहीरज्जुसर्पादयश्च ते चित्तेनैव परिच्छिद्यन्ते। ते हि कल्पनाकालमात्रभाविनो न प्रमीयन्ते। तैः सह वैलक्षण्यं मनसो बहिर्जाग्रद्दृश्यमानानां भावानामन्योन्यपरिच्छेद्यत्वं कालद्वयावच्छिन्नत्वेन प्रत्यभिज्ञागोचरत्वमिति यस्मादुपलभ्यते तस्मादयुक्तं जागरितस्य स्वप्नवन्मिथ्यात्वमित्यर्थः। श्लोकाक्षरैरुत्तरमाह—सा नेति। ये मनस्यन्तर्मनोरथरूपा भावास्ते चित्तकालत्वं विदर्शयति—चित्तेत्यादिना वाच्यार्थमुक्त्वा विवक्षितार्थमाह—कल्पनेति। द्वितीयपादमवतार्य व्याकरोति—द्वयेति। ये मनसो बहिरुपलभ्यन्त ते भेदकालाः कालस्य भेदो भेदकालः स येषां

---

१ क बाह्यः कालद्वयत्व°। २ घ. °नात्का°। ३ क. °पन्ने ते°। घ °लविभा°। ५ घ °हारा यो°। ६ क. °षवस्तु°। ७ छ. °पि त्वे तु त°। ८ झ. °न्तर्निमि°। ९ ङ °नोरू°। १० छ °रिच्छेद्य°। ११ ज. °न्तेऽहि° १२ क. °ज्ञानगो°। १३ क. येन। १४ क. °त्वे वि°। १५ झ. येन। १६ ख. ग. ज. झ. °न्ते मे°। १७ घ. °षां त°।

ते तथेति व्युत्पत्तेः । ततश्चान्येन पूर्वेणान्येन चापरेण परिच्छेद्या भिन्नकालावच्छिन्नत्वेन प्रत्यभिज्ञायमाना इत्यर्थः । प्रत्यभिज्ञायमानत्वमुदाहरणनिष्ठतया स्फुटयति—यथेति । आगोदोहनं गोदोहनपर्यन्तमाऽऽते देवदत्तस्तिष्ठतीति प्रत्यभिज्ञा शेषत्वेनाभिप्रेतोदाहरणार्था । यावता कालेनावच्छिन्नो वर्तते तावता कालेनावच्छिन्नो गोदोहनं निर्वर्तयतीत्येनकक्कालावस्थायित्वेन प्रत्यभिज्ञाविषयत्वं तस्य दर्शयति—यावदिति । यावता कालेनायं घटोऽर्थक्रियां निर्वर्वर्तयितुं शक्नोति तावता कालेनावच्छिन्नः सन्नेष तिष्ठतीत्युदाहरणान्तरमाह—तावानिति । परोक्षतया स्थितो यावता कालेनावच्छिन्नः स्वकार्यं निर्वर्त्य निर्वृणोत्येतावता कालेनावच्छिन्नः स तिष्ठतीत्यपरमुदाहरणमाह—एवमिति । उक्तेन न्यायेन परेणापरेण च कालेन परिच्छेद्यत्वं जाग्रद्दृश्यानां भावानामुपलभ्यते कालद्वयस्य च परिच्छेदकत्वम् । तथा च ते सर्वे भावा बहिर्दृश्यमाना द्वयकालेन कालद्वयेन परिच्छेद्या भवन्तीत्यर्थः । तृतीयपादं व्याचष्टे—अन्तरिति । चतुर्थपादार्थमाह—नेत्यादिना । बाह्यो जाग्रद्दृश्येषु बाह्यपदार्थेषु व्यवस्थितो द्वयकालत्वेन कालद्वयावच्छेदेन कृतः प्रत्यभिज्ञायमानत्वरूपो विशेषोऽन्यहेतुको न भवति । कल्पितेऽपि तथाविधविशेषसंभवादित्यत्र दृष्टान्तमाह—अत्रापि हीति । यद्यपि सर्वं जाग्रद्भेदजातं कल्पितं तथाऽपि तत्र यथोक्तो विशेषः स्फुटः सिध्यति स्वप्ने सर्वस्य भेदजातस्य कल्पितत्वेऽपि प्रत्यभिज्ञायमानत्वाज्जागरितेऽपि तदुपपत्तेरित्यर्थः ॥ १४ ॥

अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।
कल्पिता एव ते सर्वे विशेषस्त्विन्द्रियान्तरे ॥ १५ ॥

यद्यप्यन्तरव्यक्तत्वं भावानां मनोवासनामात्राभिव्यक्तानां स्फुटत्वं वाँ बहिरक्षुरादीन्द्रियान्तरे विशेषो नासौ भेदानामस्तित्वकृतः स्वप्नेऽपि तथा दर्शनात् । किं तर्हीन्द्रियान्तरकृत एव । अतः कल्पिता एव जाग्रद्भावा अपि स्वप्नभाववदिति सिद्धम् ॥ १५ ॥

स्वप्नजागरितयोरुभयोरपि मिथ्यात्वं स्फुटास्फुटावभासविभागानुपपत्तेर्नाविशेषेण मिथ्यात्वमित्याशङ्क्याऽऽह—अव्यक्ता इति । ये मनस्यन्तर्भावनारूपत्वादस्फुटा ये च मनसो बहिरुपलभ्यमानाः स्फुटा भवन्ति ते सर्वे मनःस्पन्दनमात्रत्वेन कल्पिताः । मिथ्यैवान्तर्बहिरिन्द्रियभेदनिमित्तः स्फुटत्वाऽस्फुटत्वविशेषः । न मिथ्यात्वममिथ्यात्वं वा

---

१ ज. °न वा प°। २ घ. °रिच्छिद्य भि°। ३ क. यद्प्य°। घ. च. योऽप्य°। छ. येऽप्य°। ४ ङ. च। ५ ख. °न्तरग्राह्याणां वि°। ६ क. एवान्तः क°। ७ ग. घ. ङ. च. झ. °थोर°। ८ ग. ज. °टाव°। ९ क. °पन्नेनावि°। १० घ. °त्तेर्नो विशेषणाभि°। ११ ङ. °ति। म°। १२ ग. °न्दमा°।

तत्रोपयुज्यते। मिथ्याभूतेष्वपि तद्दर्शनादित्यर्थः। श्लोकाक्षराणि व्याकरोति—यदपीत्यादिना। मनस्यन्तर्मनोरथरूपाणां भावानामव्यक्तत्वमस्फुटत्वम्। तत्र हेतुमाह—मन इति। चक्षुरादिग्राह्यत्वेन मनसो बहिर्भावानां स्फुटत्वं दृष्टं तदेषाममिथ्यात्वकृतमिति शङ्कां वारयति—नासाविति। सर्वसंप्रतिपन्नामिथ्यात्वेऽपि स्वप्ने स्फुटत्वास्फुटत्वविशेषप्रतिभानान्नासौ विशेषो मिथ्यात्वममिथ्यात्वं वा प्रयोजयितुं प्रभवतीत्याह—स्वप्नेऽपीति। अथ विशेषस्तर्हि केन सिध्यतीत्याशङ्क्य चतुर्थपादार्थमाह—किं तर्हीति। मनोमात्रसंबन्धादन्तर्भावानां वासनामात्ररूपाणामस्फुटत्वम्। बहिर्भावानां तु चक्षुरादिबाह्येन्द्रियसंबन्धाद्युक्तं स्फुटत्वं तदेष विशेषो मिथ्यात्वाविशेषेऽपि सिध्यतीत्यर्थः। स्फुटत्वास्फुटत्वप्रतिभासभेदस्य मिथ्यात्वेऽपि संभवात्प्रागुक्तमनुमानमविरुद्धमित्युपसंहरति—अत इति॥ १५॥

जीवं कल्पयते पूर्वं ततो भावान्पृथग्विधान्।
बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः॥ १६॥

बाह्याध्यात्मिकानां भावानामितरेतरनिमित्तनैमित्तिकतया कल्पनायां किं मूलमिति। उच्यते। जीवं हेतुफलात्मकम्। अहंकरोमि ममसुखदुःखे इत्येवंलक्षणम्। अनेवंलक्षण एव शुद्ध आत्मनि रज्ज्वामिव सर्पं कल्पयते पूर्वम्। ततस्तादर्थ्येन क्रियाकारकफलभेदेन प्राणादीन्नानाविधान्भावान्बाह्यानाध्यात्मिकांश्चैव कल्पयते। तत्र कल्पनायां को हेतुरित्युच्यते। योऽसौ स्वयं कल्पितो जीवः सर्वकल्पनायामधिकृतः स यथाविद्यो यादृशी विद्या विज्ञानमस्येति यथाविद्यस्तथाविधैव स्मृतिस्तस्येति तथास्मृतिर्भवति स इति। अतो हेतुकल्पनाविज्ञानात्फलविज्ञानं ततो हेतुफलस्मृतिस्ततस्तद्विज्ञानं तदर्थक्रियाकारकतत्फलभेदविज्ञानानि तेभ्यस्तत्स्मृतिस्तत्स्मृतेश्च पुनस्तद्विज्ञानानीत्येवं बाह्यानाध्यात्मिकांश्चेतरेतरनिमित्तनैमित्तिकभावेनानेकधा कल्पयते॥ १६॥

भवतु सर्वस्य कल्पितत्वम्। सा पुनः सर्वकल्पना केन द्वारेणेत्याशङ्क्याऽऽह—

---

१ ङ. °ति। येऽपी°। २ ङ. °त्थं प्र°। ३ घ. ज. °नां च°। ४ च. विध्यस्त°। ५ ख. घ. ङ. छ. ज. °ह्यानामाध्या°। ६ घ °नायाः किं। ७ ख. घ. ङ. छ. ज सु° दुःखमित्ये°। च. सुखेत्ये ८ क. °नेवैवं°। ९ च. °ति स य° । १० घ. °स्तथा°। ११ छ. °तिश्च। १२ ख. घ. ङ. ज. °ज्ञानमित्ये°। १३ क. °नानि तेभ्यस्तत्स्मृतिस्तत्स्मृतिश्च पुनस्तज्ज्ञानानी°। १४ ज. झ. °नामाध्या°।

जीवमिति । आत्मा हि सर्वं मायावशेन कल्पयन्नादौ विशिष्टरूपेण जीवं कल्पयति । तत इति । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः स्वयमेव जीवभावमापद्यते । तद्द्वारेण पुनर्नानाविधान्भावान्निर्मिमीते । ज्ञानस्मृतिवैषम्यात्तत्कल्प्येषु भावेषु वैषम्योपपत्तिरित्यर्थः । श्लोकव्यावर्त्यं प्रश्नमुत्थापयति—बाह्येति । पदार्थाः साध्यसाधनतया स्थिता बाह्याः सुखं दुःखं ज्ञानं रागश्चेत्येवमादयस्त्वाध्यात्मिकास्तेषां परस्परं निमित्तनैमित्तिकताऽस्ति । बाह्यान्निमित्तीकृत्याऽऽध्यात्मिका भवन्ति । तानपि निमित्तीकृत्येतरे जायन्ते । तदेवमितरेतरनिमित्ततया नैमित्तिकतया च कल्पनायां मूलं वक्तव्यम् । निर्मूलकल्पनायामतिप्रसङ्गादित्यर्थः । श्लोकाक्षरयोजनया परिहरति—उच्यत इति । हेतुफलात्मकमित्युक्तमेव व्यनक्ति—अहमिति । हेतुफलभावविकलं परिशुद्धमात्मरूपं जीवकल्पनाधिष्ठानं दर्शयति—अनेनैवमिति (१) । आरोपस्याधिष्ठानापेक्षाऽस्तीत्यत्र दृष्टान्तमाह—रज्ज्वामिवेति । द्वितीयतृतीयपादौ विभजते—तत्र इति । तादर्थ्येन प्रथमं कल्पितस्य भोक्तुर्जीवस्य शेषत्वेनेत्यर्थः । यद्यपि जीवः सर्वकल्पनायां मूलभूतो हेतुस्तथाऽपि तस्य तत्र कल्पनाविशेषो विशेषहेतुव्यतिरेकेण न संभवतीति शङ्कते—तत्रेति । चतुर्थपादेनोत्तरमाह—उच्यत इति । कल्पितो विशिष्टरूपेणेति शेषः । अधिकृतः स्वामित्वेन संबद्धः इत्यर्थः । इतिशब्दः श्लोकाक्षरयोजनासमाप्तिद्योतनार्थः । प्रकृतकल्पनामेव प्रपञ्चयति—अत इत्यादिना । सत्यन्नपानाद्युपयोगे तृप्त्यादि भवति । असति न भवतीत्यन्वयव्यतिरेकरूपान्न्यायाद्भोजनादिकं हेतुरिति कल्पनाविज्ञानमुत्पद्यते । ततस्तृप्त्यादिकं फलमिति कल्पनाविज्ञानं जायते । ततोऽपरेद्युरुक्तयोरुभयोरपि हेतुफलयोः स्मृतिरुद्भवति ततश्च फलसाधनसमानजातीये कर्तव्यताविज्ञानम् । ततश्चाभिलषितस्तृप्त्यादिफलार्थित्वेन पाकादिक्रिया तत्कारकं तण्डुलादि तत्फलान्निष्पत्त्यादीनि विशेषविज्ञानादीनि भवन्ति । ततो हेत्वादिस्मृतिः । ततस्तदनुष्ठानं ततश्च फलम् । इत्यनेन क्रमेण मिथो हेतुहेतुमत्तया कल्पना भवतीत्यर्थः । प्रकृता कल्पनामुपसंहरति—एवमिति ॥ १६ ॥

---

१ ख. घ. °यते । त° । २ क. ग घ. छ. झ. °त्कल्पेषु° । ३ ग. घ. ङ. छ. ज. बाह्यात्मनिति । झ. बाह्याध्यात्मिकानामिति । ४ क. सु-दुः° । ५ ज. °रं नै° । ६ ज. °त्तनै° । ७ घ. °या च. ८ ख. °लं च व° । ९ क. °शुद्धात्म° । १० ज. तत्र । ११ क. °स्य क° । १२ ग. °शेषहे° । १३ घ. °विशेषरू° । १४ ङ. ति विशे° । १५ ग. छ. झ. °कृत्वा स्वा° । १६ क. बन्धेव संबद्ध । १७ क. °रपरयो° । ग. घ. °रस । १८ ख. छ. °दिसंभ° । १९ ख. °पाभ्यां यद्वो° । छ. °पाद्वो° । २० क. °तस्तुष्ट्यादि° । २१ घ. ङ. ज. झ. °रुभ° । २२ क. °धनास° । २३ क. त्वे पा° । २४ क. °रकत° । छ. °रकान्तरत° । २५ ख. °लान्यन्ननि° । २६ ख. ग. ङ. छ. ज. °नानि° । २७ छ. ज. °तुम° ।

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ १७ ॥

तत्र जीवकल्पना सर्वकल्पनामूलमित्युक्तं सैवं जीवकल्पना किंनिमित्तेति दृष्टान्तेन प्रतिपादयति—यथा लोके स्वेन रूपेणानिश्चिताऽनवधारितेवमेवेति रज्जुर्मन्दान्धकारे किं सर्प उदकधारा दण्ड इति[2] वाऽनेकधा विकल्पिता भवति पूर्वस्वरूपानिश्चयनिमित्तम्। यदि[3] हि पूर्वमेव रज्जुः[4] स्वरूपेण[5] निश्चिता स्यात्। न सर्पादिविकल्पोऽभविष्यत्[6]। यथा स्वहस्ताङ्गुल्यादिषु एष दृष्टान्तः। तद्वद्धेतुफलादिसंसारधर्मानर्थविलक्षणतया स्वेन विशुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेणानिश्चितत्वाज्जीवपाणाद्यनन्तभावभेदैरात्मा विकल्पित इत्येष सर्वोपनिषदां सिद्धान्तः ॥ १७ ॥

इदानीं जीवकल्पनानिमित्तं निरूपयति—अनिश्चितेति। श्लोकस्य तात्पर्यं दर्शयितुं वृत्तं कीर्तयति—तत्रेति। पूर्वश्लोकः सप्तम्यर्थः। जीवकल्पनाया नित्यत्वायोगात्सनिमित्तत्वस्य वक्तव्यत्वात्तस्य च वस्तुत्वे निवृत्त्यनुपपत्तेः। अवस्तुत्वे च निमित्तत्वासिद्धेर्जीवकल्पनाया दुर्घटत्वात्तत्कार्यभूताऽपि कल्पना नावकल्प्यत इत्याशङ्क्य[8]—सैवेति। उत्तरत्वेन श्लोकाक्षराण्यवतार्य व्याचष्टे—दृष्टान्तेनेति। स्वमसाधारणं रूपं रज्जुत्वं तेनेति यावत्। अनवधारितत्वमेव स्फोरयति—एवमेवेति। रज्जुरेवेयमित्यनेन प्रकारेणेत्यर्थः। उक्तावधारणाराहित्ये कारणं सूचयति—मन्देति। पूर्वं रज्जुस्वरूपानिश्चयात्प्रागवस्थायामित्यर्थः। सर्पादिकल्पनायामन्वयव्यतिरेकसिद्धमुपादानमुपन्यस्यति—स्वरूपेति। एतदेव व्यतिरेकद्वारा विवृणोति—यदि हीति। देवदत्तस्य हस्ताद्यवयवेषु तद्बुद्ध्यैव निश्चितेषु[12] सर्पादिविकल्पो यथा नोपलभ्यते तथा पुरोवर्तिन्यपि रज्जुः[13] स्वरूपेण निश्चिते नासौ युक्तस्तथा च रज्ज्वज्ञानादेव[14] स भवतीत्यर्थः। उपपादितं दृष्टान्तमनूद्य दार्ष्टान्तिकमभिदधानश्चतुर्थपादार्थमाह—एष इति। हेतुफलादीत्यादिशब्देन कर्तृत्वभोक्तृत्वरागद्वेषादि गृह्यते। विलक्षणत्वमेव स्फुटयति—स्वेनेति। अनारोपितेनेति यावत्। विज्ञप्तेर्विशुद्धत्वं जन्मादिराहित्यमाकारान्तरशून्यत्वं

---

१ छ. °व क°। २ झ. °ति चानें°। ३ च. °दि पू°। ४ क. °ज्जुः सर्पेण। ५ क. °ष्यत्। स भया स्व°। ६ च. ज. झ. °दिष्वेवं द°। ७ क. तद्धे। ८ च. °क्षणः स्वे°। ९ छ. निमित्तत्व°। १० ग. °शङ्क्यते। ११ ग घ क. च. झ स्तावं°। १२ घ. °दिक°। १३ ङ. ञ. झ. °ज्जुरू°। १४ क. रज्जुज्ञा°। १५ क. °व भ। १६ क छ. भिनंद। १७ घ. ङ. एवमिति। ज एवमपि हे°।

तन्मात्रत्वं चेत्यर्थः । तन्मात्रत्वमयुक्तं सामान्यविशेषभावादित्याशङ्क्याऽऽह—सत्तेति । न च तत्रान्यदस्ति सुखमिति मत्वा विशिनष्टि—अद्वयेति । सच्चिदानन्दाद्वयात्मा विद्यैवाविलासितं द्वैतमित्यत्र प्रमाणं सूचयति—इत्येष इति । अद्वैतश्रुतयस्तावत्तत्रोपलभ्यन्ते यत्र हि द्वैतमिव भवतीत्याद्याश्च द्वैततत्प्रतिभासयोर्मृषात्वमावेदयन्त्यः श्रुतयः श्रूयन्ते तेनाद्वैतं तत्त्वं द्वैतमविद्याविजृम्भितमिति प्रमाणसिद्धमित्यर्थः ॥ १७ ॥

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते ।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥ १८ ॥

रज्जुरेवेति निश्चये सर्वविकल्पनिवृत्तौ रज्जुरेवेति चाद्वैतं यथा तथा "नेति नेति" इति सर्वसंसारधर्मशून्यप्रतिपादकशास्त्रजनितविज्ञानसूर्यालोककृतात्मविनिश्चयः "आत्मैवेदं सर्वम्" "अपूर्वोऽनपरोऽनन्तरोऽबाह्यः" "सबाह्याभ्यन्तरो ह्यजः" "अजरोऽमरोऽमृतोऽभय एक एवाद्वयः" इति ॥ १८ ॥

अविद्याकृता जीवकल्पनेत्यन्वयमुखेनोक्तं तदेवेदानीं व्यतिरेकमुखेन (ण) दर्शयति—निश्चितायामिति । रज्जुरेवेति रज्ज्वां निश्चितायां तदज्ञाननिवृत्तेस्तदुत्थसर्पादिविकल्पः सर्वथा निवर्तते रज्जुमात्रं चावशिष्यते तद्वदात्मनि श्रौतो निश्चयो यदा संपद्यते तदा सर्वस्याऽऽत्माविद्याकल्पितस्य जीवादिविकल्पस्य व्यावृत्तेरद्वैतमेवाऽऽत्मतत्त्वं परिशिष्यते । तस्मादात्माविद्याविजृम्भिता जीवकल्पनेत्यर्थः । दृष्टान्तभागं व्याचष्टे—रज्जुरिति । तद्वदित्यादि व्याकरोति—तथेति । सर्वस्यापि संसारात्मनो धर्मस्याऽऽत्मन्यारोपितस्यासत्त्वावेदकं यन्निषेधशास्त्रं तेन जनितं विज्ञानमेव सूर्यालोकस्तत्कृतो योऽयमात्मविनिश्चयः स एवाद्वितीयः शिष्यते । द्वैतं पुनः सर्वमेव व्यावृत्तं भवतीत्यर्थः । आत्मविनिश्चयमेव विशिनष्टि—आत्मैवेति । सर्वमिदमात्मैवेत्युक्तः पूर्णत्वं तस्योच्यते पूर्वभाविना कारणेन संस्पर्शशून्योऽपूर्वः पश्चाद्भाविना कार्येण संबन्धविधुरोऽनपरमनन्तरं छिद्रं तच्छून्योऽनन्तरश्चैकरसतस्यैव प्रत्यक्त्वमबाह्यत्वं कार्यकारणास्पृष्टमुभयकल्पनाधिष्ठानत्वेन ततोऽर्थान्तरत्वादित्याह—सबाह्येति । विशेषणत्रयं कौटस्थ्यव्यवस्थापनार्थम् । जन्मादिसंबन्धाभावे कारणमविद्यासंबन्धराहित्यं दर्शयति—अभय इति । न खल्वविद्या तत्र कारणत्वेन संबन्धमनुभवति । तस्य पूर्णत्वेन कारणानपेक्षत्वादित्याह—एक इति । द्वैताद्वैतव्यावृत्त्यर्थमवधारणं न विद्यायाः । निराश्रयत्वोपपत्तेः । आश्रयान्तरस्य चासत्त्वात् । तत्रैव सा प्रविशतीति

---

१ क °शेषाभा° । २ घ. °द्याल° । ३ ख. ङ. छ. °तत्र तत्रो° । ४ क. °समानयो° । ५ ज. °न्ते ना° ।

चेत्सत्यम्। अविद्वद्दृष्ट्या तस्यास्तत्र प्रवेशेऽपि वस्तुदृष्ट्या नासौ तस्मिन्प्रवेष्टुं प्रभवतीत्याह—अद्वय इति ॥ १८ ॥

प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः।
मायैषा तस्य देवस्य यया संमोहितः स्वयम् ॥ १९ ॥

यद्यात्मैक एवेति निश्चयः कथं प्राणादिभिरनन्तैरभावैरेतैः संसारलक्षणैर्विकल्पित इति। उच्यते शृणु मायैषा तस्यात्मनो देवस्य। यथा मायाविना विहिता माया गगनघनविमलं कुसुमितैः पलाशैस्तरुभिराकीर्णमिव करोति तथेयमपि देवस्य मायाऽयं यया स्वयमपि मोहित इव मोहितो भवति। "मम माया दुरत्यया" इत्युक्तम् ॥ १९ ॥

आत्मनोऽद्वितीयत्वे कथमनेकैर्भावैस्तस्य विकल्पितत्वमित्यभिप्रायापतिपत्त्या प्रत्यवतिष्ठते—प्राणादिभिरिति। सिद्धान्ती स्वाभिसंधिमुद्घाटयन्नुत्तरमाह—मायेति। चोद्यभागं विभजते—यदीति। उत्तरार्धमुत्तरत्वेन व्याकरोति—उच्यत इति। मायामेव दृष्टान्तेन स्पष्टयति—यथेति। तामेव मायां कार्यद्वारा स्फोरयति—यथेति। यथा लौकिको मोहितो मोहपरवशो दृश्यते तथाऽयमात्मा स्वयमेव मायासंबन्धान्मोहितो भवति। अतो मोहद्वाराऽऽत्मन्येव मायाधिगतिरित्यर्थः। मायया मोहहेतुत्वं भगवताऽपि सूचितमित्याह—यमेति ॥ १९ ॥

प्राण इति प्राणविदो भूतानीति च तद्विदः।
गुणा इति गुणविदस्तत्त्वानीति च तद्विदः ॥ २० ॥

ते के प्राणादयोऽनन्ता भावा यैरात्मा विकल्प्यते माययेत्यपेक्षायां प्राणादिविकल्पनामुदहरति—प्राण इति। प्राणो हिरण्यगर्भस्तटस्थेश्वरो वा स जगतो हेतुरिति प्राणविदो हैरण्यगर्भाद्या वैशेषिकादयश्चैवं कल्पयन्ति। तदिदं कल्पनामात्रम्। स्वतन्त्रस्य हिरण्यगर्भस्य सर्वजगद्धेतुत्वे मानाभावात्। पौरुषेयागमस्यापौरुषेयश्रुतिविरोधे स्वार्थे मानत्वायोगात्तटस्थेश्वरवादस्य च प्रमाणयुक्तिविहीनस्य प्रतिपत्तुमशक्यत्वादित्यर्थः। कल्पनान्तरं दर्शयति—भूतानीति चेति। पृथिव्यप्तेजोवाय्वाकाशतत्त्वानि तानि च चत्वारि भूतानि जगत्कारणानीति लोकायतिकास्तदपि कल्पनामात्रम्। न हि

---

१ क. °रेतैः क°। २ ख. घ. ङ. च. °याऽयं सं°। ३ छ. ज. मायां वि°। ४ क. °हित्मा°। ५ झ. °तिनिर्मलं। ६ च. स्फलप°। ७ ख. घ. ज. °याऽयम°। च. °या सं स्व°। ८ क. °हितो भ°। झ. °हितमिव। ९ घ. च. ज. प्राणा। १० छ. प्राणावि°। ११ ग. घ. ज. प्राणा इतीति। १२ ङ. झ. इतीति। १३ घ. ङ. ज. वा ज°। १४ ङ. °श्च विक°। १५ घ. °स्य ज°। १६ घ. °गात्तटस्थेश्च°। १७ छ. °ति। पृ°। १८ ग. झ. °नि चत्वा°।

भूतानि स्वतः सिद्धानि जडत्वविरोधात् । नापि परतः सिद्धानि । स्वगुणस्य चैतन्यस्य स्वग्राहकत्वायोगाद्बहिर्गतोऽप्यस्य वह्निविषयत्वादर्शनात् । अतो भूतानि जगत्कर्तृणीति कल्पनैवेत्यर्थः । सत्त्वरजस्तमांसि त्रयो गुणाः साम्येनावस्थिता जगतो महदादिलक्षणस्य कारणमिति सांख्यास्तदपि कल्पनामात्रम् । साम्येन स्थितानां कारणत्वे प्रलयाभावप्रसङ्गात् । वैषम्यमजनस्य च निर्हेतुकत्वे सदा तदापात् । सहेतुकत्वे हेतोर्नित्यत्वे प्राचीनदोषानुषङ्गादनित्यत्वे हेत्वन्तरापेक्षायामनवस्थानादित्याह—गुणा इतीति । कल्पनान्तरमाह— तत्त्वानीति चेति । आत्माऽविद्या शिव इति संक्षेपतस्त्रीणि तत्त्वानि सर्वजगत्प्रवर्तकानीति शैवा मन्यन्ते तदपि कल्पनामात्रम् । आत्मनो भिन्नत्वे शिवस्य घटादितुल्यत्वप्रसङ्गादभिन्नत्वे तत्त्वानां त्रित्वव्याघातादित्यर्थः ।

पादा इति पादविदो विषया इति तद्विदः ।
लोका इति लोकविदो देवा इति च तद्विदः ॥ २१ ॥

एकस्याऽऽत्मनो विश्वादयः पादाः सर्वव्यवहारहेतवो भवन्तीत्यपि कल्पनामात्रम् । निरंशस्याऽऽत्मनोऽशभेदानुपपत्तेरित्याह—पादा इतीति । वात्स्यायनप्रभृतीनां कल्पनां कथयति—विषया इतीति । शब्दादयो विषया भूयो भूयो भुज्यमानास्तत्त्वमिति विभ्रममात्रम् । " विषस्य विषयाणां च दूरमत्यन्तमन्तरम् । उपभुक्तं विषं हन्ति विषयाः स्मरणादपि " इति विषयानुसंधानस्य निन्दितत्वात्तेषां पारमार्थिकतत्त्वमानुपपत्तेरित्यर्थः । भूर्भुवः स्वरिति त्रयो लोका वस्तुभूताः सन्तीति पौराणिकाः । तदपि कल्पनामात्रम् । स्थानभेदेन त्रित्वे तदानन्त्यस्य दुरुत्तरत्वात्स्वातन्त्र्यस्य चासिद्धत्वादित्याह— लोका इतीति । अग्नीन्द्रादयो देवास्तत्तत्फलदातारो नेश्वरस्तथेति देवताकाण्डीयाः । तदपि कल्पनामात्रम् । अस्मदादिप्रयत्नमपेक्ष्य फलदातृत्वे तेषां मृत्युभ्यो विशेषाभावप्रसङ्गात् । स्वातन्त्र्येणोपकारकत्वे तदाराधनवैयर्थ्यात् । तद्भक्तानामपि विपत्तिदर्शनात्तत्प्रसादस्यार्किंचित्करत्वादित्याह—देवा इति चेति ।

वेदा इति वेदविदो यज्ञा इति च तद्विदः ।
भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः ॥२२॥

---

१ ख. घ. °म्येनावस्थि । २ क. °भवन° । ३ ग. °दापा° । ४ ग. झ. °हेतो° । ५ ख. छ. इति । ६ ग. घ. ङ. झ. °त्त्वानि चे° । ७ छ. °ति । आ° । ८ छ. झ. °ल्यप्र° । ९ क. °य. स° । १० ख. °पत्त्या पादानुपपत्ते° । ११ ख. छ. इति । १२ ख इति । १३ ख. °यो भू° । १४ छ. °ति भ्र° । १५ ग. झ. °षयःस्म° । १६ ग. छ °पत्तिरि° । १७ छ दुरुत्तरत्वा° । १८ ख. छ. इति । १९ ख. °स्तत्फ° । २० क. °शेषभा° । २१ छ. °न्त्ये परोप° ।

ऋग्वेदादयो वेदाश्चत्वारस्तत्त्वानीति पाठका वदन्ति । तदपि कल्पनामात्रम् । न हि वेदा लौकिकवर्णव्यतिरिक्ता दृश्यन्ते[4]। क्रमवतामेव वर्णानां वेदशब्दवाच्यत्वाङ्गीकारात् । क्रमश्चोच्चारणोपलब्ध्योरन्यतरगतो वर्णेष्वारोप्यते । तथा च तथाविधक्रमवतां वर्णानामारोपितरूपेण वेदशब्दवाच्यत्वात्कुतो वेदानां परमार्थतेत्याह-वेदा इति। ज्योतिष्टोमादयो यज्ञा वस्तुभूता भवन्तीति बौधायनप्रभृतयो याज्ञिका मन्यन्ते । तदपि भ्रान्तिमात्रम् । यज्ञं व्याख्यास्यामो द्रव्यं देवता त्याग इत्यत्रैकैकस्मिन्यज्ञविज्ञानामावात्समुदायस्यावस्तुत्वादित्याह— यज्ञा इति । चेति । भोक्तैवाऽऽत्मा न कर्तेति सांख्याः । तत्र भोगो यदि विक्रिया स्वीक्रियते तर्हि कथं नानित्यत्वादिप्रसङ्गः स्वभावत्वे सदा स्यादिति विषयसंनिधौ भोक्तृत्वं भ्रान्तिरेवेत्याह—भोक्तेति चेति । सूपकारास्तु भोज्यं वस्त्विति प्रतिजानते । तदपि न । मधुरादिरसव्यञ्जनादेस्तदैवान्यथात्वदर्शनादैकरूप्यासंभवादित्याह — भोज्यमिति चेति ।

सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः ।
मूर्त इति मूर्तविदोऽमूर्त इति च तद्विदः ॥ २३ ॥

आत्मा सूक्ष्मोऽणुपरिमाणः स्यादिति केचित् । तन्न । युगपदशेषशरीरव्यापिवेदनानुसंधानसिद्धेरित्याह—सूक्ष्म इति । स्थूलो देहोऽहंप्रत्ययादात्मेति लोकायतभेदः । तच्च न । मृत्सुषुप्तयोरिव संघातविशेषाच्चैतन्यप्रसङ्गात् । एकैकस्य च भूतस्य चैतन्यादर्शनात्संघातस्य चावस्तुत्वादित्याह—स्थूल इति चेति । मूर्तस्त्रिशूलादिधारी महेश्वरश्चक्रादिधारी वा परमार्थो भवतीत्यागमिकाः । तदपि भ्रान्तिमात्रम् । अस्मदादिशरीरवत्तस्यापि शरीरस्य पाञ्चभौतिकत्वात् । लीलाविग्रहकल्पनं च विग्रहाभावे लीलाभावादयुक्तमित्याह—मूर्त इति । अमूर्तः सर्वाकारशून्यो निःस्वभावः परमार्थ इति शून्यवादिनस्तदपि कल्पनामात्रम् । परमार्थो निःस्वभावश्चेति व्याघातादित्याह—अमूर्त इति चेति ।

काल इति कालविदो दिश इति च तद्विदः ।
वादा इति वादविदो भुवनानीति तद्विदः ॥ २४ ॥

---

१ ग. घ. ङ. ज. झ. इतीति । २ ग. झ. °ति । भो° । ३ ग. घ. ङ. ज. झ. °दि कि° । ४ छ. °यन्ते त° । ५ ङ. छ. ज. °दैक्यरू° । ६ ग. घ. °रवे । ७ छ. °रित्यर्थः । सू° । ८ छ. °च मृ° । ९ ङ. °सुप्त° । १० घ. °तादिवि° । ११ ङ. °तस्याव° । १२ ग. °स्य च व° । १३ घ. ङ. ज. मूर्तस्त्रि° । १४ छ. °दिव° । १५ घ. °रीरं पा° । १६ ख. ग. घ. ङ. ज. झ. °लायोगाद° । १७ घ. ज. °मार्थतो निः° ।

कालः परमार्थत इति ज्योतिर्विदः । तच्च न । कालैक्ये मुहूर्तादिव्यवहारायोगात् । तन्नानात्वेऽपि न स्वातन्त्र्यम् । अन्यविषयत्वेन प्रतीतेः । उदयकाल इत्यादिना क्रियाधर्मत्वेन प्रतीतेः स्फुटत्वात् । न च क्रियाधर्मत्वं कालेऽपि तदुत्पत्तिदर्शनादन्यथा कालानवच्छिन्नत्वेन क्रियानित्यत्वापातादित्याह—काल इतीति । स्वरोदयविदस्तु दिशः परमार्था इत्याहुः । तदपि भ्रान्तिमात्रम् । तद्विदामपि पराजयदर्शनादित्याह—दिश इति चेति । धातुवादो मन्त्रवादश्चेत्यादयो वादा वस्तुभूता भवन्तीति केचित् । तदपि कल्पनामात्रम् । ताम्रादिस्वभावे स्थिते नष्टे च कनकादिस्वभावासंभवात् । मन्त्रवादेऽपि कालदष्टो न जीवति अकालदष्टः स्वयमेवोत्थास्यतीत्यभ्युपगमाद्व्यामोहमात्रमित्याह—वादा इतीति । भुवनानि चतुर्दश वस्तूनीति भुवनकोशविदः । तदपि कल्पनामात्रम् । तेषामदृष्टत्वात् । न चैते तेभ्यस्तद्दर्शनम् । तेषां मिथो विप्रतिपत्तिदर्शनादित्याह—भुवनानीति ।

मन इति मनोविदो बुद्धिरिति च तद्विदः ।
चित्तमिति चित्तविदो धर्माधर्मौ च तद्विदः ॥ २५ ॥

मन एवाऽऽत्मेति लोकायतभेदः । तदपि भ्रान्तिमात्रम् । तस्य स्वातन्त्र्ये क्लेशप्राप्त्यनुपपत्तेः अस्वातन्त्र्ये च घटवदनात्मत्वात्करणत्वाच्च दीपवदात्मत्वायोगादित्याह—मन इति । बुद्धिरेवाऽऽत्मेति बौद्धाः । तेषामपि भ्रान्तिमात्रमेव । तत्सुषुप्त्यभिचाराद्वेद्यस्य च घटवदनित्यत्वादित्याह—बुद्धिरिति । चित्तमेव बाह्याकारशून्यं विज्ञानम् । तदेवाऽऽत्मेत्यपरे । तत्रापि प्रागुक्तन्यायाविशेषात्तुल्यं भ्रान्तित्वमित्याह—चित्तमिति । धर्माधर्मौ निर्विशेषचोदनाजन्यौ परमार्थाविति मीमांसकाः । तदपि कल्पनामात्रम् । देशकालादिषु धर्माधर्मयोर्विप्रतिपत्तिदर्शनादित्याह—धर्माविति ।

पञ्चविंशक इत्येके षड्विंश इति चापरे ।
एकत्रिंशक इत्याहुरनन्त इति चापरे ॥ २६ ॥

प्रधानं मूलप्रकृतिः । महदहंकारतन्मात्राणीति सप्त प्रकृतिविकृतयः । पञ्च ज्ञानेन्द्रियाणि । पञ्च कर्मेन्द्रियाणि । पञ्च विषयाः । मनश्चैकमिति षोडश विकाराः । पुरुषस्तु

---

१ क. °त्वे प्र° । २ ग. °तीते । उ° । ३ घ °लाव° । ४ घ. °यायां नि° । ५ ख. °मार्थ इ° । ६ छ. °वादर्शनात् । ७ ख ग. घ. झ. °लदृष्टो । ८ ख. ग. घ. ज. °लदृष्टः । ९ छ °मेव व्युत्था° । १० ख. °ति । ११ छ. °दृष्टार्थत्वा° । १२ ख. च. वचनेभ्य° । १३ घ. °नीतीति । १४ घ. च. छ. मनवि° । १५ ग ङ झ. °क्तत्वे° । १६ ग. °त्तुल्यभा° ।

दृशिस्वभाव इति पञ्चविंशतिसंख्याकः प्रपञ्चो वस्त्विति सांख्याः । तच्च कल्पनामात्रम् । पञ्चविंशतिविशेषणस्याव्यावर्तकत्वे वैयर्थ्याद्व्यावर्तकत्वे च व्यावर्त्यप्रमित्यप्रमित्योरनुपपत्तेरित्याह—पञ्चविंशक इति । पातञ्जलाः पुनरीश्वरमधिकं पश्यन्तः षड्विंशतिपदार्था इति कल्पयन्ति । तदयुक्तम् । ईश्वरस्य पुरुषान्तर्भावादधिकत्वानुपपत्तेः । अनन्तर्भावे च घटवदनीश्वरत्वप्रसङ्गादित्याह— षड्विंश इति चेति । पाशुपतास्तु रागाविद्यानियतिकालकलामायाधिकास्त एवैकत्रिंशत्पदार्था इति ब्रुवते । तन्न । क्लेशत्वेऽपि रागाविद्ययोरवान्तरभेदवदस्मितादेरपि तद्भिन्नत्वेन संख्यातिरेकात्तस्य रागोपलक्षितत्वे तस्याप्यविद्योपलक्षितत्वेन न्यूनतापाताद्विद्यामायायोश्चैकत्वादवान्तरभेदे च नियतावपि तदुपपत्तेः संख्यातिरेकतादवस्थ्यम् । कालकलासु च तत्प्रसिद्धेरित्याह— एकत्रिंशक इति । * अनन्तः पदार्थभेदो न नियतोऽस्तीति केचित् । तदपि न । वादिनां विवाददर्शनात । विवादस्य चाज्ञानमूलकत्वादित्याह— अनन्त इतीति ।

लोकाल्लौकिकविदः प्राहुराश्रमा इति तद्विदः ।
स्त्रीपुंनपुंसकं लैङ्गाः परापरपथापरे ॥ २७ ॥

लोकानुरञ्जनमेव तत्त्वमिति लौकिकाः । तदपि विप्रलम्भमात्रम् । लोकस्य भिन्नरुचित्वात्तदनुरञ्जनायेश्वरेणापि कर्तुमशक्यत्वादित्याह—लोकानिति । दक्षप्रभृतयस्त्वाश्रमाः परमार्था इति समर्थयन्ते । तदसत् । वेषस्याऽऽश्रमशब्दार्थत्वे शूद्रादेरपि प्रसङ्गाज्जातेश्च दुर्निर्वचत्वात्तन्मूलस्याऽऽश्रमस्य दर्शयितुमशक्यत्वात्संस्कारस्य च देहसमवायित्वे पारलौकिकत्वायोगादसङ्गे चाऽऽत्मनि तदसमवायादित्याह—आश्रमा इतीति । वैयाकरणास्तु स्त्रीपुंनपुंसकं शब्दजातं तत्त्वमिति वर्णयन्ति । तदप्ययुक्तम् । स्त्र्यादेः शब्दस्वभावत्वे सर्वादीनां त्रिलिङ्गत्वायोगादेकस्यानेकस्वभावत्वासंभवादौपाधिकधर्मत्वे च तस्यावस्तुत्वप्रसङ्गादित्याह— स्त्रीपुंनपुंसकमिति । द्वे ब्रह्मणी वेदितव्ये परं चापरं चेति केचित् । तच्च न । परिच्छेदे क्वचिदपि ब्रह्मत्वायोगाद्वस्तुतोऽपरिच्छिन्नस्य तद्भावादित्याह— परापरमिति ।

सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।
स्थितिरिति स्थितिविदः सर्व चेह तु सर्वदा ॥ २८ ॥

* अनन्तः पदार्थ इत्यादिरनन्त इत्यन्तो ग्रन्थो ग. पुस्तके—चेतीत्यस्य पश्चाद्दृश्यते ।

१ घ. °शसं° । २ घ. °श्चोऽस्ति° । ३ ग. छ. झ. °शतिः प° । ४ क. °ति विक° । ५ घ. ज. °ता रा° । ६ क. °न च शून्यता° । ७ छ इति । ८ ज °रणस्तु । ९ घ. ङ. छ. ज. °सकश° । १० ज. °यति । त° । ११ ग. घ. ङ. ज. °स्य सङ्गा° ।

सृष्टिर्वा लयो वा स्थितिर्वा तत्त्वमिति पौराणिकाः । तदपि कल्पनामात्रम् । सतोऽसतश्चोत्पत्त्याद्यभावस्य वक्ष्यमाणत्वादिति मत्वाऽऽह—सृष्टिरित्यादिना । यथोक्तकल्पनानामधिष्ठानं सूचयति—सर्वे चेति । उदाहृताश्चानुदाहृताश्च कल्पनाभेदा यावन्तो विद्यन्ते ते सर्वेऽपि प्रकृतात्मन्येव कल्पनावस्थायां कल्प्यन्ते नाऽऽत्मनः कल्पितत्वम् । सर्वस्य कल्पितत्वेनाधिष्ठानत्वायोगादित्यर्थः ।

प्राणः प्राज्ञो बीजात्मा तत्कार्यभेदा हीतरे स्थित्यन्ताः । अन्ये च सर्वे लौकिकाः सर्वप्राणिपरिकल्पिता भेदा रज्ज्वामिव सर्पादयः । तच्छून्य आत्मन्यात्मस्वरूपानिश्चयहेतोरविद्यया कल्पिता इति पिण्डीकृतोऽर्थः । प्राणादिश्लोकानां प्रत्येकं पदार्थव्याख्याने फल्गुप्रयोजनत्वाद्यत्नो न कृतः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

प्राणादिश्लोकेषु प्राणशब्दार्थमाह—प्राण इति । तस्यैव बीजात्मनो विकारविशेषत्वादितरेषां न ततोऽत्यन्तभिन्नतेत्याह—तत्कार्येति । अन्तिमपदार्थं स्फुटयति—अन्य इति । कुलधर्मो ग्रामधर्मो देशधर्मश्चेत्येते सर्वशब्देन गृह्यन्ते । तेषामात्मनि तदज्ञानादेव कल्पितत्वं सदृष्टान्तं स्पष्टयति—रज्ज्वामिति । आत्मनोऽधिष्ठानयोग्यतार्थं कल्पनाशून्यत्वमाह—तच्छून्य इति । किमिति समुदायार्थः श्लोकानामुच्यते । श्लोकान्तरेष्विव प्रत्येकं पदार्थव्याख्यानमेषु किं न स्यादित्याशङ्क्याऽऽह—प्रत्येकमिति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।
तं चावति स भूत्वाऽसौ तद्ग्रहः समुपैति तम् २९ ॥

किं बहुना प्राणादीनामन्यतममुक्तमनुक्तं वाऽन्यं भावं पदार्थं दर्शयेद्यस्याऽऽचार्योऽन्यो वाऽसत्[13] इदमेव तत्त्वमिति स तं भावमात्मभूतं पश्यत्ययमहमिति वा समेति वा तं च द्रष्टारं स भावोऽवति यो दर्शितो भावोऽसौ भूत्वा रक्षति । स्वेनाऽऽत्मना सर्वतो निगृह्णाति । तस्मिन्ग्रहस्तदग्रहस्तदभिनिवेशः । इदमेव तत्त्वमिति स तं ग्रहीतारमुपैति । तस्याऽऽत्मभावं निगच्छतीत्यर्थः ॥ २९ ॥

---

१ क. °नां°। २ क. °तानु°। ३ ङ. °र्वेऽपीह प्र°। ४ ख. जीवात्मा। ५ क. °त्मनाऽऽत्म°। ६ झ. °त्वात्प्रसिद्धपदार्थत्वाच्च यत्नो। ७ ङ. ज °तिमं प°। ८ ग. °र्भो दे° ९ ग. स्फुटयति। १० ख. छ °नत्वयो°। ११ झ. °क्तं चान्यं। १२ ङ. वा यं भा°। १३ ख. घ. ज. °न्यो नेत्थमि°। १४ क. वा सुप्त। छ. वा प्राप्त। १५ छ. सन्तं भा°। ज. सततं।

लौकिकानां परीक्षकाणां च कतिपयकल्पनाभेदानुदाहृत्यानन्तत्वादशेषतस्तेषामुदाहर्तुमशक्यत्वं दृष्ट्वा संक्षेपमात्रमाचष्टे—यं भावमिति । पादत्रयं विभजते—किं बहुनेत्यादिना । तमेव भावं विशिनष्टि—यो दर्शित इति । स कथं द्रष्टारं रक्षतीत्यपेक्षायामाह—असाविति । साधकपुरुषतादात्म्यमापद्येत्यर्थः । रक्षणप्रकारं प्रकटयति—स्वेनेति । साक्षादसाधारणरूपत्वेन तत्रैव निष्ठामुपाद्य ततोऽन्यत्र प्रवृत्तिमुपासकस्य निवारयतीत्यर्थः । चतुर्थपादं व्याचष्टे—तस्मिन्निति ॥ २९ ॥

एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत्सोऽविशङ्कितः ॥ ३० ॥

एतैः प्राणादिभिरात्मनोऽपृथग्भूतैरपृथग्भावैरेष आत्मा रज्जुरिव सर्पादिविकल्पनारूपैः पृथगेवेति लक्षितोऽभिलक्षितो निश्चितो मूढैरित्यर्थः । विवेकिनां तु रज्ज्वामिव कल्पिताः सर्पादयो नाऽऽत्मव्यतिरेकेण प्राणादयः सन्तीत्यभिप्रायः । " इदं सर्वं यदयमात्मा " इति श्रुतेः । एवमात्मव्यतिरेकेणासत्त्वं रज्जुसर्पवदात्मनि कल्पितानामात्मानं च केवलं निर्विकल्पं यो वेद तत्त्वेन श्रुतितो युक्तितश्च सोऽविशङ्कितो वेदार्थं विभागतः कल्पयेत्कल्पयतीत्यर्थः । इदमेवंपरं वाक्यमदोऽन्यपरामिति । न ह्यनध्यात्मविद्वेदाञ्ज्ञातुं शक्नोति तत्त्वतः । न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुत इति हि मानवं वचनम् ॥ ३० ॥

एतेनान्यत्र प्रवृत्तिनिरोधे हेतुरुक्तस्तर्हि प्राणादीनामात्मवदेव तात्त्विकत्वं प्राप्तमित्याशङ्क्य कल्पितानामधिष्ठानातिरेकेणावस्तुत्वान्नैवमित्याह—एतैरिति । उक्तज्ञानतुल्यर्थमाह—एवमिति । पूर्वार्धं व्याकरोति—एतैरिति । कल्पितानामधिष्ठानातिरेकेण सत्तास्फुरणयोरभावात्तद्द्वारेणाऽऽत्मनि भेददर्शनमविवेकिनामस्तु तदन्येषां कथमुपलब्धिरित्याशङ्क्याऽऽह—विवेकिनां त्विति । प्राणादीनामात्मातिरेकेणासत्त्वे

---

१ ग. °दाभेदानु° । २ घ. °नन्तास्ते° । ३ क. °षामिहाऽऽह° । ४ ख. घ. ङ. ज. मात्रव्याच° । ५ घ ङ. झ. °मापद्य । ६ ग घ. ङ. ज. झ. °स्य वा° । ७ झ. °थग्भावैरपृथग्भूतैरे° । ८ क. °तोऽप्यलक्षितो नि° । ङ. °तो मू° । ज झ. °तो नि° । ९ क. °वै पदमा° । १० ख. घ. च. छ. ज. °दार्थतत्त्वं ज्ञातुं° । ११ ग. ह्यनात्म° । १२ ख. घ. ज. °विर्किंचित्कि° । १३ ङ. झ. °मत्वादे° । १४ क. °त्वान्मैव° । १५ क. सत्त्वात्स्फु° । १६ ख. छ. °मात्मव्याति° ।

प्रमाणमाह—इदमिति । उत्तरार्धं योजयति—एवमिति । तत्त्वेनाऽऽत्मवेदनोपायं सूचयति—तत्त्वेनेति । स्वप्नदृश्यवज्जाग्रद्दृश्यानां मिथ्यात्वसाधको दृश्यत्वादिहेतुरत्र युक्तिरित्युच्यते । यथोक्तविज्ञानवान्वेदकिंकरो न भवति किंतु स यं वेदार्थं ब्रूते स एव वेदार्थो भवतीत्यर्थः । विभागतो वेदार्थव्याख्यानमभिनयति—इदमिति । ज्ञानकाण्डं साक्षादद्वैतवस्तुपरम् । कर्मकाण्डं तु साध्यसाधनसंबन्धबोधनद्वारा परम्परया तस्मिन्पर्यवसितम् । सर्वे वेदा यत्पदमामनन्तीति श्रुतेरित्यर्थः । आत्मविदो वेदार्थवित्त्वमुक्तं व्यनक्ति—न हीति । तदेव हि वेदार्थतत्त्वं यत्प्रत्यगात्मस्वरूपमतश्चाध्यात्मविदेव यथात्म्येन तत्त्वज्ञाने प्रभवतीत्यर्थः । उक्तेऽर्थे स्मृतिमुदाहरति—न हीति । क्रियाशब्देन प्रमाणमुच्यते । तत्फलं तत्त्वज्ञानमग्निहोत्रादिक्रियायार्थं शुद्धिद्वारा तस्मिन्पर्यवसानादित्यर्थः ॥ ३० ॥

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ ३१ ॥

यदेतद्द्वैतस्यासत्त्वमुक्तं युक्तितस्तदेतद्वेदान्तप्रमाणावगतमित्याह । स्वप्नश्च माया च स्वप्नमाये असद्रूपत्वात्मिके असत्यौ सद्रूपत्वात्मिके इव लक्ष्येते अविवेकाभिः । यथा च प्रसारितपण्यापणगृहप्रासादस्त्रीपुंजनपदव्यवहाराकीर्णमिव गन्धर्वनगरं दृश्यमानमेव सदकस्मादभावतां गतं दृष्टम् । यथा च स्वप्नमाये दृष्टे असद्रूपे तथा विश्वमिदं द्वैतं समस्तमसद्दृष्टम् । केत्याह । वेदान्तेषु । " नेह नानाऽस्ति किंचन " । "इन्द्रो मायाभिः" । " आत्मैवेदमग्र आसीत् " "ब्रह्मैवेदमग्र आसीत् " । " द्वितीयाद्वै भयं भवति " । " न तु तदूद्वितीयमस्ति " । "यत्र त्वस्य सर्वमात्मैवाभूत्" इत्यादिषु । विचक्षणैर्निपुणतरवस्तुदर्शिभिः पण्डितैरित्यर्थः ।

" तमः स्वभ्रनिभं दृष्टं वर्षबुद्बुदसंनिभम् ।
नाशयायं सुखाद्धीनं नाशोत्तरमभावगम् " ॥

इति व्यासस्मृतेः ॥ ३१ ॥

यामिर्युक्तिभिरस्मिन्प्रकरणे द्वैतस्य मिथ्यात्वं कथ्यते तासां प्रमाणानुग्राहकत्वादना-

---

१ ख. छ. °ति—श्रुतित इति । २ छ. किंत्वसौ यं । ३ ग. छ. झ. तदर्थो । ४ ख. °दान्तार्थ° । ५ ग. झ. °त्मरू° । ६ झ. °नेन प्र° । ७ छ. °तिमवतारयति । ८ ख. ग. छ. °श्च बुद्धिशु° । झ. °श्च बुद्धि° । ९ क. °स्तद्वे° । १० च °गमामि° । ११ घ. छ. झ. °सत्ये स° । १२ च. छ. °पण्यगृ° । १३ ङ. च. छ. ज. °हप्रसा° । १४ क °शिभिरोभिः । । १५ च. °र्थः । नभस्यभ्र° । १६ क. °ति हि व्या° । १७ घ. च. झ. °स्मृतिः ॥ ३१ ॥

भासत्वमवैसेयमित्याह–स्वप्नेति । श्लोकस्य तात्पर्यार्थमाह—यदेतद्द्वैतस्येति । असत्त्वे सत्त्ववत्प्रतिभानं कथमित्याशङ्क्य श्लोकाक्षराणि व्याचष्टे—स्वप्नश्चेति । प्रसारितानि तत्र तत्र प्रकटतां प्रापितानि पण्यानि क्रयविक्रयद्रव्याणि येषामापणेषु हट्टेषु ते प्रसारितपण्यापणास्ते च गृहाश्च प्रासादाश्च स्त्रीपुंजनपदाश्चैतेषां व्यवहारास्तैराकीर्णमिति योजना । दृष्टान्तत्रयमनूद्य दार्ष्टान्तिकमाह–यथा चेति । गन्धर्वनगराकारं चकारार्थः । नेह नानाऽस्ति किंचनेत्यादयो वेदान्ताः । द्वैतस्य वस्तुतोऽसत्त्वे स्मृतिमपि दर्शयति—तम इति । तमसि मन्दान्धकारे रज्ज्वामधिष्ठाने भूच्छिद्रमिति यद्भ्रान्त्या भाति तन्निमं तत्तुल्य विवेकिभिर्विश्वं दृष्टं तच्चातीव चञ्चलमालक्षितं नाशप्रायं वर्तमानकालेऽपि तद्योग्यतासत्त्वात् । न च द्वैतं कदाचिदपि सुस्थकरमुपलभ्यते दुःखाक्रान्तं तु दृश्यते । तच्च नाशग्रस्तम् । नाशादूर्ध्वमसत्त्वमेवापगच्छति न तर्हि तस्य परमार्थत्वं प्रमाणाभावादित्यर्थः ॥ ३१ ॥

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ३२ ॥

प्रकरणार्थोपसंहारार्थोऽयं श्लोकः । यदा वितथं द्वैतमात्मैवैकः परमार्थतः संस्तदेदं निष्पन्नं भवति सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति तदा न विरोधः । निरोधनं निरोधः प्रलय उत्पत्तिर्जननं बद्धः संसारी जीवः साधकः साधनान्मोक्षस्य मुमुक्षुर्मोचनार्थी मुक्तो विमुक्तबन्धः । उत्पत्तिप्रलययोरभावाद्बद्धादयो न सन्तीत्येषा परमार्थता । कथमुत्पत्तिप्रलयोरभाव इत्युच्यते । द्वैतस्यासत्त्वात् । "यत्र हि द्वैतमिव भवति" । "य इह नानेव पश्यति" । "आत्मैवेदं सर्वम्" । "ब्रह्मैवेदं सर्वम्" "एकमेवाद्वितीयम्" । "इदं सर्वं यदयमात्मा" इत्यादिना श्रुतिभ्यो द्वैतस्यासत्त्वं सिद्धम् । सतो ह्युत्पत्तिः प्रलयो वा स्यान्नासतः शशविषाणादेः । नाप्यद्वैतमुत्पद्यते लीयते वा । अद्वयं चोत्पत्तिप्रलयवच्चेति विप्रतिषिद्धम् । यस्तु पुनर्द्वैतसंव्यवहारः स रज्जुसर्पवदात्मनि प्राणादिलक्षणः कल्पित

---

१ घ. छ. °वधेय° । २ ख. ग. °त्र प्र° । ३ ग. घ. ङ. ज. झ. °षु ते । ४ घ. ङ. ज. °दाश्च ते° । ५ ग. घ. ङ. ज. °ति । ने° । ६ छ. °संग्रहार्थो° । ७ घ. ङ. च. ज. झ. °हारोऽयं । ८ च. °त्मैकः । ९ च. निकृष्टं । १० च. °र्मोक्षभावना° । ११ ख. ङ छ. ज. °बन्धनः । उ° । १२ घ. च. छ. ज झ. °द्वन्धाद° । १३ क. °स्यास्यास° । १४ क. °दिनानाश्रु° । १५ घ. सत उत्प° । १६ ख. ग. च. ज. °ते प्रली° ।

इत्युक्तम् । न हि मनोविकल्पनाया रज्जुसर्पादिलक्षणाया रज्ज्वां प्रलय उत्पत्तिर्वा । न च मनसि रज्जुसर्पस्योत्पत्तिः प्रलयो वा न चोभयतो वा । तथा मानसत्वाविशेषाद्द्वैतस्य । न हि नियते मनसि सुषुप्ते वा द्वैतं गृह्यते । अतो मनोविकल्पनामात्रं द्वैतमिति सिद्धम् । तस्मात्सूक्तं द्वैतस्यासत्त्वान्नि-राधाद्यभावः परमार्थतेति ।

प्रमाणयुक्तिभ्यां द्वैतमिथ्यात्वप्रसाधनेनाद्वैतमेव पारमर्थिकमिति स्थिते निर्धारितमर्थं संगृह्णाति—नेत्यादिना । श्लोकस्य तात्पर्यार्थमाह—प्रकरणेति । कोऽसौ प्रकरणार्थ-स्तस्य वा संग्रहे किं सिध्यति तदाह—यदेति । व्यवहारमात्रस्याविद्याविषयत्वेऽपि किं स्यादिति चेत्तदाह—तदेति । चतुर्थपादार्थमाह—उत्पत्तीति । उक्तमेवार्थं प्रश्नप्रतिवचनाभ्यां प्रपञ्चयति—कथमित्यादिना । द्वैतासत्त्वं श्रुत्यवष्टम्भेनैव स्पष्ट-यति—यत्र हीति । द्वैतस्यासत्त्वे कथमुत्पत्तिप्रलयौ न स्यातामित्याशङ्क्य किं द्वैतस्य तौ किं वाऽद्वैतस्येत्याद्यं विकल्पं दूषयति—सतो हीति । द्वितीयं प्रत्याह—नापीति । व्यावहारिकद्वैताङ्गीकारात्तस्यैवोत्पत्तिप्रलयावित्याशङ्क्याऽऽह—यस्त्विति । विमतस्त-त्त्वतो नोत्पत्ति-लयवान्कल्पितत्वाद्रज्जुसर्पवदित्यत्र दृष्टान्तासिद्धिमाशङ्क्य रज्जुस-र्पस्य रज्ज्वामुत्पत्तिप्रलयौ मनसि वा द्वयोर्वेति विकल्प्य प्रथमं प्रत्याह—न हीति । रज्जुं पश्यतां सर्वेषामुपलब्धिप्रसङ्गादित्यर्थः । द्वितीयं दूषयति—न चेति । बहि-रुपलब्धिविरोधादित्यर्थः । तृतीयं निरस्यति—न चेति । उभयतो मनोरज्जुलक्षणे न रज्जुसर्पस्योत्पत्तिप्रलयौ युक्तौ द्वयाधारत्वानुपलम्भादित्यर्थः । रज्जुसर्पवद्द्वैतस्य मानसत्वाविशेषान्न तत्त्वतो जन्मविनाशौ दर्शयितुं शक्यावितिं दार्ष्टान्तिकमाह—तथेति । द्वैतस्य न कुतश्चित्तात्त्विकौ जन्मविनाशाविति शेषः । मानसत्वासिद्धिमा-शङ्क्याऽऽह—न हीति । अन्वयव्यतिरेकाभ्यां द्वैतं मनोविकल्पनामात्रमिति निगम-यति—अत इति । न च मनो द्वैतस्य दर्शनमात्रे निमित्तमिति युक्तम् । भ्रमसिद्ध-स्याज्ञातसत्ताया प्रमाणाभावादित्यभिप्रेत्य प्रकृतमुपसंहरति—तस्मादिति ।

यद्येवं द्वैताभावे शास्त्रव्यापारो नाद्वैते विरोधात् । तथा च सत्यद्वैतस्य वस्तुत्वे प्रमाणाभावाच्छून्यवादप्रसङ्गः । द्वैतस्य चाभा-वान्न रज्जुसर्पादिविकल्पनाया निरास्पदत्वानुपपत्तिरिति प्रयुक्तमेत-

---

१ क.नायां र° । २ झ. निद्रने । ३ घ. °मार्थेति । ४ ग. ङ. °पादमा° । ५ ग. °न स्फुट्य° । ६ ग. तौ किमद्वै° । ७ ज. °र्ज्जु प्रथमं प° । ८ ग. झ. °न्मना° । ९ झ. °वे शास्त्रादिव्या° । १० च. °रो न स्याद्वै° ।

त्कथमुज्जीवसीत्याह। रज्जुरपि सर्पविकल्पस्याऽऽस्पदभूता विकल्पितत्वति दृष्टान्तानुपपत्तिः। न। विकल्पनाक्षयेऽविकल्पितस्याविकल्पितत्वादेव सत्त्वोपपत्तेः। रज्जुसर्पवदसत्त्वमिति। चेत्। न। एकान्तेनाविकल्पितत्वादविकल्पितरज्ज्वंशवत्प्राक्सर्पाभावविज्ञानात्। विकल्पयितुश्च प्राग्विकल्पनोत्पत्तेः सिद्धत्वाभ्युपमादसत्त्वानुपपत्तिः।

निरोधाद्भावस्य परमार्थत्वे तत्रैव शास्त्रव्यापारादद्वैते तदव्यापारादभावबोधने व्यापृतस्य भावबोधने व्यापारविरोधादद्वैतमप्रामाणिकं प्राप्तमिति शङ्कते—यद्येवमिति। अद्वैतस्य प्रामाणिकत्वाभावे किं स्यादित्याशङ्क्याऽऽह—तथा चेति। अद्वैतस्याप्रामाणिकत्वेऽपि कुतः शून्यवादो द्वैतस्य सत्त्वादित्याशङ्क्याऽऽह—द्वैतस्येति। नाप्रामाणिकशून्यवादो युक्तो यथा रज्ज्वामारोपितसर्पादे रज्जुरधिष्ठानम्। न हि निरधिष्ठानो भ्रमोऽस्ति। तथा द्वैतकल्पनाया निरधिष्ठानत्वायोगात्तदधिष्ठानत्वेनाद्वैतमास्थेयमित्योंकारश्रवणे परिहृतमेतच्चोद्यं कथमुद्भावयसीति सिद्धान्तवाद्याह—नेत्यादिना। तत्र शून्यवादी स्वमतानुसारेण दृष्टान्तासंप्रतिपत्त्या चोदयति—आहेति। स्वमतसंमतस्यैव दृष्टान्ततेत्यनियमात्प्रसिद्धिमात्रेण परप्रतिबोधनसंभवाद्भ्रमबाधे परिशिष्यमाणस्यावधेः सत्यताया रज्ज्वादौ दृष्टत्वाद्द्वैतभ्रमबाधसाक्षितया स्फुरतश्चैतन्यस्याकल्पितत्वादेव सत्त्वान्न शून्यताप्रसक्तिरित्युत्तरमाह—नेत्यादिना। अद्वैतमसदप्रामाणिकत्वाद्रज्जुसर्पवदिति तदकल्पितत्वासिद्धिं शङ्कते—रज्ज्विति। रज्जुसर्पस्यासत्त्वे भ्रान्तिविषयत्वं प्रयोजकमात्मनस्तु भ्रमसाक्षित्वान्नियमेन भ्रमविषयत्वान्नासत्त्वमित्युत्तरमाह—नैकान्तेनेति। अप्रामाणिकत्वहेतोरनैकान्तिकत्वं दोषान्तरमाह—अविकल्पितेति। नायं सर्पो रज्जुरेषेति सर्पाभावज्ञानपूर्वकपुरोवर्तिरज्जुत्वानिश्चयात्प्रागवस्थायां प्रामाणिकत्वाभावेऽपि सन्नेवाज्ञातो रज्ज्वंशोऽभ्युपगम्यते। तथा सदैव प्रामाणिकत्वाभावेऽपि सन्नेवाऽऽत्मा भविष्यतीत्यर्थः। आत्मनोऽसत्त्वाभावे हेत्वन्तरमाह—विकल्पयितुश्चेति।

कथं पुनः स्वरूपे व्यापाराभावे शास्त्रस्य द्वैतविज्ञाननिवर्तकत्वम्। नैष दोषः। रज्ज्वां सर्पादिवदात्मनि द्वैतस्याविद्याध्यस्तत्वात्। कथं सुखयहं दुःखी मूढो जातो मृतो जीर्णो देहवान्पश्यामि व्यक्तोऽव्यक्तः कर्ता फली

---

१ झ. °मुद्भावयसी°। २ क. च. छ. झ. सर्वावि°। ३ छ. °वल्पिता चेति। ४ छ. °त्प्राग्भाव°। ५ क. °मादेव स°। ६ ग. झ. °त्याह। ७ ग. झ. °त्वे कु°। ८ ज. °ल्पनया। ९ ज. °ण प्र°। १० ख. छ. परं प्र°। ११ घ. च. °वाद्वा°। १२ ख. °त्यतया। १३ ख. °वाऽऽत्मा। १४ घ. ज. सदेव। १५ च. °मि शृणोमि व्य°।

संयुक्तो वियुक्तः क्षीणो वृद्धोऽहं ममैत[1] इत्येवमादयः सर्वे आत्मन्यध्यारोप्यन्ते[2]। आत्मैतेष्वनुगतः सर्वत्राव्यभिचारात्। यथा सर्पधारादिभेदेषु रज्जुः। यदा चैवं विशेष्यस्वरूपप्रत्ययस्य सिद्धत्वान्न कर्तव्यत्वं शास्त्रेण। अकृतकर्तृ च शास्त्रं कृतानुकारित्वेऽपमाणम्। यतोऽविद्याध्यारोपितसुखित्वादिविशेषप्रतिबन्धादेवाऽऽत्मनः स्वरूपेणानवस्थानं स्वरूपावस्थानं च न श्रेय इति।

आत्मनो द्वैतभ्रमाधिष्ठानत्वेन संभावितत्वाद्बाधसाक्षित्वेन पारिशिष्ट्यात्पूर्वं भ्रमोत्पत्तेः स्वतः सिद्धत्वाच्च प्रमाणाविषयत्वेऽपि नास्ति शून्यतेत्युक्तम्। इदानीं प्रमिते धर्मिणि प्रतिषेधदर्शनादात्मनोऽप्रमितत्वे तत्र द्वैताभावप्रमापकं शास्त्रमयुक्तमिति शङ्कते— कथमिति। प्रतिपन्ने धर्मिणि प्रतिषेधात्प्रमिते प्रतिषेधस्य विशेषणवैफल्यादेवानभ्युपगमादात्मनश्च सर्वकल्पनास्वधिष्ठानाकारेण स्फुरणाङ्गीकरणात्तस्मिन्प्रतिपन्ने द्वैतप्रतिषेधः संभवतीति परिहरति—नैष दोष इति। भ्रमाविषयस्याऽऽत्मनोऽध्यासानुगततया स्फुरणमघटमानमित्याक्षिपति— कथमिति। स्वप्रकाशत्वेन स्वतो निर्विकल्पकस्फुरणेऽपि सविकल्पकव्यवहारे समारोपितसंसृष्टाकारेण भ्रमविषयत्वमविरुद्धमित्याह— सुरूपहमित्यादिना। उक्तन्यायेनाऽऽत्मप्रतीतेः सिद्धत्वात्प्रतिपन्ने तस्मिन्द्वैतप्रतिषेधस्य सुकरतेति फलितमाह—यदा चेति। न केवलमारोपितविशेषणैर्विशेष्यस्याऽऽत्मनः स्वरूपस्फुरणस्य सिद्धत्वादेव न शास्त्रेण कर्तव्यत्वमनुवादत्वेनाप्रामाण्यप्रसङ्गाच्चैवमित्याह— अकृतेति। स्फुरत्यात्मनि द्वैतनिषेधकत्वेऽपि शास्त्रस्य फलाभावादप्रामाण्यं तदवस्थमित्याशङ्क्याऽऽह— अविद्येति। प्रतिषेधशास्त्रादपनीते प्रतिबन्धे स्वरूपावस्थानं फलतीत्यर्थः। निःशेषदुःखनिवृत्तिर्निरतिशयानन्दावाप्तिश्च परं श्रेयो न स्वरूपावस्थानमित्याशङ्क्याऽऽह— स्वरूपेति। इति प्रसिद्धं मोक्षशास्त्रेष्विति शेषः।

सुखित्वादिनिवर्तकं शास्त्रमात्मन्यसुखित्वादिप्रत्ययकरणेन नेति नेत्यस्थूलादिवाक्यैरात्मस्वरूपवदसुखित्वाद्यपि सुखित्वादिभेदेषु नानुवृत्तोऽस्ति धर्मः। यद्यनुवृत्तः स्यान्नाध्यारोपि[3]तसुखित्वादिलक्षणो विशेषः। यथोष्णत्वगुणविशेषवत्यग्नौ शीतता। तस्मान्नैर्विशेष्य एवाऽऽत्मनि सुखित्वादयो विशेषाः कल्पिताः। यत्त्वसुखित्वादिशास्त्रमात्मनस्तत्सुखित्वादिविशेषानिवृत्त्यर्थमेवेति सिद्धम्। " सिद्धं तु निवर्तकत्वात् " इत्यागमविदां सूत्रम् ॥ ३२ ॥

---

१ घ. °मैतदित्ये°। २ घ. स्यान्नोऽध्यारोप्येत्त°। ३ झ. °ध्यारोपेत°। ४ घ. ङ. °रोप्येत°। ५ क. °सुखत्वा°। ६ च. °त्वदि°। ७ क. तस्मिन्नि°।

द्वैतनिवर्तकत्वे शास्त्रस्य कारकत्वं स्यादित्याशङ्क्याऽऽह-सुखित्वादीति । असुखित्वादेः स्वाभाविकत्वादात्मनि स्फुरत्यस्फुरणमनुपपन्नमित्याशङ्क्य भ्रमविषयशुक्तीदमंशादेश्च स्वाभाविकोऽपि रजतादिभेदो दोषमाहात्म्याद्यथा न प्रतिभाति तथाऽचिन्त्यशक्त्यविद्याप्रभावादात्मनि स्फुरत्यपि सुखित्वाद्यध्यासविरोध्यसुखित्वादिरूपेणास्फुरणमविरुद्धमित्याह— आत्मेति । विरुद्धे भ्रमानुपपत्तिरित्याह—यदीति । उक्तमर्थं संक्षिप्य निगमयति—तस्मादिति । असुखित्वादेरकल्पितत्वमसिद्धमाशङ्क्य निरस्यति— यच्चेति । अस्थूलमशोकान्तरमित्यादि वाक्यं शास्त्रशब्देन गृह्यते । उक्तेऽर्थे द्रविडाचार्यसंमतिमाह — सिद्धं त्विति । ब्रह्मणि पदानां व्युत्पत्त्यभावेऽपि सिद्धमेव शास्त्रप्रामाण्यमभावबोधनव्युत्पन्नभावसंसृष्टैः स्थूलादिव्युत्पन्नपदैः स्वाभाविकद्वैताभावबोधनेनाध्यस्तनिवर्तकत्वादिति सूत्रार्थः ॥ ३२ ॥

भावैरसद्भिरेवायमद्वयेन च कल्पितः ।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ ३३ ॥

पूर्वश्लोकार्थस्य हेतुमाह—यथा रज्ज्वामसद्भिः सर्पधारादिभिरद्वयेन च रज्जुद्रव्येण सताऽयं सर्प इयं धारा दण्डोऽयमिति वा रज्जुद्रव्यमेव कल्प्यत एवं प्राणादिभिरनन्तैरसद्भिरेवाविद्यमानैः, न परमार्थतः। न ह्यप्रचलिते मनसि कश्चिद्भाव उपलक्षयितुं शक्यते केनचित् । न चाऽऽत्मनः प्रचलनमस्ति । प्रचलितस्यैवोपलभ्यमाना भावा न परमार्थतः सन्तः कल्पयितुं शक्याः । अतोऽसद्भिरेव प्राणादिभावैरद्वयेन च परमार्थसताऽऽत्मना रज्जुवत्सर्पविकल्पास्पदभूतेनायं स्वयमेवाऽऽत्मा कल्पितः । सदैकस्वभावोऽपि संस्तै च प्राणादिभावा अप्यद्वयेनैव सताऽऽत्मना विकल्पिताः । न हि निरास्पदा कांचित्कल्पनोपलभ्यते । अतः सर्वकल्पनास्पदत्वात्स्वेनाऽऽत्मनाऽद्वयस्याऽभिचारात्कल्पनावस्थायामप्यद्वयता शिवा । कल्पना एव त्वशिवाः । रज्जुसर्पादिवत्त्रासादिकारिणो हि ताः । अद्वयताऽभयाऽतः सैव शिवा॥३३॥

यदुक्तं निरोद्याद्यभावस्य परमार्थतेति तदयुक्तम् । सामान्यविशेषात्मकं वस्तु नाना-

---

१ क. तस्मिन्निति । २ ङ. ज. °ल्पस्य प्रा° । ३ क. ग. च. °नैः प° । ४ घ. ज. °स्ति । अप्र° । ५ च. °कल्पस्याऽऽस्प° । ६ घ. °पि संश्चैत. प्रा° । ७ क. अद्व° । ८ क. °येनैव । ९ ख. ज. सत्तात्म° । १० च. काऽपि विकल्प° । ११ ख. घ. ङ. ज. °पद्यते । १२ ख. घ ङ च. °र्वविक° । १३ घ. अद्वैतताऽ° । १४ च. °याऽत एव सै° ।

रसमिति मते निरोधादेः सुसाध्यत्वादित्याशङ्क्याऽऽह—भावैरिति । भावा व्यावृत्ता विशेषाः । ते च व्यभिचारित्वादसन्तो रज्जुसर्पवत् । अद्वयमनुवृत्तं सामान्यं विशेषाकारैरवस्तुभूतैः सामान्याकारेण च तादृशेनायमव्यावृत्तानुगतपूर्णसत्ताचिदेकतानः सन्नात्मैव मूढैर्मोहमाहात्म्यात्कल्प्यते । न वस्तुतः सामान्यविशेषभावोऽस्ति परस्परापेक्षत्वादित्यर्थः । विशेषाणामसत्त्वे कथं सत्त्वेन व्यवहारः स्यादित्याशङ्क्य सत्तातादात्म्येन कल्पितत्वात्तेषां सत्त्वेन व्यवहारोपपत्तिरित्याह—भावा इति । अनुगतसत्ताकारेण कल्पिताः सत्त्वव्यवहारा भवन्तीति शेषः । सामान्यविशेषभावस्य कल्पितत्वादखण्डैकरसत्वे वस्तुनः सिद्धे निरोधादेर्दुःसाधनत्वमुचितमिति फलितमाह—तस्मादिति । श्लोकतात्पर्यं दर्शयति—पूर्वेति । निरोधादिसर्वविशेषाभावोपलक्षितं वस्तु वस्तुभूतमिति पूर्वश्लोकार्थस्तस्य सामान्यविशेषात्मके वस्तुनि विशेषानाश्रित्य निरोधादेः सुसाधनत्वादसत्त्वमाशङ्क्यते तेन तस्य साधनापेक्षायां तत्प्रदर्शनपरोऽयं श्लोक इत्यर्थः । तत्र पूर्वार्धगतान्यक्षराणि दृष्टान्तावष्टम्भेन व्याचष्टे—यथेत्यादिना संसृष्टरूपेण कल्पितत्वेऽपि स्वरूपेणानारोपितत्वाद्रज्जुद्रव्यस्य व्यावहारिकसत्यत्वमुन्नेयम् । अविद्यमानैरयमात्मा कल्प्यते न परमार्थतस्तेषां सत्त्वमिति शेषः । कथं प्राणादीनां परमार्थतोऽसत्त्वमित्याशङ्क्यान्वयव्यतिरेकाभ्यां तेषां मनःस्पन्दितमात्रत्वप्रतीतेर्मृषात्वं स्वप्नवदित्याह—न हीति । आत्मपरिणामत्वान्मनश्चलनमन्तरेणापि प्राणादिभावानां परमार्थतः सत्त्वमित्याशङ्क्याऽऽह—न चेति । न हि विभोरात्मनो नभोवच्चलनं वास्तवमवकल्पते । न च तदभावे निरवयवस्य परिणामसंभावनेत्यर्थः । प्राणादीनामात्मपरिणामत्वासंभवे फलितमाह—प्रचलितस्येति । प्रगतं चलितं यस्य स तथा कूटस्थस्यैवाऽऽत्मनो भासमाना भावा न परमार्थतः सन्तो भवितुमुत्सहन्ते । दृश्यत्वजडत्वादिना स्वप्नवन्मिथ्या वसिद्धेरित्यर्थः । एवं प्राणादिभावानां मिथ्यात्वं प्रसाध्य फलितं दर्शयन्पूर्वार्धाक्षराणां व्याख्यानमुपसंहरति—अत इति । अद्वयस्य परमार्थत्वात्तदात्मना कथमात्मा कल्पितः स्यादित्याशङ्क्य स्वरूपेणाकल्पितस्य संसृष्टरूपेण कल्पितत्वमिष्टमित्याह—परमार्थसतेति । अविद्यावशादिष्टा कल्पना न

---

१ ग. घ. ज. झ. 'साधयत्वा' । २ ख. घ. 'वृत्तता' । ३ ग. 'वृत्स्यन' । ४ क. 'नः सूत्रात्मै' । ५ घ. 'रान्वय' । ६ ग. ङ. ज. 'श्रयादि' । ७ ख. ङ. छ. 'त्तादात्म्ये' । ८ ख. 'साध्यत्व' । ९ घ. 'ति श्लो' । १० कः 'शेषेणाश्रि' । ११ ख. ङ. छ 'साध्यत्वा' । घ. 'साधकत्वा' । १२ घ. 'सत्त्वमु' । १३ घ. 'र्थस्ते' । १४ झ. 'न्दित्वमा' । १५ ग. 'तत्त्वमा' । १६ ग. 'त्रप्र' । १७ क 'भावनि' । १८ घ. ज. 'ह—अप्र' । १९ घ. ङ. 'र्थस' । ग. ज. 'र्थसतो भ' । २० छ 'श्यत्वाज्जड' । २१ घ. 'प्रमिथ्या' । २२ क. 'मात्मक' । २३ छ. 'ह्यस्य स्वत्व' । २४ घ. 'पेणाक' । २५ ग. झ. 'मित्या' ।

स्वभाववशादित्याह— सदेति । प्राणादीनामसत्त्वे सत्त्वेन कथं व्यवहारगोचरत्वमित्याशङ्क्य तृतीयपादार्थमाह–ते चेति । कल्पितानां प्राणादिभावानामधिष्ठानसत्तया सत्त्वेन न सत्ताऽवकल्प्यते । तेषामधिष्ठानापेक्षानियमाभावादित्याशङ्क्याऽऽह— न हीति । सर्वविकल्पना साधिष्ठानैव दृश्यते । न चासतोऽधिष्ठानत्वमारोपितानुवेधाभावात्तदनुवेधात्तु सतोऽधिष्ठानत्वमेष्टव्यम् । तथा च प्राणादिभावानां वस्तुतोऽसत्त्वेऽपि सति कल्पितानां सत्त्वेन व्यवहारसिद्धिरित्यर्थः । चतुर्थपादार्थमाह—अत इति । स्वेनेति विशेषणं संसृष्टरूपेण व्यभिचाराङ्गीकारार्थम् । कल्पनारहित्यदशायामेवाद्वयता शिवेत्याशङ्क्य कल्पनामात्रस्याशिवत्वान्नैवमित्याह–कल्पनेति । त्रासादीत्यादिशब्देन हर्षशोकादयो गृह्यन्ते । यदुक्तमद्वयता शिवेति तदुपपादयति–अद्वयतेति ॥ ३३ ॥

नाऽऽत्मभावेन नाँनेदं न स्वेनापि कथंचन ।
न पृथङ्नापृथक्किंचिदिति तत्त्वविदो विदुः ॥ ३४ ॥

कुतश्चाद्वयता शिवा । नानाभूतं पृथक्त्वमन्यस्यान्यस्माद्यत्र दृष्टं तत्राशिवं भवेत् । न ह्यत्राद्वये परमार्थसत्यात्मनि प्राणादिसंसारजातमिदं जगदात्मभावेन परमार्थस्वरूपेण निरूप्यमाणं नाना वस्त्वन्तरभूतं भवति । यथा रज्जुस्वरूपेण प्रकाशेन निरूप्यमाणो न नानाभूतः कल्पितः सर्पोऽस्ति तद्वत् । नापि स्वेन प्राणाद्यात्मनेदं विद्यते कदाचिदपि रज्जुसर्पवत्कल्पितत्वादेव । तथाऽन्योन्यं न पृथक्प्राणादि वस्तु यथाऽश्वान्महिषः पृथग्विद्यत एव । अतोऽसत्त्वान्नापृथग्विद्यतेऽन्योन्यं परेण वा किंचिदिति । एवं परमार्थतत्त्वमात्मविदो ब्राह्मणा विदुः । अतोऽशिवहेतुत्वाभावादद्वयतैव शिवेत्यभिप्रायः ॥ ३४ ॥

किंच किमिदं नानाभूतं द्वैतमात्मतादात्म्येन वा सिध्यति स्वातन्त्र्येण वेति विवेक्तव्यम् । नाऽऽत्मेत्यादि— इदं हि नानाभूतं द्वैतं नाऽऽत्मतादात्म्येन सेद्धुमर्हति । जडत्वादात्म्यायोगात् । भेदादशून्यात्मतादात्म्ये च द्वैतस्य नानात्वं दूषयति—न स्वेनेति । स्वेन सत्तास्फूर्तीतरेतरान्यानपेक्षतालक्षणस्वातन्त्र्येण द्वैतं सेद्धुं पारयति । तथा स्वातन्त्र्ये सत्यात्मतात्प्रसङ्गादनात्मनोऽद्वैतस्य नानात्वादित्यर्थः । किंच किमिदं द्वैतमन्योन्यं पृथग-

---

१ ग. °न स° । २ छ. सर्वा वि° । ३ छ. °ष्ठानेनै° । ४ छ °णादीनां । ५ छ. °ति वि छ° । ६ घ. ज. °सादित्या° । ७ ज. नाभेदं । ८ च. °भाणे ना° । ९ ख. छ. ज. रज्जुं स्व° । १० च. °पे प्र° । ११ छ. °त्त्वविं° । १२ ख. °भूतद्वै° । १३ घ. सिद्धया वा स्वा° । १४ क. °ति स्वतन्त्रेण । १५ ज. नाऽऽत्मभू° । १६ ज. °त्म्येन द्वै° । १७ क. °थक्पृथ° ।

पृथग्वेति विवेक्तव्यं नाऽऽद्य इत्याह—न पृथगिति । न हि किंचिदपि द्वैतं परस्परं पृथगेव सिध्यति पृथक्त्वस्य धर्मिप्रतियोगिरूपावच्छिन्नत्वेनान्योन्याश्रयत्वाद्धर्मत्वस्वरूपत्वयोर्दुर्वचनत्वादित्यर्थः । नापि किंचिदन्योन्यमपृथग्भूत्वा सिध्यति । घटपटादिशब्दानां पर्यायत्वप्रसङ्गाद्व्यवहारलोपापातादित्याह—नापृथगिति । अतो वास्तवाकारेण सर्वथा निरूपणासहमेव द्वैतमिति फलितमाह—इति तत्त्वेति । युक्तमद्वयता शिवेति तत्र हेत्वन्तरोपन्यासपरत्वं श्लोकस्य दर्शयति—कुतश्चेति । तदेव स्फुटयति—नानाभूतमित्यादिना । नानाभूतमित्यस्य पर्यायोपादानं पृथक्त्वमिति तस्य भयकारणत्वं प्रकटयति—अन्यस्येति । तत्र व्याघ्रचोरादाविति यावत् । तद्भयकारणं भेददर्शनमद्वये वस्तुनि नास्तीत्याह—न हीति । अध्यस्तमधिष्ठानरूपेण तत्त्वतो निरूप्यमाणमसदेव भवतीत्यत्र दृष्टान्तमाह—यथेति । प्रदीपप्रकाशेनाधिष्ठानमात्रतया समारोपितः सर्पो यदा निरूप्यते तदा नासौ तद्व्यतिरेकेण सिध्यति । तथा जगदपीदं तदात्मस्वरूपेण निरूप्यमाणं नान्यत्वेन सिध्येदित्यर्थः । एवं प्रथमपादं व्याख्याय द्वितीयपादं व्याचष्टे—नापीति । कदाचिदपीति । कल्पनावस्थायां प्रागूर्ध्वं चेत्यर्थः । न पृथगित्यस्यार्थमाह—तथेति । पृथक्त्वस्यान्योन्याश्रयत्वेन दुर्वचनत्वात् । वैधर्म्योदाहरणं तु प्रातीतिकं पृथक्त्वमधिकृत्याविरुद्धम् । नापृथगित्यादि व्याकरोति—अत इति । द्वैतस्य प्रागुक्तन्यायेनासत्त्वान्न तदन्योन्यं वा परेणाऽऽत्मना वा सह पृथग्भूत्वा सेद्धुमर्हति । अतो दुर्निरूपत्वान्न किंचिद्द्वैतं नामास्तीति ब्रह्मविदां मतमित्यर्थः । दृष्टं हि द्वैतं भयहेतुस्तदस्पृष्टं पुनरद्वैतमभयमेवेत्युपसंहरति—अत इति ॥ २४ ॥

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ २५ ॥

तदेवमुत्सम्यग्दर्शनं स्तूयते । विगतरागभयद्वेषक्रोधादिसर्वदोषैः सर्वदा मुनिभिर्मननशीलैर्विवेकिभिर्वेदपारगैरवगतवेदार्थतत्त्वैर्ज्ञानिभिर्निर्विकल्पः सर्वविकल्पशून्योऽयमात्मा दृष्ट उपलब्धो वेदान्तार्थतत्परैः प्रपञ्चोपशमः प्रपञ्चो द्वैतभेदविस्तारस्तस्योपशमोऽभावो यस्मिन्स आत्मा प्रपञ्चोपशमोऽत एवाद्वयः । विगतैः-

---

१ छ. °स्परं । २ ग. °र्यायादा° । ३ छ. व्याघ्रादिचो° । ४ ग. ङ. °पीदमात्म° । ५ ग. °दं तादात्म्यस्व° । ६ क. °स्वात्तद° । ७ ग. घ. °दस्पर्शं । ङ. °दसंस्पृ° । ८ ख. °ते । वीत° । घ. ङ. ज. °ते । वीतो रागभयद्वेषक्रोधादिदोषो येषां तैः सर्वदा । ९ च. झ. °दोषैर्मुनि° । १० झ. °र्विकल्पानाथू° । ११ ख. °श्चो भे° । १२ झ. °यः । तेन वि° । १३ क. °तद्वैषै° ।

दोषैरेव पण्डितैर्वेदान्तार्थतत्परैः संन्यासिभिः परमात्मा द्रष्टुं शक्यो नान्यै-रागादिक्लुषितचेतोभिः स्वपक्षपातिदर्शनैस्तार्किकादिभिरित्यभिप्रायः॥ ३५॥

किमिति यथोक्तमद्वैतं सर्वेषां न प्रतीतिगोचरतामाचरतीत्याशङ्क्याऽऽह—वीतेति। रागादिप्रतिबन्धविधुराणामेव यथोक्तमद्वैतदर्शनं न सर्वेषामित्यर्थः। श्लोकस्य तात्पर्य-माह—तदेतदिति। स्तुतिश्च तदुपायप्रवृत्तावुपकरोतीति शेषः। आदिपदेन सम्यग्द-र्शनप्रतिबन्धकाः सर्वे दोषाः संगृह्यन्ते। रागादिक्लिमोक्षो यदा कदाचिदनधिका-रिणामपि संभवत्यतो विशिनष्टि—सर्वदेति। सदा रागादिव्यावृत्तौ विवेकं हेतुं प्रप-ञ्चयति—मुनिभिरिति। विवेके च पदशक्तेर्वाक्यतात्पर्यस्य च परिज्ञानं कारणमि-त्याह—वेदेति। एवं सम्यग्ज्ञानाधिकारिणं साधनचतुष्टयसंपन्नमुक्त्वा तद्विषयं निरू-पयति—निर्विकल्प इति। आत्मनश्चाक्षीणत्वशङ्कां वारयति—उपलब्ध इति। हिशब्दद्योत्यमर्थमाह—वेदान्तेति। सर्वविकल्पशून्यत्वमात्मनः स्फुटयितुं प्रपञ्चोपशा-न्तविशेषणम्। आत्मनोऽभावत्वं बहुव्रीहिणा प्रत्युदस्यते। हेतुहेतुमद्भावेन पुनरुक्तिं विशेषणयोर्व्यासेधति—अत एवेति। सम्यग्दर्शनाधिकारिणो दर्शितानुपसंहरति—विगतेति। अनधिकारिणो दर्शयन्वैशेषिकवैनाशिकादिशास्त्राभिज्ञानामपि तदन्तर्भावं सूचयति—नान्यैरिति॥ ३५॥

तस्मादेवं विदित्वैनमद्वैते योजयेत्स्मृतिम्।
अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत्॥ ३६॥

यस्मात्सर्वानर्थप्रशमरूपत्वाद्द्वयं शिवमभयमत एवं विदित्वैनमद्वैते स्मृतिं योजयेत्। अद्वैतावगमायैव स्मृतिं कुर्यादित्यर्थः। तच्चाद्वैतमवगम्याहमस्मि परं ब्रह्मेति विदित्वाऽशनायाद्यतीतं साक्षादपरोक्षादजमात्मानं सर्वलोकव्य-वहारातीतं जडवल्लोकमाचरेत्। अप्रख्यापयन्नात्मानमहमेवंविध इत्यभि-प्रायः॥ ३६॥

मिथ्याज्ञानप्रपञ्चसंस्काराद्वेदान्तार्थतात्पर्यवतां पण्डितानामपि नाद्वैते प्रत्ययदार्ढ्यं

---

१ घ. च. ज. °त्परैरयमा°। २ ख. झ. °सिभिरयमा°। ३ झ. °भिः प°। ४ क. ख. च. छ. °पातद°। ५ क. विगतेति। ६ छ. °क्षसम्यग्दर्श°। ७ झ. र्ववेदो° ८ क. घ° °रिणम°। ९ घ. छ. °वेकहे°। ज. °वेके हे। १० छ. °वं हि स°। ११ ख. छ. °त्वाश°। १२ ख. °द्योतितम°। १३ झ. °त्यार्थ°। १४ क. °ल्पत्वशू°। १५ ख. घ. ङ. ज. °म इति वि°। १६ ग ज. °णयोः प्रति-षेधयति। १७ घ. ज. °धयति। १८ झ. °दभावं। १९ च. एनं विदित्वाऽद्वै°। २० क. °दित्वाऽद्वै°। २१ घ. च. ज. °ते यो। २२ घ. ज. °गमनेनैव। २३ क. छ. °तीतो ज°। २४ ख. °नप्रपञ्च°। २५ ग. °प्रपञ्चसं°।

सिध्यतीत्याह—तस्मादिति । शास्त्रादद्वैतमवगम्य स्मृतिसंततिं कुर्वतो लोकानुवर्तने विधिनियममाह—अद्वैतमिति । तस्मादित्यस्यार्थमाह—यस्मादिति । एवमिति निर्विकल्पत्वादिपरामर्शः । विदित्वा शास्त्रतोऽवगम्येत्यर्थः । अद्वैतावगतिदार्ढ्यार्थं स्मृतिसंततिकर्तव्यतायां नियमविधिमन्यनुजानाति—अद्वैत इति । अद्वैतमित्याद्युत्तरार्धं विभजते—तच्चेति । जडसदृशस्य कथं लोकाचरणमबुद्धिपूर्वकारित्वादित्याशङ्क्याऽऽह—सर्वलोकेति । लौकिकव्यवहारानर्तीत्य विदुषो जडवदाचरणं कीदृशमित्यपेक्षायां चतुर्थं पादमनूद्य तात्पर्यमाह—जडवदिति । एवंविधोऽहमित्यात्मानं विद्याभिजनादिभिरप्रख्यापयञ्जडवदेव विद्वाँल्लोकमाचरेदिति योजना ॥ ३६ ॥

निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च ।
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥ ३७ ॥

कया चर्यया लोकमाचरेदित्याह—स्तुतिनमस्कारादिसर्वकर्मवर्जितस्त्यक्तसर्वबाह्यैषणः प्रतिपन्नपरमहंसपारिव्राज्य इत्यभिप्रायः । "एतं वै तमात्मानं विदित्वा" इत्यादिश्रुतेः । "तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः" इत्यादिस्मृतेश्च । चलं शरीरं प्रतिक्षणमन्यथाभावात् । अचलमात्मतत्त्वम् । यदा कदाचिद्भोजनादिव्यवहारनिमित्तमाकाशवदचलं स्वरूपमात्मतत्त्वमात्मनो निकेतमाश्रयमात्मस्थितिं विस्मृत्याहमिति मन्यते यदा तदा चलो देहो निकेतो यस्य सोऽयमेवं चलाचलनिकेतो विद्वान्न पुनर्बाह्यविषयाश्रयः । स च यादृच्छिको भवेत् । यदृच्छालाभसन्तुष्टः कौपीनाच्छादनग्रासमात्रदेहस्थितिरित्यर्थः ॥ ३७ ॥

ननु परापरदेवयोः स्तुतिपूर्वकं प्रमाणस्य श्राद्धादिक्रियायाश्च कर्तव्यतया प्रतिबन्धात्कथं विदुषो जडवदाचरणमिति तत्राऽऽह—निस्तुतिरिति । तथाऽपि जीवितेऽपि क्वापि स्थातव्यत्वादाश्रयमुद्दिश्य प्रवृत्तेरावश्यकत्वात्कुतो जडसादृश्यमित्याशङ्क्याऽऽह—चलेति । चलं चाचलं च चलाचले ते निकेतो यस्याऽऽश्रयः स तथेति यावत् ।

---

१ घ. ज. झ. °कल्पादि° । २ क. °तिं क° । ३ क. °डसादृश्यस्य । घ. ङ° । ४ ज. °र्वकत्वा° । ५ ङ. झ. °त्याह । ६ ग. झ. °त्पर्यार्थमा° । ७ क. °भिर्न प्र° । ८ क. °ना । न° । ९ क. °त्रपारमहंस्यपा° । १० ङ. च. ज. झ. °सपरि° । ११ घ. ङ. च. एवं चैत° । १२ झ. °त्मत्वम् । १३ च. °चलस्व° । १४ घ. ज. °त्मनो । १५ क. °तनमा° । १६ ज. °श्रममा° । १७ छ. °दा च° । १८ च.झ. °को य° । १९ झ. °च्छया प्रा° । २० झ. °प्रमाणगम्यस्य । २१ क. झ. °वतां क्रा° । ग. °वतायाः क्रा° । २२ घ. ङ. च. °ले नि° ।

तथाऽपि कौपीनाच्छादनाशनपानादिदेहस्थितिप्रयोजकापेक्षया[1] प्रवृत्तिप्रौढ्यान्नं विदुषो जडतुल्यतेत्याशङ्क्याऽऽह— यतिरिति । आकाङ्क्षापूर्वकं पूर्वार्धाक्षराणि व्याचष्टे— कथेत्यादिना । वर्णाश्रमाभिमानवतस्तत्तत्कर्मसु वर्तमानस्य कथमिदं विशेषणमित्याशङ्क्याऽऽह—त्यक्तेति । परमहंसस्य पारिव्राज्यं प्रतिपत्तुमशक्यमप्रामाणिकत्वादिति चेन्मैवं श्रुतिस्मृतिसिद्धत्वादित्याह—एतमिति । विदित्वेत्यापातिकं वेदनं व्युत्थानहेतुत्वेनोच्यते । तस्मिन्नेव परस्मिन्वस्तुनि विषयान्तरेभ्यो व्यावृत्ता बुद्धिर्येषामिति तथा । तदेवं परं वस्त्वात्मा निरुपचरितं स्वरूपं येषां ते तथोच्यन्ते । तस्मिन्नेव परस्मिन्नात्मनि निष्ठा निश्चयेन स्थितिर्येषां ते तथेत्याह—तन्निष्ठा इति । तदेवाऽऽत्मभूतं परं वस्तु परमयनं परा गतिर्येषां ते तथेत्याह—तत्परायणा इति । आदिशब्देन सर्वकर्माणि मनसेत्यादिवाक्यं गृह्यते । कदा पुनश्चलो देहो विदुषो निकेतो भवति तत्राऽऽह— यदेति । अविवक्षिते हि कालविशेषे विवक्षितं व्यवहारं निमित्तीकृत्याऽऽत्मस्थितिमुक्तविशेषणवती विस्मृत्याहंकारममकारपरवशो यदा विद्वानवतिष्ठते तदेति योजना । स्वभावतस्त्वचलमात्मस्वरूपमेवास्य निकेतनम् । चलं पुनः शरीरमुपदर्शितविस्मरणद्वारेणेति निगमयति—सोऽयमिति । अविदुषो विशेषार्थं व्यावर्त्यं कीर्तयति—न पुनरिति । चतुर्थपादार्थमाह—स चेति । ॥२७॥

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥ ३८ ॥

इति गौडपादीयकारिकायां(सु) वैतथ्याख्यं
द्वितीयं प्रकरणम् ॥ २ ॥

बाह्यं पृथिव्यादि तत्त्वमाध्यात्मिकं च देहादिलक्षणं रज्जुसर्पादिवत्स्वप्नमायादिवच्चासत् । "वाचाऽऽरम्भणं विकारो नामधेयम्" इत्यादिश्रुतेः । "आत्मा च सबाह्याभ्यन्तरो ह्यजोऽपूर्वोऽनन्तरोऽबाह्यः कृत्स्न आकाशवत्सर्वगतः सूक्ष्मोऽचलो निर्गुणो निष्कलो निष्क्रियस्तत्सत्यं स आत्मा तत्त्वमसि" इति श्रुतेः । इत्येवं तत्त्वं दृष्ट्वा तत्त्वीभूतस्तदारामो न बाह्यरमणो यथाऽतत्त्वदर्शी कश्चिच्चित्तमात्मत्वेन प्रतिपन्नश्चित्तचलनमनु चलितमात्मानं मन्यमानस्तत्त्वाच्चलितं देहादिभूतमात्मानं कदाचिन्मन्यते प्रच्युतोऽहमात्मतत्त्वादिदानीमिति । समाहिते तु मनसि कदाचित्तत्त्वभूतं प्रस-

---

१ ङ. °पेक्षायाः प्र° । च. °पेक्षायां प्र° । २ ज. °प्रतिष्ठौ° । ३ घ. ज. °स्तत्क° । ४ ग. °त्याह—ए° । ५ छ. °ब स्वात्मा । ६ घ. ज. °परव° । ७ ज. आत्मश° । ८ छ. °हो निके° । ९ च. °रप° । १० ग. झ. °र्थमा° । ११ घ. °णं च २° । १२ घ. ङ. ज. तत्त्वीभू° ।

आत्मानं मन्यत इदानीमस्मि तत्त्वीभूत इति । न तथाऽऽत्मविद्भवेत् । आत्मन एकरूपत्वात्स्वरूपप्रच्यवनासंभवाच्च । सदैव ब्रह्मास्मीत्यप्रच्युतो भवेत्तत्त्वात्सदाऽप्रच्युतात्मैतत्त्वदर्शनो भवेदित्यभिप्रायः । "शुनि चैव श्वपाके च" । "समं सर्वेषु भूतेषु" इत्यादिस्मृतेः ॥ ३८ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतौ गौडपादीयागमशास्त्रभाष्ये वैतथ्याख्यं द्वितीयप्रकरणम् ॥ २ ॥

अहमेव परं ब्रह्म न मत्तोऽन्यदस्ति किंचिदिति स्मृतिसंततिकरणमपि न कालविशेषनियतं किंतु नैरन्तर्येण कर्तव्यमित्याह—तत्त्वमिति । आध्यात्मिकं शरीरादि कल्पितं तत्त्वमधिष्ठानमात्रं दृष्ट्वा बाह्यतो देहाद्बहिरवस्थितं पृथिव्यादि च कल्पितत्वेनावस्तुत्वादधिष्ठानमात्रमेवेत्यनुभूय स्वयमपि द्रष्टा परमार्थवस्तुस्वभावमापन्नस्तत्रैवाऽऽसक्तचेता बाह्येभ्यो विषयेभ्यो व्यावृत्तबुद्धिस्तस्मिन्नेव तत्त्वे परमार्थभूते प्रतिष्ठितस्तद्दर्शननिष्ठः स्यादित्यर्थः । पृथिव्यादेश्च प्रत्येकं परमार्थत्वसंभवे कथमद्वैतनिष्ठा सिध्येदित्याशङ्क्य व्याचष्टे— बाह्यमित्यादिना । किं तदुभयोस्तत्त्वं तदाऽऽह–रज्जुसर्पवदिति । उक्तस्य विकारजातस्यासत्त्वे प्रमाणमाह–वाचाऽऽरम्भणमिति । द्रष्टुरात्मनोऽपि दृश्यप्रतियोगित्वात्तुल्यं वाचाऽऽरम्भणत्वमित्याशङ्क्याऽऽह–आत्मा चेति । भवतु परस्याऽऽत्मनस्तत्तदागमवचननिर्देशादुक्तलक्षणत्वं तथाऽपि द्रष्टुरात्मनो न यथोक्तरूपत्वमित्याशङ्क्याऽऽह–तत्सत्यमिति । विशेषणानि तु प्राचीनानि तत्तदागमोपात्तान्यपुनरुक्तानि । द्वितीयार्धं व्याचष्टे— इत्येवमिति । आत्मारामत्वं कथमित्याशङ्क्य बाह्यविषयासक्तिं त्यक्त्वा प्रत्यगात्मन्येव + परितृप्तत्वादित्याह–न बाह्येति । तत्त्वादप्रच्युतो भवतीत्येतद्व्यतिरेकमुखेन(ण) व्याकरोति–ययेत्यादिना । अतत्त्वदर्शीति च्छेदः । आत्मविदो नात्यवस्थितमात्मदर्शनमित्यत्र हेतुमाह–आत्मन इति । सति स्वरूपे स्वरूपात्प्रच्युतेरप्रसक्तत्वात्तत्प्रतिषेधो युक्तो न भवतीत्याशङ्क्याऽऽह–सदेति । वैतुनः सदैकरूपत्वे स्मृतिमुदाहरति–शुनि चेति । समदर्शिनः सदैकरूपवस्तुदर्शिन एव पण्डिता नान्ये तथेत्यर्थः । स्वरूपाप्रच्यवने च स्मृतिं दर्शयति–समिति । तत्र हि विनश्यत्स्वविनश्यन्तमिति स्वरूपाप्रच्यवनमुक्तम् ॥ ३८ ॥

इति श्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितायां गौडपादीयकारिकाभाष्यटीकायां वैतथ्याख्यं द्वितीयप्रकरणम् ॥ २ ॥

+ भवेदित्येतदिति पाठान्तरम् ।

---

१ क. °दैवं ब्र° । २ क. °त्मद° । ३ ग. कालावि° । ४ ख. ङ. छ. भवेदित्ये° । ५ ब. वस्तुतः । ६ क. ङ. °कस्वरू । ७ क. °रूपप्र ।

अथ गौडपादीयकारिकास्वद्वैताख्यं तृतीयं प्रकरणम् । ॐ उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते । प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥ १ ॥

ओंकारनिर्णय उक्तः प्रपञ्चोपशमः शिवोऽद्वैत आत्मेतिप्रतिज्ञामात्रेण । ज्ञाते द्वैतं न विद्यत इति च । तत्र द्वैताभावस्तु वैतथ्यप्रकरणेन स्वप्नमायागन्धर्वनगरादिदृष्टान्तैर्दृश्यत्वाद्यन्तवत्त्वादिहेतुभिस्तर्केण च प्रतिपादितः । अद्वैतं किमागममात्रेण प्रतिपत्तव्यमाहोस्वित्तर्केणापीत्यत आह । शक्यते तर्केणापि ज्ञातुम् । तत्कथमित्यद्वैतप्रकरणमारभ्यते । उपास्योपासनादिभेदजातं सर्वं वितथं केवलश्चाऽऽत्माऽद्वयः परमार्थ इति स्थितमतीते प्रकरणे । यत उपासनाश्रित उपासनादात्मनो मोक्षसाधनत्वेन गत उपासकोऽहं ममोपास्यं ब्रह्म । तदुपासनं कृत्वा जाते ब्रह्मणीदानीं वर्तमानोऽजं ब्रह्म शरीरपाताद्ऊर्ध्वं प्रतिपत्स्ये प्रागुत्पत्तेश्चाजमिदं सर्वमहं च । यदात्मकोऽहं प्रागुत्पत्तेरिदानीं जातो जाते ब्रह्मणि च वर्तमान उपासनया पुनस्तदेव प्रतिपत्स्य इत्येवमुपासनाश्रितो धर्मः साधको येनैवं क्षुद्रब्रह्मवित्तेनासौ कारणेन कृपणो दीनोऽल्पकः स्मृतो नित्याजब्रह्मदर्शिभिरित्यभिप्रायः । " यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते " इत्यादिश्रुतेस्तलवकाराणाम् ॥ १ ॥

तर्कावष्टम्भेन द्वैतवैतथ्यनिरूपणं परिसमाप्याद्वैतमार्थिकमपि तर्कतः संभावयितुं प्रकरणान्तरं प्रारिप्सुरुपास्योपासकभेददृष्टिं तावदपवदति—उपासनेति । देहस्य धारणाद्धर्मो जीवो भूतसंघाताकारेण जाते ब्रह्मणि तदभिमानित्वेन वर्तते । स प्रागुत्पत्तेरजं सर्वमित्येवं कालावच्छिन्नं वस्तु मन्यते । स पुनरुपासनां पुरुषार्थसाधनत्वेनाऽऽश्रितस्तदेव ब्रह्म प्रतिपत्स्ये शरीरपाताद्ऊर्ध्वमित्येवं यतो मिथ्याज्ञानवानवतिष्ठते तेनासौ कृप-

---

१ घ. द्वैते । २ ज. °यायां ग° । ३ छ. °ह्। अशक्यत° । च. °ह न श° । ४ च. °त्यतोऽद्वै । ५ झ. °ल आत्माऽ' । ६ घ. ङ. च. ज. झ- °र्थत इ° । ७ क. °तीतप्र° । ८ ङ. छ. °समा° । ९ ख. ग. ज. °माश्रित्य मो° । १० घ. ङ. ज. ज्ञाते । ११ झ. जाते । १२ च. झ. °णि व° । १३ ग. ङ. ज. °नामाश्रि° । १४ च. °ह्मचिते° । १५ क. °चा वाऽभ्यु° । १६ च. म च वा° । १७ क. ख. छ. °द्वैतं पारमा° । १८ ग. °कद° । १९ झ. °मानत्वे° । २० क. °रजः इ° । २१ ख. °श्रित्य तूतस्त° ।

णोऽलको ब्रह्मविद्भिः स्मृतश्चिन्तित इत्यर्थः । प्रकरणान्तरमवतारयन्वृत्तमनुद्रवति—ओंकारेति । तस्य हि निर्णये प्रथमे प्रकरणे प्रपञ्चोपशमः शिवोऽद्वैत इति विशेषणैरात्मा प्रतिज्ञामात्रेणोद्दिष्टो द्वितीयो व्याख्यात इत्यर्थः । द्वितीयप्रकरणार्थं संक्षिप्यानुवदति—ज्ञात इति । तत्रैवाऽऽद्ये प्रकरणे ज्ञाते द्वैतं न विद्यत इत्यत्र प्रतिज्ञामात्रेण द्वैताभाव उक्तः । स तु द्वितीयेन प्रकरणेन हेतुदृष्टान्तात्मकेन तर्केण च प्रतिपादितो नात्र प्रतिपादयितव्यमवशिष्टमस्तीत्यर्थः । तृतीयं प्रकरणमाकाङ्क्षापूर्वकमवतारयति—अद्वैतमिति । नैषा तर्केण मतिरापनेयेति श्रुतेरद्वैतं कथं तर्केण ज्ञातुं शक्यमित्याक्षिपति—तत्कथमिति । स्वतन्त्रतर्कप्रवेशेऽपि तस्मिन्नागमिकतर्कस्य सहकारितया संभावनाहेतुत्वात्तर्केणापि ज्ञातुं शक्यमिति व्यवहारोपपत्तिरिति मत्वाऽऽह—अद्वैतेति । यदि तर्केणाद्वैतं संभावयितुं प्रकरणमारभ्यते तर्हि किमित्युपासकनिन्दा प्रथमं प्रस्तूयते तत्राऽऽह—उपास्येति । उक्तवक्ष्यमाणविरोधित्वादुपासकस्य तन्निन्दा प्रकृतोपयोगिनीत्यर्थः । कथं तर्हि तत्र तत्रौजत्वमात्मनो दर्शयन्ती श्रुतिर्घटिष्यते तत्राऽऽह—प्रागिति । प्रागवस्थायां सर्वमिदमनमहं च तथेत्युपासको यतो मन्यतेऽतश्च प्रागवस्थब्रह्मविषया भविष्यत्यजत्वश्रुतिरित्यर्थः । कार्यस्थित्यवस्थायां यदि ब्रह्म तन्मात्रमिष्टं तर्हि किमुपासनया प्राप्तव्यमित्याशङ्क्याऽऽह—यदात्मक इति । इदानीमुत्पत्त्यवस्थाया जातो जाते ब्रह्मणि स्थित्यवस्थायां वर्तमानोऽहं प्रागुत्पत्तेर्यदात्मकः सन्नासं तदेव पुनः प्रलयावस्थायामुपासनया प्रतिपत्स्ये तत्कुन्यायादिति संबन्धः । तत्प्रकाराणां शाखायामुपात्तस्य ब्रह्मत्वनिषेधदर्शनाच्चोपासकनिन्दा युक्तेत्याह—यद्वाचेति । अनभ्युदितमनभिप्रकाशितमभ्युद्यतेऽभिप्रकाशयत उपासते वाचा विषयी कुर्वन्तीत्यर्थः । आदिशब्देन यन्मनसेत्यादि गृह्यते ॥ १ ॥

अतो वक्ष्याम्यकार्पण्यमजातिं समतां गतम् ।
यथा न जायते किंचिज्जायमानं समन्ततः ॥ २ ॥

सन्ब्रह्मोपनिषदमात्मानं मत्वा तत्प्रकाशकशास्त्रविद्यया दीनमात्मानं मन्यमानो जातोऽहं जाते ब्रह्मणि पूर्वं तदुपासनाश्रितः सन्ब्रह्म प्रतिपत्स्य इत्येवं प्रतिपन्नः कृपणो भवति परमादतो वक्ष्याम्यकार्पण्यमकृपणभावभजं ब्रह्म । तद्धि कार्पण्यास्पदम् " यत्रान्योऽन्यत्पश्यत्यन्यच्छृणो-

१ छ. ज. प्रप° । २ झ. °णाद्वैतं° । ३ ज. °ते तत्त्वं न । ४ घ. °तिरप° । ५ क. °रापनये° । ६ ड. °तर्कोऽप्र । ७ घ. °मंस्तू° । ८ छ. °स्य निन्दा । ९ क. तत्रा° । १० ग. °त्राज्ञत्व° । ११ क. °सके य° । १२ क. °तुर्न्याया° । १३ क. °त्यत्र° । १४ क ज. उपास्यते । १५ घ. °हं ब्र° । १६ च. °र्पण्यमास्प° । १७ च. 'न्योऽन्यं प° । १८ च. °त्यन्यं शृणो° ।

त्यन्यद्विजानाति तदल्पं मर्त्यमसत्" "वाचाऽऽरम्भणं विकारो नामधेयम्" इत्यादिश्रुतिभ्यः । तद्विपरीतं सबाह्याभ्यन्तरमजमकार्पण्यं भूमाख्यं ब्रह्म यत्प्राप्याविद्याकृतसर्वकार्पण्यनिवृत्तिस्तदकार्पण्यं वक्ष्यामीत्यर्थः । तद्-जाति, अविद्यमाना जातिरस्य । समतां गतं सर्वसाम्यं गतम् । कस्मात् । अवयववैषम्याभावात् । यद्धि सावयवं वस्तु तदवयववैषम्यं गच्छज्जायत इत्युच्यते । इदं तु निरवयवत्वात्समतां गतमिति न कैश्चिदवयवैः स्फुटत्य-तोऽजात्यकार्पण्यम् । समन्ततः समन्ताद्यथा न जायते किंचिदल्पमपि न स्फुटति रज्जुसर्पवदविद्याकृतदृष्ट्या जायमानं येन प्रकारेण न जायते सर्व-तोऽजमेव ब्रह्म भवति तथा तं प्रकारं शृण्वित्यर्थः ॥ २ ॥

भेददर्शिनमुपासकमद्वैताविरोधिनं निन्दित्वा संप्रत्यद्वैतप्रतिज्ञां करोति—अत इति । जातिर्जन्म तद्रहितमजाति तत्र हेतुमाह—समतामिति । जन्मराहित्यं साध-यति—यथेति । अतःशब्दार्थमाह—सबाह्येति । प्रतिज्ञाभागं विभजते—अकृपणेति । तदेव व्यतिरेकमुखेन(ण) स्फोरयति—तद्धीति । दर्शनादिविशेषव्यवहारगोचरीभूतं कार्यजातं परिच्छिन्नं नाशि चोच्यते । तदेव कृपणत्वालम्बनमित्यर्थः । तच्च मिथ्या-भूतमित्यत्र प्रमाणमाह—वाचाऽऽरम्भणमिति । कार्पण्यमुक्त्वा तदभावरूपमकार्पण्यं प्रकटयति—तद्विपरीतमिति । प्राप्य ज्ञात्वेति यावत् । द्वितीयपादं व्याचष्टे—तद्-जातीत्यादिना । सर्वात्मना साम्यं निर्विशेषत्वं गतमित्यत्र हेतुं पृच्छति—कस्मा-दिति । निर्विशेषत्वे हेतुमाह—अवयवेति । हेतुमेव प्रकटयन्व्यतिरेकमुखेन(णा)-ऽजत्वं प्रपञ्चयति—यद्धीत्यादिना । समन्तत इति पूर्णत्वसंकीर्तनम् । द्वितीयार्धं व्याचष्टे—यथेत्यादिना । यथा रज्ज्वां सर्पो भ्रान्त्या जायते तथा सर्वं भ्रान्तिदृष्ट्या जायमानत्वेन मायमानमपि यथा येन प्रकारेण वस्तुतो न जायते तथा किंतु सर्वतो देशतः कालतो वस्तुतश्च पूर्णं कूटस्थमेव वस्तु भवति तथा तं प्रकारमिति संक्षे-पः ॥ २ ॥

आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च संघातैर्जातिवांस्तन्निदर्शनम् ॥ ३ ॥

अजाति ब्रह्माकार्पण्यं वक्ष्यामीति प्रतिज्ञातं प्रतिसिद्ध्यर्थं हेतुं दृष्टान्तं च वक्ष्यामीत्याह—आत्मा परो हि यस्मादाकाशवत्सूक्ष्मो निरवयवः सर्वगतश्च आकाशवदुक्तो जीवैः क्षेत्रज्ञैर्घटाकाशैरिव घटाकाशतुल्य उदित उक्तः । स

---

१ क. °मेव ब्र° । २ च. °ति यत्प्रति° । ३ क. °न्तं व° । ४ छ. °मीप्सित आह । ५ च. °तस्तस्मादाका° । ६ च. °शैर्निरवयवघटाका° । ७ झ. °वमहाका° ।

एवाऽऽकाशसमः परः[1] आत्मा । अथवा घटाकाशैर्यथाऽऽकाश उदित उत्पन्न-स्तथा परो जीवात्मभिरुत्पन्नो जीवात्मनां परस्मादात्मन उत्पत्तिर्या श्रूयते वेदान्तेषु सा महाकाशाद्घटाकाशोत्पत्तिसमा[3] न परमार्थत इत्यभिप्रायः । तस्मादेवाऽऽकाशाद्घटादयः संघाता[4] यथोत्पद्यन्त एवमाकाशस्थानीया-त्परमात्मनः पृथिव्यादिभूतसंघाता आध्यात्मिकाश्च कार्यकारणलक्षणा रज्जुसर्पवद्विकल्पिता जायन्ते । अत उच्यते घटादिवच्च संघातैरुदित इति । यदा मन्दबुद्धि[5]प्रतिपिपादयिषया श्रुत्याऽऽत्मनो जातिरुच्यते जीवादीनां तदा जातावुपगम्यमानायामेतन्निदर्शनं दृष्टान्तो यथोदिताकाशवादित्यादिः ॥ ३ ॥

प्रतिज्ञावाक्ये ब्रह्मशब्देन परमात्मा प्रकृतः स कीदृगित्यपेक्षायामाह—आत्मा हीति । जीवभेदप्रतीतिस्तर्हि कथमित्याशङ्क्याऽऽह–जीवैरिति । यथाऽऽकाशो विभुत्वादिधर्मैः स्वगतताात्त्विकभेदवान्न भवति तथा परमात्मा विशेषाभावात् । यथा च महाकाशो घटाकारेण प्रतीयते तथा परमात्मा नानाविधजीवाकारेण प्रतीतिगो-चरो भवतीत्यर्थः । कथं संघातानां परस्मादुत्पत्तिरित्याशङ्क्याऽऽह–घटादिवादिति । यथा मृदः सकाशाद्घटादयो जायन्ते तथा परमात्मैव पृथिव्यादिसंघाताकारेण जायत इत्यर्थः । यदाऽऽत्मनो जीवादीनामुत्पत्तिरिष्टा तदा तस्यामुत्पत्तौ दृष्टान्तवचनमेतदि-त्याह–जाताविति । श्लोकस्य वृत्तानुवादपूर्वकं तात्पर्यमाह–अजातीत्यादिना । प्रथमपादस्याक्षरार्थमाह— आत्मेत्यादिना । विभुः स्वगतताात्त्विकभेदशून्यः सूक्ष्म-त्वान्निरवयत्वाद्विभुत्वादाकाशवत् । न च परमाण्वादौ सूक्ष्मत्वादेर्व्यभिचारः । तस्यै-वासंमतत्वात् । क्वचिदपि तात्त्विकभेदासंप्रतिपत्तेश्चेत्यर्थः । जीवैरित्यादि[6] व्याचष्टे— जीवैरिति । जीवाकारेण परमात्मैवोक्तः । " क्षेत्रज्ञं चापि मां विद्धि " इति स्मृते-रित्यर्थः । उदितशब्दश्चेदुक्तार्थस्तर्हि परस्यैवाऽऽत्मनः संघातरूपेणोक्तत्वे सप्रपञ्चत्वं प्रसज्येतेत्याशङ्क्याऽऽह–अथवेति । तर्हि नाऽऽत्माऽश्रुतेरितिन्यायविरोधः स्यादि-त्याशङ्क्याऽऽह––जीवात्मनामिति । तृतीयपादं व्याचष्टे—तस्मादेवेति । उक्तेऽर्थे वाक्यमवतारयति–अत इति । आकाशस्यावकाशप्रदाने च (?) घटाद्युत्पत्तौ कारणत्वं निर्विकारस्यैव दृष्टमिति द्रष्टव्यम् । जातावित्यादेरर्थमाह–यदेति ॥ ३ ॥

---

१ ज. °रमात्मा° । झ. °र एवाऽऽत्मा° । २ क. ङ. °र्थथोदि° । ३ क. °मानं प° । ४ झ. °र्थं इ° । ५ ज °ताच्चाऽऽख्या° । ६ छ. झ. °बुद्धिं प्र° । ७ घ, °चारास्तस्यै° । ८ क. छ. °दिना ख्या° । ९ ज. अत एवं° । १० क छ, °वात्मानमि° ।

घटादिषु प्रलीनेषु घटाकाशादयो यथा।
आकाशे संप्रलीयन्ते तद्वज्जीवा इहाऽऽत्मनि ॥ ४ ॥

यथा घटाद्युत्पत्त्या घटाकाशाद्युत्पत्तिः। यथा[1] घटादिप्रलये घटाकाशादिप्रलयस्तद्वदेहादिसंघातोत्पत्त्या जीवोत्पत्तिस्तत्प्रलये च जीवानामिहाऽऽत्मनि प्रलयो न स्वत इत्यर्थः ॥ ४ ॥

अद्वैतस्य जीवसृष्टिश्रुतिविरोधं परिहृत्य तस्यैव जीवप्रलयश्रुत्या विरोधमाशङ्क्य परिहरति घटादिष्विति। औपाधिकौ जीवानामुत्पत्तिप्रलयौ न स्वाभाविकौ तथा चोत्पत्तिश्रुत्या विरोधाभाववदद्वैतस्य प्रलयश्रुत्याऽपि न विरोधोऽस्तीति श्लोकाक्षरव्याख्यानेन प्रकटयति—यथेत्यादिना ॥ ४ ॥

यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते।
न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥ ५ ॥

सर्वदेहेष्वात्मैकत्व एकस्मिञ्जननमरणसुखादिमत्यात्मनि सर्वात्मनां तत्संबन्धः क्रियाफलसांकर्यं च स्यादिति य आहुर्द्वैतिनस्तान्प्रतीदमुच्यते। यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते संयुक्ते न सर्वे घटाकाशादयस्तद्रजोधूमादिभिः संयुज्यन्ते तद्वज्जीवाः सुखादिभिः।

इदानीमद्वैतस्य व्यवस्थानुपपत्त्या विरोधमाशङ्क्य परिहरति—यथैकस्मिन्निति। उक्तदृष्टान्तवशादेकस्मिञ्जीवे सुखादिसंयुक्ते सत्यपरे जीवास्तैरेव सुखादिभिर्न संयुज्यन्त औपाधिकभेदादित्याह—तद्वदिति। श्लोकव्याख्यार्थमाशङ्कां दर्शयति—सर्वदेहेष्विति। ऐकात्म्ये कर्तर्येकस्मिन्कर्तारः सर्वे भोक्तरि चैकस्मिन्भोक्तारः सर्वे भवेयुरित्यव्यवस्थान्तरमाह—क्रियेति। व्यवस्थानुपपत्त्या द्वैतमेष्टव्यमिति वदन्तं प्रत्युत्तरत्वेन श्लोकमवतारयति—तान्प्रतीति। किमिदमैकात्म्ये सांकर्यं किमेकस्मिञ्जीवे व्यवस्थितेन सुखादिना जीवान्तराणां तद्वत्त्वं स्यादित्युच्यते किंवा सर्वोपाधिष्वात्मैक्यात्तस्य स्वरूपेण सर्वसुखादिमत्त्वं स्यादित्यापाद्यते तत्राऽऽद्यं प्रत्याह—तद्वदिति।

नन्वेक एवाऽऽत्मा। बाढम्। ननु न श्रुतं त्वयाऽऽकाशवत्सर्वैक्यसंघाते-

---

१ क. °जीव इ°। २ क. ख. °था च घ°। च. °था वा घ°। ३ च. झ. °येन जी°। ४ ग. °लयौ। ५ ख. °स्य ल°। ६ घ. ङ. ज. तत्तत्सं°। ७ च. °फलं सां°। ८ क. °नं यु°। ९ ख. °भेवेष्ट°। १० घ. °ते वा त°। ११ घ. झ. °वाऽऽकाशो वा°। च. °वाऽऽकाशोऽस्ति वा°। १२ ख. °सर्वैक्यं सं°।

प्येक एवाऽऽत्मेति । यद्येक एवाऽऽत्मा तर्हि सर्वत्र सुखी दुःखी च स्यात् । न चेदं सांख्यचोद्यं संभवति । न हि सांख्य आत्मनः सुखदुःखादिमत्त्वमिच्छति । बुद्धिसमवायाभ्युपगमात्सुखदुःखादीनाम् । न चोपलब्धिस्वरूपस्याऽऽत्मनो भेदकल्पनायां प्रमाणमस्ति । भेदाभावे प्रधानस्य पारार्थ्यानुपपत्तिरिति चेत् । न । प्रधानकृतस्यार्थस्याऽऽत्मन्यसमवायात् । यदि हि प्रधानकृतो बन्धो मोक्षो वाऽर्थः पुरुषेषु भेदेषु समवैति ततः प्रधानस्य पारार्थ्यमात्मैकत्वे नोपपद्यत इति युक्ता पुरुषभेदकल्पना । न च सांख्यैर्बन्धो मोक्षो वाऽर्थः पुरुषसमवेतोऽभ्युपगम्यते । निर्विशेषाश्च चेतनमात्रा आत्मानोऽभ्युपगम्यन्ते । अतः पुरुषसत्तामात्रप्रयुक्तमेव प्रधानस्य पारार्थ्यं सिद्धं न तु पुरुषभेदप्रयुक्तमिति ।

आत्मनः सर्वत्रैकत्वात्तस्य स्वरूपेण सर्वसुखादिमत्त्वमिति द्वितीयं पक्षं विवक्षन्नाशङ्कते—नन्विति । सर्वत्राऽऽत्मैकत्वमुक्तमङ्गी करोति—बाढमिति । तदेकत्वमुपपत्तिशून्यं कथमङ्गीकृतमित्याशङ्क्याऽऽह—ननु नेति । यदि सर्वत्रैकत्वं नियतमिष्यते तर्हि तत्र तत्र सुखित्वं दुःखित्वं च तस्यैवैकस्य प्राप्तमिति व्यवस्थासिद्धिरिति चोदयति—यद्येक एवेति । आत्मस्वरूपस्य सर्वत्रैकत्वेऽपि कल्पितभेदाद्व्यवस्थासिद्धिरित्यभिप्रेत्य किमिदं सांख्यस्य चोद्यं किंवा वैशेषिकादेरिति विकल्प्याऽऽद्यं प्रत्याह—न चेदमिति । किंचैकात्म्यं दूषयता सांख्येन तद्भेदोऽभ्युपगम्यते । स च नाभ्युपगन्तुं शक्यते तेन्मानाभावादित्याह—न चेति । प्रधानं हि कस्यचिद्भोगमपवर्गं च कस्यचिदादधत्पुरुषैर्विशेषमिष्यते । तच्च पुरुषभेदाभावे नोपपद्यते । तेनार्थापत्त्या पुरुषभेदः सिध्यतीति शङ्कते—भेदेति । अर्थापत्तेरनुदयं वदन्नुत्तरमाह—नेत्यादिना । संक्षिप्तमेवोक्तं विवृणोति—यदि हीति । प्रधानस्य पारार्थ्यसामर्थ्यादेव पुरुषेषु काश्चिदतिशयो भविष्यतीत्याशङ्क्यापसिद्धान्तप्रसङ्गान्नैवमित्याह—निर्विशेषा इति ।

अतः पुरुषभेदकल्पनायां न प्रधानस्य पारार्थ्ये हेतुः । न चान्यत्पुरुषभेदकल्पनायां प्रमाणमस्ति सांख्यानाम् । परसत्तामात्रमेव चैतन्यमिति-

---

१ घ. ङ. °त्सुखा° । २ ख. छ. °पमात्रस्याऽऽ° । ३ ङ. °बन्धमो° । ४ क. घ. छ. ज. आत्मनोऽ° । ५ क. तस्य चैक° । ६ ख. °ति न व्य° । ७ घ. ज. °भेदव्यव° । ८ ग. ञ. °व्यचो° । ९ घ. ज. ञ. तत्र माना° । १० छ. °षविशे° । ११ ग. °ते स च पु° । १२ ग. ञ. °दादेवोप° । १३ क. घ. ङ. ज. °षे क° । १४ क. °यां प्र° । १५ च. °व चैतन्यमि° । १६ ख. °तन्यान्नि° ।

स्वीकृत्य स्वयं बध्यते मुच्यते च प्रधानम्। परस्योपलब्धिमात्रसत्तास्वरूपेण प्रधानप्रवृत्तौ हेतुर्न केनचिद्विशेषेणेति। केवलमूढतयैव पुरुषभेदकल्पना वेदार्थपरित्यागश्च। ये त्वाहुर्वैशेषिकादय इच्छादय आत्मसमवायिन इति। तदप्यसत्। स्मृतिहेतूनां संस्काराणामप्रदेशवत्यात्मन्यसमवायात्।

किंच प्रधानस्य पारार्थ्यं परं शेषिणमपेक्षते। न तस्मिन्नेदमपि काङ्क्षते। अतोऽन्यथाऽप्युपपत्तिरित्याह—अत इति। जन्ममरणादिव्यवस्थानुपपत्त्या पुरुषभेदकल्पनमपि न युक्तं व्यधिकरणत्वादिति मत्वाऽऽह—न चेति। न केवलं प्रमाणशून्या पुरुषभेदकल्पना किंतु प्रयोजनशून्या चेत्याह—परेति। ननु न पुरुषसत्तामात्रं निमित्तीकृत्य प्रधानं प्रवर्तते किंत्वीश्वराधिष्ठितमिति सेश्वरवादिमतमाशङ्क्य तस्यापि पुरुषत्वाविशेषादुपलब्धिमात्रत्वमभ्युपेत्याऽऽह—परस्येति। वेदार्थो वेदप्रतिपाद्यमद्वैतम्। द्वितीयमुत्थापयति—ये त्विति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा नव विशेषगुणाः। ते च प्रत्येकमात्मसु व्यवस्थया समवेताः स्वीक्रियन्ते। तेषां व्यवस्थानुपपत्त्या प्रतिदेहमात्मभेदसिद्धिरित्यर्थः। किं बुद्ध्यादयो रूपादिवदात्मव्यापिनः किंवा संयोगादिवदेकदेशवृत्तयः। नाऽऽद्यः। ज्ञानादिगुणानामाश्रयव्यापिनामाश्रयसंयुक्ते सर्वस्मिन्नपर्यायेण ज्ञातृतादिव्यवहारजनकत्वप्रसङ्गादित्याह—तदप्यसदिति। द्वितीये त्वेकदेशः सत्योऽसत्यो वा। प्रथमे घटादिवदात्मनः सत्येकदेशत्वात्कार्यत्वादिप्रसङ्गः। द्वितीये कल्पितैकदेशानामेव ज्ञानादिगुणवत्त्वमात्मनस्तु न तद्वत्त्वं सिध्यतीत्याह—स्मृतीति। स्मृतिहेतवः संस्कारा भावनाख्यास्तेषां ग्रहणमितरेषामुपलक्षणार्थं तेषामात्मनि समवायाभावात्परस्य सिद्धान्तासिद्धिरिति शेषः।

आत्ममनःसंयोगाच्च स्मृत्युत्पत्तेः स्मृतिनियमानुपपत्तिः। युगपच्च सर्वस्मृत्युत्पत्तिप्रसङ्गः। न च भिन्नजातीयानां स्पर्शादिहीनानामात्मनां मनआदिभिः संबन्धो युक्तः। न च द्रव्यादयो गुणाः कर्मसामान्यविशेषसमवायो वा भिन्नाः सन्ति परेषाम्। यदि ह्यत्यन्तभिन्ना एव द्रव्यात्स्युरिच्छादयश्चाऽऽत्मनस्तथा च सति द्रव्येण तेषां संबन्धानुपपत्तिः। अयुतसिद्धानां समवायलक्षणः संबन्धो न विरुध्यत इति चेत्। न। इच्छादिभ्योऽनित्येभ्य आत्मनो

---

१ च. °दस° । २ क. °रणव्य° । ३ घ. °नं व° । ४ क. °श्रयादि° । ५ ख. ग. ङ. °शब्दत्वात्का° । ६ ङ. °त्युपपत्तेः । ७ च. °पच्चात्सर्व° । ८ क. संबन्धो । ९ क. ख. घ. °वा भि° । च. °या भावा भि° । १० घ. ङ. ज. °त्यन्तं भि° । ११ क. °था स°।

नित्यस्य पूर्वसिद्धत्वान्नायुतसिद्धत्वोपपत्तिः । आत्मनाऽयुतसिद्धत्वे चेच्छादीनामात्मगतमहत्त्ववन्नित्यत्वप्रसङ्गः । स चानिष्टः । आत्मनोऽनिर्मोक्षप्रसङ्गात् ।

किंचाऽऽत्ममनःसंयोगासमवायिकारणाज्ज्ञानानामुत्पत्तिरिष्टा । तथा च सति ग्रहणसमये स्मृतिर्न संभवत्येवेति नियमो नोपपद्यते ग्रहणकारणसंयोगेनैव स्मृत्युपपत्तिसंभवादित्याह—आत्मेति । किंचाऽऽत्ममनसोः संयोगादेकस्माद्येकस्याः स्मृतेः समुत्पत्तिसमये स्मृत्यन्तराण्यपि समुत्पद्येरन् । असमवायिकारणस्य तुल्यत्वात् । न च समुद्बुद्धसंस्कारायोगपद्याद्युगपदनुत्पत्तिः । तेषां तदुद्बोधस्य चाऽऽत्मनि विप्रतिपन्नत्वेन स्मृतिसामग्र्यन्तर्भावासंभवादित्यभिप्रेत्याऽऽह—युगपदेति । किंच समानजातीयानां स्पर्शादिमतां च परस्परं संबन्धो दृष्टः । यथा मल्लानां मेषाणां रज्जुघटादीनां च तदुभयाभावादात्मनां मनआदिभिः संबन्धासिद्धेर्नोक्तादसमवायिकारणाद्बुद्ध्यादिगुणोत्पतिः सिध्यतीत्याह—न चेति । गुणादीनां साजात्यस्य स्पर्शादिमत्त्वस्य चाभावेऽपि द्रव्येण संबन्धवदात्मनो मनआदिभिः संबन्धः सिध्येदिति चेन्नेत्याह—न चेति । स्वतन्त्रं सन्मात्रं द्रव्यशब्देनात्र विवक्षितं न ततो भेदेन गुणादयो वेदान्तिमते विद्यन्ते । शुक्लः पटः खण्डो गौरित्यादिसामानाधिकरण्यदर्शनात् । द्रव्यमेव तु कल्पनया तत्तदाकारेण भातीत्यभ्युपगमात् । अतो दृष्टान्तासंप्रतिपत्तिरित्यर्थः । विपक्षे दोषमाह—यदि हीति । गुणादयो द्रव्यादत्यन्तभिन्ना हिमवद्विन्ध्ययोरिव यदि स्युर्यदि चाऽऽत्मनः सकाशादिच्छादयोऽत्यन्तं भिन्ना भवेयुस्तदा गुणादीनां द्रव्येण तावदेव संबन्धानुपपत्तेः । इच्छादीनां चाऽऽत्मना तदयोगात्पारतन्त्र्यासिद्धिरित्यर्थः । अत्यन्तभिन्नानामपि समवायसंबन्धात्पारतन्त्र्योपपत्तिरिति शङ्कतेअयुतेति । किमिदमयुतसिद्धत्वमपृथक्कालत्वं किंवा पृथग्देशत्वमुतापृथक्त्वमावर्त्वं माहोस्वित्संयोगविभागायोग्यत्वम् । नाऽऽद्यः । विकल्पासहत्वात् । किमिच्छाद्यपेक्षयाऽपृथक्कालत्वं किंवाऽऽत्मापेक्षयेच्छादीनामिति विकल्प्याऽऽद्यं दूषयति—नेत्यादिना । यद्यात्मना सहापृथक्कालत्वमिच्छादीनां तदाऽऽत्मनोऽनादित्वात्तद्वत्तमहत्त्ववन्नित्यत्वं तेषामापतीत्याह—आत्मनेति । प्रसङ्गस्येष्टत्वमाशङ्क्य निराचष्टे—स चेति ।

समवायस्य च द्रव्यादन्यत्वे सति द्रव्येण संबन्धान्तरं वाच्यं यथा द्रव्यगुणयोः । समवायो नित्यसंबन्ध एवेति न वाच्यमिति चेत्तथा च समवायसंबन्धवतां नित्यसंबन्धप्रसङ्गात्पृथक्त्वानुपपत्तिः । अत्यन्तपृथ-

---

१ ख. °गादस° । २ ख. ग झ. °त्युत्पत्ति° । ३ ग. झ. °गादक° । ४ क. °मुत्पत्तिबुद्धिसं° । ५ ग. °स्य त्वात्म° । ६ ख. °वादि° । ७ क. सिध्यति । ८ ग. छ. झ. °दि वाऽऽत्म° । ९ क. °तन्त्र्यासि° । १० ग. °त्वमहो संयो° । ११ छ. झ. °हो संयो° । १२ झ. °भागयो° । १३ ख. क. झ. न च वा° ।

क्त्वे च द्रव्यादीनां स्पर्शवदस्पर्शद्रव्ययोरिव षष्ठ्यर्थानुपपत्तिः । इच्छाद्युपजनापायवद्गुणवत्त्वे चाऽऽत्मनोऽनित्यत्वप्रसङ्गः । देहफलादिवत्सावयवत्वं विक्रियावत्त्वं च देहादिवदेवेति दोषावपरिहार्यौ । यथा त्वाकाशस्याविद्याध्यारोपितरजोधूममलत्वादिदोषवत्त्वं तथाऽऽत्मनोऽविद्याध्यारोपितबुद्ध्याद्युपाधिकृतसुखदुःखादिदोषवत्त्वे बन्धमोक्षादयो व्यावहारिका न विरुध्यन्ते । सर्ववादिभिरविद्याकृतव्यवहाराभ्युपगात्परमार्थानभ्युपगमाच्च । तस्मादात्मभेदपरिकल्पना वृथैव तार्किकैः क्रियत इति ॥ ५ ॥

न चापृथग्देशत्वमयुतसिद्धत्वम् । तन्तुपटादीनां पृथग्देशानामयुतसिद्ध्यभावप्रसङ्गात् । न चापृथक्स्वभावत्वमयुतसिद्धत्वम् । भेदपक्षपरिक्षयात् । न च संयोगविभागायोग्यत्वमयुतसिद्धत्वम् । देवदत्तस्य हस्तादीनां चायुतसिद्ध्यभावापातादित्यभिप्रेत्य समवायस्य द्रव्यादन्यत्वे तावन्मात्रत्वेन तत्संबन्धत्वव्याघातात्ततोऽन्यत्वेन संबन्धान्तरमस्ति नेति विकल्प्याऽऽद्ये स्यादनवस्थेति मत्वाऽऽह—समवायस्येति । द्वितीयं शङ्कते—समवाय इति । न वाच्यं संबन्धान्तरमिति शेषः । समवायस्य नित्यसंबन्धत्वे समवायवतां द्रव्यगुणादीनामपि तद्वत्त्वाद्भेदस्य कदाचिदप्यनुपलम्भात्पृथक्त्वप्रथानुपपत्तिरिति दूषयति—तथा चेति । संयोगस्यापि समवायसाम्यं चकारेण सूच्यते । समवायस्य समवायिभिर्गुणादीनां च द्रव्येणात्यन्तभेदे हिमवद्विन्ध्ययोरिव संबन्धानुपपत्तेस्तेषु परतन्त्रताव्यवहारासिद्धिरित्याह—अत्यन्तेति । किंचेच्छादयो नाऽऽत्मगुणा उपजनापायवत्त्वाद्रूपादिवत् । यद्वाऽऽत्मा नानित्यगुणवान्नित्यत्वाद्घटादिरेकेण देहादिवदित्याह—इच्छादीति । न केवलमात्मनोऽनित्यगुणत्वेऽनित्यत्वप्रसक्तिरेव दोषः । किंत्वन्यदपि दोषद्वयं दुष्परिहरमिति बाधकान्तरमाह—सावयवत्वमिति । यद्यात्मनो नेच्छादिगुणवत्त्वं तदा तस्य बन्धाभावान्मोक्षो न स्यादतो बन्धमोक्षव्यवस्थानुपपत्त्या प्रतिदेहं सुखदुःखादिविशिष्टात्मभेदसिद्धिरित्याशङ्क्याऽऽह—यथा त्विति । अवस्तुत्वादविद्यायास्तत्कृतव्यवहारायोगाद्बन्धाद्यभ्युपगमासिद्धिरित्याशङ्क्याऽऽह—सर्ववादिभिरिति । अविद्याकृतमनुष्यत्वा-

---

१ च. °क्त्वेन च द्र° । छ. °क्त्वे द्र° । २ ङ. °जननाऽ° । ३ घ. °त्वे चाऽऽत्म° । ज. °त्वेनाऽऽत्म° । ४ छ. घ. ज. °त्वं कि° । ५ च. °यौं स्याताम् । य° । ६ च. °थाऽऽका° । ७ ज. °चारो° । ८ ख. °था चाऽऽत्म° । ९ क. °यो व्यव° । १० झ. °विद्यया कृ° । ११ ङ. °र्थानीत्यप° । १२ ज. क्रियन्त । १३ झ. °भागयो° । १४ छ. °व्यानन्य° । १५ ग. झ. °न्यत्वं ता° । १६ ग. झ. °तान्न ततोऽ° । १७ ङ. छ. झ. °त्वे तेन । १८ छ. न चेति । १९ ग. झ. तावतू । २० ग. झ. °पत्तिः । ते° । २१ छ. °के दे° । २२ ग. छ. ज. झ. °णवत्त्वेऽनि° । २३ छ. °त्वदोषम° । २४ घ. °स्य संब° । २५ क. °गाव्यवं° । २६ ग. छ. झ. °त्वाद्यध्या° ।

व्यवहारोऽपि लौकिकवैदिकव्यवहारः सर्ववादिभिरिष्यते तत्कृता च व्यवस्थाऽऽस्थीयते तस्मादस्माकमपि तयैव सर्वमविरुद्धमित्यर्थः । परमार्थे च मोक्षे केनापि वादिना व्यवहारो नाभ्युपगम्यते । तथा च मोक्षे परेषां व्यवहारस्यैवाभावात्तन्निर्वाहकपारमार्थिकभेदाभ्युपगमो वृथेत्याह—परमार्थेति । कल्पितभेदवशादपि पूर्वोक्तसर्वव्यवस्थासौस्थ्यात्पारमार्थिकात्मभेदकल्पना प्रमाणप्रयोजनशून्येत्युपसंहरति—तस्मादिति ॥ ९ ॥

रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।
आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥ ६ ॥

कथं पुनरात्मभेदनिमित्त इव व्यवहार एकस्मिन्नात्मन्यविद्याकृत उपपद्यत इति । उच्यते । यथेहाऽऽकाश एकस्मिन्घटकरकापवरकाद्याकाशानामल्पत्वमहत्त्वादिरूपाणि भिद्यन्ते तथा कार्यमृदकाहरणधारणशयनादिसमाख्याश्च घटाकाशकरकाकाश इत्याद्यास्तत्कृताश्च भिन्ना दृश्यन्ते । तत्र तत्र वै व्यवहारविषय इत्यर्थः । सर्वोऽयमाकाशे रूपादिभेदकृतो व्यवहारो न परमार्थ एव । परमार्थतस्तदाकाशस्य न भेदोऽस्ति । न चाऽऽकाशभेदनिमित्तो व्यवहारोऽस्त्यन्तरेण परोपाधिकृतं द्वारम् । यथैतत्तद्वदेहोपाधिभेदकृतेषु जीवेषु घटाकाशस्थानीयेष्वात्मसु निरूपणात्कृतो बुद्धिमद्भिर्निर्णयो निश्चय इत्यर्थः ॥ ६ ॥

अद्वैतस्य श्रुत्यादिविरोधाभावेऽप्यनुमानविरोधमाशङ्क्यानैकान्तिकत्वेनानुमानं दूषयति—रूपेति । श्लोकव्यावर्त्यामाशङ्कामाह—कथमिति । यथाऽऽत्मभेदवादे तद्भेदनिमित्तो रूपादिव्यवहारस्तथैकस्मिन्नेवाऽऽत्मन्यात्मैकत्वपक्षे रूपादिव्यवहारो नोपपद्यते । तथा च विमता जीवास्तत्त्वतो भिद्यन्ते भिन्ननामकत्वाद्भिन्नकार्यकरत्वाद्भिन्नरूपत्वाद्घटपटादिवदित्यनुमानविरुद्धमद्वैतमित्यर्थः । घटाकाशादिष्वनैकान्तिकत्वं विवक्षित्वा श्लोकाक्षराणि व्युत्पादयति—उच्यत इत्यादिना । शयनादिसमाख्याश्च भिद्यन्त इति

१ घ. ङ. ञ. °द्वाराः स्व° । २ घ. ङ. ञ. °व्यस्ते त° । ३ ग. झ. तद्वदेव । ४ क. °त्व्य° । ५ घ. ञ. °रणादि च° । ६ क. °ख्याश्च इ° । ७ घ. ङ. छ. ज. तत्रैव व्य° । ८ च. झ. °त्र व्य° । ९ क. °काशक° । १० च. °दिक्° । ११ च. °र्थत आका° । १२ छ. °काशे भे° । १३ च. झ. °णा कृता बु° । १४ छ. °त्या वि° । १५ ग. छ. झ. °र्दिभेदस्य° । १६ ग. छ. झ. °त्वाच्च घट° । १७ क. °क्षितत्वात् । श्लो° । १८ झ. ग. घ. क. °दि भिद्यत इ° । ज. °दिभिर्भिद्य° ।

संबन्धः । तत्कृताश्चेत्यत्र तच्छब्देन विकल्पितो घटाकाशभेदो गृह्यते । चकारोऽवधारणार्थः । घटाकाशादीनामुक्तहेतुत्वेऽपि विपक्षत्वाभावे कथमनैकान्तिकत्वमित्याशङ्क्याऽऽह— सर्वोऽयमिति । उक्तेऽर्थे तृतीयं पादं विभजते—न चेति । परोपाधिशब्देन घटकरकादिरुच्यते । दृष्टान्तमनूद्य दार्ष्टान्तिकं व्याचष्टे—यथैतदित्यादिना॥६॥

नाऽऽकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवाऽऽत्मनः सदा जीवो विकारावयवौ तथा ॥ ७ ॥

ननु तत्र परमार्थकृत एव घटाकाशादिषु रूपकार्यादिभेदव्यवहार इति । नैवदस्ति । यस्मात्परमार्थाकाशस्य घटाकाशो न विकारः । यथा सुवर्णस्य रुचकादिर्यथा वाऽपां फेनबुद्बुदहिमादिः । नाप्यवयवो यथा वृक्षस्य शाखादिः । न तथाऽऽकाशस्य घटाकाशो विकारावयवौ यथा तथा नैवाऽऽत्मनः परस्य परमार्थसतो महाकाशस्थानीयस्य घटाकाशस्थानीयो जीवः सदा सर्वदा यथोक्तदृष्टान्तवद्विकारो नाप्यवयवः । अत आत्मभेदकृतो व्यवहारो मृषैवेत्यर्थः ॥ ७ ॥

घटाकाशादीनां विपक्षत्वाभावमाशङ्क्य परिहरति—नेत्यादिना । घटाकाशादिराकाशस्य विकारोऽवयवो वेत्यङ्गीकारात्तत्रापि भेदस्य तात्त्विकत्वान्न विपक्षतेति श्लोकस्य व्यावर्त्यं चोद्यमुत्थापयति—नन्विति । आकाशस्य निर्विकारत्वं निरवयवत्वं च लोकसिद्धं गृहीत्वा परिहरति—नैवदस्तीति । तत्र वैधर्म्योदाहरणद्वयमाह—यथेति । घटाकाशादिराकाशाख्यस्य महाकाशस्यावयवो न भवतीत्यत्र व्यतिरेकदृष्टान्तमाह—यथा वृक्षस्येति । उक्तदृष्टान्तानां दार्ष्टान्तिकमाह—न तथेति । घटाकाशस्य महाकाशं प्रति विकारत्वमवयवत्वं च नास्तीत्युक्तं दृष्टान्तत्वेनानूद्य दार्ष्टान्तिकं दर्शयन्नुत्तरार्धं व्याकरोति—यथेत्यादिना । अनैकान्तिकत्वेनानुमानस्यामानत्वे स्थिते फलितमाह—अत इति ॥ ७ ॥

यथा भवति बालानां गगनं मलिनं मलैः ।
तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः ॥ ८ ॥

---

१ ग विकल्पतो । २ घ. टाद्याका° । ३ ख. ग. ङ. छ. ज. °त्वेवि° । ४ ङ. ज. तीयपा° । ५ ग. झ °ति । अन्तरेणोपा° । ६ च °ति चेत्तत्रेत्याह नेति । नै° । ७ च. °माका° । ८ क. घ. ङ. ज. झ दि यथा । ९ ख. घ ङ छ. °मादिनाऽप्य° । १० क. था च वृ° । ११ ज. °काशौ वि° । १२ घ. °यवौ त° । १३ ज. °कारित्वं च । १४ ग. °धर्म्योदा° ।

यस्माद्यथा घटाकाशादिभेदबुद्धिनिबन्धनो रूपकार्यादिभेदव्यवहारस्तथा देहोपाधिजीवभेदकृतो जन्ममरणादिव्यवहारस्तस्मात्तत्कृतमेव क्लेशकर्मफलमलवत्त्वमात्मनो न परमार्थत इत्येतमर्थं दृष्टान्तेन प्रतिपिपादयिषन्नाह— यथा भवति लोके बालानामविवेकिनां गगनमाकाशं घनरजोधूमादिमलैर्मलिनं मलवन्न गगनं मलवद्यथात्मविवेकिनाम्, तथा भवत्यात्मा परोऽपि यो विज्ञाता प्रत्यक्क्लेशकर्मफलमलैर्मलिनोऽबुद्धानां प्रत्यगात्मविवेकरहितानां नाऽऽत्मविवेकवताम् । न ह्यूषरदेशस्तृड्वत्प्राण्यध्यारोपितोदकफेनतरङ्गादिमांस्तथा नाऽऽत्माऽबुधारोपितक्लेशादिमलैर्मलिनो भवतीत्यर्थः ॥ ८ ॥

जीवो ब्रह्मणो नांशो न विकारोऽपि तु ब्रह्मैवोपाध्यनुप्रविष्टं जीवशब्दितमित्युक्तं तदयुक्तं ब्रह्मणः शुद्धत्वाज्जीवस्य रागादिमलैवत्त्वोदनेकत्वायोगादित्याशङ्क्य च परमार्थतो जीवस्यापि नास्ति मलैवत्त्वमित्याह—यथेति । श्लोकस्य तात्पर्यमाह—यस्मादिति । घटाकाशो मठाकाशः सूचीपाशाकाश्चेत्युपाधिनिमित्तो भेदस्तद्विषया बुद्धिस्तत्प्रयुक्तो रूपभेदोऽर्थक्रियाभेदो नामभेदश्चेति व्यवहारो नभसि यथोपलभ्यते तथा देहाद्युपाधिभेदप्रयुक्तो जीवभेदात्ततकृतो जननमरणसुखदुःखादिव्यवहारो व्यवस्थितो यस्मादारभ्यते तस्मात्तेनाविद्याविद्यमानेन कृतमेवाऽऽत्मनो रागादिमलैवत्त्वं न वस्तुतोऽस्तीत्येतमर्थं दृष्टान्तद्वारा प्रतिपिपादयिषन्नादौ दृष्टान्तमाहेति योजना । दृष्टान्तभागनिविष्टान्यक्षराणि व्याचष्टे—यथेत्यादिना । दार्ष्टान्तिकभागगतानामक्षराणामर्थमाह—तथेति । यो हि प्रत्यगात्मा विज्ञाता सोऽप्यबुद्धानां मलिनो भवतीति संबन्धः । अबुद्धानामित्येतद्व्याचष्टे—प्रत्यगात्मेति । अविवेकिभिरध्यारोपितेऽपि प्रत्यगात्मनो मलवत्त्वे मलप्रयुक्तं फलं तत्र वास्तवं भविष्यतीत्याशङ्क्याऽऽह—न हीति ॥ ८ ॥

मरणे संभवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु आकाशेनाविलक्षणः ॥ ९ ॥

---

१ झ. °र्याभे° । २ च. झ. °रणभेदव्य° । ३ झ. °हारो यस्मा° । ४ च. °त्येनम° । ५ च. छ. झ. °तिपा° । ६ च. छ. झ. °यिष्यन्ना° । ७ क. गमनं । ८ क. °वत्त्या° । झ. °वत् । यथात्मवि° । ९ ज. °मलिनैर्मे° । १० ख. घ. ङ. च. झ. °ह्यूषर° । ११ च. °बुद्धयारो° । १२ घ. °लत्वाद° । १३ छ. झ. °त्वादेकत्वा° । १४ क. °लत्वामि° । १५ ग. ज. झ. महाका° । १६ ग. °नाविद्य° । १७ क. °लत्वं न । १८ ग. घ. °तिपा° । १९ ग. झ. °छाक्ष° । २० झ. °बुद्धाका° ।

पुनरप्युक्तमेवार्थं प्रपञ्चयति—घटाकाशजन्मनाशगमनागमनस्थितिवत्सर्व-शरीरेष्वात्मनो जन्मरणादिराकाशेनाविलक्षणः प्रत्येतव्य इत्यर्थः ॥ ९ ॥

ननु जीवो मरणानन्तरं धर्मानुरोधेन स्वर्गं गच्छति । अधर्मवशाच्च नरकं प्रतिपद्यते। धर्माधर्मयोश्च भोगेन क्षये पुनरागत्य योनिविशेषे संभवति । तत्र यावद्भोगं स्थित्वा पुनरपि परलोकाय प्रतिष्ठते । एवमिह लोकपरलोकसंचरणव्यवहाराविरुद्धमद्वैतमिति तत्राऽऽह—मरण इति । श्लोकस्य तात्पर्यमाह—पुनरपीति । आत्मनि सर्वो व्यवहारोऽविद्याकृतो वास्तवो नेत्युक्तोऽर्थः । आत्मनो हि गगनोपमस्य गत्यादेर्वस्तुतोऽसंभवादविद्याकृतस्तस्मिन्गत्यादिरित्यर्थः ॥ ९ ॥

संघाताः स्वप्नवत्सर्व आत्ममायाविसर्जिताः ।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥ १० ॥

घटादिस्थानीयास्तु देहादिसंघाताः स्वप्नदृश्यदेहादिवन्मायाविकृतदेहादिवच्चाऽऽत्ममायाविसर्जिता आत्मनो मायाऽविद्या तया प्रत्युपस्थापिता न परमार्थतः सन्तीत्यर्थः । यद्याधिक्यमधिकभावस्तिर्यग्देहाद्यपेक्षया देवादिकार्यकारणसंघातानां यदि वा सर्वेषां समतैव नैषामुपपत्तिः संभवः सद्भावप्रतिपादको हेतुर्विद्यते । नास्ति हि यस्मात्तस्मादविद्याकृता एवं न परमार्थतः सन्तीत्यर्थः ॥ १० ॥

ननु संघातशब्दितानामुपाधीनां सत्यत्वात्तत्प्रयुक्तभेदस्यापि तथात्वाद्वैतानुपपत्तेस्तादवस्थ्यमिति चेत्तत्राऽऽह—संघाता इति । देवादिदेहानां पूज्यतमत्वेनाऽऽधिक्याभ्युपगमान्नासत्यत्वसिद्धिरित्याशङ्क्य देहभेदेषु केषुचिदाधिक्ये मूढदृष्ट्या कल्पितेऽपि विवेकदृष्ट्या सर्वदेहानां पञ्चभूतात्मकत्वाविशेषादशेषसाम्ये वा स्वीकृते नास्ति संघातेषु सत्यत्वे काचिदुपपत्तिरित्याह—आधिक्य इति। पूर्वार्धाक्षराणि योजयति—घटादीति । मणिमन्त्रादिरूपां मायामिन्द्रजालप्रयोजकभूतां व्यावर्तयति—अविद्येति । विमता देहा न सत्या देहत्वात्संप्रतिपन्नवादित्यर्थः । ब्रह्मादिदेहानामुत्कृष्टत्वान्नाविद्याकृतत्वमित्याशङ्क्य द्वितीयार्धं व्याचष्टे—यदीत्यादिना ॥ १० ॥

---

१ झ. °नरुक्तमे° । २ ख. सर्वव्य° । ३ झ. °त्युक्तार्थः । ४ क. °विवार्जि° । ५ क °पेक्षाया । ६ क. °र्यकर° । ७ क. ख. ग. °पत्तिसं° । ८ झ. °स्ति य° । ९ क. °व प° । १० झ. °त्तिस्तद° । ११ क. झ. °षु चि° । १२ ग. झ. °वेकिद° । १३ ख. °द्दृप° । १४ ज. °षादिशे° । १५ ख. छ. °षु पुनः स° । १६ छ. °णि व्याचष्टे-व° । १७ ज. °मन्त्ररू° । १८ क. कृतमि° ।

रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।
तेषामात्मा परो जीवः खं यथा संप्रकाशितः ॥ ११ ॥

उत्पाद्यत्वादिवर्जितस्याद्वयस्यैऽऽत्मतत्त्वस्य श्रुतिप्रमाणैकत्वप्रदर्शनार्थं वाक्यान्युपन्यस्यन्ते । रसादयोऽन्नरसमयः प्राणमय इत्येवमादयः कोशा इव कोशा अस्याऽऽदेरिवोत्तरोत्तरस्यापेक्षया बहिर्भावात्पूर्वपूर्वस्य व्याख्याता विस्पष्टमाख्यातास्तैत्तिरीयके तैत्तिरीयकशाखोपनिषद्वल्ल्यां तेषां कोशानामात्मा येनाऽऽत्मना पञ्चापि कोशा आत्मवन्तोऽन्तरतमेन । स हि सर्वेषां जीवननिमित्तत्वाज्जीवः । कोऽसावित्याह—पर एवाऽऽत्मा यः पूर्वम् "सत्यं ज्ञानमनन्तं ब्रह्म" इति प्रकृतः । यस्मादात्मनः स्वप्नमायादिवदाकाशादिक्रमेण रसादयः कोशलक्षणाः संघाता आत्ममायाविसर्जिता इत्युक्तम् । स आत्माऽस्माभिर्यथा खं तथेति संप्रकाशित आत्मा ह्याकाशवदित्यादिश्लोकैः । न तार्किकपरिकल्पितात्मवत्पुरुषबुद्धिप्रमाणगम्य इत्यभिप्रायः ॥ ११ ॥

जीवस्याद्वितीयब्रह्मत्वमुपपत्त्यवष्टम्भेनोपपादितम् । इदानीं तत्रैव तैत्तिरीयश्रुतेस्तात्पर्यमाह—रसादयो हीति । श्लोकस्य तात्पर्यमाह—उत्पत्त्यादीति । अक्षरार्थं कथयति—रसादय इति । आदिशब्देन मनोमयविज्ञानमयावानन्दमया गृह्यन्ते । खड्गादेर्यथा कोशास्तदपेक्षया बहिर्भवन्ति तद्वदेते पञ्च कोशा व्यपदिश्यन्ते । तत्र हेतुमाह—उत्तरोत्तरस्येति । पूर्वपूर्वस्यान्नमयादेरुत्तरोत्तरप्राणमयाद्यपेक्षया बहिर्भावाद्ब्रह्म सर्वान्तरं प्रतिष्ठाभूतमपेक्ष्याऽऽनन्दमयस्य [illegible] बहिर्भावविशेषाविशिष्टं पञ्चानामपि कोशत्वमित्यर्थः । अवशिष्टान्यक्षराणि व्याचष्टे—व्याख्याता इत्यादिना । तत्र जीवशब्दप्रवृत्तिं व्युत्पादयति—य हीति । विविक्तं जीवशब्दार्थमाकाङ्क्षाद्वारा व्यावर्तयति—कोऽसाविति त्वादिना । अनेन विच्छेदनार्थं प्रकरणमनुसंधत्ते—यस्मादिति । प्रकृतस्य परस्याऽऽत्मनः श्रौतत्वे फलितमाह—नेत्यादिना ॥ ११ ॥

द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितम् ।
पृथिव्यामुदरे चैव यथाऽऽकाशः प्रकाशितः ॥ १२ ॥

---

१ च. °वः स यथा खं प्र° । २ च. ज्ञ. °स्याऽऽत्म° । ३ च. °णत्व° । ४ क. °र्वस्य व्या° । ख. ड. ज. ञ. °र्वस्य पू° । ५ क. °यकशा° । ६ ञ. °पद्ब्रह्मवल्ल्यां । ७ ञ °न्तरात्मना स° । ८ छ. °क्षणसं° । ९ ञ. °ति प्र° । १० च. संप्रकाशः । ११ ख. घ. छ. ज. °दिभिः श्लो° । १२ ञ. °त्मपुरु° । १३ ख. छ. °यकश्रु° । १४ ज. °या पृ° । १५ क. °पेक्षया ब° । १६ क. °रणवि° । १७ च. छ. ञ. °च्छेदार्थं ।

किंचाधिदैवमध्यात्मं च तेजोमयोऽमृतमयः पुरुषः पृथिव्याद्यन्तर्गतो यो विज्ञाता पर एवाऽऽत्मा ब्रह्म सर्वमिति द्वयोर्द्व्योरा द्वैतक्षयात्परं ब्रह्म प्रकाशितम् । कैत्याह— ब्रह्मविद्याख्यं मध्वमृतममृतत्वं मोदनहेतुत्वाद्विज्ञायते यस्मिन्निति मधुज्ञानं मधुब्राह्मणं तस्मिन्नित्यर्थः । किमिवेत्याह—पृथिव्यामुदरे चैव यथैक आकाशोऽनुमानेन प्रकाशितो लोके तद्वदित्यर्थः ॥ १२ ॥

मनुष्योऽहं प्राण्यहं प्रमाताऽहं कर्ताऽहं भोक्ताऽहमिति पञ्चानां विशिष्टानां यदेकं स्वरूपमनुगतं प्रत्यक्चैतन्यं तद्ब्रह्मैवेति जीवपरयोरैक्ये तैत्तिरीयश्रुतेस्तात्पर्यमुक्त्वा तत्रैव बृहदारण्यकश्रुतेरपि तात्पर्यमाह—द्वयोरिति । मधुब्राह्मणे बहुषु पर्यायेष्वधिदैवाध्यात्मविभक्तयोः स्थानयोरयमेव स इति परं ब्रह्म प्रत्यक्प्रकाशितम् । अतोऽस्मिन्बृहदारण्यकश्रुतेरपि ब्रह्मात्मैक्ये तात्पर्यमित्यर्थः । तत्र दृष्टान्तमाह— पृथिव्यामिति । न केवलमैक्ये तैत्तिरीयश्रुतेरेव तात्पर्यं किंतु बृहदारण्यकश्रुतेरपीत्याह— किंचेति । अधिदैवं पृथिव्यादावध्यात्मं च शरीरे तेजोमयो ज्योतिर्मयश्चैतन्यप्रधानोऽमृतमयोऽमरणधर्मा पुरुषः पूर्णः पृथिव्यादौ शरीरे चान्तर्गतो यो विज्ञाता स पर एवाऽऽत्मा । तेन स विज्ञाता सर्वं पूर्णमपरिच्छिन्नं ब्रह्मैवेति परं ब्रह्म प्रकाशितमिति संबन्धः। अपवादावस्थायामध्यारोपासंभवाद्द्वयोर्द्व्योरिति कथमुच्यते तत्राऽऽह— अद्वैतक्षयादिति । द्वैतक्षयपर्यन्तं ब्रह्म प्रकाशितम् । द्वयोर्द्व्योरिति पुनरनुवादमात्रमित्यर्थः । मधुज्ञानमध्येव प्रकाशितं न ब्रह्मेत्याशङ्क्य च मधुज्ञानशब्दार्थं व्युत्पादयति—कैत्यादिना । शब्दस्य क्वचिदाश्रितत्वं रूपवदनुमीयते । तच्च शब्दाधिकरणं सामान्यतः सिद्धं पारिशेष्यादाकाशमिति सिद्धमिति । तच्च कल्पनालाघवादेकमेवेति गम्यते । तथा च बहिरन्तश्चैकमेवाऽऽकाशमनुमानप्रमाणाभ्यामधिगतमिति । तथाऽधिदैवमध्यात्मं च ब्रह्म प्रत्यग्भूतं सिद्धमित्युत्तरार्धं व्याचष्टे— किमे(मि)त्यादिना॥ १२॥

जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते ।
नानात्वं निन्द्यते यच्च तदेवं हि समञ्जसम् ॥ १३ ॥

---

१ क. °योरद्वै° । २ ङ. छ. °त्परब्र° । ३ च. °मृतं मो° । ४ ज. °ते तस्मिं° । ५ ग. घ. °हं क° । ६ ग. घ. झ. °देवस्व° । ७ ख. °यकबृ° । ८ घ. °क्त्वा बृ° । ९ घ. °ण्यश्रु° । १० घ. परब्र° । ११ ग. ङ. ज. झ. °त्यग्भूतं प्रका° । १२ ज. ब्रह्मैक्ये । १३ ज. °लमात्मैक्ये । १४ ख. °यकश्रु° । १५ क. °श्रुतिरे° । १६ घ. °रथ° । १७ घ. °र्णः सन्पृथि° । १८ ख. छ. °र्वं परिपू° । १९ ङ. °ह-अद्वै° । २० झ °ने ब्रह्मे । २१ घ. ङ. °काशते न । २२ छ. °शङ्क्याऽऽह म° । २३ घ. ङ. ज. °द्धं परिशेषादा° । २४ घ. ज. °ण्याधि° । २५ घ. °मू । यथा° । २६ च. °देव हि ।

यद्युक्तितः श्रुतितश्च निर्धारितं जीवस्य परस्य चाऽऽत्मनो जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते स्तूयते शास्त्रेण व्यासादिभिश्च। यच्च सर्वप्राणिसाधारणं स्वाभाविकं शास्त्रबहिष्कृतैः कुतार्किकैर्विरचितं नानात्वदर्शनं निन्द्यते "न तु तद्द्वितीयमस्ति" "द्वितीयाद्वै भयं भवति" "उदरमन्तरं कुरुते। अथ तस्य भयं भवति" "इदं सर्वं यदयमात्मा" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिवाक्यैश्चान्यैश्च ब्रह्मविद्भिः। यच्चैतत्तदेवं हि समञ्जसमृजुबोधं न्याय्यमित्यर्थः। यास्तु तार्किकपरिकल्पिताः कुदृष्टयस्ता अनुक्त्वा निरूप्यमाणा न घटनां प्राञ्चन्तीत्यभिप्रायः ॥ १२ ॥

इतश्चैकत्वे श्रुतीनां तात्पर्यमित्याह—जीवात्मनोरिति। अभेदेन ब्रह्म वेद ब्रह्मैव भवतीत्यादिना ब्रह्मभावफलत्वादेनेत्यर्थः। यत्प्रशस्यते तद्विधेयमित्यादिन्यायादेकत्वदर्शने फलवादोपपत्त्युपलम्भादेकत्वं प्रशस्तत्वाद्विवक्षितमिति भावः। यच्चानेकत्वं सर्वप्राणिसाधारणं तन्निन्द्यमानं दृश्यते। यन्निन्द्यते तन्निषिध्यत इति न्यायान्नानात्वं शास्त्रार्थो न भवतीत्याह—नानात्वमिति। तदुभयमेकत्वप्रशंसनं नानात्वनिन्दनं चैकत्वमेव शास्त्रीयमित्यभ्युपगमे सति युक्तमिति फलितमाह—तदेवं हीति। श्लोकाक्षराणि व्याचष्टे—यदिति। अनन्यत्वभावशङ्कां व्यावर्त्यैकरसत्वं दर्शयति—अभेदेनेति। तत्प्रशस्यते शास्त्रेणेति तत्पदमादाय व्याख्येयम्। शास्त्रेणाभेदवेदनेन फलवादेनेत्यर्थः। व्यासपाराशरादिभिश्च वेदार्थं व्याचक्षाणैरेकत्वं स्तूयते "वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" "अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम्" इत्यादिवाक्यैरित्याह—व्यासादिभिश्चेति +। द्वितीयार्धं विभजते—यच्चेति। तन्निन्द्यत इति यच्छब्देनोपक्रमादुद्दृष्टव्यम्। "अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः"। "किं तेन न कृतं पापं चोरेणाऽऽत्मापहारिणा" इत्यादिवाक्यैर्व्यासादयोऽपि द्वैतदर्शनं निन्दन्तीत्याह—अन्यैश्चेति। एवमनेकत्वदर्शनस्य निन्दितत्वेन निषिद्धत्वान्नानेकत्वं शास्त्रीयमित्युक्त्वा चतुर्थपादार्थमाह—यच्चै-

---

+ एतत्पुरतः—" सकलमिदमहं च वासुदेव इति सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहमित्यादि " इत्यधिकं ङ. पुस्तके।

---

१ क. छ. झ. °नोर° । घ. ङ. °नोर्जीवा° । २ झ. °नात्वं द° । ३ झ. °नं तन्निन्दा° । ४ ख. °तेयं द्वि° । ५ च. °देव हि । ६ च. यस्तु । ७ घ. °माना न दृष्टीः प्रा° । ८ क. ज. घटानां । ९ ग. ङ. ज. झ. °र्थमाह— । १० छ. °त्वभावनि° । ११ ज. °कत्वं हि शा° । १२ ङ. फलमा° । १३ छ. °त्वं प्रस्तू° । १४ घ. ङ. ज. °मादिति द्रष्ट° । १५ ख. °कद° ।

तादिति । विषयभेदेन प्रशंसनं निन्दनं चेत्यर्थः । एवं हीति । द्वैतस्याशास्त्रीयत्वमद्वैतस्यैव तत्तात्पर्यगम्यत्वमित्यङ्गीकारे सतीत्यर्थः । भेददृष्टीनामपि न्याय्यत्वाविशेषाद्भेददर्शननिन्दनस्य कुतो न्याय्यत्वमित्याशङ्क्याऽऽह—यास्त्विति ।

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रेत्य तमोमूला हि ताः स्मृताः ॥

इति मनुवचनादित्यर्थः । न्यायविरोधादपि भेदवादानामसमञ्जसत्वमित्याह—निरूप्यमाणा इति । वैशेषिकवैनाशिकादिकल्पना भेदानुसारिण्यो भेदश्च परस्पराश्रयतादिदोषदूषितो न प्रमीयते । तेन भेदवादानामुत्प्रेक्षामूलानामसमञ्जसतेत्यर्थः ॥ १३ ॥

जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्तितम् ।
भविष्यद्वृत्त्या गौणं तन्मुख्यत्वं हि न युज्यते ॥ १४ ॥

ननु श्रुत्याऽपि जीवपरमात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेरुत्पत्त्यर्थोपनिषद्वाक्येभ्यः पूर्वं प्रकीर्तितं कर्मकाण्डे । अनेकशः कामभेदत इदंकामोऽदःकाम इति । परश्च "स दाधार पृथिवीं द्याम्" इत्यादिमन्त्रवर्णैः । तत्र कथं कर्मज्ञानकाण्डवाक्यविरोधे ज्ञानकाण्डवाक्यार्थस्यैवैकत्वस्य सामञ्जस्यमवधार्यत इति । अत्रोच्यते—"यतो वा इमानि भूतानि जायन्ते" "यथाऽग्नेः क्षुद्रा विस्फुलिङ्गाः" । "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" । "तदैक्षत" । "तत्तेजोऽसृजत" इत्युत्पत्त्यर्थोपनिषद्वाक्येभ्यः प्रागपृथक्त्वं कर्मकाण्डे प्रकीर्तितं यत्तन्न परमार्थम् । किं तर्हि गौणम् । महाकाशघटाकाशादिभेदवत् । यथौदनं पचतीति भविष्यद्वृत्त्या तद्वत् । न हि भेदवाक्यानां कदाचिदपि मुख्यभेदार्थत्वमुपपद्यते । स्वाभाविकाविद्यावत्प्राणिभेददृष्ट्यनुवादित्वाद्भेदवाक्यानाम् । इह चोपनिषत्सूत्पत्तिप्रलयादिवाक्यैर्जीवपरमात्मनोरेकत्वमेव प्रतिपिपादयिषितम् । "तत्त्वमसि" "अन्योऽसावन्योऽहमस्मीति न स वेद" इत्यादिभिः । अत उपनिषत्स्वेकत्वं श्रुत्या प्रतिपिपादयिषितं भविष्यतीति भाविनी-

---

१ क. °दृष्टिताम° । २ ग. झ. °न्दकस्य । ३ छ. °लाः प्रोक्तास्तमो° । ४ घ. छ. ज. °ह्—अनि° । ५ छ. °दिभेदक° । ६ क. °यः ॥ १३ ॥ भे° । ७ छ. गौणत्वं मुख्य° । ८ ङ. ज °त्वं न हि यु° । ९ घ. °कत्वं प्रागु° । १० ख. घ. ज. °त्पत्तेः, व्युत्प° । ११ ख. झ. °थिवीम्" इ° । घ. ङ. ज. °थिवीं द्यामुतेमाम्' इ° । १२ घ. ङ. ज. °त्यादिव्युत्प° । १३ ज. °भ्यः पृथ° । १४ घ. क. °मार्थं भविष्यदिति किं । १५ च. इहैवोप° ।

मेकवृत्तिमाश्रित्य लोके भेददृष्ट्यनुवादो गौण एवेत्यभिप्रायः । अथवा " तदैक्षत " " तत्तेजोऽसृजत " इत्याद्युत्पत्तेः प्राक् " एकमेवाद्वितीयम् " इत्येकत्वं प्रकीर्तितम् । तदेव च " तत्सत्यं स आत्मा तत्त्वमसि " इत्येकत्वं भविष्यतीति तां भविष्यद्वृत्तिमपेक्ष्य यज्जीवात्मनोः पृथक्त्वं यत्र क्वचिद्वाक्ये गम्यमानं तद्गौणम् । यथौदनं पचतीति तद्वत् ॥ १४ ॥

न भेदवादानामुत्प्रेक्षामात्रमूलत्वं श्रुतिमूलत्वादित्याशङ्क्य परिहरति—जीवात्मनोरिति । उत्पत्तिर्व्युत्पत्तिः सम्यग्ज्ञानं तदर्थोपनिषदां प्रवृत्त्यपेक्षया प्राक्प्रवृत्तकर्मकाण्डेन कृतपरापरयोर्नानात्वमुक्तं तदोदनं पचतीति भविष्यत्प्रवृत्त्या तण्डुलेष्वोदनत्ववद्गौणमेव न मुख्यभेदार्थत्वं श्रुतेर्युज्यते । भेदस्यापूर्वत्वपुरुषार्थत्वयोरभावादित्यर्थः । श्लोकैकदेश्यावर्त्यामाशङ्कामाह—नन्विति । न केवलमस्माभिरुत्प्रेक्षितामिदं किंतु श्रुत्याऽपि दर्शितमित्युपेत्यार्थः । भेदं वदन्त्याः श्रुतेस्तात्पर्यलिङ्गमभ्यासं सूचयति—अनेकश इति । कर्मकाण्डे तत्तत्कामनाभेदेन नियोज्यभेदसिद्धावपि कथं जीवपरयोर्भेदः सिध्यति परस्य तत्रानुक्तत्वादित्याशङ्क्याऽऽह—परश्चेति । हिरण्यगर्भः समवर्तताग्र इति मन्त्रे प्रकृतो हिरण्यगर्भः सर्वनाम्ना परामृश्यते । स इमां पृथिवीं द्यामपि धृतवान् । अन्यथा गुरुत्वातयोरवस्थानायोगात् । न च हिरण्यगर्भातिरिक्तमीश्वरं परे बुध्यन्ते मन्त्रवर्णैः । परश्च प्रकीर्तित इति संबन्धः । कर्मकाण्डार्थं ज्ञानकाण्डेनापबाध्यं ज्ञानकाण्डार्थस्यैवैकत्वस्य सामञ्जस्यमवधार्यतामित्याशङ्क्य बाध्यबाधकभावानिर्धारणे कारणानवधारणान्नैवमित्याह—तत्रेति । श्लोकाक्षरैरुत्तरमाह—अत्रेत्यादिना । पृथक्त्वस्य गौणत्वे प्रागुक्तमेव दृष्टान्तमाह—महाकाशेति । तत्रैव श्लोकसूचितमुदाहरणमाह—यथेति । मुख्यत्वं हीत्यादिव्याचष्टे—न हीति । भेदस्यापूर्वत्वाद्यभावान्न वाक्यानां तत्परत्वं तत्परातत्परयोश्च तत्परं वाक्यं बलवदिति न्यायादखण्डवाक्यार्थस्यैव सामञ्जस्यमित्यर्थः । अद्वैतवाक्यानामपि कथमद्वैते तात्पर्यमित्याशङ्क्यापूर्वार्थत्वादुपपत्तिमत्त्वाच्चेत्याह—इह चेति । अद्वैतं तावन्मानान्तरागोचरत्वादपूर्वमेकमेवाद्वितीयमिति प्रागवस्थायां ब्रह्माद्वितीयं श्रुतम् । तदेवेदं सृष्ट्वा तत्सृष्ट्वा तदेवानुप्राविशादिति श्रुतेरनुप्रविष्टं

---

१ क. °क्षामूलमात्रत्वं । २ छ. °तिस्मृत्युक्तत्वा° । ३ झ. °शङ्क्याऽऽह—जी° । ४ क. घ. झ. °षदः प्र° । ५ घ. छ. °पेक्षाया । ६ ख. °वृत्ते क° । ७ ख. °ण्डे य° । ८ ख. ग. छ. झ. °व्यद्वृत्त्या । ९ ख. °कस्य व्या° । ज. °द्वयव्या° । १० ख. घ. °त्यपरोऽर्थः । ११ क. भेदवत्वाः श्रु° । १२ ज. °रस्यात्रानु° । १३ क. स हि इ° । १४ ख. °ण्डार्थे ज्ञा° । ज. °ण्डार्थज्ञा । १५ ज. °ध्य यज्ज्ञान° । १६ ख. रता त° । १७ घ. ङ. °त्परवा° । १८ क. झ. °भेवा° । १९ झ. °दं दृष्ट्वा । २० झ. °प्रविष्टजी° । २१ क. °विष्टो जी° ।

जीवोऽभिलप्यते । तेन जीवस्य ब्रह्मता(ता) संभवतीत्युपपत्त्याऽपि श्रुतेरद्वैतार्थत्वं गम्यते । सृष्ट्यादिश्रुतीनामद्वैते तात्पर्यं न सृष्ट्यादावित्यनन्तरमेव वक्ष्यते । तस्माद्-द्वैते श्रुतेस्तात्पर्यात्तदर्थस्यैव तात्त्विकतेत्यर्थः । न केवलमुपपत्तेरेवाद्वैते श्रुतेस्तात्पर्यं किंतु नवकृत्वोऽभ्यासादपीत्याह—तत्त्वमिति । भेददृष्टेरपवादाच्च श्रुतेरद्वैते तात्पर्यं प्रतिभातीत्याह—अन्योऽसाविति । आदिशब्देनाद्वैतवादीनि द्वैतनिषेधीनि च वचनान्तराणि गृह्यन्ते । एकत्वमेव प्रतिपिपादयिषितमिति पूर्वेण संबन्धः । एकत्वे श्रुतेस्तात्पर्ये सिद्धे तृतीयपादावष्टम्भेन फलितमाह—अत इति । श्लोकस्य साध्याहारं व्याख्यानान्तरमाह—अथवेत्यादिना ॥ १४ ॥

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथंचन ॥ १५ ॥

ननु यदुत्पत्तेः प्रागजं सर्वमेकमेवाद्वितीयं तथाऽप्युत्पत्तेरूर्ध्वं जातमिदं सर्वं जीवाश्च भिन्ना इति । मैवम् । अन्यार्थत्वादुत्पत्तिश्रुतीनाम् । पूर्वमपि परिहृत एवायं दोषः । स्वप्नवदात्ममायाविसर्जिताः संघाता घटाकाशोत्पत्तिभेदादिवज्जीवानामुत्पत्तिभेदादिरिति । इत एवोत्पत्तिभेदादिश्रुतिभ्य आकृष्येह पुनरुत्पत्तिश्रुतीनामैदंपर्यप्रतिपिपादयिषयोपन्यासः । मृल्लोहविस्फुलिङ्गादिदृष्टान्तोपन्यासैः सृष्टिर्या चोदिता प्रकाशितोऽन्यथाऽन्यथा च सा सर्वः सृष्टिप्रकारो जीवपरमात्मैकत्वबुद्ध्यवतारोपायोऽस्माकम् । यथा प्राणसंवादे वागाद्यासुरपाप्मवेधाद्याख्यायिका कल्पिता प्राणवैशिष्ट्यबोधावताराय तदप्यसिद्धमिति चेत् । न । शाखाभेदेष्वन्यथाऽन्यथा च प्राणादिसंवादश्रवणात् । यदि हि संवादः परमार्थ एवाभूदेकरूप एव संवादः सर्वशाखास्वश्रोष्यद्विरुद्धानेकप्रकारेण नाश्रोष्यत् । श्रूयते तु । तस्मान्न तादर्थ्यं संवादश्रुतीनाम् । यथोत्पत्तिवाक्यानि प्रत्येतव्यानि । कल्पसर्गभेदात्संवादश्रुतीनामुत्पत्तिश्रुतीनां च प्रतिसर्गमन्यथात्वमिति चेन्न । निष्प्रयोजनत्वाद्यथोक्तबुद्ध्यवतारप्रयोजनव्यतिरेकेण । न ह्यन्यप्रयोज-

---

१ क. °षेधानि व° । २ ख. °ति सं° । ३ छ. झ. श्रुतितात्प° । ४ घ. ङ. °तीयमिति श्रुत्या त° । ५ क. °तिभेदा° । ६ ज. °दि श्रुति° । ७ छ. °रित ए° । ङ. °रितीत ए° । ८ क. छ. ज. °नामैदंपारंपर्य° । झ. °नामिदंप° । ९ झ. °ष्टिचर्या° । १० ज. °ताऽन्य° । ११ क. °था च । १२ ज. सर्वः । १३ ज. °रायास्मा° । १४ ङ. झ. 'धाख्या° । १५ क. °था च । १६ क. हि वा° । १७ च. °शास्वश्रोषद्वि° । १८ क. °स्वश्रौषीद्वि° । १९ च. °द्विबुद्धा° । २० घ. ज. नाश्रौषत् । २१ झ. तथा चोत्प° । २२ क. °तीनां प्र° । २३ ख. °नवत्त्वाद्य° । २४ छ. °कप्रयोजनबुद्ध्यवतारव्य° ।

नैवत्वं संवादोत्पत्तिश्रुतीनां शक्यं कल्पयितुम् । तथात्वप्रतिपत्तये ध्याना-र्थमिति चेन्न । कलहोत्पत्तिप्रलयानां प्रतिपत्तेरनिष्टत्वात् । तस्मादुत्पत्त्या-दिश्रुतय आत्मैकत्वबुद्ध्यवतारायैव नान्यार्थाः कल्पयितुं युक्ताः । अतो नास्त्युत्पत्त्यादिकृतो भेदः कथंचन ॥ १५ ॥

सृष्ट्यादिश्रुतिषु शब्दशक्तिवशादेव सृष्ट्यादिभेददृष्टेरद्वैतानुपपत्तिरित्याशङ्क्याऽऽह—मृल्लोहेति । उत्पत्त्यादिश्रुतीनां स्वार्थनिष्ठत्वमुपेत्य व्यावर्त्यं चोद्यमुत्थापयति—नन्विति । तासां स्वार्थनिष्ठत्वाभावान्निरवकाशं चोद्यमिति परिहरति—नैवमिति । परिहृतत्वाच्च नेदं चोद्यं सावकाशमित्याह— पूर्वमपीति । यदि प्रकृतोत्पत्त्यादिश्रुतिभ्यः सकाशादुपक्रमोपसंहारैकरूप्यं तात्पर्यलिङ्गमाकृष्योद्धाष्य मृषा सृष्ट्यादिश्रुतेः स्वार्थपरत्वं परिहृतं तर्हि पुनरुपन्यासो वृथा स्यादित्याशङ्कते—इत एवेति । उत्पत्त्यादिश्रुतीनां मिथ्यासृष्टिपरत्वं पूर्वमुक्तम् । इह तु तासां ब्रह्मात्मैक्ये तात्पर्यप्रतिपादनेच्छया पुनरुपन्यासः सिध्यतीत्युत्तरमाह—इह पुनरिति । पादत्रयगतान्यक्षराणि योजयति—मृदित्यादिना । यः शब्दशक्त्या प्रतीयते न स श्रुत्यर्थो भवति किंतु तात्पर्यगम्यस्यैव श्रुत्यर्थतेत्यत्र दृष्टान्तमाह—यथेति । वागादीनां प्राणानामहं श्रेयानहं श्रेयानिति मिथः संघर्षः संवादस्तत्र याऽऽख्यायिका श्रूयते नासौ श्रुत्यर्थो भवति वागादीनामचेतनत्वात् । तथा सृष्ट्यादिश्रुतिरपि न स्वार्थे तात्पर्यवतीत्यर्थः । उदाहरणान्तरं सूचयति—वागादीति । देवासुरसंग्रामे देवास्तावदसुरानभिभवितुं यज्ञमुपक्रमिरे । वागादींश्चोद्गातृत्वेन वव्रिरे । तांश्च वागादीन्कल्याणसङ्गतेन पाप्मनाऽसुरा विविधुरित्यौद्गात्राख्यायिका च न यथाश्रुतार्था । वागादीनां वागभावेनोद्गातासामर्थ्यात् । किंत्वसुरैरर्षितत्वात्प्राणोत्क्रान्तौ देहपातप्रसिद्धेश्च प्राणः श्रेष्ठो भवतीति प्राणवैशिष्ट्यनिश्चये बुद्ध्यवतारशेषत्वेन सा कल्पिता । तथैव प्रकृतेऽपि सृष्ट्यादिश्रुतेः स्वार्थे तात्पर्याभावात्तत्कार्यस्य तद्व्यतिरेकेणाभावात्तदेवास्ती-

---

१ घ. °नत्वं सं° । २ छ. शक्यते क° । ३ झ. °नां तत्र प्र° । ४ झ. °दुपपत्त्यादि° । ५ च. नान्यथा क° । ६ ख. °न्यार्थावक° । ७ ग. झ. °रद्वयता° । ८ झ. °रूपं ता° । ९ ग. °कृष्येद्धाष्ये मृ° । झ. °कृष्ये मृ° । १० ख. छ. °द्धाव्य भाष्ये मृ° । ङ. °द्धाव्यं मृ° । ११ ग. झ. °दित्यध्याहृत्य श° । छ. °दिति श° । १२ झ. उत्पादितश्रु° । १३ छ. °नेच्छायां पु° । १४ ग. °या रूप° । १५ क. °यानि° । १६ छ. °र्थः संवाद° । १७ ग. झ. स्वार्थता° । घ. स्वार्थे ता° । १८ क. °वितुमु° । १९ ग. झ. °चक्रिरे । २० ग. झ °दीनकल्याण° । २१ ज. °णासंगतेन । २२ ग. झ. ख्याख्या° । २३ क. ख. °सुर° । २४ घ. °रैरुद्धर्षि° । ज. °रैराध° ।

त्यद्वैतबुद्ध्यवतारोपायत्वेन सृष्ट्यादिप्रक्रिया कल्पितेत्यर्थः । देवताशब्दप्रयोगाद्वैतनत्व वागादीनामिति मुख्यार्थत्वं संवादादिश्रवणस्य । अतोऽसिद्धमुदाहरणमिति शङ्कते–तदपीति । संवादविसंवादयोरसतो श्रुतेऽर्थे प्रामाण्यमर्थवादानामित्यङ्गीकारादविरोधापेक्षमेवार्थवादप्रामाण्यम् । इह तु परस्परव्याहतिदर्शनान्न प्रामाण्यमिति परिहरति–न शाखाभेदेष्विति । प्राणादीत्यादिशब्देन मुख्यप्राणातिरिक्ता वागादयो गृह्यन्ते । उक्तमेव समाधानं व्यतिरेकमुखेन(ण) विवृणोति–यदि हीति । क्वचिद्विवदमानानां प्राणानां स्वयमेव निर्णेतुमशक्तानां प्रजापतिमुपगतानां यस्मिन्नुत्क्रान्ते शरीरमिदं पापिष्ठतरमिव तिष्ठति स वः श्रेष्ठो भवतीति तेनोक्तानां प्रवासः श्रूयते । क्वचित्तु स्वातन्त्र्येण । यस्मिन्नुत्क्रान्ते शरीरमिदं पतति स नः श्रेयानित्यालोच्य प्रवासो व्यपदिश्यते । क्वचित्पुनर्वाक्चक्षुःश्रोत्रमनांसीति मुख्यप्राणातिरिक्ताश्चत्वारः श्रूयन्ते । क्वचित्त्वगादयोऽपीत्येवं विरुद्धानेकप्रकारेण संवादश्रवणमस्तीत्याह–श्रूयत इत्यिति । प्राणसंवादश्रुतीनां मिथो विरोधान्नास्ति स्वार्थे प्रामाण्यमित्युपसंहरति–तस्मादिति । उक्तदृष्टान्तानुरोधादुत्पत्तिवाक्यान्यपि न विवक्षितार्थानि । क्वचिदाकाशादिक्रमेण सृष्टिः क्वचिदग्न्यादिक्रमेण क्वचित्प्राणादिक्रमेण क्वचिदक्रमेणेत्येवं परस्परव्याहतिदर्शनादित्याह–तथेति । प्रतिकल्पं सृष्टिभेदस्येष्टत्वादुक्तश्रुतीनामपि प्रतिसर्गमन्यथात्वादृष्ट्यवस्थयाऽर्थवत्त्वं स्यादिति शङ्कते–कल्पेति । सिद्धे प्रामाण्ये व्यवस्था कल्प्यते । तदेव नाद्यापि सिद्धमित्युत्तरमाह–नेत्यादिना । तासां प्रयोजनवत्त्वं त्वयाऽपि स्वीकृतमित्याशङ्क्याऽऽह–यथोक्तेति । प्रयोजनान्तराभावं प्रकटयति–न हीति । प्राणादिभावप्राप्तये ध्यानार्थं प्राणादिसंकीर्तनमिति शङ्कते–तथा चेति । तं यथा यथोपासते तदेव भवतीति श्रुतेः । न्यायसाम्यात्कलहादिध्यानात्तत्प्राप्तिः फलं स्यात् । तच्चानिष्टमिति परिहरति–नेत्यादिना । प्राणसंवादश्रुतीनां प्राणवैशिष्ट्यावबोधावतारार्थत्वमुपपाद्य दार्ष्टान्तिकमुपसंहरति–तस्मादिति । उत्पत्त्यादिश्रुतीनामुत्पत्त्यादिपरत्वाभावे फलितं चतुर्थपादावष्टम्भेन स्पष्टयति–अत इति ॥ १५ ॥

आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।
उपासनोपदिष्टेयं तदर्थमनुकम्पया ॥ १६ ॥

---

१ ग. झ. °तनावत्त्वं वा° । २ क. °त्वं यागा° । ३ घ. ङ. श्रुत्यर्थे । ४ क. घ. व्यावृत्तिद° । ५ ग. झ. °न्ते स्वश° । ६ क. सर्व । श्रे° । ७ छ. °नांसि मु° । ८ ख. °चित्तु त्वगा° । ९ घ. ज. °गादीत्ये° । १० ज स्वार्थप्रा° । ११ छ. °स्पराह° । १२ क. °रापह° । १३ झ. °ति । संप्रति वाक्यं सृ° । १४ ग. प्रतिवाक्यं सृ° । १५ छ. °वस्थाः कल्पन्ते त° । १६ घ. °ति । य° । १७ ङ. °व च भ° । १८ ख. घ. °सामान्यात्क° । १९ क. प्राप्निफ° । २० ज. °र्थमु° ।

यदि परं एवाऽऽत्मा नित्यशुद्धबुद्धमुक्तस्वभाव एकः परमार्थः सन् "एकमेवाद्वितीयम्" इत्यादिश्रुतिभ्योऽसदन्यत्किमर्थमुपासनोपदिष्टा। "आत्मा वा अरे द्रष्टव्यः" "य आत्माऽपहतपाप्मा" "स क्रतुं कुर्वीत"। "आत्मेत्येवोपासीत" इत्यादिश्रुतिभ्यः। कर्माणि चाग्निहोत्रादीनि। शृणु तत्र कारणम्। आश्रमा आश्रमिणोऽधिकृताः। वर्णिनश्च मार्गगाः। आश्रमशब्दस्य प्रदर्शनार्थत्वात्त्रिविधाः। कथम्। हीनमध्यमोत्कृष्टदृष्टयः। हीना निकृष्टा मध्यमोत्कृष्टा च दृष्टिर्दर्शनमप्यैश्वर्यं येषां ते मन्दमध्यमोत्तमबुद्धिसामर्थ्योपेता इत्यर्थः। उपासनोपदिष्टेयं तदर्थं मन्दमध्यमदृष्ट्याश्रमाद्यर्थं कर्माणि च। न चाऽऽत्मैक एवाद्वितीय इति निश्चितोत्तमदृष्ट्यर्थं दयालुना वेदेनानुकम्पया सन्मार्गगाः सन्तः कथमेमामुत्तमामेकत्वदृष्टिं प्राप्नुयुरिति।

यन्मनसा न मनुते येनाऽऽहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
"तत्त्वमसि" "आत्मैवेदं सर्वम्" इत्यादिश्रुतिभ्यः॥ १६॥

उत्पत्त्यादिश्रुतिविरोधमद्वैते परिहृत्योपासनविध्यनुपपत्तिविरोधं परिहरति—आश्रमा इति। आश्रमिणो वर्णिनश्च कार्यब्रह्मोपासका हीनदृष्टयः। कारणब्रह्मोपासका मध्यमदृष्टयः। अद्वितीयब्रह्मदर्शनशीलास्तूत्तमदृष्टयः। एवमेतेषु त्रिविधेषु मध्ये तेषां मन्दानां मध्यमानां चोत्तमदृष्टिप्रवेशार्थं दयालुना वेदेनोपासनोपदिष्टा। तथा चोपासनानुष्ठानद्वारेणोत्तमामेकत्वदृष्टिं क्रमेण प्राप्ता उत्तमेष्वेवान्तर्भाविष्यन्तीत्यर्थः। श्लोकव्यावर्त्यामाशङ्क्यामाह—यदीति। तस्यैव परमार्थतः सत्त्वे प्रमाणमाह—एकमेवेति। द्वैतप्रतीतेर्मिथ्याद्वैतविषयत्वेनाविरोधमाह—असदिति। अद्वैतस्यैव वस्तुत्वे ध्यानविधिविरोधमाह—किमर्थेति। उपासनोपदेशमेव विशदयति—आत्मेति। तत्र हि निदिध्यासितव्य इत्युपासनोपदिश्यते। य आत्मेत्यादौ तु स विजिज्ञासितव्य इति ध्यानविधिः। स क्रतुमित्यत्र सशब्देन शमादिमानधिकारी परामृश्यते। अद्वैतस्यैव वस्तुत्वे कर्मविधिविरोधोऽपि प्रसरतीत्याह—कर्माणि चेति। किमर्थान्युपदिष्टानीति संबन्धः। अद्वैताधिकारिणोऽधिकार्यन्तरं प्रति विधिद्वयं सावकाशमिति परिहरति—

---

१ छ. झ. °रम ए°। २ ख. छ. °मार्थतः स°। ३ ङ. वेदगाः। ४ च झ. °मोत्तमद°। ५ घ. ङ. ज. °र्शनं सा°। ६ घ. ङ. ज. °मर्थमेषां। ७ क. °र्थ्यं च ये° ८ ख घ. °तीयमिति। ९ ज. °ना देवेना°। १० च. °मसीति, आ°। ११ ङ. °ध्यद°। १२ घ. ज. °ध्ये म°। १३ ज. °वाऽऽविर्भ°। १४ छ. झ. °ष्यतीत्य°। १५ ग. झ. °कमिति। १६ झ. °कार्यान्त°।

शृण्वन्ति । तैत्रेत्युपासनोपदेशः कर्मोपदेशश्च गृह्यते । तैदेव कारणमक्षरयोजनया प्रकटयति—आश्रमा इति । आश्रमशब्देनाऽऽश्रमिणो गृह्यन्तां वर्णिनस्तु कथं गृह्येरन्नित्याशङ्क्याऽऽह—आश्रमेति । शूद्रान्व्यावर्त्य त्रैवर्णिकानामेव ग्रहणार्थं मार्गगा इति विशेषणम् । त्रैविध्यमेवाऽऽकाङ्क्षाद्वारा स्फोरयति—कथमित्यादिना । कार्यब्रह्मविषयत्वान्निकृष्टत्वम् । मध्यमत्वं कारणब्रह्मविषयत्वात् । उत्कृष्टत्वमद्वैतविषयत्वादिति द्रष्टव्यम् । एवं पूर्वार्धं व्याख्यायोत्तरार्धं व्याकरोति—उपासनेति । कर्मोपदेशस्यापि तदर्थत्वमाह—कर्माणि चेति । व्यावर्त्यां शङ्कां दर्शयति—न चेति । वेदेनोपासनाद्युपदेशे मन्दानां मध्यमानां च कथमनुग्रहः सिध्यतीत्याशङ्क्याऽऽह—सन्मार्गगा इति । प्राप्नुयुरित्युपासनोपदिष्टा कर्माणि चेति पूर्वेण संबन्धः । उपास्यं ब्रह्मैव न भवतीति प्रतिषेधान्मन्दमध्यमदृष्टिविषयत्वमुपासनस्य प्रतिभातीत्याह—यन्मनसेति । अद्वैतदृष्टीनां तु वर्णाश्रमभेदाभिमानाभावादेव नोपासनं कर्म वा संभवतीत्याह—तत्त्वमसीति ॥ १६ ॥

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।
परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥ १७ ॥

शास्त्रोपपत्तिभ्यामवधारितत्वादद्वयात्मदर्शनं सम्यग्दर्शनं तद्बाह्यत्वान्मिथ्यादर्शनमन्यत् । इतश्च मिथ्यादर्शनं द्वैतिनां रागद्वेषादिदोषास्पदत्वात्कथं स्वसिद्धान्तव्यवस्थासु स्वसिद्धान्तरचनानियमेषु कपिलकणादबुद्धार्हतादिदृष्ट्यनुसारिणो द्वैतिनो निश्चिताः । एवमेवैष परमार्थो नान्यथेति तत्र तत्रानुरक्ताः प्रतिपक्षं चाऽऽत्मनः पश्यन्तस्तं द्विषन्त इत्येवं रागद्वेषोपेताः स्वसिद्धान्तदर्शननिमित्तमेव परस्परमन्योन्यं विरुध्यन्ते । तैरन्योन्यविरोधिभिरस्मदीयोऽयं वैदिकः सर्वानन्यत्वादात्मैकत्वदर्शनपक्षो न विरुध्यते यथा स्वहस्तपादादिभिः । एवं रागद्वेषादिदोषानास्पदत्वादात्मैकत्वबुद्धिरेव सम्यग्दर्शनमित्यभिप्रायः ॥ १७ ॥

अद्वैतदर्शनस्योपासनादिविधिविरोधाभावेऽपि मतान्तरैर्विरोधोऽस्तीत्याशङ्क्य तेषां भ्रान्तिमूलत्वान्नैवमित्याह—स्वसिद्धान्तेति । श्लोकस्य तात्पर्यं वक्तुं भूमिकां करोति—शास्त्रेति । तद्बाह्यत्वादित्यत्र तच्छब्देन शास्त्रोपपत्ती गृह्येते । द्वैतदर्शनस्य

---

१ क. तत्राप्युपा° । २ क. तदैव । ३ ज. स्फोटयति । ४ घ. ङ. ज. °वर्त्याश° । ज. °वर्त्यांश द° । ५ ग. ज. झ. वेदनो° । ६ घ. °देशम° । ७ ज. °नां च । ८ झ. °ष्टी वि° । ९ घ. °र्थं सि° । १० च. °द्धादि° । ११ च. °न्तप्रद° । १२ क. °षाना° ।

मिथ्यादर्शनत्वे हेत्वन्तरंपरत्वमवधारितस्य श्लोकस्य दर्शयति–इतश्चेति । इतःशब्दार्थमेव दर्शयति—द्वैतिनामिति । आदिशब्देन मदमानादयो गृहीताः । स्वीयं स्वीयं सिद्धान्तं व्यवस्थापयितुं तत्त्वज्ञानमधिकृत्य प्रवृत्तानां वादिनां कुतो दोषास्पदत्वमित्याक्षिपति—कथमिति । श्लोकाक्षरयोजनया परिहरति—स्वसिद्धान्तेत्यादिना । निश्चयमेव स्फोरयति—एवमेवेति । रागास्पदत्वेऽपि तेषां द्वेषास्पदत्वं कथमित्याशङ्क्याऽऽह—प्रतिपक्षमिति । उत्तरार्धं विभजते–स्वसिद्धान्तेति । यद्धि वादिनां प्रत्येकं स्वसिद्धान्ततत्वेनोपसंगृहीतं दर्शनं तन्निर्धारणार्थमन्योन्यं वादिनो विरोधमाचरन्तो दृश्यन्ते । न च तैरद्वैतदर्शनं विरुध्यमानमध्यवसीयते । + यथा स्वकीयकरचरणादिभिराघाते कदाचिदाचरितेऽपि द्वेषो न जायते । परबुद्ध्यभावात्तथा द्वैताभिमानिभिरुपद्रवे क्षुद्रे कृतेऽपि नाद्वैतदर्शिनस्तेषु द्वेषो जायते । सर्वानन्यत्वात्परबुद्ध्यभावादित्यर्थः । अद्वैतदर्शनस्य सम्यग्दर्शनत्वं प्रतिज्ञातं कथं प्रदर्शितया प्रक्रियया प्रतिपन्नमित्याशङ्क्याऽऽह—एवमिति ॥ १७ ॥

अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ।
तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥ १८ ॥

केन हेतुना तैर्न विरुध्यत इत्युच्यते । अद्वैतं परमार्थो हि यस्माद्द्वैतं नात्वं तस्याद्वैतस्य भेदस्तद्भेदस्तस्य कार्यमित्यर्थः । "एकमेव द्वितीयम्", "तत्तेजोऽसृजत" इति श्रुतेः । उपपत्तेश्च । स्वचित्तस्पन्दनाभावे समाधौ मूर्छायां सुषुप्तौ चाभावात् । अतस्तद्भेद उच्यते द्वैतम् । द्वैतिनां तु तेषां परमार्थतश्चापरमार्थतश्चोभयथाऽपि द्वैतमेव । यदि च तेषां भ्रान्तानां द्वैतदृष्टिरस्माकमद्वैतदृष्टिरभ्रान्तानाम् । तेनायं हेतुनाऽस्मत्पक्षो न विरुध्यते तैः । "इन्द्रो मायाभिः पुरुरूप ईयते" "न तु तद्द्वितीयमस्ति" इति श्रुतेः । यथा मत्तगजारूढ उन्मत्तं भूमिष्ठं प्रति गजारूढोऽहं वाहय मां प्रतीति ब्रुवाणमपि तं प्रति न वाहयत्यविरोधबुद्ध्या तद्वत् । ततः परमार्थतो

+ अत्र ङ नाम्नि पुस्तके टिप्पणम्—"भागवतैकादशस्कन्धे—जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत्" इति ।

१ ग. झ. °रम° । २ ग. झ. °न सह मा° । ३ छ. °ना । उत्तरार्धनि° । ४ ज. स्फोटयति । ५ छ. °षां दोषा° । ६ छ. °त्येकस्व° । ७ क °सिद्धान्तेनो° । ८ झ. °न्योन्यवा° । ९ ग. झ. °भव° । १० झ. °र्वान न्य° । ११ ग. झ. °तत्कि° । १२ क °नात्वमस्याद्वै° । १३ क. °दस्तस्य । १४ ङ. °र्थः । केन हेतुना तैर्न विरुध्यत इत्युच्यते । "ए° । १५ च. झ. °सौ वाऽभा° । १६ क. °तश्चो° । ङ. °तश्चापरार्थतश्चोभ° । १७ झ. °र्थश्चोभ° । १८ ज. °ते । "इ° । १९ ज. °हं गर्ग वा° ।

ब्रह्मविदात्मैव द्वैतिनाम् । तेनायं हेतुरसत्पक्षो न विरुध्यते तैः ॥१८॥

द्वैतपक्षेरद्वैतपक्षस्य विषयद्वारके विरोधेऽधिगम्यमाने कथमविरोधवाचोयुक्तिरित्याशङ्क्य स्वमतपर्यालोचनया तावदविरोधमाह—अद्वैतामिति । मिथ्याभूतेन द्वैतेनाद्वैतस्याविरोधेऽपि परमार्थभूतेन तेन विरोधः स्यादित्याशङ्क्य तथाविधं द्वैतमेव नास्तीति मत्वाऽऽह—तेषामिति । द्वैतिनां परमार्थत्वेनापरमार्थत्वेन च द्वैतमेव व्यवहारगोचरीभूतम् । तच्च संप्रतिपन्नद्वैतवन्मिथ्येत्येवं स्थिते न द्वैतेनाद्वैतस्य विरोधः शक्यशङ्को भवतीत्यर्थः । श्लोकप्रतिषेध्यं प्रश्नं करोति—केनेति । श्लोकाक्षराणामर्थमाचक्षाणो हेतुमाह—उच्यत इति । द्वैतस्याद्वैतकार्यत्वे प्रमाणमाह—एकमेवेति । श्रुतिप्रामाण्याद्द्वैतस्याद्वैतकार्यत्वावगमात्कार्यस्य च कारणाद्भेदेन सत्त्वनिषेधात्तत्सत्यमित्यवधारणान्नाद्वैतदर्शनं द्वैतदर्शनेन विरुद्धमित्यर्थः । अद्वैतदर्शनं द्वैतदर्शनैरविरुद्धमित्यत्रैव युक्तिमाह—उपपत्तेश्चेति । तामेवोपपत्तिं संक्षिप्य दर्शयति—स्वचित्तेति । सुषुप्त्याद्यवस्थायां स्वकीयचित्तस्पन्दनाभावे मिथ्याज्ञानोपरमे सति द्वैतदर्शनाभावाद्द्वैतं सिद्धम् । ततश्च स्वप्नवज्ज ग्रद्भेदानामुत्पत्तिदर्शनादित्युपपत्तेर्द्वैतमद्वैतकार्यं न च कारणं तत्कार्यप्रतिमासैर्विरुध्यते कार्यस्य वाचाऽऽरम्भणमात्रत्वात्कारणातिरेकेणाभावादित्यर्थः । तेषामित्यादिभागं विभजते—द्वैतिनां त्विति । परमार्थद्वैतांशेनाद्वैताविरोधमाशङ्क्य द्विधा व्यवहारेऽपि विमतस्य द्वैतस्य द्वैतत्वादेव संप्रतिपन्नवन्मिथ्यात्वसिद्धेर्न तेन विरोधोऽद्वैतस्येति मन्वानः सन्नाह—यदि चेति । भ्रान्तिमूलद्वैतदर्शनैरद्वैतदर्शनं प्रमाणमूलमविरुद्धमित्येतदृष्टान्तेनोपपादयति—यथेत्यादिना । कार्यकारणभूतयोर्द्वैताद्वैतयोरविरोधे सिद्धे फलितमाह—तत इति । अद्वैतिनां द्वैतिनां च प्रातिस्विकपक्षपर्यालोचनातो द्वैतपक्षैरद्वैतपक्षो विरुद्धो न भवतीति फलितमुपसंहरति—तेनेति ॥१८॥

मायया भिद्यते ह्येतन्नान्यथाऽजं कथंचन ।
तत्त्वतो भिद्यमाने हि मर्त्यतामृतं व्रजेत् ॥ १९ ॥

द्वैतमद्वैतभेद इत्युक्ते द्वैतमप्यद्वैतवत्परमार्थसदिति स्यात्कस्यचिदाशङ्क्येत

---

१ क. °ह्म चिदा° । २ च झ. °तिनस्तेना° । ३ ख. घ. ङ. ज. °धे ग° । ४ ङ. °नां द्वैते° । ५ घ. °मेवास्ती° । ६ झ. द्वैतिकानां । ७ घ. °द्वैतानां वि° । ८ छ. °रोधश° । ९ छ. °शङ्का भ° । १० झ. °श्नं प्रक° । ११ ग. झ. °र्शने द्वै° । १२ छ. °त्यत्रै° । १३ ग. झ. °प्रजाग्र° । १४ झ. °न्नमिथ्या° । १५ छ °वन्न मिथ्या° । १६ ख. ग. छ. झ. °मूलैर्द्वैत° । १७ ज. °रद्वैतविरुद्धत्वे सि° । १८ ख. घ छ °विरुद्धत्वे सि° । १९ ख. °नां प्रा° । २० झ. °द्वैत इ° ।

आह— यत्परमार्थसदद्वैतं मायया भिद्यते श्वेतचैमिरिकानेकचन्द्रवद्रज्जुः सर्पधारादिभिर्भेदैरिव न परमार्थतो निरवयवत्वादात्मनः । सावयवं ह्यवयवान्यथात्वेन भिद्यते । यथा मृद्घटादिभेदैः । तस्मान्निरवयवमजं नान्यथा कथंचन केनचिदपि प्रकारेण न भिद्यत इत्यभिप्रायः । तत्त्वतो भिद्यमाने ह्यमृतमजमद्वयं स्वभावतः सन्मर्त्यतां व्रजेत् । यथाऽग्निः शीतताम् । तच्चानिष्टं स्वभाववैपरीत्यगमनम् । सर्वप्रमाणविरोधात् । अजमव्ययमात्मतत्त्वं मायैव भिद्यते न परमार्थतः । तस्मान्न परमार्थसदद्वैतम् ॥ १९ ॥

अद्वैतमेव द्वैतात्मना परिणमते चेद्द्वैतमपि तात्त्विकं स्यादित्याशङ्क्याऽऽह— मायेति । विवर्तवादानङ्गीकारे दोषमाह—तत्त्वत इति । पूर्वार्धव्यावर्त्यामाशङ्कामादर्शयति—द्वैतमिति । तत्र पूर्वार्धाक्षराण्यवतार्य व्याकरोति—अत आहेति । विमतो भेदो मिथ्या भेदत्वाच्चन्द्रादिभेदवदित्यर्थः । विमतं तत्त्वतो भेदरहितम् । निरवयवत्वान्नित्यत्वादजत्वाच्च व्यतिरेकेण मृदादिवदित्याह—नेत्यादिना । निरवयवत्वेऽपि वस्तुनः स्फुटनधर्मत्वमाशङ्क्याऽऽह—सावयवं हीति । उक्तमनुमानं निगमयति—तस्मादिति । अन्यथा परमार्थत्वेनेत्यर्थः । पुनर्नञनुकर्षणमन्वयार्थं, कार्यत्वधर्मत्वांशत्वादिरत्र प्रकारोऽभिप्रेतः । विपक्षे दोषं वदन्द्वितीयार्धं विवृणोति—तत्त्वत इति । प्रसङ्गस्येष्टत्वमाशङ्क्य निराचष्टे—तच्चेति । विवर्तवादमुपसंहरति—अजामिति । स्थिते विवर्तवादे फलितमाह—तस्मादिति ॥ १९ ॥

अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो भावो मर्त्यतां कथमेष्यति ॥ २० ॥

ये तु पुनः केचिदुपनिषदूव्याख्यातारो ब्रह्मवादिनो वावदूका अजातस्यैवाऽऽत्मतत्त्वस्यामृतस्य स्वभावतो जातिमुत्पत्तिमिच्छन्ति परमार्थत एव तेषां जातं चेत्तदेव मर्त्यतामेष्यत्यवश्यम् । स चाजातो ह्यमृतो भावः स्वभावतः सन्नात्मा कथं मर्त्यतामेष्यति । न कथंचन मर्त्यत्वं स्वभाववैपरीत्यमेष्यतीत्यर्थः ॥ २० ॥

स्वपक्षमुक्त्वा स्वयूथ्यपक्षमनुभाष्य दूषयति—अजातस्येति । अनुवादविभागं विभजते—ये त्विति । स्वभावत एवाजातस्य स्वभावत एवामृतस्य चाऽऽत्मत-

---

१ ङ. °द्रज्जुस° । २ क. सर्पादिधा° । ३ ज. °यवं ह्य° । ४ ङ. °यथा भि° । ५ ङ. °णतं चे° । ६ ङ. °शवत्वा° । ७ च. °तं चैतदेव ८ क. °मतभा° । ९ क. °र्त्यत्वस्व° । १० ङ. ग. ज. ङ. °दभा° । ११ ङ. एव जा° । १२ ङ. °वाऽजस्य ।

स्वस्य परमार्थत एव जातिमुत्पत्तिं ये स्वयूथ्याः स्वीं कुर्वन्तीत्यर्थः। जातस्य हि ध्रुवो मृत्युरिति न्यायेन दूषयति–तेषामिति। अजातो हीत्याद्यक्षराण्युक्तेऽर्थे योजयति–स चेति ॥ २० ॥

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥ २१ ॥

यस्मान्न भवत्यमृतं मर्त्यं लोके नापि मर्त्यममृतं तथा। ततः प्रकृतेः स्वभावस्यान्यथाभावः स्वतः प्रच्युतिर्न कथंचिद्भविष्यति। अग्नेरिवौष्ण्यस्य॥२१॥

पदार्थानां स्वभावविपरित्यागमनमनुपपन्नमित्युक्तं प्रपञ्चयति–न भवतीति। तत्र पूर्वार्धं हेतुत्वेन व्याचष्टे—यस्मादिति। उत्तरार्धं हेतुमत्त्वेन योजयति–तत इति। यथाऽग्नेः स्वभावभूतस्योष्णत्वस्यान्यथात्वं शैत्यगमनमयुक्तं तथाऽन्यत्रापि स्वभावस्यान्यथात्वमनुचितं स्वरूपनाशप्रसङ्गादित्यर्थः ॥ २१ ॥

स्वभावेनामृतो यस्य भावो गच्छति मर्त्यताम्।
कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥ २२ ॥

यस्य पुनर्वादिनः स्वभावेनामृतो भावो मर्त्यतां गच्छति परमार्थतो जायते तस्य प्रागुत्पत्तेः स भावः स्वभावतोऽमृत इति प्रतिज्ञा मृषैव। कथं तर्हि कृतकेनामृतस्तस्य स्वभावः कृतकेनामृतः स कथं स्थास्यति निश्चलोऽमृतस्वभावतया न कथंचित्स्थास्यत्यात्मजातिवादिनः सर्वदाऽजं नाम नास्त्येव सर्वमेतन्मर्त्यम्। अतोऽनिर्मोक्षप्रसङ्ग इत्यभिप्रायः॥ २२ ॥

ननु ब्रह्म कारणरूपेण प्रागुत्पत्तेरमृतमपि कार्याकारेणोत्पत्त्युत्तरकालं मर्त्यतां गमिष्यति। ततो रूपभेदादुभयभावविरुद्धमिति तत्राऽऽह–स्वभावेनेति। पूर्वार्धं साध्याहारं योजयति–यस्येति। प्रागवस्थायामपि कारणस्यैव कार्याकारेण जन्मयोग्यतया मर्त्यत्वावगमान्मृषैव प्रतिज्ञा स्यादित्यर्थः। कथं तर्हि तस्य प्रतिज्ञा युक्तेत्याशङ्क्य कृतकेन मर्त्यविलयेनामृतस्तस्य वादिनः स कारणाख्यो भावो भवतीति प्रतिज्ञा युक्तेत्या-

---

१ ख. ङ. च. छ. ज. °णुक्तार्थे। २ क. मर्त्यलो°। ३ च °था। यतः। ४ क. °कृते स्व°। ५ च. °भावः स्व° । ६ क. °ष्टे–तस्या°। ७ ख. °त्वेन। ८ क °तश्चेष्टत्व°। ९ च. ज. झ. °तेः स्व°। १० ज. °भावोऽमृ°। ११ ख. घ. ज. °स्य भा°। ङ. छ °स्य स भा°। १२ च °तः सन्कथं। १३ ख. घ. ज झ. °वस्तया। १४ ब. घ. छ. ज इति भावः ॥२२॥ १५ ग. झ. °यतः, वि°। १६ ग. झ. तदाह। १७ ङ. °तस्य।

ह-कथमित्यादिना । भवतु प्रलयावस्थायाममृतावस्थापरिणामेनामृतत्वं ततो वा किं स्यादित्याशङ्क्याऽऽह-कृतकेनेति । कृतकत्वस्य यत्कृतकं तदनित्यमिति विनाशित्वेन व्याप्तत्वादित्यर्थः । किंचास्यामवस्थायां कार्यमात्रं वस्त्वित्यजं ब्रह्मास्मीति ज्ञानाभावान्मोक्षो न स्यादित्याह-आत्मेति ॥ २२ ॥

भूततोऽभूततो वाऽपि सृज्यमाने समा श्रुतिः ।
निश्चितं युक्तियुक्तं च यत्तद्भवति नेतरत् ॥ २३ ॥

नन्वजातिवादिनः सृष्टिप्रतिपादिका श्रुतिर्न संगच्छते प्रामाण्यम् । बाढं विद्यते सृष्टिप्रतिपादिका श्रुतिः । सा त्वन्यपरा । उपायः सोऽवतारयेत्यवोचाम । इदानीमुक्तेऽपि परिहारे पुनश्चोद्यपरिहारौ विवक्षितार्थे प्रति सृष्टिश्रुत्यक्षराणामानुलोम्यविरोधाशङ्काभावपरिहारार्थौ । भूततः परमार्थतः सृज्यमाने वस्तुन्यभूततो मायया वा मायादिनेव सृज्यमाने वस्तुनि समा तुल्या सृष्टिश्रुतिः । ननु गौणमुख्ययोर्मुख्ये शब्दार्थपतिपत्तिर्युक्ता । न । अन्यथा सृष्टेरप्रसिद्धत्वान्निष्पयोजनत्वाच्चेत्यवोचाम । अविद्यासृष्टिविषयैव सर्वा गौणी मुख्या च सृष्टिर्न परमार्थतः । " सर्वाह्यभ्यन्तरो ह्यज. " इति श्रुतेः । तस्माच्छ्रुत्या निश्चितं यदेकमेवाद्वितीयमजममृतमिति युक्तियुक्तं च । युक्त्या संपन्नं तदेवेत्यवोचाम पूर्वैर्ग्रन्थैः । तदेव श्रुत्यर्थो भवति नेतरत्कदाचिदपि ॥ २३ ॥

परिणामवादस्य सृष्टिश्रुत्यनुसारेण स्वीकार्यत्वमाशङ्क्य निरस्यति-भूतत इति । परिणामवादे विकारवादे च सृष्टिश्रुतेर्निर्विशेषाद्वैतानुगाधश्रुतियुक्तिविरुद्धविवर्तवादस्यैव स्वीकर्तव्यतेति भावः । सृष्टिश्रुतेरद्वैतानुगुण्येन समायुक्तत्वमनुगृहीतमद्वैतमेवाभ्युपगन्तव्यमिति फलितमाह निश्चितमिति । श्लोकव्याख्यार्थं शङ्कां दर्शयति-नन्विति । यद्यात्मा कार्याकारेण न जायते तर्हि सृष्टिश्रुतिरश्लिष्टा स्यादित्यर्थः । सृष्टयनुवादिनी श्रुतिरस्तीत्यङ्गीकरोति यद्यपीति । तस्या मिथ्यासृष्ट्यनुवादित्वेन कथमुपपत्तिरित्याशङ्क्याऽऽह—सा त्विति । कथमद्वैतपरत्वेन सृष्टिश्रुतेरुपपत्तिरित्याशङ्क्याऽऽह-उपाय इति । यदि सृष्टिश्रुतेरद्वैतपरत्वेन तात्पर्यमभावी अवस्तादेवोक्तौ तर्हि पुनश्चोद्यं तत्परिहारश्चायुक्तौ पुनरुक्तिरित्याशङ्क्याऽऽह— इदानीमिति । मिथ्या-

---

ज. °क्तिमुक्तं । २ ख. °दिकश्च° । ३ ज. °या मा° । ४ क मायां वि° । ५ च. °त्तिर्न युक्तेति चेत् । न । ६ झ. °मार्थः स° । ७ छ पूर्वग्रन्थैः । ८ ङ. °व भ° । ९ घ. ङ. ज. °वर्त्ता-श्च° । झ. °वर्त्यामाश्च° । १० क छ. °रश्च यु° ।

सृष्टिवादे श्रुतिपदानाममृजतामवदित्यादीनामसामञ्जस्यविरोधाशङ्कायां तावन्मात्रं परिहर्तुं पुनश्चोद्यपरिहारावित्यर्थः। श्लोकस्य तात्पर्यमुक्त्वा पूर्वार्धाक्षराणि व्याकरोति—भूत इति। माया ह्येषा मया सृष्टेत्यादिवत्तत्तेजोऽमृजतेति श्रुतेः। सच्चेत्यच्चामवदिति श्रुतिस्तु देवदत्तो व्याघ्रोऽभवदितिवत्। न च सत्यत्वं विशेषणमत्रोपलभ्यते। तेन मायामय्यां सृष्टाविष्टायामपि सृष्टिश्रुतिः सृष्टेत्यर्थः। गौणमुख्ययोर्मुख्ये संप्रत्यय इति न्यायमाश्रित्य शङ्कते—नन्विति। अग्निर्माणवक इत्यत्र माणवकेऽग्निशब्दप्रयोगेऽप्यग्निमानयेत्यादिप्रयोगे प्रथमं वह्निमतीतेर्मुख्यमेव प्रथमं प्रतीतिमातीति मुख्ये पदव्युत्पत्तेर्मुख्यार्थतया सत्या सृष्टिरेष्टव्येत्यर्थः। मुख्यसृष्ट्यङ्गीकारेऽपि सत्या सृष्टिर्न सिध्यतीति। अस्मत्पक्षे सत्यायाः सृष्टेः सृष्टिशब्दार्थत्वेनाप्रसिद्धत्वादिति परिहरति—नेत्यादिना। लौकिकानां मुख्यसृष्टेः सत्यसृष्टित्वेन प्रसिद्धत्वेऽपि फलाभावान्न तत्र श्रुतितात्पर्यमित्याह—निष्प्रयोजनत्वाच्चेति। अन्यथा सृष्टेरप्रसिद्धत्वमेव स्पष्टयति—अविद्येति। गौणी स्वप्ने रथादिसृष्टिः। मुख्या जागरे घटादिसृष्टिः। सर्वाऽप्यविद्यावस्थायामेव तस्यां सत्यामेव भावान्न तत्त्वदृष्ट्या काऽपि सृष्टिः संभवति। तथाभूतस्यान्यथाभूतस्य स्वतः परतो वा वस्तुनोऽन्यथाभावासंभवात्तदतिरेकेण च सृष्टेरयोगादित्यर्थः। वस्तुस्वरूपालोचनया वास्तव्याः सृष्टेरशिष्टत्वे श्रुतिमनुकूलयति—सबाह्येति। सृष्टेरविद्यौविद्यमानत्वेऽपि किं वस्तु विवक्षितमित्याशङ्क्योत्तरार्धं विभजते—तस्मादिति। निरवयवत्वं विभुत्वमित्यादियुक्तिः। तेनाद्वैतमेव श्रुतितात्पर्यगम्यं न द्वैतमिति फलितमाह—तदेवेति ॥ २३ ॥

नेह नानेति चाऽऽम्नायादिन्द्रो मायाभिरित्यपि।
अजायमानो बहुधा मायया जायते तु सः ॥ २४ ॥

कथं श्रुतिनिश्चय इत्याह—यदि हि भूतत एव सृष्टिः स्यात्ततः सत्यमेव नाना वस्त्वस्तीति तदभावप्रदर्शनार्थमाम्नायो न स्यात्। अस्ति च "नेह नानाऽस्ति किंचन" इत्यादिराम्नायो द्वैतभावप्रतिषेधार्थः। तस्मादात्मैकत्वप्रतिपत्त्यर्थं कल्पिता सृष्टिरभूतैव प्राणसंवादवत्। "इन्द्रो मायाभिः"

---

१ ग. ज. °मज्ञ°। २ ग. झ. °रोधश°। ३ ज. °त इ°। ४ घ. °च सच्चा°। ५ क. °ति। तत्र न। ६ ग. घ. °णमेवोप°। ७ क °ख्यें कार्यसं°। ८ क. °योगोऽप्य°। ९ ज. °या सृ°। १० ख. सिध्येत्। ग घ. झ. सिध्येदस्मिन्पक्षे। छ. सिध्यतीत्यस्मिन्पक्षे। ज. सिध्यत्यस्मिन्पक्षे। ११ ग. °व स्फुटय°। १२ घ. °दिदृष्टिः। १३ घ. °सृष्टिरेवं यदि सृष्टिः स°। १४ ख. घ. ङ. छ. ज. °तस्थ स्व°। १५ ख. घ. ज. °द्यायां वि°। १६ क. °त ए°। १७ ख. घ. ङ ज. °नार्थ आत्मा°। १८ घ. °त्यर्थं क°।

इत्यभूतार्थप्रतिपादकेन मायाशब्देन व्यपदेशात् । ननु प्रज्ञावचनो मायाशब्दः। सत्यम्। इन्द्रियप्रज्ञाया अविद्यामयत्वेन मायात्वाभ्युपगमाददोषः । मायाभिरिन्द्रियप्रज्ञाभिरविद्यारूपाभिरित्यर्थः । " अजायमानो बहुधा विजायते " इति श्रुतेः । तस्मान्माययैव जायते तु सः । तुशब्दोऽवधारणार्थः—मायय्येवेति । न ह्यजायमानत्वं बहुधा जन्म चैकत्र संभवति । अग्नाविव शैत्यमौष्ण्यं च । फलवत्त्वाच्चाऽऽत्मैकत्वदर्शनमेव श्रुतिनिश्चितोऽर्थः । "तत्र को मोहः कः शोक एकत्वमनुपश्यतः " इत्यादिमन्त्रवर्णात् । " मृत्योः स मृत्युमाप्नोति " इति निन्दितत्वाच्च सृष्ट्यादिभेददृष्टेः ॥ २४ ॥

सृष्टेर्मृषात्वस्पष्टीकरणद्वारेणाद्वैतमेव श्रुत्यर्थतया निर्धारयितुं श्रौतनिश्चयमेव विवृणोति—नेहेति । आकाङ्क्षां प्रदर्श्य श्लोकाक्षराणि व्याकरोति—कथमित्यादिना । तत्राऽऽद्यपादे व्यतिरेकं दर्शयित्वा पुनरन्वयाख्यानेन व्याचष्टे—यदि हीति। द्वैतभावश्चेत्प्रतिषिध्यते कथं तर्हि सृष्टिरुपदिश्यते तत्राऽऽह—तस्मादिति । यथा प्राणवैशिष्ट्यदृष्ट्यर्थं प्राणसंवादः श्रुतिषु कल्प्यते तथा सृष्टिरेकत्वप्रतिपत्त्यर्थत्वेन कल्पिता । वास्तव्याः सृष्टेरयोगस्योपदिष्टत्वादित्यर्थः । कल्पिता सृष्टिरित्यत्र हेत्वन्तरं दर्शयन्द्वितीयं पादमवतार्य तात्पर्यमाह—इन्द्र इति । मायाशब्देन सृष्टेर्व्यपदेशादसौ कल्पिता युक्तेति शेषः । अभिधानग्रन्थे प्रज्ञानामसु पाठान्मायाशब्दो मिथ्यार्थो न भवतीति शङ्कते—नन्विति । मायाशब्दस्य प्रज्ञानामसु क्वचित्कं पाठमङ्गीकरोति—सत्यमिति । कथं तर्हि मिथ्यार्थत्वं तत्राऽऽह—इन्द्रियेति । न हि मायाशब्दिता प्रज्ञा ब्रह्मचैतन्यम् । भूयश्चान्ये विश्वमायानि * वृत्तिरित्यादौ निवृत्तिश्रवणात् । किंत्वसाविन्द्रियजन्या तस्याश्चाविद्यान्वयव्यतिरेकानुविधायितया विद्यात्वेन मिथ्यात्वान्मायाशब्दस्य मिथ्यार्थत्वे नानुपपत्तिरित्यर्थः । तात्पर्यार्थमुक्त्वा तत्रैवाक्षरानुगुण्यमाह—मायाभिरिति । पुरुरूपः सन्नीयत इति संबन्धः । मायामयी सृष्टिरित्यत्र हेत्वन्तरपरत्वेन तृतीयपादमवतारयति—अजायमान इति । अजा-

* ङ. निवृत्तिरेव त्रिधा नश्यति चाऽऽत्ममायेति श्वेताश्वरोपनिषदि, इत्यादौ निवृत्तिश्र° ।

१ ख. ङ. छ °त्यप्यभू° । २ झ. °न सृष्टेर्व्यप° । ३ ज. झ. °द्यात्वे । ४ छ. शैत्यौष्ण्यं । ५ ग. झ. °र्धारितुं । ६ ज. आकाङ्क्षं । ७ ग. झ. °त्राऽऽद्यं पादं व्य° । ८ ज. °शिष्टयार्थं । ९ ख. °स्तव्यायाः सृ° । १० झ. °पपादितत्वादि° । ११ झ. °र्थं मा° । १२ घ. ज. °त्पर्यार्थमा° । १३ ग. झ. °र्थत्वं । १४ ख. °रिति नि° । १५ झ. °जन्यतया तृ° । १६ ख. °यामयत्वेन । १७ ग. ज. °त्वार्थ° । १८ झ. °रत्वे° ।

थमानस्य बहुधा विजायमानत्वं विरुद्धमित्याशङ्क्य चतुर्थपादमुत्थापयति-तस्मा-दिति । अश्रुतस्य कथमेवकारस्याऽऽप्तः स्यादित्याशङ्क्याऽऽह—तुशब्द इति । अवधारणरूपमर्थमेवाभिनयति—माययैवेति । कस्मादित्थमवधार्यते वास्तवे जन्मनि का वस्तुक्षतिरित्याशङ्क्याऽऽह—न ह्यजेति । आत्मैकत्वज्ञानमेव सृष्टिश्रुतितात्पर्य-गम्यं सृष्टिस्तु तच्छेषत्वादविवक्षितेत्यत्र हेत्वन्तरमाह—फलवत्त्वाच्चेति । तस्य फलत्वे प्रमाणमाह—तत्रेति । एकत्वमाचार्योपदेशमनुपश्यतः साक्षात्कुर्वतस्तत्रैकत्वसाक्षात्कारे सति शोकमोहोपलक्षितः संसारो न भवतीत्यर्थः । न केवलं विफलत्वाद्धेयदृष्टिरविव-क्षिता किंतु निन्दितत्वेन निषिद्धत्वादनर्थकैरत्वाच्चेत्याह—मृत्योरिति ॥ २४ ॥

संभूतेरपवादाच्च संभवः प्रतिषिध्यते ।
को न्वेनं जनयेदिति कारणं प्रतिषिध्यते ॥ २५ ॥

"अन्धं तमः प्रविशन्ति ये संभूतिमुपासते" इति संभूतेरुपास्यत्वापवादा-त्संभवः प्रतिषिध्यते । न हि परमार्थतः संभूतायां संभूतौ तदपवाद उपपद्यते । ननु विनाशेन संभूतेः समुच्चयविधेयर्थः संभूत्यपवादः । "यथाऽन्धं तमः प्रवि-शन्ति तेऽविद्यामुपासते" इति । सत्यमेव देवतादर्शनस्य संभूतिविषयस्यैव विनाशशब्दवाच्यस्यैव कर्मणः समुच्चयविधानार्थः संभूत्यपवादः । तथाऽपि विनाशाख्यस्यैव कर्मणः स्वाभाविकाज्ञानप्रवृत्तिरूपस्य मृत्योरतितरणार्थत्वबोधे-वतादर्शनकर्मसमुच्चयस्य पुरुषसंस्कारार्थस्य कर्मफलरागप्रवृत्तिरूपस्य साध्य-साधनैषणाद्वयलक्षणस्य मृत्योरतितरणार्थत्वम् । एवं ह्येषणाद्वयरूपान्मृत्यो-रशुद्धेर्वियुक्तः पुरुषः संस्कृतः स्यादतो मृत्योरतितरणार्था देवतादर्शनकर्म-समुच्चयलक्षणा ह्यविद्या । एवमेवैषणालक्षणादविद्याया मृत्योरतितीर्णस्य विरक्तस्योपनिषच्छास्त्रार्थालोचनपरस्य नान्तरीयकी परमात्मैकत्वविद्योत्प-त्तिरिति पूर्वभाविनीमविद्यामपेक्ष्य पश्चाद्भाविनी ब्रह्मविद्याऽमृतत्वसाधि-नैकेन पुरुषेण संबध्यमानाऽविद्यया समुच्चीयत इत्युच्यते । अतोऽन्यार्थ-

---

१ ज. °रस्यापवादः स्या° । २ छ. °पमेवार्थं° । ३ ग. झ. °दित्यवतार्यं° । ४ क. नित्य-त्वेन । ५ ग. झ. °कत्वा° । ६ क. °ति श्रुतेः सं° । ७ च. °विधानार्थः । ८ ज. °ति । मैवं विना सत्यदे° । ९ ज. °स्य शब्द° । १० छ. °स्य च क° । ११ क. °यलक्षणाद° । १२ घ. मृत्युर° । १३ च. °णावि° । १४ क. °विषया । १५ ख. च. °धनमेकं° ।

त्वादमृतत्वसाधनं ब्रह्मविद्यामपेक्ष्य निन्दार्थ एव भवति संभूत्यपवादः। यद्यप्यशुद्धिविरोगहेतुरतन्निष्ठत्वात् । अत एव संभूतेरपवादात्संभूतेरापेक्षिकमेव सत्त्वमिति । परमार्थमदात्मैकत्वमपेक्ष्यामृताख्यः संभवः प्रतिषिध्यते । एवं मायानिर्मितस्यैव जीवस्याविद्यया प्रत्युपस्थापितस्याविद्यानाशे स्वभावरूपत्वात्परमार्थतः को न्वेनं जनयेत् । न हि रज्ज्वामविद्यारोपितं सर्पं पुनर्विवेकतो नष्टं जनयेत्कश्चित् । तथा न कश्चिदेनं जनयेदिति को न्वित्याक्षेपार्थत्वात्कारणं प्रतिषिध्यते । अविद्योद्भूतस्य नष्टस्य जनयितृ कारणं न किंचिदस्तीत्यभिप्रायः । नायं कुतश्चिन्न बभूव कश्चित् " इति श्रुतेः ॥२५॥

मेदद्दष्टेर्मिथ्यात्वे हेत्वन्तरमाह— संभूतेरिति । सम्यग्भूतिरैश्वर्यं यस्याः सा संभूतिर्देवता हिरण्यगर्भाख्या । तस्याश्च कार्यमध्ये श्रेष्ठाया निन्दितत्वात्प्रधानमल्लनिबर्हणन्यायेन संभवशब्दितं कार्यमेव निषिध्यते । तथा च सिद्धं तस्यावस्तुत्वमित्यर्थः । कारणप्रतिषेधेन तदवस्तुत्वसिद्धेश्च यथोक्तार्थसिद्धिरित्याह—को न्वेनमिति । पूर्वार्धं व्याकरोति- अन्धमिति । संभूत्युपासनाया मन्त्रार्धेनाऽऽद्येन निन्दां विधाय ततो भूय इवेत्यादिनोत्तरार्धेन संभूतेरुक्ताया देवताया हेयत्वमुपपाद्यते ततश्च प्रधानभूतदेवतोपास्यत्वापवादात्ततोऽवाक्तनं सर्वमेव संभवशब्दितं कार्यमात्रं निध्यते । तथा च तदवस्तुत्वसिद्धिरित्यर्थः । संभूतेरपवादेऽपि तस्मिन्मिथ्यात्वनियमाभावान्न कार्यमात्रस्य मिथ्यात्वं शक्यं प्रतिज्ञातुमित्याशङ्क्याऽऽह—न हीति । संभूतिनिन्दा तदवस्तुत्वख्यापनार्था न भवति किंतु विनाशेन कर्मणा देवतोपासनस्य समुच्चयविध्यर्था । समुच्चयविधानस्य फलवत्त्वादिति शङ्कते—नन्विति । अपवादस्य समुच्चयविध्यर्थत्वे दृष्टान्तमाह— यथेति । अत्र खल्वविद्याशब्दितकर्मापवादो विद्याकर्मणोः समुच्चयविध्यर्थः स्थितो विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति श्रवणादित्यर्थः । उक्तं चोद्यमनुजानाति—सत्यमिति । तर्हि संभूत्यपवादेस्तदवस्तुत्वख्यापको न भवतीत्युक्तं स्थितमेवेत्याशङ्क्य समुच्चयस्याविद्यावस्थायामवस्थितफलवत्त्वाद्यदवस्तुत्वं संभूत्यादेर्निन्दाधीनमुक्तं तत्तदवस्थमेवेति मन्वानः सन्नाह—तथाऽपीति । यथाऽग्निहोत्रादेः शास्त्रीयस्य कर्मणोऽशास्त्रीयप्रवृत्तिरूपमृत्युतरणार्थत्वं तथा साधना-

---

१ झ. सत्यमि° । २ ङ. झ. °ख्यानृत° । ३ छ. °नाशे भाव° । घ. °नाशः स्व° । ४ घ. ङ. च. छ. ज. °द्याध्यारो° । ५ ख. °पितस° । ६ झ. °श्चिन्न क° । ७ ख. °श्वर्यं य° । ८ ग झ. °धेन नि° । ९ ज. °ब्दितका° । १० ख. ग छ. झ. तन्मि° । ११ ख. °तिर्निन्दा । १२ ग. घ. झ. °लत्वा° । १३ क. न हीति । १४ ग. झ. °दस्तव° । १५ घ. झ. °निषेधाधी° । १६ ग. झ. तद° । १७ ख. झ. °त्तिस्वरू° ।

द्येषणारूपमृत्युतरणार्थत्वं समुच्चयस्यापि वाच्यम् । तथा च संभूत्यादेरवस्तुत्वमविरुद्धमित्यर्थः । मृत्युतरणार्थत्वे संस्कारार्थत्वं कथमित्याशङ्क्याऽऽह—एवं हीति । कामचारैकामवादैकाममक्षैणादिलक्षणस्याभावैकप्रवृत्तिरूपाशुद्धिवियोगः संस्कारो यथा नित्याग्निहोत्रादिफलं तथा निष्कामेणानुष्ठितसमुच्चयफलं काम रूपाशुद्धिव्यावृत्तिरित्यर्थः । अविद्यया मृत्युं तीर्त्वेति मन्त्रे मृत्युतरणहेतुरविद्येति श्रवणात्संभूत्याऽमृतमश्नुत इति च संभूतेरमृतत्वफलाभिलाषात्कथं समुच्चयफलं मृत्योरतितरणमित्याशङ्क्याऽऽह—अत इति । यतो न समुच्चयान्मुख्यममृतत्वं घटते तस्य विद्ययाऽमृतमश्नुत इति वक्ष्यमाणत्वात् । अतः समुच्चयलक्षणाऽविद्याऽविद्यया मृत्युं तीर्त्वेत्यत्र निर्दिश्यते । आपेक्षिकमृत्युतरणहेतुत्वसंभवादित्यर्थः । यद्यविद्याशब्देन समुच्चयो विवक्ष्यते कथं तर्हि विद्यां चाविद्यां चेत्यनेन विद्याविद्ययोः समुच्चयो निर्दिश्यते । न हि देवतादर्शनकर्मसमुच्चयस्य ब्रह्मविद्यायाः समुच्चयः संभवतीत्याशङ्क्याऽऽह—एवमिति । नान्तरीयकत्वमवश्यंभावित्वं प्रतिबन्धकाभावे कार्योत्पत्तेरुपपत्तेरित्यर्थः । एवं मन्त्रार्थे स्थिते प्रकृते फलितमाह—अत इति । अन्यार्थत्वं समुच्चयस्याशुद्धिक्षयहेतुत्वं तच्चेदिष्टं किमित्यपवादस्तत्राऽऽह—यद्यपीति । तथाऽप्यतन्निष्ठत्वात्परमार्थामृतत्वफलैत्वाभावात्तदपवादसिद्धिरित्यर्थः । अपवादफलं दर्शयन्नाद्यभागविभजनमुपसंहरति—अत एवेति । को न्वेनं जनयेत्पुनरिति श्रुत्यर्थमाचक्षाणो द्वितीयार्धं विभजते—एवं मायेत्यादिना । उक्तमर्थं दृष्टान्तेन स्पष्टयति—न हीति । न कश्चिदेनं जनयेदिति कारणं प्रतिषिध्यत इति संबन्धः । प्रश्नार्थे किंशब्दे दृश्यमाने कथं कारणप्रतिषेधसिद्धिरित्याशङ्क्याऽऽह—को न्विति । अक्षरार्थमुक्त्वा द्वितीयार्धस्य तात्पर्यमाह—अविद्येति । ततश्चेदुद्भूतो जीवः कथं तस्य जनयितृ कारणं नेत्युच्यते व्याघातादित्याशङ्क्याऽऽह—नष्टस्येति । जीवस्य जनयितृकारणाभावे प्रमाणमाह—नायमिति । तस्याविद्यामन्तरेण स्वतो जन्माभावं सूचयति—न बभूवेति ॥ २५ ॥

स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।
सर्वमग्राह्यभावेन हेतुनाऽजं प्रकाशते ॥ २६ ॥

---

१ ग. ज झ. °रवा । २ ग. घ. झ. °दभ° । ३ छ °क्षणत्वा° । ४ घ. °रूपासिद्धि° । ङ. °रूपविशु° । ५ ग. °तत्वम° । ६ घ. ङ. ज. °त्यत्राविद्या नि° । ७ क. °ते । अपेक्षितमृ° । ८ क. °ष्यपि वि° । ९ ग. झ. °विद्यया श° । १० ग झ °विद्यया स° । ११ ख. °यच्चत्वं सं° । १२ क °त्तेरि° । १३ ग झ अन्यथार्थ° । १४ क. छ. °द्धिरुपहे° । १५ ग °चेदनिष्टं १६ क. °र्थाप्नुत° । १७ ख ग छ. ज °लक्षत्वाभा° । १८ क. °देव ज° । १९ घ. ज को वेति । ग. छ. को न्विति ।

सर्वविशेषप्रतिषेधेन " अथात आदेशो नेति नेति " इति प्रतिपादितस्याऽऽत्मनो दुर्बोध्यत्वं मन्यमाना श्रुतिः पुनः पुनरुपायान्तरत्वेन तस्यैव प्रतिपिपादयिषया यद्यदुव्याख्यातं तत्सर्वं निह्नुते । ग्राह्यं जनिमद्बुद्धिविषयमपलपत्यर्थात् " स एष नेति नेति " इत्यात्मनोऽदृश्यतां दर्शयन्ती श्रुतिरुपायस्योपेयनिष्ठतामजानत उपायत्वेन व्याख्यातस्योपेयवद्ग्राह्यता मा भूदित्यग्राह्यभावेन हेतुना कारणेन निह्नुत इत्यर्थः । ततश्चैवमुपायस्योपेयनिष्ठतामेव जानत उपेयस्य च नित्यैकरूपत्वमिति तस्य सबाह्याभ्यन्तरमजमात्मतत्त्वं प्रकाशते स्वयमेव ॥ २६ ॥

इतोऽपि द्वैतं वस्तु न भवतीत्याह—स एष इति । द्वे वावेत्यादिना व्याख्यातं मूर्तामूर्तादि सर्वमेव त्याज्यमग्राह्यं नेति नेतीति वीप्सया यतो निषेधति श्रुतिरतः स एष इत्युपक्रम्य प्रतिपादितस्याऽऽत्मतत्त्वस्य कूटस्थस्याविषयत्वेन ग्रन्थोपपत्तिरित्यर्थः । नेति नेतीतिवीप्सातात्पर्यमाह—सर्वेति । रूपद्वयोपन्यासानन्तरं तन्निषेधमन्तरेण निर्विशेषवस्तुप्रतिपत्तेरयोगात्तत्प्रतिपत्तये च पुरुषार्थपरिसमाप्तिसंभवादादेशो निर्विशेषस्याऽऽत्मतत्त्वस्योपदेशस्तावत्प्रस्तूयते । एवं प्रस्तुत्य नेति नेतीति वीप्सया सर्वस्य मूर्तामूर्तादिविशेषस्याऽऽरोपितस्य निषेधो दर्शितस्तेन चाऽऽत्मा जिज्ञासितो विशिष्टो निर्दिष्ट इत्यर्थः । स चेदेवं मूर्तामूर्ताधिकारे प्रतिपादितस्तर्हि किमिति प्रदेशान्तरे पुनः पुनरेवं प्रतिपाद्यते पुनरुक्तेरित्याशङ्क्य व्याख्यातमित्यादि व्याचष्टे—प्रतिपादितस्येति । यद्यपि मूर्तामूर्तप्रकरणे प्रतिपादितमात्मतत्त्वं तथाऽपि तस्य परमसूक्ष्मत्वादूदुर्ज्ञानत्वं मन्यते श्रुतिः । सा पुनरुपायविशेषश्रद्धावानिमायेण तस्मै पुनः पुनः प्रतिपादनेच्छया यद्यदारोपितं तत्तदशेषमपह्नुत्यावशिष्टमात्मस्वरूपं निवेदयतीत्यर्थः । सर्वमित्यादि स्पष्टीकुर्वाणः स एष इति व्याचष्टे—ग्राह्यमिति । स एष इत्याद्या श्रुतिरदृश्यतामात्मनो विशेषं निषेधमुखेन दर्शयन्ती यद्दृश्यं कार्यं मनसा वाचा च गोचरीभूतं तदशेषमर्थादपलपति । सा हि परमार्थवस्त्वदृश्यमिति ब्रुवाणा दृश्यस्य वस्तुत्वे नोपपद्यते तथा चानुपपत्तेर्दृश्यवर्गस्यावस्तुत्वं सिद्धमित्यर्थः । ननु किमिति श्रुतिर्व्या-

---

१ ख. घ. ङ. च. छ. ज झ. °थातोऽदे° । २ घ. दुर्बोधत्वं । ३ घ. ज. °यति श्रु° । ४ घ. °निष्ठा ता° । ५ ज. °श्चैवोपा° । ६ ङ. °ति । द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्यादि° । ७ घ. ङ. ज. सर्वं त्या° । ८ क. ग्रंथमोपप° । ग. झ. प्रतिपत्ति° । ९ क. °तत्त्वोप° । १० झ. नेति । ११ ग. मूर्तादि° । १२ घ. ङ. ज. °तोऽवशि° । १३ ज. °ष्ट इष्ट इ° । १४ क. प्रवेशा° । १५ छ. °रे तर्हि पु° । १६ ग. ज. °न. प्र° । १७ ख. ग. ज. °पितमुक्तं त° । छ. °पितमुक्तं तद° । १८ ग. छ. झ. °त्वा विशि° । १९ झ. °त्मरू° । २० झ. °चां गो° । २१ क. °थैतस्त्व° । २२ ग. °श्यव° । २३ ग. °र्थः ॥ २५ ॥ न° । २४ ग. °ति व्याख्या° ।

ख्यातं विशेषजातं निह्नुते पङ्कप्रक्षालनन्यायापातादित्याशङ्क्याग्राह्यभावेनेत्यादि व्याकरोति—उपायस्येति । द्वे वावेत्यादिना व्याख्यातस्य रूपप्रपञ्चस्याद्वितीयब्रह्मात्ममात्रपर्यवसायितामप्रतिपाद्यमानस्य ब्रह्मवदेवोपायत्वेनाभिमतस्यापि प्रपञ्चस्य वस्तुत्वेन ग्राह्यत्वाशङ्का या सा मा भूदित्यशेषविशेषराहित्येनाद्वितीयब्रह्मस्वरूपनिर्धारणार्थमारोपितं प्रपञ्चं प्रतिषेधति श्रुतिरित्यर्थः । उपायस्य कल्पितत्वेन वस्तुत्वाभावादुपेयस्य च सदैकरूपत्वात्कथं तथाविधवस्तुप्रतिपत्तिरित्याशङ्क्याजमित्यादि व्याचष्टे—ततश्चेति । समारोपितस्य सर्वस्य निषेधादेव स्वातन्त्र्येण वस्तुत्वाभावनिश्चयादारोपितसर्पादेराधिष्ठानातिरेकेणासत्त्ववदुपायस्य मूर्तादेरुपेयाद्वितीयब्रह्ममात्रतामेव प्रतिपाद्यमानस्य ब्रह्मणश्च सदैकरूपत्वकूटस्थनित्यदृष्टिस्वभावत्वादि जानतस्तत्स्योत्तमस्याधिकारिणः स्वयमेवान्यापेक्षामन्तरेणाऽऽत्मतत्त्वमुक्तविशेषणं प्रकाशी भवति । कल्पितस्य चोपायत्वं प्रतिबिम्बादिवदविरुद्धमित्यर्थः ॥ २६ ॥

सतो हि मायया जन्म युज्यते न तु तत्त्वतः ।
तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥ २७ ॥

एवं हि श्रुतिवाक्यशतैः सबाह्याभ्यन्तरमजमात्मतत्त्वमद्वयं न ततोऽन्यदस्तीति निश्चितमेतत् । युक्त्या च धुनेतदेव पुनर्निर्धार्यत इत्याह । तत्रैतत्स्यात्सदाऽग्राह्यमेव चेदसदेवाऽऽत्मतत्त्वमिति । तन्न । कार्यग्रहणात् । यथा सतो मायाविनो मायया जन्मकार्यम् । एवं जगतो जन्मकार्यं गृह्यमाणं मायाविनमिव परमार्थसन्तमात्मानं जगज्जन्म मायास्पदमवगमयति । यस्मात्सतो हि विद्यमानात्कारणान्मायानिर्मितस्य हस्त्यादिकार्यस्येव जगज्जन्म युज्यते नासतः कारणात् । न तु तत्त्वत एवाऽऽत्मनो जन्म युज्यते । अथवा सतो विद्यमानस्य वस्तुनो रज्ज्वादेः सर्पादिवन्मायया जन्म युज्यते न तु तत्त्वतो यथा तथाऽग्राह्यस्यापि सत एवाऽऽत्मनो रज्जुसर्पवज्जगद्रूपेण मायया जन्म युज्यते । न तु तत्त्वत एवाजस्याऽऽत्मनो जन्म । यस्य पुनः परमार्थसदजमात्मतत्त्वं जगद्रूपेण जायते वादिनो न हि तस्याजं जायत

---

१ क. ङ. 'तिपद्य' । २ ग. छ. 'तप्रप' । झ. तस्य प्र' । ३ ख. घ. झ. 'धरा' । ४ ग. छ. झ. 'ह्यरू' । ५ झ. 'स्य सर्वस्य च । ६ झ. 'ति । संसार-रो' । ७ ख. 'तिपद्य' । ८ क. छ. झ. सदेक' । ९ क. 'काशि भ' । १० छ. 'तस्योपा' । ११ छ. निश्चयापित' । १२ छ. 'तस्मात्स' । १३ च. 'ति चेन्न । १४ घ. 'था हि विद्यमानत्कारणात्सतो । १५ ख. कार्यं गृ' । १६ क. छ. 'मार्थं स' । १७ क. छ. 'जन्मभा' । १८ क. 'दमेव । १९ च. छ. 'नो यु' । २० घ. 'मार्थं स' ।

इति शक्यं वक्तुं विरोधात् । ततस्तस्यार्थाज्जातं जायत इत्यापन्नं ततश्चानवस्थां जाताज्जायमानत्वेन । तस्मादजमेकमेवाऽऽत्मतत्त्वमिति सिद्धम् ॥२७॥

आत्मतत्त्वमजमद्वितीयं परमार्थभूतम् । द्वैतं तु मायाकल्पितमसदिति प्रतिपादितम् । तत्रैव हेत्वन्तरमाह—सतो हीति । यदात्मतत्त्वं सदा सदेकरूपं तस्या मायाया जगदाकारेण जन्म युक्तम् । मायाया दुर्निरूपार्थसमर्थनपटीयस्त्वात्परमार्थतस्त्वेकरूपमनेकरूपतया नोत्पत्तुं पारयति विरोधादित्यर्थः । विपक्षे दोषमाह—तत्त्वत इति । यस्य वादिनो मते ब्रह्मैव परमार्थतो जगदात्मना जायते तस्याजस्य जायमानत्वप्रतिज्ञाया व्याहतत्वाज्जातस्यैव जायमानत्वे स्यादनवस्थेत्यर्थः । अद्वैतमावेदयन्त्या द्वैतनिषेधकश्रुत्या दृश्यत्वजडत्वादियुक्त्या च तथाविधया निर्धारितमर्थं श्लोकाक्षरार्थकथनार्थमनुवदति—एवमिति । उक्तमेव वस्तु युक्त्यन्तरेण पुनर्निर्धारयितुमुत्तरग्रन्थप्रवृत्तिरित्याह—अधुनेति । पूर्वार्धं शङ्कोत्तरत्वेन व्याख्यातुं शङ्कयति—तत्रेति । श्लोकः सप्तम्या परामृश्यते । यन्न कदाचिदपि गृह्यते तदत्यन्तासदेव शशविषाणादिवदेष्टव्यं प्रमाणाभावे प्रमेयासिद्धेरित्यर्थः । कार्यलिङ्गकानुमानवशादात्मतत्त्वस्य कारणत्वेन सत्त्वनिर्णयान्नासत्त्वं चोद्यमिति दूषयति—तन्नेति । संगृहीतमर्थं दृष्टान्तेन विवृणोति—यथेति । विमतं सदधिष्ठानं कार्यत्वात्संप्रतिपन्नवादित्यर्थः । उक्तेऽर्थे पूर्वार्धाक्षराणि योजयति—यस्मादिति । तस्मात्कारणस्य सत्त्वमविवादमिति शेषः । नासत इति तस्य निःस्वभावत्वात्कारणत्वायोगादित्यर्थः । न त्विति । तथाभूतस्यान्यथाभूतस्य च जन्मायोगादित्यर्थः । सत इति पञ्चम्यन्तं पदं गृहीत्वा निमित्तकारणपरतया व्याख्यातम् । संप्रति सत इति षष्ठ्यन्तं पदमुपादानपरतया व्याख्यां करोति—अथवेति । यथा रज्ज्वां सर्पाद्याकारेण मायाकल्पितं जन्म तथैवाग्राह्यस्यापि सद्रूपस्याऽऽत्मतत्त्वस्य जगदात्मना जन्म मायाप्रयुक्तं प्रतिपत्तव्यम् । जन्मरहितस्य वस्तुतो जन्मव्याघातादित्यर्थः । उत्तरार्धं विभजते—यस्येत्यादिना । मायिकं जन्म न तात्त्विकमिति स्थिते फलितमाह—तस्मादिति ॥ २७ ॥

असतो मायया जन्म तत्त्वतो नैव युज्यते ।
वन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते ॥ २८ ॥

---

१ क. छ. 'स्थापाता' । २ च. 'जनेवा' । ३ घ. ङ ज. सदैक° । ४ ज. 'नस्य प्र° । ५ ख. छ. °ति । पूर्वश्लो° । ६ क यत्र क° । ७ ग. घ. झ. 'सिद्धिरि° । ८ ग. झ. °लिङ्गानु° । ९ क. 'त्वस्याका° । १० क. ङ. 'सत्त्वचो° । ११ ग. ज. जन्मयो° । १२ घ. ज. वस्तुनो । १३ च. °न्ध्यासुतो न ।

असद्वादिनामसतो भावस्य मायया तत्त्वतो वा न कथंचन जन्म युज्यते। अदृष्टत्वात्। न हि वन्ध्यापुत्रो मायया तत्त्वतो वा जायते तस्मादसद्वादो दूरत एवानुपपन्न इत्यर्थः ॥ २८ ॥

सत्पूर्वकं कार्यमिति न व्याप्तिः। असद्वादिभिरसतः सज्जन्माभ्युपगमादित्याशङ्क्याऽऽह—असत इति। तत्त्वतोऽतत्त्वतो वा नासतः सदाकारेण जन्मेत्यर्थः। तत्र दृष्टान्तमाह—वन्ध्येति। पूर्वार्धं व्याकरोति—असद्वादिनामिति। असतो निःस्वरूपस्य स्वरूपाभावादेव तत्त्वतोऽतत्त्वतो वा कार्याकारेण न युक्तं जन्मेत्यत्र हेतुमाह—अदृष्टत्वादिति। उत्तरार्धं व्याकुर्वन्नदृष्टत्वमेव दृष्टान्तेन स्पष्टयति—न हीति। सद्वादो मायया संभवति। असद्वादस्तु तयाऽपि नेति विशेषं दर्शयन्नुपसंहरति—तस्मादिति कार्यकारणनिरूपणमत्रेति परामृश्यते ॥ २८ ॥

यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः।
तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः॥ २९ ॥

कथं पुनः सतो माययैव जन्मेत्युच्यते। यथा रज्ज्वां विकल्पितः सर्पो रज्जुरूपेणावेक्ष्यमाणः सन्नेवं मनः परमार्थविज्ञप्त्याऽऽत्मरूपेणावेक्ष्यमाणं सद्ग्राह्यग्राहकरूपेण द्वयाभासं स्पन्दते स्वप्ने मायया रज्ज्वामिव सर्पः। तथा तद्वदेव जाग्रज्जागरिते स्पन्दते मायया मनः स्पन्दत इवेत्यर्थः ॥२९॥

सत्तत्त्वस्यैव मायया जन्मेत्युक्तमुपपादयति—यथेति। सत एव मायया जन्मेत्युक्तम्। अवस्थाद्वयेऽपि द्वैतस्य मनःस्पन्दितत्वस्वीकारादिति श्लोकव्यावर्त्यं चोद्यमुत्थापयति—कथमिति। अधिष्ठानरूपेण मनोऽपि सदिति सदृष्टान्तमुत्तरमाह—उच्यत इति। मनसः सन्मात्रत्वेऽपि कथमनेकधा स्पन्दनमित्याशङ्क्य स्वप्नदृष्टान्तं व्याचष्टे—ग्राह्येति। दार्ष्टान्तिकमाह—तथेत्यादिना। मायाधीनं मनःस्पन्दनमवस्तुभूतमिति द्योतयितुमिवेत्युक्तं मनो ब्रह्म चेति कारणद्वयम् ॥ २९ ॥

अद्वयं च द्वयाभासं मनः स्वप्ने न संशयः।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः॥ ३० ॥

---

१ ङ. ज. °दिनां तु अस°। २ क. °दस°। ३ घ. °द्वादा दू°। ४ घ °पन्ना इ°। ५ छ. झ. °तो वा। ६ घ °ष्टमे°। ७ ङ ज. °वं पारमार्थ्यविद्दृष्टयाऽऽत्म°। ८ घ. °नः पारमार्थ्यविद्दृष्टयात्म°। ९ ख. °र्थदृष्टयाऽऽत्म°। १० ग. छ. झ. °त्वे क°। ११ ग. झ. °स्पन्दितम°। १२ झ. द्योतितामि°।

रज्जुरूपेण सर्प इव परमार्थत आत्मरूपेणाद्वयं सद्द्वयाभासं मनः स्वप्ने न संशयः । न हि स्वप्ने हस्त्यादि ग्राह्यं तद्ग्राहकं वा चक्षुरादिद्वयं विज्ञानव्यतिरेकेणास्ति । जाग्रदपि तथैवेत्यर्थः परमार्थसद्विज्ञानमात्राविशेषात् ॥३०॥

तर्हि द्वैतस्य स्वकृत[त्व]मित्याशङ्क्य दृष्टान्तेन निराचष्टे-अद्वयं चेति । दृष्टान्तभागं विभजते— रज्ज्विति । दृष्टान्ते चैतन्यातिरिक्तस्य ग्राह्यग्राहकभेदस्य मनःस्पन्दितस्यासत्त्वं साधयति-न हीति । तथैव जागरितेऽपि परमार्थात्मस्वरूपेणाद्वयं सन्मनो ग्राह्यग्राहकद्वैताकारेणावभासते । तथा च परमार्थसतो विज्ञानमात्रस्यावस्थाद्वयेऽपि विशेषाभावात्तस्मिन्नेवाधिष्ठाने मायाकल्पितं मनः स्पन्दते । द्वयाकारमित्यङ्गीकारात् । न कारणद्वयं शङ्कितव्यमित्याह— जाग्रदपीति ॥ ३० ॥

मनोदृश्यमिदं द्वैतं यत्किंचित्सचराचरम् ।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥ ३१ ॥

रज्जुसर्पवद्विकल्पनारूपं द्वैतरूपेण मन एवेत्युक्तम् । तत्र किं प्रमाणमित्यन्वयव्यतिरेकलक्षणमनुमानमाह । कथं तेन हि मनसा विकल्प्यमानेन दृश्यं मनोदृश्यमिदं द्वैतं सर्वं मन इति प्रज्ञा । तद्भावे भावात्तदभावेऽभावात् । मनसो ह्यमनीभावे निरुद्धे(रोधे) विवेकदर्शनाभ्यासवैराग्याभ्यां रज्ज्वामिव सर्पे लयं गते वा सुषुप्ते द्वैतं नैवोपलभ्यत इत्यभावात्सिद्धं द्वैतस्यासत्त्वमित्यर्थः ॥ ३१ ॥

मनोमात्रं द्वैतमित्यत्र प्रमाणमाह— मनोदृश्यमिति । वृत्तमनूद्य श्लोकतात्पर्यमाह— रज्ज्विति । यथा रज्जुः सर्परूपेण विकल्पते तथा मनो द्वैतरूपेण विकल्पनात्मकम् । तच्चाविद्याकल्पितमित्युक्तेऽर्थे प्रमाणगवेषणायां विशिष्टमनुमानमुपन्यस्यतीत्यर्थः । तदेव प्रश्नपूर्वकं प्रकटयन्प्रथमार्धाक्षराणि व्याचष्टे-कथमित्यादिना । विमतं मनोमात्रं तद्भावे नियतभावत्वात् । यथा मृद्भावे नियतभावो मृन्मात्रो घटादिरित्यनुमानमारचयति—द्वैतमिति । उक्तमेव व्यतिरेकं स्फोरयन्द्वितीयार्धं विभजते- मनसो हीति । समाधिस्वापयोर्द्वैतस्यानुपलम्भेऽपि नासत्त्वमित्याशङ्क्य मानाधीना मेयसिद्धिरित्यभिप्रेत्याऽऽह-इत्यभावादिति ॥ ३१ ॥

---

१ क. सत्तद्द्व° । २ क. °ह्यं ग्राहकं च° । ३ ग. घ. ज. झ. °तत्त्वं सा° । ४ क. °पेण द्व° । ५ ङ. छ. °कल्पमा° । ६ झ. 'वे चाभा° । ७ छ 'मात्रमिदं द्वै° । ८ छ. झ. °माणान्वेष° । ९ झ. °माचरति । १० ग. झ. स्फोटय° ।

आत्मसत्यानुबोधेन न संकल्पयते यदा ।
अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ॥ ३२ ॥

कथं पुनरमनीभाव इति । उच्यते । आत्मैव सत्यमात्मसत्यं मृत्तिकावत् । "वाचाऽऽरम्भण विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः । तस्य शास्त्राचार्योपदेशमन्ववबोध आत्मसत्यानुबोधः । तेन संकल्प्याभाव-तया न संकल्पयते । दाह्याभावे ज्वलनमिवाग्नेः । यदा यस्मिन्काले तदा तस्मिन्काले ऽमनस्तामममनोभावं याति ग्राह्याभावे तन्मनोऽग्रहं ग्रहणविकल्प-नावर्जितमित्यर्थः ॥ ३२ ॥

मनसो यदमनस्त्वमुक्तं तदुपपादयति—आत्मेति । समाधिस्वापयोरननुभवेऽपि मनसः स्वरूपेण नित्यत्वान्नामनस्त्वमित्याक्षिपति—कथमिति । संकल्पो हि मनसो व्यावहारिकं रूपम् । संकल्पश्च संकल्प्यापेक्षत्वात्तदभावे न भवति । सर्वमात्मैवेत्य-वगमे च संकल्प्याभावान्मनसो मनस्त्वं न वर्तते तथाऽपि स्फुरति चेदात्मैवेति न विवेकिदृष्ट्या मनो नामास्तीति श्लोकाक्षरैरुत्तरमाह—उच्यत इति । तस्यैव सत्यत्वे दृष्टान्तमाह—मृत्तिकावदिति । यथा घटशरावादिष्वसत्येषु मृत्तिकामात्रमनुस्यूतं सत्यमिष्यते तथैवानात्मस्वसत्येष्वात्ममात्रं सत्यमेष्टव्यम् । तत्सत्यमित्यवधारणादेव-कारस्य दृष्टान्तनिविष्टस्य दार्ष्टान्तिकेऽनुषङ्गादित्यर्थः । उक्ते दृष्टान्ते प्रमाणमाह—वाचाऽऽरम्भणमिति । अवशिष्टान्यक्षराणि व्याचष्टे—तस्येत्यादिना । तेन तत्त्व-ज्ञानेनाऽऽत्मातिरिक्तार्थाभावे निश्चिते संकल्पविषयाभावनिर्धारणया संकल्पाभावे दृष्टान्तमाह—दाह्येति । यथाऽग्नेर्दाह्याभावे ज्वलनं न भवति तथा संकल्प्याभावे संकल्पो निरवकाशः स्यादित्यर्थः । संकल्प्याभावे किं मनसो भवति तदाह—यदेति । ३२ ॥

अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ।
ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥ ३३ ॥

यद्यसादिदं द्वैतं केन स्वमजसमा(जमा)त्मतत्त्वं विबुध्यत इति । उच्यते । अकल्पकं सर्वकल्पनावर्जितमत एवाजं ज्ञानं ज्ञप्तिमात्रं ज्ञेयेन परमार्थसता ब्रह्मणाऽभिन्नं प्रचक्षते कथयन्ति ब्रह्मविदः । न हि विज्ञातुर्विज्ञातेर्विपरि-

---

१ क. °रयं म° । २ ख. घ. ज. °मनुबो° । ३ क. °भावात्तया । ४ क. कल्प्यते । ५ ङ. च. छ. °ते यदा दा° । झ. °ते यदा यथा दा° । ६ ख. °दाऽम° । ७ ख. °मनीभा° । ८ क. सर्वा-त्मै° । ९ ग. झ. °वेकद° । १० घ. ङ. ज. उक्तद° । ११ ग. झ. °ष्टाश्च° । १२ ग. छ. झ. °कल्प्यवि° । घ. ङ. छ. °कल्प्याभा° । १३ ग. झ. संकल्प्याभावे । १४ च. °तं तर्हि के° । १५ क. °न समज्ञसमा° । १६ ज. हि ज्ञा° ।

लोपो विद्यतेऽग्न्युष्णवत् । "विज्ञानमानन्दं ब्रह्म" । "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिभ्यः । तस्यैव विशेषणं ब्रह्म ज्ञेयं यस्य स्वस्य तदिदं ब्रह्मज्ञेयमुष्णस्येवाग्निवदभिन्नम् । तेनाऽऽत्मस्वरूपेणाजेन ज्ञानेनाजं ज्ञेयमात्मतत्त्वं स्वयमेव विबुध्यतेऽवगच्छति नित्यप्रकाशस्वरूप इव सविता । नित्यविज्ञानैकरसघनत्वान्न ज्ञानान्तरमपेक्षत इत्यर्थः ॥ ३३ ॥

मनसश्चेन्मनस्त्वं व्यावर्तते तर्हि कथमात्मनोऽवबोधो व्यञ्जकाभावादित्याशङ्क्याऽऽह—अकल्पकमिति । श्लोकव्यावर्त्यां शङ्कामाह—यदीति । मनोमुख्यस्य द्वैतस्यासत्त्वे व्यञ्जकाभावान्नाऽऽत्मबोधः संभवति मनसैवानुद्रष्टव्यमिति श्रुतेः । मनसश्चासत्त्वाङ्गीकारादित्यर्थः । स्वरूपभूतेन ज्ञानेनैवाऽऽत्मनोऽवबोधसंभवान्नातिरिक्ते मनस्यपेक्षेत्युत्तरमाह—उच्यत इति । ज्ञेयाभिन्नं ज्ञानमित्यत्र श्रुतिरुदाहरति—न हीति । सत्यग्नौ तदात्मकमौष्ण्यं न परिलुप्यते तथेत्युत्तरमाह—अग्न्युष्णवदिति । प्रज्ञानं ब्रह्मेत्यादिश्रुतिसंग्रहार्थमादिपदम् । ज्ञेयाभिन्नमित्युक्तं स्फुटयति—तस्यैवेति । आत्मनः स्वयमवावगतिरूपत्वान्नार्थान्तरापेक्षेत्येतमर्थं दृष्टान्तेन स्फुटयति—नित्येति ॥ ३३ ॥

निगृहीतस्य मनसो निर्विकल्पस्य धीमतः ।
प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ॥ ३४ ॥

आत्मसत्यानुबोधेन संकल्पमकुर्वद्बाह्यविषयाभावे निरिन्धनाग्निवत्प्रशान्तं निगृहीतं निरुद्धं मनो भवतीत्युक्तम् । एवं च मनसो ह्यमनीभावे द्वैताभावश्लोक्तः । तस्यैवं निगृहीतस्य निरुद्धस्य मनसो निर्विकल्पस्य सर्वकल्पनावर्जितस्य धीमतो विवेकवतः प्रचरणं प्रचारो यः स तु प्रचारो विशेषेण ज्ञेयो योगिभिः । ननु सर्वप्रत्ययाभावे यादृशः सुषुप्तिस्थस्य मनसः प्रचारस्तादृश एव निरुद्धस्यापि प्रत्ययाभावाविशेषात्किं तत्र विज्ञेयमिति । अत्रोच्यते । नैवम् । यस्मात्सुषुप्तेऽन्यः प्रचारोऽविद्यामोहतमोग्रस्तस्यान्तर्लीनानेकानर्थप्रवृत्तिबीजवासनावतो मनस आत्मसत्यानुबोधहुताशविप्लुष्टावि-

---

१ ज. ब्रह्म" इ° । २ क. छ. स्वस्थ्यं । ३ क. ग. झ. °यमौष्ण्यस्ये° । ४ ख. °जेना° । ५ ख. °वर्त्यते । ६ छ. °वर्त्यमा° । ७ ग. झ. सत्यत्वे व्य° । ८ ख. °नाऽऽत्मावबो° । ९ ग. छ. श्रुतिमुदा° । १० ग. झ. न विलु° । ख. छ. न विप° । ११ क. °नुरोधे° । च. °नुबाधे° । १२ ग. ज. झ. °र्वन्बाह्य° । १३ च. तस्यैव । १४ झ. सर्वसगव° । १५ क. °चारं वि° । १६ च. सुप्तस्य । १७ क. °षुप्तिस्थ° । १८ छ. °प्तम° । १९ च. 'ति चेदत्रो° । २० च मैवम् । २१ झ. °प्तेऽन्यश्च° २२ घ. ज. °कार्य° ।

[1]अनर्थप्रवृत्तिबीजस्य निरुद्धस्यान्य एव प्रशान्तसर्वक्लेशरजसः [2]स्वतन्त्रः [3]प्रचारः । अतो न तत्समः । तस्माद्युक्तः स विज्ञातुमित्यभिप्रायः ॥ ३४ ॥

मोक्षमाणस्य ज्ञानफलं स्वर्गवन्न परोक्षं किंतु तृप्तिवत्प्रत्यक्षम् । अतश्च प्रकृतज्ञानफलस्य मनोनिरोधस्य प्रत्यक्षत्वार्थं प्रसङ्गं प्रकरोति—निगृहीतस्येति । न तस्य विज्ञेयत्वं सुषुप्ते प्रसिद्धत्वादित्याशङ्क्याऽऽह—सुषुप्त इति । श्लोकाक्षराणि व्याकर्तुं वृत्तं कीर्तयति—आत्मेति । तस्य सत्यस्य प्रागुक्तनानुबोधेन सम्यग्ज्ञानेन बाह्यस्य विषयस्य संकल्पस्याभावे निरालम्बनस्य प्रचारासंभवे च मनः संकल्पमकुर्वत्प्रशान्तं निरुद्धं च प्रभवतीत्यन्वयः । निर्विषयं मनः शाम्यतीत्यत्र दृष्टान्तमाह—निरिन्धनेति । निरुद्धे मनसि मनस्त्वव्यावृत्तौ मनःस्पन्दितस्य द्वैतस्याभावमुक्तं स्मारयति—एवं चेति । एवं वृत्तमनूद्य पादत्रयस्यार्थमाह—तस्येति । एवं विषयाभावेनेति यावत् । आत्मसत्यानुबोधो विवेकशब्दार्थः । प्रत्यगात्मन्येव पर्यवसानं प्रचारस्तस्य विद्वत्प्रत्यक्षत्वं विवक्षित्वा योगिभिरित्युक्तम् । चतुर्थपादव्यावर्त्यामाशङ्कामाह—नन्विति । निरुद्धस्यापि मनसः प्रचार इति संबन्धः । विशेषप्रत्ययाभावस्य निरोधे स्वापे च विशेषाभावादिति हेत्वर्थः । तत्र प्रचारे प्रसिद्धे सतीति यावत् । चतुर्थपादमुत्तरत्वेनावतारयति—अत्रेति । निरुद्धस्य मनसः सुषुप्तस्येव प्रचारस्य सुज्ञानत्वान्न तत्र ज्ञातव्यमस्तीत्युक्तं प्रत्याह—नैवमिति । विद्यामात्रव्यावृत्त्यर्थं मोहविशेषणं चित्तभ्रमं व्यावर्तयितुं तमोविशेषणम् । अन्तर्लीना गुप्ता अनेकानर्थफलाना प्रवृत्तीना बीजभूता वासना यस्मिन्मनसि तस्येति सुषुप्तस्य विशेषणम् । आत्मनः सत्यस्यानुबोधो यो व्याख्यातः स एव हुताशोऽग्निस्तेन विप्लुष्टान्यविद्यादीन्यनेकानर्थपर्यन्तप्रवृत्तीनां बीजानि यस्य तस्येति निरुद्धस्य विशेषणं, प्रकर्षेण शान्तं सर्वक्लेशात्मकं रजो यस्येति तस्यैव विशेषणान्तरम् । स्वतन्त्रो ब्रह्मस्वरूपावस्थानात्मक इत्यर्थः । यथोक्तस्य प्रचारस्य सुषुप्तप्रचारविसदृशस्य दुर्ज्ञानत्वे स्थिते फलितमाह—तस्मादिति ॥३४॥

लीयते हि सुषुप्ते तन्निगृहीतं न लीयते ।
तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः ॥ ३५ ॥

प्रचारभेदे हेतुमाह—लीयते सुषुप्तौ हि यस्मात्सर्वात्मिकाविद्यादिप्रत्य-

---

१ छ. °द्यार्थ° । २ घ. °तन्त्रप्र° । ३ ज. °तद्दानफलमस्य । ४ ग. ङ. ज. °द्धं भ° । ५ ग. छ. झ. च भ° । ६ ग. °स्य विशे° । ७ ब. °रेते प्र° । ८ घ. प्रतिषिद्धे । ९ ग. झ. °त्वात्तत्र किं ज्ञा° । १० ग. °सा भवतीति अ° । ११ झ. °न प्लु° । १२ ग. ज. °र्थ° । १३ ख. °प्तिप्र । १४ छ. सुषुप्तौ° । १५ क. छ. झ. °ते हि । १६ च. सुषुप्ते ।

यबीजवासनाभिः सह तमोरूपमविशेषरूपं बीजभावमापद्यते तद्विवेकविज्ञानपूर्वकं निरुद्धं निगृहीतं सन्न लीयते तमोबीजभावं नाऽऽपद्यते तस्माद्युक्तः प्रचारभेदः सुषुप्तस्य समाहितस्यं मनसः । यदा ग्राह्यग्राहकाविद्याकृतमलद्वयवर्जितं तदा परमद्वयं ब्रह्मैव तत्संवृत्तमित्यतस्तदेव निर्भयम् । द्वैतग्रहणस्य भयनिमित्तस्याभावात् । शान्तमभयं ब्रह्म । यद्विद्वान्न बिभेति कुतश्चन । तदेव विशेष्यते ज्ञप्तिर्ज्ञानमात्मस्वभावचैतन्यं तदेव ज्ञानमालोकः प्रकाशो यस्य तद्ब्रह्म ज्ञानालोकं विज्ञानैकरसघनमित्यर्थः । समन्ततः समन्तात्सर्वतो व्योमवन्नैरन्तर्येण व्यापकमित्यर्थः ॥ ३५ ॥

मनसः सुषुप्तस्य समाहितस्यं च प्रचारभेदोऽस्तीत्युक्तं तत्र हेतुमाह—लीयते हीति। समाहितस्य मनसो द्वैतवर्जितस्य स्वरूपं कथयति—तदेवेति । पूर्वार्धस्य तात्पर्यमाह—प्रचारेति । मनसः सुषुप्तस्य समाहितस्य चेति वक्तव्यम् । यस्मादित्यस्य तस्मादित्युत्तरेण संबन्धः । अविद्यादीत्यादिशब्देनास्मितारागादयो गृह्यन्ते । सुषुप्ते मनसो वासनाभिः सह लयप्रकारं कथयति—तमोरूपमिति । आपद्यत इति संबन्धः । जाड्यं रूपमवस्थान्तरेऽपि तुल्यमित्यतो विशिनष्टि—अविशेषेत्यादिना । एवमार्धं पादं व्याख्याय द्वितीयं पादं व्याचष्टे—तदिति । पूर्वविभागविभजनेन फलितमाह—तस्मादिति । तदेव निर्भयं ब्रह्मेत्यस्यार्थमाह—यदेति । समाहितं मनोग्राह्यं ग्रहकमित्यविद्याकृतं यन्मलद्वयं तेन वर्जितं यदा तदेति संबन्धः । मनसो ब्रह्मत्वे निर्भयत्वं तस्य फलितमित्याह—इत्यत इति । तत्र हेतुमतःशब्देन सूचितमाह—द्वैतेति । यदुपशान्तं ब्रह्माभयमित्युक्तं तस्याभयत्वे प्रमाणं सूचयति—यद्विद्वानिति । ननु यथोक्तं ब्रह्म प्रकाशते न वा प्रकाशते । प्रकाशते चेदुपायापेक्षायामद्वैतव्याघातः । न चेत्प्रकाशते पुरुषार्थत्वासिद्धिरिति तत्राऽऽह—तदेवेति । तस्य ब्रह्मत्वसिद्धये पारिच्छिन्नत्वं व्यवच्छिनत्ति—समन्तत इति ॥ ३५ ॥

अजमनिद्रमस्वप्नमनामकमरूपकम् ।
सद्द्वितीयं सर्वज्ञं नोपचारः कथंचन ॥ ३६ ॥

जन्मनिमित्ताभावात्सबाह्याभ्यन्तरमजम् । अविद्यानिमित्तं हि जन्म

---

१ ख. 'द्धं गृ'। २ च नोपपद्यते। ३ क. च. छ. झ. 'स्य च म'। ४ च. 'त्संप्रवृ'। ५ छ. विशिष्यते। ६ ग. झ 'स्य प्र'। ७ ग. झ. 'ति च व'। ८ ग. 'धुप्तम'। ९ ग झ. 'षेणेत्रा'। १० क. 'ग्राह्'. ११ ग. झ. 'कमवि'। १२ ग. झ. 'त्वेऽपि नि'। १३ क घ. ङ. छ. ज. ञ. ट. 'तमाह। १४ झ. 'त्वेन प्र'। १५ ख. 'माणान्तरं सू'। १६ ग. 'शेत चे'। १७ झ. 'वा चे'।

रज्जुसर्पवदित्यवोचाम। सा चाविद्याऽऽत्मसत्यानुबोधेन निरुद्धा। यतोऽजमत एवानिद्रम्। अविद्यालक्षणाऽनादिर्माया निद्रा। स्वापात्प्रबुद्धोऽबुध्यस्वरूपेणाऽऽत्मनाऽतोऽस्वप्नम्। अप्रबोधकृते ह्यस्य नामरूपे प्रबोधाच्च ते रज्जुसर्पवद्विनष्टे इति न नाम्नाऽभिधीयते ब्रह्म रूप्यते वा न केनचित्प्रकारेणेत्यनामकरूपकं च तत्। "यतो वाचो निवर्तन्ते" इत्यादिश्रुतेः। किंच सकृद्विभातं सदैव विभातं सदा भारूपमग्रहणान्यथाग्रहणाविर्भावतिरोभाववर्जितत्वात्। ग्रहणाग्रहणे हि रात्र्यहनी तमश्चाविद्यालक्षणं सदाऽप्रभास्तत्वे कारणं तदभावान्नित्यचैतन्यभारूपत्वाच्च युक्तं सकृद्विभातमिति। अत एव सर्वं च तज्ज्ञस्वरूपं चेति सर्वज्ञम्। नेह ब्रह्मण्येवंविध उपचरणमुपचारः कर्तव्यः। यथाऽन्येषामात्मस्वरूपव्यतिरेकेण समाधानाद्युपचारः। नित्यशुद्धबुद्धमुक्तस्वभावत्वाद्ब्रह्मणः कथंचन न कथंचिदपि कर्तव्यसंभवोऽविद्यानाश इत्यर्थः॥ ३६॥

प्रकृतमेव ब्रह्म प्रकारान्तरेण निरूपयति—अजमित्यादिना। न च तस्मिन्निरुपाधिके ब्रह्मणि ज्ञाते कर्तव्यशेषः संभवतीत्याह—नेति। अजत्वमुपपादयति—जन्मेति। किं तज्जन्मनिमित्तं यदभावादजत्वमुपपाद्यते तदाह—अविद्येति। कुतस्तर्हि तन्निवृत्त्योऽजत्वसिद्धिस्तत्राऽऽह—सा चेति। निमित्तनिवृत्त्याऽजत्वसिद्धेर्युक्तमनिद्रत्वं निद्राशब्देनाविद्याभिधानादित्याह—अत एवेति। विशेषणान्तरं सावयति—अविद्यालक्षणेति। उत्तरविशेषणद्वयं विवृणोति—अप्रबोधेति। ब्रह्मणो नामरूपवत्त्वाभावे प्रमाणमाह—यत इति। विशेषणान्तरमाह—किंचेति। सदाभारूपत्वे हेतुमाह—अग्रहणेति। जीवे ह्युपाधिस्थेऽहंरूपग्रहणानुदये तिरोभावः। कर्ताऽहमित्यन्यथाग्रहणोदये चाऽऽविर्भावो भवति तदभावाद्ब्रह्मस्वरूपमेव सदा ब्रह्मेत्यर्थः। श्रुत्याचार्योपदेशात्पूर्वं ब्रह्मण्यग्रहणं तदुपदेशादूर्ध्वं तद्ग्रहणमिति प्रसिद्धे ब्रह्मण्यपि ग्रहणाग्रहणे स्यातामित्याशङ्क्याऽऽह—ग्रहणेति। यथा सवित्रपेक्षया रात्र्यहनी न स्तः किंतूदयास्तमयकल्पनया कल्प्येते तथा ब्रह्मस्वभावालोचनया ग्रहणाग्रहणे न

---

१ क. घ. ङ. च. °तोऽतोऽजम°। च. °तोऽतोऽयमजम°। २ क. °दिमाया। ३ क. स्वस्य। ४ क. °ष्टे न°। ५ च. °भानत्वे। ६ च. °न्यप्रभा°। ७ ख. °म्। न हि ब्र°। ८ घ. °विधेय उ°। ९ च °रः कर्तव्यः। नि°। १० क. °भावाद्ब्र°। ११ च. ज. °न क°। १२ ज. °वो विद्यमाने ना°। १३ ज. °कारे°। १४ छ °ते सति क°। १५ ज. °दया तत्त्वसि°। १६ क. °लाषादि°। १७ ग. झ. °र्णं वि°। १८ क. °भासरू°। १९ ग झ. °ईम्र°। २० ग. झ. °द्धातमे°। ङ. °द्धावरू°। २१ ग. झ. °सिद्धेर्ब्रह्म°। घ. °सिद्धं ब्र°। २२ ज. °पेक्षाया°।

विद्येते किंतूपाधिद्वारा कल्प्येते । तेन ब्रह्मणः सदा भारूपत्वमविरुद्धमित्यर्थः । इतश्च निरुपाधिकं ब्रह्म सदाविभातमेषितव्यमित्याह—तमश्चेति । अप्रभातत्व इति च्छेदः । तदभावो ब्रह्मदृष्ट्या तमःसंबन्धाभावः । उक्तमेव हेतूकृत्य विशेषणान्तरं विशदयति—अत एवेति । विदुषो निरुद्धमनसो ब्रह्मस्वरूपावस्थानमुक्तम् । ये तु विदुषोऽपि समाध्यादि कर्तव्यमाचक्षते तान्प्रत्याह—नेहेति । एवंविधत्वं निरुपाधिकत्वमुपचारः समाध्यादिः । निरुपाधिके ब्रह्मणि विदुषो न कर्तव्यशेषोऽस्तीत्येतमर्थं वैधर्म्योदाहरणेन साधयति—यथेत्यादिना । अन्येषामनात्मविदामिति यावत् । अविद्यादशायामेव सर्वो व्यवहारो विद्यादशायां चाविद्याया असत्त्वान्न कोऽपि व्यवहारः । बाधितानुवृत्त्या तु व्यवहाराभाससिद्धिरित्यर्थः ॥ २६ ॥

सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः ।
सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः ॥ २७ ॥

अनामकत्वाद्युक्तार्थसिद्धये हेतुमाह—अभिलप्यतेऽनेनेत्यभिलापो वाक्करणं सर्वप्रकारस्याभिधानस्य तस्माद्विगतः । वागत्रोपलक्षणार्था सर्वबाह्यकारणवर्जित इत्येतत् । तथा सर्वचिन्तासमुत्थितः । चिन्त्यतेऽनयेति चिन्ता बुद्धिस्तस्याः समुत्थितोऽन्तःकरणवर्जितः इत्यर्थः । "अप्राणो ह्यमनाः शुभ्रः" इति श्रुतेः । "अक्षरात्परतः परः" । यस्मात्सर्वविशेषवर्जितोऽतः सुप्रशान्तः । सकृज्ज्योतिः सदैव ज्योतिरात्मचैतन्यस्वरूपेण, समाधिः । समाधिनिमित्तप्रज्ञावगम्यत्वात् । समाधीयतेऽस्मिन्निति वा समाधिः । अचलोऽविक्रियः । अत एवाभयो विक्रियाभावात् ॥ २७ ॥

विद्वानेव ब्रह्मेत्यङ्गीकृत्य प्रकृतं ब्रह्म पुंलिङ्गत्वेन निर्दिशति—सर्वेति । श्लोकस्य तात्पर्यमाह—अनामेति । अत्रेति प्रकृतपदोपादाने तर्हि सर्वकरणवर्जितत्वस्यात्रैव सिद्धत्वादुत्तरविशेषणमनर्थकमित्याशङ्क्याऽऽह—सर्वबाह्येति । बाह्यकरणसंबन्धराहित्यवदन्तःकरणसंबन्धराहित्यं दर्शयति—तथेति । उभयविधकरणसंबन्धवैधुर्येणाऽऽत्मनः शुद्धत्वे प्रमाणमाह—अप्राण इति । कारणसंबन्धराहित्यमाह—अक्षरादिति । तस्य परत्वं कार्यापेक्षया द्रष्टव्यम् । उक्तं हेतूकृत्य विशेषणान्तरं विशद-

---

१ ग. झ. °दामा° । २ झ. अभा° । ३ छ. हेतुं कृ° । ४ ग. छ. झ. °द्धत्वे म° । ५ ख. °ह नेहेति । ६ क. °धत्वनि° । ७ छ. °ध्यादि । नि° । ८ क. अप्रमाणो । ९ च. °णो ह्यशुद्ध ई° । १० क. विषयव° । ११ ख. °माधिनि° । १२ ख. °लोऽक्रि° । १३ ख. °कृतं । १४ ग. झ. कृतात्पर्यार्थमा° । १५ ख. घ. ङ. ज. °दानं तं° । १६ ग. °वैधाद्यक° । १७ छ. °दं दर्शय° ।

यति—यस्मादिति । अस्मिन्परस्मिन्नात्मनि समाधीयते निक्षिप्यते जीवस्तद्गुणविश्रेति समाधिः परमात्मा । समाधिर्निमित्तया प्रज्ञया तस्यावगम्यत्वाद्वा समाधित्वमवगन्तव्यम् । अत एवेत्युक्तं स्फुटयति—विक्रियेति ॥ ३७ ॥

ग्रहो न तत्र नोत्सर्गश्चिन्ता यत्र न विद्यते ।
आत्मसंस्थं तदा ज्ञानमजाति समतां गतम् ॥ ३८ ॥

यस्माद्ब्रह्मैव समाधिरचलोऽभय इत्युक्तमतो न तत्र तस्मिन्ब्रह्मणि ग्रहो ग्रहणमुपादानं, नोत्सर्ग उत्सर्जनं हानं वा विद्यते । यत्र हि विक्रिया तद्विषयत्वं वा तत्र हानोपादाने स्यातां न तदुभयमिह ब्रह्मणि संभवति । विकारहेतोरन्यस्याभावाच्चिरवयवत्वाच्च । अतो न तत्र हानोपादाने इत्यर्थः । चिन्ता यत्र न विद्यते । सर्वप्रकारैव चिन्ता न संभवति यत्रामनस्त्वात्कुतस्तत्र हानोपादाने इत्यर्थः । यदैवाऽऽत्मसत्यानुबोधो जातस्तदैवाऽऽत्मसंस्थं विषयाभावादग्न्युष्णवदात्मन्येव स्थितं ज्ञानम् । अजाति जातिवर्जितम् । समतां गतं परं साम्यमापन्नं भवति । यदादौ प्रतिज्ञातमतो वक्ष्याम्यकार्पण्यमजाति समतां गतमितीदं तदुपपत्तितः शास्त्रतश्चोक्तमुपसंहियते । अजाति समतां गतमित्येतस्मादात्मसत्यानुबोधात्कार्पण्यविषयमन्यत् । "यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः । प्राप्यैतत्सर्वः कृतकृत्यो ब्राह्मणो भवतीत्यभिप्रायः ॥ ३८ ॥

प्रकृते ब्रह्मण्यविक्रिये विधिनिषेधाधीनयोर्वैदिकयोर्वा लौकिकयोर्वा हानोपादानयोरनवकाशत्वमित्याह—ग्रहो नेति । मनोविषयत्वाभावाच्च ब्रह्मणि तयोरवकाशो नास्तीत्याह—चिन्तेति । यथोक्ते ब्रह्मणि ज्ञाते फलितमाह—आत्मेति । प्रकरणादौ प्रतिज्ञातमुपसंहरति—अजातीति । किमिति लौकिकौ वैदिकौ वा ग्रहोत्सर्गौ ब्रह्मणि न भवतस्तत्राऽऽह—यस्मादिति । उक्तमेवार्थमुपपादयति—यत्र हीति । ब्रह्मणि विक्रियाभावे हेतुमाह—विकारेति । तस्य विक्रियाविषयत्वाभावेऽपि हेतुं कथयति—निरवयवत्वाच्चेति । विक्रियायास्तद्विषयत्वस्य चाभावे फलितमाह—अत इति । द्वितीयं पादमवतार्य

---

१ घ. °त्तप्र° । २ ख. ग. छ. झ. °कं हेतुं स्फु° । ३ ज. हि क्रि° । ४ च. झ. °या विष° । ५ झ. °लं त° । ६ झ. °ने संभवतः । चि° । ७ च. °ते, इति सं° । ८ च. °न्ता यत्र न । ९ क. °ति । य° । १० क. °नरवं कृत° । ११ च. °दानचिन्तादय इ° । १२ छ. °ने ज्ञातमित्य° । १३ ज. परमा° । १४ ज. झ. शास्त्रोक्त° । १५ झ. °मतामि । १६ च. झ. °त्सर्वं कृ° । १७ घ. °त्यर्थः ॥ ३८ ॥ १८ झ. °षयाभा° । १९ क. °वे हे° ।

ख्याचष्टे— चिन्तेत्यादिना । तृतीयं पादं विभजते— यदैवेति । चतुर्थपादं व्याकरोति-अजातीति । नन्विदं प्रकरणादावुक्तं किमर्थं पुनरिहोच्यते तत्राऽऽह— यदादाविति । ननु अहो न तत्रेत्यादौ पूर्वत्र तत्त्वज्ञानमुक्तं न त्वकार्पण्यं तत्कथमकार्पण्यं वक्ष्यामीत्युपक्रान्तस्यात्रोपसंहारः संभवतीत्याशङ्क्य तत्त्वज्ञानस्यैवाकार्पण्यरूपत्वादुक्तोपसंहारसिद्धिरित्याह— तस्मादिति । तत्त्वज्ञानातिरिक्तं ज्ञानं कार्पण्यविषयमित्यत्र लिङ्गं दर्शयति— यो वा इति । तत्त्वज्ञानराहित्ये कृपणत्वमुक्त्वा तद्वत्त्वे फलितमाह— प्राप्येति ॥ ३८ ॥

अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥ ३९ ॥

यद्यपीदमित्थं परमार्थतत्त्वम् । अस्पर्शयोगो नामायं सर्वसंबन्धाख्यस्पर्शवर्जितत्वादस्पर्शयोगो नाम वै स्मर्यते प्रसिद्धमुपनिषत्सु । दुःखेन दृश्यत इति दुर्दर्शः सर्वैर्योगिभिः, वेदान्तविहितविज्ञानरहितैः सर्वयोगिभिरात्मसत्यानुबोधायासलभ्य एवेत्यर्थः । योगिनो बिभ्यति ह्यस्मात्सर्वभयवर्जितादप्यात्मनोऽरूपमिमं योगं मन्यमाना भयं कुर्वन्ति । अभयेऽस्मिन्भयदर्शिनो भयनिमित्तात्मनाशदर्शनशीला अविवेकिन इत्यर्थः ॥ ३९ ॥

परमार्थब्रह्मस्वरूपावस्थानफलकं चेदद्वैतदर्शनं किमिति तर्हि सर्वैरेव नाऽऽद्रियते तत्राऽऽह- अस्पर्शेति । परमार्थतत्त्वं कर्मनिष्ठानां बहिर्मुखानां(णां) दुर्दर्शनमित्यत्र हेतुमाह— योगिन इति । यदुक्तं तत्त्वज्ञानं स्वरूपावस्थानफलकमिति तदङ्गी करोति— यद्यपीति । परमार्थतत्त्वं ब्रह्मेदं प्रत्यग्भूतम् । इत्थं प्रागुक्तपरिपाट्या कूटस्थसच्चिदानन्दात्मकं यद्यपि तत्त्वज्ञानात्प्राप्यते तथाऽपि मूढास्तन्निष्ठा न भवन्तीति शेषः । यस्य तत्त्वानुभवस्य स्वरूपावस्थानं फलमुक्तं तमिदानीं विशिनष्टि— अस्पर्शेति । तत्र वर्णाश्रमादिधर्मेण पापादिमलेन च स्पर्शो न भवत्यस्मादित्यद्वैतानुभवोऽस्पर्शः । स एव योगो जीवस्य ब्रह्मभावेन योजनादित्याह—सर्वेति । नामेतिनिपातस्य पर्यायं गृहीत्वा विवक्षितमर्थमाह—नामेत्यादिना । उपनिषत्सु न लिप्यते कर्मणा पापकेनेत्याद्यासु । दुःखं श्रवणमननादिलक्षणम् ।

---

१ ग. छ. झ. °त्वाद्युक्तो° । २ च °तत्त्वं तथाऽपि तस्मिन्केचिन्मुह्यन्तीत्याह । अ° । ३ क. विज्ञा° । ४ ङ. °वैमलव° । ५ ज. °नाऽभ° । ६ ग. झ. °ति स° । ७ झ. °त्मत्वं य° । ८ क. °ढास्तुष्टास्त° । ९ छ. ज. °स्थापक° । १० ङ ज. °न रूप° । ११ च. संस्पर्शो । १२ छ. °नुभावोऽ° । १३ ग. झ. एष यो° ।

योगिशब्दस्य ज्ञानिविषयत्वं व्यावर्तयति— वेदान्तेति । केन तर्हि यथोक्तस्यानुभवस्य लभ्यत्वमित्याशङ्क्याऽऽह— आत्मेति । उत्तरार्धं विभजते- योगिन इति । कर्मिणां हि श्रोत्रिया ब्राह्मण्याद्यस्माकं नैकुक्ष्यतीति मत्वा तत्त्वज्ञानाद्बिभ्यतीत्यर्थः । अभय-निमित्तमेव तत्त्वज्ञानं मिथ्याज्ञानवशाद्भयनिमित्तं पश्यन्तीत्याह— सर्वेति । भयद-र्शित्वं विशदयति— अभयेति ॥ ३९ ॥

मनसो निग्रहायत्तमभयं सर्वयोगिना(णा)म् ।
दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ॥ ४० ॥

येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत्कल्पितमेव मन इन्द्रियादि च न परमार्थतो विद्यते तेषां ब्रह्मस्वरूपाणामभयं मोक्षाख्या चाक्षया शान्तिः स्वभावत एव सिद्धा नान्यायत्ता नोपचारः कथंचनेत्यवोचाम । ये त्वतोऽ-न्ये योगिनो मार्गगा हीनमध्यमदृष्टयो मनोऽन्यदात्मव्यतिरिक्तमात्मसंबन्धि पश्यन्ति तेषामात्मसत्यानुबोधरहितानां मनसो निग्रहायत्तमभयं सर्वेषां योगिनाम् । किंच दुःखक्षयोऽपि । न ह्यात्मसंबन्धिनि मनसि प्रचलिते दुःखक्षयोऽस्त्यविवेकिनाम् । किंचाऽऽत्मप्रबोधोऽपि मनोनिग्रहायत्त एव । तथाऽक्षयाऽपि मोक्षाख्या शान्तिस्तेषां मनोनिग्रहायत्तैव ॥ ४० ॥

उत्तमदृष्टीनामद्वैतदर्शनमद्वैतदृष्टिफलं च मनोनिरोधमुक्त्वा मन्ददृष्टीनां मनोनिरोधा-धीनमात्मदर्शनमुपन्यस्यति— मनस इति । अभयमित्यशेषभयनिवृत्तिसाधर्म्यान्मात्मदर्शा-नमुच्यते । सर्वयोगिना(णां) सर्वेषां योगिनां कर्मानुष्ठाननिष्ठानां बुद्धिशुद्धिमतामि-त्यर्थः । मनोनिरोधाधीनं प्रागुक्तमनूद्य तत्फलं कैवल्यं कथयति— दुःखेति । श्लो-कस्य विषयं परिशिनष्टि— येषामिति । अभयं भयरहित्यमसंत्रासात्मकमित्यर्थः । उक्तलक्षणा शान्तिर्निरतिशयानन्दाभिव्यक्तिः स्वभावतो विद्यास्वरूपसामर्थ्यादित्यर्थः । विदुषां जीवन्मुक्तानां मुक्तेः सिद्धत्वान्न साधनापेक्षेत्याह— नान्यायत्तेति । तत्र वाक्योपक्रममनुकूलयति— नेत्यादिना । उत्तमेभ्यो ज्ञानवद्भ्योऽधिकारिभ्यो व्यति-रिक्तानधिकारिणोऽवतारयति— ये त्विति । योगिनः सुकृतानुष्ठायिनस्तदनुष्ठानादेव

---

१ ग. न क्षरती° । २ च. वा । ३ ज. °रूपेण व्य° । ४ झ. °वं सर्वे म° । ५ झ. °क्षय्या शा° । ६ च. °बन्धं प° । ७ च. °न्ति तेषां मोक्षफलमाह मनस इति ते° । ८ ख. मनोनि° । ९ च. °त्मनो° । १० ङ. झ. मनसो नि° । ११ च. °यतमेव । १२ क. °तदृष्टिफलं म° । १३ झ. °लं म° । १४ क. °धनात्म° । १५ घ. °नां क° । १६ ज. °द्धिम° । १७ ग. °नोरो° । १८ ख, °शिशि° । १९ ग. घ. °न्तिरवति° । २० क. °कारेणाव° ।

सन्मार्गगामिणस्तेषामपि तत्त्वज्ञानं कथंचिदुपजातं चेदलं मनोनिग्रहेणेत्याशङ्क्याऽऽह-तेषामिति । अभयं तदेव तत्त्वज्ञानम् । दुःखनिवृत्तिरपि मनोनिग्रहमपेक्ष्य भवतीत्याह—किंचेति । तदेव व्यतिरेकमुखेन (ण) स्फोरयति—न हीति । इतश्च मनो निगृ(ह्य)हीतव्यमित्याह-किंचेति । अभयमित्यत्र सूचितं स्पष्टं विवृणोति-आत्मेति । इतश्च मनोनिग्रहोऽर्थवानित्याह— तथेति । तेषां साधकानां मुमुक्षूणामिति यावत् ॥ ४० ॥

उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना ।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥ ४१ ॥

मनोनिग्रहोऽपि तेषामुदधेः कुशाग्रेणैकबिन्दुनोत्सेचनेन शोषणव्यवसायवद्दृढव्यवसायवतामनवसन्नान्तःकरणानामनायासेनैवादपरिखेदतो भवतीत्यर्थः॥४१॥

कथं मुमुक्षूणां जिज्ञासूनां मनोनिग्रहः सिध्येदित्याशङ्क्याऽऽह--उत्सेक इति। दृष्टान्तदार्ष्टान्तिकभूतश्लोकनिर्दिष्टाक्षराणि व्याचष्टे--मनोनिग्रहोऽपीति । तेषां दृढव्यवसायवतामुद्वेगभागिनामनुद्वेगवतामिति संबन्धः । चक्षुषो निमीलने तमो दृश्यते तस्य चोन्मीलने घटादेवोपलभ्यते न कदाचिदपि ब्रह्मोद्वेगपरिवर्जनात्प्रागुदीरितानां मनोनिग्रहः संभवति तदाह--अपरिखेदत इति ॥ ४१ ॥

उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः ।
सुप्रसन्नं लये चैव यथा कामो लयस्तथा ॥ ४२ ॥

किमपरिखिन्नदृढव्यवसायमात्रमेव मनोनिग्रह उपायो नेत्युच्यते । अपरिखिन्नदृढव्यवसायेनासन्वक्ष्यमाणेनोपायेन कामभोगविषयेषु विक्षिप्तं मनो निगृह्णीयान्निरुन्ध्यादात्मन्येवेत्यर्थः । किंच लीयतेऽस्मिन्निति सुषुप्तो लयस्तस्मिंल्लये च सुप्रसन्नमायासवर्जितमपीत्येतन्निगृह्णीयादित्यनुवर्तते । सुप्रसन्नं चेत्कस्मान्निगृह्यत इति । उच्यते । यस्माद्यथा कामोऽनर्थहेतुस्तथा लयोऽपि । अतः कामविषयस्य मनसो निग्रहवल्लयादपि निरोद्धव्यमित्यर्थः॥४२॥

समाधिं कुर्वतस्तत्त्वसाक्षात्कारप्रतिबन्धका लयविक्षेपसुखरागास्तेभ्यो मनसो वक्ष्य-

---

१ ङ्ग °ति । तदेवाभ° । २ च. मनसो निग्रहे तेषामुपायमाह—उत्सेक इति । मनो° । ३ ख. ग. °दधेर्यद्वत्कुशा° । ४ च. °ने शो° । ५ च. °नुद्ध्यवता° । ६ च °वशान्तः° । ७ झ. मनसो नि° । ८ ङ. °पाये नि° । ९ च. ङ. झ. °बान्व° । १० च. °माणोपा° । ११ च. °मे वि° । १२ झ. °ते यस्मि° । १३ च. झ. °लक्षित्ये° । १४ छ. °ःखबल° । १५ ग. घ. ङ. च. °पकषायद्वं°।

माणोपायेन निग्रहं कुर्यात् । अन्यथा समाधिसाफल्यानुपपत्तेरित्याह—उपायेनेति । प्रागुक्तादुपायादेव मनोनिग्रहपरिग्रहे श्रवणादिविध्यानर्थक्यमिति मन्वानः शङ्कते—किमिति । पूर्वोक्तोपायवतः श्रवणाद्यनुतिष्ठतो मनोनिग्रहद्वारा तत्त्वज्ञानसिद्धिरित्युत्तरमाह—नेत्युच्यत इति । तृतीयपादं व्याचष्टे—किंचेति । लीयते स्थानद्वयमिति शेषः । चतुर्थपादमाकाङ्क्षाद्वारा विवृणोति—सुप्तसन्नमित्यादिना ॥ ४२ ॥

दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।
अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ॥ ४३ ॥

कः स उपाय इति । उच्यते । सर्वं द्वैतमविद्याविजृम्भितं दुःखमेवेत्यनुस्मृत्य कामभोगात्कामनिमित्तो भोग इच्छाविषयस्तस्माद्विप्लुतं मनो निवर्तयेद्वैराग्यभावनयेत्यर्थः । अजं ब्रह्म सर्वमित्येवंतच्छास्त्राचार्योपदेशतोऽनुस्मृत्य तद्विपरीतं द्वैतजातं नैव तु पश्यति । अभावात् ॥ ४३ ॥

उपायेन निगृह्णीयादित्युक्तम् । तमेवोपायं वैराग्यरूपमुपदिशति—दुःखमिति । ज्ञानाभ्यासाख्यमुपायान्तरमुपन्यस्यति—अजमिति । अक्षरव्याख्यानार्थमाकाङ्क्षां निक्षिपति—कः स इति । तत्र पूर्वार्धं व्याकरोति—उच्यत इत्यादिना । वैराग्यभावना तत्र तत्र द्वैतविषये दोषानुसंधानेन वैतृष्ण्यभावना । तया कामभोगान्मनो निरोद्धव्यमित्यर्थः । द्वितीयार्धं ज्ञानाभ्यासविषयं व्याकरोति—अजमित्यादिना ॥ ४३ ॥

लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥ ४४ ॥

एवमनेन ज्ञानाभ्यासवैराग्यद्वयोपायेन लये सुषुप्ते लीनं संबोधयेन्मनः । आत्मविवेकदर्शनेन योजयेत् । चित्तं मन इत्यनर्थान्तरम् । विक्षिप्तं च कामभोगेषु शमयेत्पुनः । एवं पुनः पुनरभ्यस्यतो लयात्संबोधितं विषयेभ्यश्च व्यावर्तितं नापि साम्यापन्नमन्तरालावस्थं सकषायं सरागं बीजसंयुक्तं मन

---

१ ग. ज. °साकल्या° । २ क. झ. °नुष्ठितो । ३ च. °तजातम° । ४ ख. °भावं नयेत्य° । घ. ङ. °भावे नयेत्य° । ५ झ. °वमानयेदित्य° । ६ झ. अजमि° । ७. झ. °यमु° । ८ ग. °ने च वै° । ९ छ. झ, °न च वै° । १० घ. ङ ज. °मसङ्गान्म° । ११ च. न विना° । १२ घ. °पास्तेन् । १३ घ. ज. °त्मद° । १४ ग, ङ. च. °भ्यसतो । १५ ज. °साम्यमाप° । १६ छ. °रागवी° ।

इति विजानीयात् । ततोऽपि यत्नतः साम्यमापादयेत् । यदा तु समप्राप्तं भवति । समप्राप्त्यभिमुखी भवतीत्यर्थः । ततस्तत्र विचालयेद्विषयाभिमुखं न कुर्यादित्यर्थः ॥ ४४ ॥

ज्ञानाभ्यासवैराग्याभ्यां लयाद्विक्षेपाच्च व्यावर्तितं मनो रागप्रतिबद्धं श्रवणमननिदिध्यासनाभ्यासप्रसूतसंप्रज्ञातसमाधिनाऽसंप्रज्ञातसमाधिपर्यन्तेन ततोऽपि प्रतिबन्धाद् व्यावर्तनीयमित्याह— लय इति । श्लोकाक्षराणि व्याकरोति— एवमित्यादिना । ज्ञानाभ्यासश्रवणाद्यावृत्तिर्विषयेषु क्षयिष्ण्वादिदोषदर्शनेन वैतृष्ण्यं वैराग्यं लयो निद्रा । संप्रबोधनमेवाभिनयति—आत्मेति । मनसि प्रकृते किमिति चित्तमुच्यते तत्राऽऽह—चित्तमिति । विक्षिप्तं विप्रसृतं शमयेदुपावर्तयेदिति यावत् । पुनरित्यत्र विवक्षितमर्थमाह—एवमिति । उभयतो व्यावर्तितं मनस्तर्हि निर्विशेषब्रह्मरूपतां गतमित्याशङ्क्याऽऽह—नापीति । अन्तरावस्थमनसः स्वरूपं तृतीयपादावष्टम्भेन स्पष्टयति—सकषायमिति । रागस्य बीजत्वं पराचीनविषयप्रवृत्तिं प्रति प्रतिपत्तव्यम् । यथोक्तं मनोऽज्ञात्वा किं कर्तव्यमित्यपेक्षायामाह—ततोऽपीति । अन्तरालावस्थां पञ्चम्या परामृशति । लयावस्थादि दृष्टान्तयितुमपिशब्दः । यत्नतः संप्रज्ञातसमाधेरिति यावत् । साम्यमसंप्रज्ञातसमाधिमित्यर्थः । चतुर्थपादस्थार्थमाह—यदा त्विति । समाधिद्वयद्वारेण समं निर्विशेषं परिपूर्णं ब्रह्मरूपं प्राप्य मनस्तन्मात्रतया समाप्तं चेदप्राप्तप्रतिषेधः स्यादित्याशङ्क्याऽऽह—समप्नोतीति । ततो निर्विशेषवस्तुप्राप्त्याभिमुख्यादनन्तरमित्यर्थः किं तन्मनसश्चालनं यत्प्रतिषिध्यते तत्राऽऽह—विषयेति ॥ ४४ ॥

नाऽऽस्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥ ४५ ॥

समाधित्सतो योगिनो यत्सुखं जायते तन्नाऽऽस्वादयेत् । तत्र न रज्येतेत्यर्थः । कथं तर्हि । निःसङ्गो निःस्पृहः प्रज्ञया विवेकबुद्ध्या यदुपलभ्यते सुखं तदविद्यापरिकल्पितं मृषैवेति विभावयेत् । ततोऽपि सुखरागान्निवृत्तीयादित्यर्थः । यदा पुनः सुखरागान्निवृत्तं निश्चलस्वभावं सन्निश्चरद्बहिर्निर्गच्छद्भवति चित्तं ततस्ततो नियम्योक्तोपायेनाऽऽत्मन्येवैकीकुर्यात्प्रयत्नतः । चित्स्वरूपसत्तामात्रमेवाऽऽपादयेदित्यर्थः ॥ ४५ ॥

---

१ ङ. °र्तितम° । २ क. °माधिप्र° । ३ ज. व्याचष्टे । ४ छ. °मेनैवं वै° । ५ ब. °सं प्र° । ६ ग. ङ. °ङ्गस्वरू° । ७ ग. ङ. °गमित° । ८ ग. °स्याऽपि प° । ९ ख. ङ. °ङ्गस्वरू° । १० च. °र्हि वर्तेत तत्राऽऽह—नि.सङ्ग इति नि° ।

समाधिस्थायां यत्सुखमुत्पद्यते तद्विषयाभिलाषादपि मनो निरोद्धव्यमित्याह—नाऽऽस्वादयेदिति । तत्रेति समाध्यवस्थोच्यते । किंतु तस्यामवस्थायां सुखं यदुपलभ्यते तदज्ञानविजृम्भितं मिथ्यैवेति प्रज्ञया विवेकेनज्ञानेन निःस्पृहः सन्भावयेदित्याह—निःसङ्ग इति । किंच यच्चित्तं प्राचीनवैराग्यादुपायेन निश्चलं प्रत्यगात्मप्रवणं प्रसाधितं तद्यदि स्वभावानुसारेण बहिर्निर्गन्तुमिच्छेत्तदा संप्रज्ञातसमाधेरसंप्रज्ञातसमाधिपर्यन्तात्प्रयत्नात्तदात्मन्येवैकीकृत्य तन्मात्रमुपाद्य परिशुद्धपरिपूर्णब्रह्मात्मकः स्वयं तिष्ठेदित्याह—निश्चरदिति । प्रथमपादाक्षराणि योजयति—समाधिस्सत्व इति । तस्य समाध्यवस्थायामिति शेषः । द्वितीयपादमाकाङ्क्षाद्वारा विवृणोति—कथमित्यादिना । निःस्पृहो यथोक्ते सुखेऽनु गरहितः सन्नित्यर्थः । विवेकरूपा बुद्धिरागन्तुकस्य रज्जुसर्पवत्कल्पितत्वमित्येवमात्मिका तया भावयेदिति सबन्धः । भावनाप्रकारमभिनयति—यदित्यादिना । प्रथमार्धस्यात्तरार्थमुक्त्वा तात्पर्यार्थं निगमयति—ततोऽपीति । उत्तरार्धं विभजते—यदेत्यादिना । पूर्वोक्तसमाध्यनुरोधादात्मन्येव निश्चलस्वभावं सच्चित्तं यथोक्तं सुखरागनिमित्तं तदुपायरागनिमित्तं वा निश्चरद्भवतीति संबन्धः । तच्च चित्तं बाह्यविषयाभिमुख्यादुक्तोपायेन ज्ञानाभ्यासादिना व्यावर्त्याऽऽत्मन्येव परस्मिन्ब्रह्मणि प्रयत्नतः संप्रज्ञातसमाधिद्वारादेकीकुर्यात् । असंप्रज्ञातसमाधियुक्तं परिपूर्णं ब्रह्मैवाऽऽपादयेदित्यर्थः । तदेव स्पष्टयति—चित्तस्वरूपेति॥४५॥

यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥ ४६ ॥

यथोक्तोपायेन निगृहीतं चित्तं यदा सुषुप्ते न लीयते न च पुनर्विषयेषु विक्षिप्यते अनिङ्गनमचलं निवातस्थदीपैकरूपम् । अनाभासं न केनचित्कल्पितेन विषयभावेनावभासत इति । यदेवंलक्षणं चित्तं तदा निष्पन्नं ब्रह्म ब्रह्मस्वरूपेण निष्पन्नं चित्तं भवतीत्यर्थः ॥ ४६ ॥

कदा पुनरिदं चित्तं ब्रह्ममात्रमापद्यते तत्राऽऽह—यदेति । त्रिविधप्रतिबन्धविधुरं विषयाकाररहितं यदा चित्तमवतिष्ठते तदा ब्रह्म संपन्नं भवतीत्यर्थः । अक्षराणि व्याचष्टे—यथोक्तेनेत्यादिना । उपायो ज्ञानाभ्यासादिः । निगृहीतं विषयेभ्यो विमुखीकृतं न

---

१ छ. तु समाध्यव° । २ क. ग. झ. °कविज्ञा° । ३ ख. °त्रतामा° । ४ क. ख. °मापद्य° । ५ ग. झ. °त्पर्यं नि° । ६ क. यथेत्या° । ७ क. तत्तथा । ८ ङ. छ. °थोक्तेनोपा° । ९ ख. घ. ङ. च. °प्तौ न° । १० ख. च. छ. ज. °निर्वात । ११ झ. °तदी° । १२ क. °ऽक्षरा° । १३ ख. च. °ह्म स्व° । १४ ख. ग. छ. झ. °दा तद्ब्रह्म ।

लीयते न निद्रापारवश्येन कारणात्मतां गतमित्यर्थः । अचलं रागादिवासनाशून्यमित्यर्थः । अचलत्वे दृष्टान्तः—निर्वातेति । किंतु ब्रह्माकारेणेत्येवंलक्षणं चित्तं यदा संपद्यते तदेति योजना । निष्पन्नं ब्रह्मेत्युक्तमेव स्फुटयति—ब्रह्मस्वरूपेणेति ॥ ४६ ॥

स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।
अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते ॥ ४७ ॥

यथोक्तं परमार्थसुखमात्मसत्यानुबोधलक्षणं स्वास्थं स्वात्मनि स्थितम् । शान्तं सर्वानर्थोपशमरूपम् । सनिर्वाणं निर्वृत्तिर्निर्वाणं कैवल्यं सह निर्वाणेन वर्तते । तच्चाकथ्यं न शक्यते कथयितुम् । अत्यन्तासाधारणविषयत्वात् । सुखमुत्तमं निरतिशयं हि तद्योगिप्रत्यक्षमेव । न जातमित्यजं यथा विषयं-विषयम् । अजेनानुपज्ञेन ज्ञेयेनाव्यतिरिक्तं सत्तत्त्वेन सर्वज्ञरूपेण सर्वज्ञं ब्रह्मैव सुखं परिचक्षते कथयन्ति ब्रह्मविदः ॥ ४७ ॥

असंप्रज्ञातसमाध्यवस्थायां येन रूपेण चित्तमभिनिष्पद्यते तद्ब्रह्मस्वरूपं विशिनष्टि-स्वस्थमिति । ज्ञेयेनाव्यतिरिक्तमिति शेषः । तत्र विदुषां संमतिमुदाहरति—सर्वज्ञमिति । यथोक्तमित्यसंप्रज्ञातसमाधिलक्षणं ब्रह्मेत्यर्थः । तस्य परमपुरुषार्थरूपतामाह—सुखमिति । वैषयिकं सुखं व्यवच्छेत्तुं परमार्थेति विशेषणम् । किं तत्र ज्ञानेनेत्याशङ्क्याऽऽह—आत्मेति । तस्य सत्यस्याऽऽगमाचार्यानुमोदिना बोधेन लक्ष्यते प्राप्यते ब्रह्मेति तथोच्यते । तस्य स्वमहिमप्रतिष्ठत्वमाह—स्वात्मनीति । सर्वस्य त्रिविधस्यानर्थस्योपशमेनोपलक्षितत्वादपि पुरुषार्थत्वसिद्धिरित्याह—सर्वेति । निरतिशयानन्दाभिव्यक्तिर्निरवशेषानर्थोच्छित्तिश्चेत्येवंलक्षणं मोक्षमाचक्षते । तत्कथमिदं ब्रह्मेत्याशङ्क्याऽऽह—सनिर्वाणमिति । तस्य क्षीरगुडादिमाधुर्यभेदस्येव स्वानुभवमात्राधिगम्यत्वादवाच्यत्वमाह—तच्चेति । यदुक्तं परमार्थसुखमिति तदिदानीमुपपादयति—सुखमिति । तर्हि सर्वेषामेव तद्भूयादित्याशङ्क्याऽऽह—योगीति । ज्ञानस्याज्ञातत्वे वैधर्म्यदृष्टान्तमाह—यथेति ॥ ४७ ॥

---

१ ख. ग. घ. छ झ निर्वाते । २ घ. झ. निर्वृत्तिनिर्वा° । ज. निर्वृत्तिनिर्वा° । ३ क ङ. °यम् । ४ ज. °नुपज्ञे° । ५ च. छ. सत्तुखेन । ६ ग. झ. 'झरू° । ७ ग. झ °नेत्यत्राऽऽह । ८ ग. झ. °ति यथो° । ९ ग झ. °शमनो° । १० ख. °गन्तव्यत्वा° । ११ ग °भेदभावादि° । घ. °षामेव स्या° ।

न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते ॥ ४८ ॥

इति गौडपादीयकारिकायामद्वैताख्यं तृतीयं
प्रकरणम् ॥ ३ ॥ ॐ तत्सत् ॥

सर्वोऽप्ययं मनोनिग्रहादिर्दृष्टोदादिवत्सृष्टेरुपासना चोक्ता परमार्थस्वरूप-प्रतिपत्त्युपायत्वेन न परमार्थमत्येति । परमार्थसत्यं तु न कश्चिज्जायते जीवः कर्ता भोक्ता च नोत्पद्यते केनचिदपि प्रकारेण । अतः स्वभावतोऽजस्यास्यैकस्याऽऽत्मनः संभवः कारणं न विद्यते नास्ति । यस्मान्न विद्यतेऽस्य कारणं तस्मान्न कश्चिज्जायते जीव इत्येतत् । पूर्वेषूपायत्वेनोक्तानां सत्यानामेतदुत्तमं सत्यं यस्मिन्सत्यस्वरूपे ब्रह्मण्यणुपात्रमपि किंचिन्न जायत इति ॥ ४८ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतौ गौडपादीयभाष्ये आगमशास्त्रविवरणेऽद्वैताख्यतृतीयप्रकरणभाष्यं समाप्तम् ॥ ३ ॥
ॐ तत्सत् ।

उक्तानामुपायानां परमार्थसत्यत्वे सदद्वैतहानिः । अन्यथा तदप्रमितिरित्याशङ्क्याऽऽह—न कश्चिदिति । तत्र हेतुमाह—संभवोऽस्येति । श्लोकाक्षराणि व्याकर्तुं भूमिकां व्याकरोति—सर्वोऽपीति । व्यावहारिकमत्यत्वेनोपायानां न परमार्थसत्यत्वमित्यङ्गीकृत्य पारमार्थिकसत्यस्य प्रतिपत्त्युपायत्वेनैवोक्तत्याह—मृदिति । यदुक्तं मनोनिग्रहादीनां परमार्थत्वेऽद्वैतहानिरिति तत्राऽऽह—नेत्यादिना । तेषामपरमार्थत्वे कथमद्वैतप्रतिपत्तिरित्यपि न, व्यावहारिकसत्यानामपि तत्प्रमितिहेतुत्वस्य प्रतिबिम्ववदुपपत्तेरिति भावः । उपायानां व्यावहारिकमत्यत्वेनैव पारमार्थिकं सत्यत्वं किं न

---

१ च. °ति श्री उपदेशग्रन्थेऽद्वै° । घ. ङ °ति म० माण्डूक्योपनिषद्वार्तिके तृतीयप्रकरणार्थं प्र° । २ झ. °ष्टिरूपावास° । ३ ज. °ते का° । ४ श. °तत्तदु° । ५ झ. °षेऽणु° । ६ ङ. °व्यप° । ७ ङ. घ. ङ. च. झ. °कृताचाय° । ८ ग. ङ. झ. °कां क° । ९ ङ. °श्चैव° । १० घ. °त्वमद्वयी° । ११ ग, ङ. °स्य सृष्टिः पा° ।

स्यादिति तत्राऽऽह-परमार्थेति । तदेव स्पष्टयति— कर्तेति । स्वभावतोऽजत्वं हेतुकर्तव्यम् । तत्रैव हेत्वन्तरमाह—अत इति । हेत्वन्तरमेव स्पष्टयति-यस्मादिति । उत्तरार्धं व्याचष्टे-पूर्वेष्विति । पूर्वेषु ग्रन्थेष्विति शेषः । इतिशब्दोऽद्वैतप्रकरणपरिसमाप्तिं द्योतयति ॥ ४८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितायां गौडपादकारिकाभाष्यटीकायामद्वैताख्यं तृतीयं प्रकरणं समाप्तम् ॥ ३ ॥

अथालातशान्त्याख्यं चतुर्थप्रकरणम् ।

ज्ञानेनाऽऽकाशकल्पेन धर्मान्यो गगनोपमान् ।
ज्ञेयाभिन्नेन संबुद्धस्तं वन्दे द्विपदां वरम् ॥ १ ॥

ओंकारनिर्णयद्वारेणाऽऽगमतः प्रतिज्ञातस्याद्वैतस्य बाह्यविषयैर्भेदवैतथ्यार्थं सिद्धस्य पुनरद्वैते शास्त्रयुक्तिभ्यां साक्षात्किर्धारितस्यैवमुत्तमं सत्यमित्युपसंहारः कृतः। अन्ते तस्यैतस्याऽऽगमार्थस्याद्वैतदर्शनस्य प्रतिपक्षभूता द्वैतिनो वैनाशिकाश्च तेषां चान्योन्यविरोधाद्रागद्वेषादिक्लेशास्पदं दर्शनमिति मिथ्यादर्शनत्वं सूचितम् । क्लेशानास्पदत्वात्सम्यग्दर्शनमित्यद्वैतदर्शनं स्तूयते । तदिह विस्तरेणान्योन्यविरुद्धतयाऽसम्यग्दर्शनत्वं पदर्श्य तत्प्रतिषेधेनाद्वैतदर्शनसिद्धिरूपसंहर्तव्याऽऽलातन्यायेनेत्यलातशान्तिरारभ्यते । तत्राद्वैतदर्शनं (न)संप्रदायकर्तुरद्वैतस्वरूपेणैव नमस्कारार्थोऽयमाद्यश्लोकः । आचार्यपूजा ह्यभिप्रेतार्थसिद्ध्यर्थेष्यते शास्त्रारम्भे । आकाशेनेषदसमाप्तमाकाशं(क ल्पमाकाशतुल्यमेतत् । तेनाऽऽकाशकल्पेन ज्ञानेन, किम्, धर्मानात्मनः किंविशिष्टान्गगनोपमान्गगनमुपमा येषां ते गगनोपमास्तानात्मनो धर्मान् । ज्ञानस्यैव पुनर्विशेषणम्-ज्ञेयैर्धर्मैरात्माभिरभिन्नमन्युष्णवत्सवितृप्रकाशवच्च ज्ञानं तेन ज्ञेयाभिन्नेन ज्ञानेनाऽऽकाशकल्पेन ज्ञेयात्मस्वरूपाव्यतिरिक्तेन गगनोपमान्धर्मान्यः संबुद्धः संबुद्धवानित्ययमेवेश्वरो यो नारायणाख्यस्तं वन्देऽ-

---

१ ख. ग. घ. ङ. छ. ञ. झ. °पादीयभा° । २ झ. °यविशेषवै° । ३ क. °च प्रसि° । ४ च. छ. °द्वैतशा° । ५ ङ. ञ. °कादयस्तेषां । घ. °कातेषां । झ. काश्चैते° । ६ क. °ध्यात्वद° । ७ छ. °त्मादात्मैकत्वबुद्धिरेव सम्य° । ८ छ. °द्धयर्थमिष्य° । ९ घ. °दसामान्यमा° । १० घ. °शतुल्य° । ११ ञ °त्मघ ।

भिवादये द्विपदां वरं द्विपदोपलक्षितानां पुरुषाणां वरं प्रधानं पुरुषोत्तम-मित्यभिप्रायः । उपदेष्टृनमस्कारमुखेन(ण) ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थ-तत्त्वदर्शनमिह प्रकरणे प्रतिपिपादयिषितं प्रतिपक्षप्रतिषेधद्वारेण प्रतिज्ञातं भवति ॥ १ ॥

आद्यन्तमध्यमङ्गला ग्रन्थाः प्रचारिणो भवन्तीत्यभिप्रेत्याऽऽदावोंकारोच्चारणवदन्ते परदेवताप्रणामवन्मध्येऽपि परदेवतारूपमुपदेष्टारं प्रणमति—ज्ञानेति । पूर्वोत्तरप्रकरणसं-बन्धसिद्ध्यर्थं पूर्वप्रकरणत्रये वृत्तमर्थं क्रमादनुद्रवति—ओंकारेति । अद्वैत इत्यद्वैतो-पलक्षितं तृतीयं प्रकरणमुच्यते । चतुर्थं प्रकरणमवतारयितुमुपयुक्तमर्थान्तरमनुवदति—तस्येति । द्वैतिनो भेदवादिनो वैनाशिकव्यतिरिक्ता गृह्यन्ते । वैनाशिका नैरात्म्य-वादिनः । रागद्वेषादीत्यादिशब्देनातिरिक्तक्लेशोपादानम् । पक्षान्तराणां मिथ्यादर्शन-त्वसूचनं कुत्रोपयुज्यते तत्राऽऽह—क्लेशेति । पातनिकामेवं कृत्वा समनन्तरप्रकरण-प्रवृत्तिं प्रतिजानीते—तदिहेति । तदसम्यग्दर्शनत्वमिति संबन्धः । आवीतन्यायो व्यतिरेकन्यायः । यथा यत्कृतकं तदनित्यमित्यन्वयादनित्यत्वेऽवगतेऽपि यन्नानित्यं न तत्कृतकमिति व्यतिरेकोऽपि व्यभिचारशङ्कानिरासित्वेन व्याप्तिनिश्चयार्थमिष्यते । तथा तर्कतः संभावितस्याऽऽगमेनावगतस्यापि प्रतिपक्षमूलवादान्तरापाकरणप्रपञ्चमन्त-रेण पाक्षिकासम्यक्त्वशङ्का स्याद्द्वैतदर्शनस्येति तत्प्रतिषेधेन तत्सिद्धिरुपसंहर्तव्येत्य-लातशान्तिदृष्टान्तोपलक्षितमारभ्यते प्रकरणमित्यर्थः । विशेषेण स्पष्टमितो वीतः स नं भवतीत्यवीतः । अवीत एवाऽऽवीतः । तेन न्यायेन व्यतिरेकेणेति यावत् । प्रकरणस्य तात्पर्यमेवं दर्शयित्वा प्रथमश्लोकस्य तात्पर्यमाह—तत्रेति । तत्र चतुर्थप्रकरणं सप्तम्या परामृश्यते । किमित्यद्वैतरूपेणाऽऽचार्यो नमस्क्रियते तत्राऽऽह—आचार्येति । अभि-प्रेतार्थः शास्त्रस्याविघ्नेन परिसमाप्तिस्तदर्थं विप्रतिपत्त्यादिव्यावृत्तिश्च । आकाशस्य जडत्वाधिक्याज्ज्ञानं स्वप्रकाशमाकाशेनेषदसमानं वक्तव्यम् । विभुत्वाद्वायुपमा द्रष्टव्या । बहुवचनमुपाधिकल्पितभेदाभिप्रायम् । तेषामपि चिन्मात्रत्वं विवक्षित्वोक्तम् । ज्ञान-स्यैवेति । तेनेत्यादि पुनरनुवादेनान्वयमन्वाचष्टे । आचार्यो हि पुरा बदरिकाश्रमे नरनारायणाधिष्ठिते[11] नारायणं भगवन्तमभिप्रेत्य तपो महदतप्यत । ततो भगवानति-प्रसन्नस्तस्मै विद्यां प्रादादिति प्रसिद्धं परमगुरुत्वं परमेश्वरस्येति भावः । ननु प्रक-रणे प्रारभ्यमाणे प्रतिप(पा)द्ये प्रमेये वक्तव्ये किमित्युपदेष्टा नमस्क्रियते तत्राऽऽह—उपदेष्टृति ॥ १ ॥

---

१ ग. °त्याऽऽह—ओंका° । २ ग. ङ. °न्ते च प° । ३ छ. °नुवदति । ४ ज. °न्धः । अवी° । ङ. °न्धः । अविनीत । ५ ज. व्यतिरेकश्च° । ६ क. °सासितेत्व° । ७ ग. ङ. °न संभ° । ८ ज. °तः । ते° । ९ ग. छ. ङ. °ति च । त° । १० घ. °शस्याऽऽत्मा° । ११ घ. °तेन ना° । १२ ङ. तत्त्वतो । १३ ज. °ति स्थि° । १४ क. °श्वर इति ।

अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः ।
अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ॥ २ ॥

अधुनाऽद्वैतदर्शनयोगस्य नमस्कारस्तत्स्तुतये । स्पर्शनं स्पर्शः संबन्धो न विद्यते यस्य योगस्य केनचित्कदाऽपि सोऽस्पर्शयोगो ब्रह्मस्वभाव एव, वै नामेति ब्रह्मविदामस्पर्शयोग इत्येवं प्रसिद्ध इत्यर्थः । स च सर्वसत्त्वसुखो भवति । कश्चिदत्यन्तसुखसाधनविशिष्टोऽपि दुःखरूपः, यथा तपः । अयं तु न तथा । किं तर्हि सर्वसत्त्वानां सुखः । तथेह भवति कश्चिद्विषयोपभोगः सुखो न हितः । अयं तु सुखो हितश्च । नित्यमप्रचलितस्वभावत्वात् । किंचाविवादो विरुद्धवदनं विवादः पक्षप्रतिपक्षपरिग्रहेण यस्मिन्न विद्यते सोऽविवादः । कस्मात् । यतोऽविरुद्धश्च य ईदृशो योगो देशित उपदिष्टः शास्त्रेण तं नमाम्यहं प्रणमामीत्यर्थः ॥ २ ॥

इदानीमद्वैतदर्शनयोगस्तुतये तन्नमस्कारं प्रस्तौति—अस्पर्शेति । श्लोकस्य तात्पर्यमाह—अधुनेति । तस्य च स्तुतिस्तत्साधनेषु प्रवृत्तावुपयुज्यते । संप्रत्यक्षराणि व्याकुर्वन्नस्पर्शयोगशब्दं व्याकरोति—स्पर्शनमिति । योगस्यान्यसंबन्धप्रसङ्गाभावात्कथमस्पर्शत्वमित्याशङ्क्याऽऽह—ब्रह्मेति । निपातयोरर्थं कथयति—वै नामेति । सर्वेषां सत्त्वानां देहभृतां सुखयतीति व्युत्पत्त्या सुखहेतुत्वं ब्रह्मस्वभावस्य सुखविशेषणेन दर्शयति—स चेति । सुखहेतावपि ब्रह्मस्वभावे विवक्षितं विशेषं दर्शयति—भवतीति । हितविशेषणस्य तात्पर्यमाह—तथेह भवतीत्यादिना । तस्य हितत्वे हेतुमाह—नित्यमिति । तस्यैव विशेषणान्तरमाह—किंचेति । तत्र हेतुं प्रश्नपूर्वकमाह—कस्मादिति । आत्मप्रकाशत्वाद्ब्रह्मस्वभावस्याविरुद्धत्वम् । न हि कस्यचिदात्मप्रकाशो विरुद्धो भवतीत्यर्थः । यथोक्तयोगज्ञानमार्गस्य संप्रदायागतत्वमाह—य ईदृश इति । तन्नमस्कारव्याजेन तस्य स्तुतिस्तदुपायेषु श्रोतृप्रवृत्त्यर्थमत्र विवक्षितेत्याह—तं नमामीति ॥ २ ॥

भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि ।
अभूतस्यापरे धीरा विवदन्तः परस्परम् ॥ ३ ॥

---

१ च. °ष्टो दु°। २ घ. छ. °खस्वरू°। ३ ख. घ. ज. यथेह। ४ च. °दः प्रतिप°। ५ च. ज. °ग्रहो य°। ६ ज. °योगः स्तूयते त°। ७ ख. घ. ज. यथेह। ८ ज. °द्वम्। ९ ङ. ज. °स्य यो°। १० ज. °तितदु°। ११ घ. °परं धी°।

कथं द्वैतिनः परस्परं विरुध्यन्त इति । उच्यते । भूतस्य विद्यमानस्य वस्तुनो जातिमुत्पत्तिमिच्छन्ति वादिनः केचिदेव हि सांख्या न सर्व एव द्वैतिनः । यस्मादभूतस्याविद्यमानस्यापरे वैशेषिका नैयायिकाश्च धीरा धीमन्तः प्राज्ञाभिमानिन इत्यर्थः । विवदन्तो विरुद्धं वदन्तो ह्यन्योन्यमिच्छन्ति जेतुमित्यभिप्रायः ॥ ३ ॥

अद्वैतदर्शनस्याविरुद्धत्वेनाविवादत्वं विशदीकर्तुं द्वैतिनां विवादं तावदुदाहरति—भूतस्येति । एवं विरुद्धं वदन्तो मिथो जेतुमिच्छन्तीत्याह—विवदन्त इति । प्रश्नपूर्वकं श्लोकाक्षराणि योजयति—कथमित्यादिना । एवकारार्थे हेतुमाह—यस्मादिति । प्राज्ञाभिमानिनो जातिमिच्छन्तीति पूर्वेण संबन्धः । चतुर्थपादं साध्याहारं व्याकरोति—विवदन्त इति ॥ ३ ॥

भूतं न जायते किंचिदभूतं नैव जायते ।
विवदन्तो द्वया ह्येवमजातिं ख्यापयन्ति ते ॥ ४ ॥

तैरेवं विरुद्धवदनेनान्योन्यपक्षप्रतिषेधं कुर्वद्भिः किं ख्यापितं भवतीति । उच्यते । भूतं विद्यमानं वस्तु न जायते किंचिद्विद्यमानत्वाद्देवाऽऽत्मवदित्येवं वदन्नसद्वादी सांख्यपक्षं प्रतिषेधति सज्जन्म । तथाऽभूतमविद्यमानंमविद्यमानत्वान्नैव जायते शशविषाणवदित्येवं वदन्सांख्योऽप्यसद्वादिपक्षमसज्जन्म प्रतिषेधति । विवदन्तो विरुद्धं वदन्तो द्वया द्वैतिनोऽप्येतेऽन्योन्यस्य पक्षौ सदसतोर्जन्मनी प्रतिषेधन्तोऽजातिमनुत्पत्तिमर्थात्ख्यापयन्ति प्रकाशयन्ति ते ॥ ४ ॥

पक्षद्वयनिषेधमुखेन सिद्धमर्थं कथयति—भूतमित्यादिना । श्लोकाक्षरव्याख्यानार्थमाकाङ्क्षां निक्षिपति—तैरिति । तत्राऽऽद्यं पादमवतार्य व्याकरोति—उच्यत इति । द्वितीयपादं विभजते—तथेति । द्वितीयार्धं विभजते—विवदन्त इत्यादिना । सदपदातिरिक्तवस्त्वभावाद्वस्तुत उत्पत्तेरनुपपत्तिरित्याह—अर्थादिति ॥ ४ ॥

ख्याप्यमानामजातिं तैरनुमोदामहे वयम् ।
विवदामो न तैः सार्धमविवादं निबोधत ॥ ५ ॥

तैरेवं ख्याप्यमानामजातिमेवमस्तित्वेनानुमोदामहे केवलं न तैः सार्धं

---

१ क. °न्तोऽन्यो° । २ च. छ. झ. °न्तोऽन्यो° । ३ ग छ झ °ति । प्रज्ञा° । ४ ग. झ. °नो भूतस्य जा° । ५ च °तिबोधं । ६ झ. किं व्याख्यातं । ७ क. °त्वादात्म° । ८ क. ख घ. ङ. °नत्वा° । ९ क. °या अद्वै° । १० च झ. °न्यप° ।

विवादार्थः पक्षप्रतिपक्षग्रहणेन । यथा तेऽन्योन्यमित्यभिप्रायः । अतस्तमविवादं विवादरहितं परमार्थदर्शनमनुज्ञातमस्माभिर्निबोधत हे शिष्याः ॥ ५ ॥

तर्हि प्रतिवादिभिरुक्तत्वादजातिरपि भवता प्रत्याख्येयेत्याशङ्क्याऽऽह—रूपाण्यपानामिति । प्रतिवादिभिः सह विवादाभावे फलितमाह- अविवादमिति । अक्षराणि व्याचष्टे-तैरित्यादिना । अद्वैतवादिनो द्वैतवादिभिर्विवादाभावे वैधर्म्यदृष्टान्तमाह- यथा त इति । चतुर्थपादार्थमाह—अत इति ॥ ६ ॥

अजातस्यैव धर्मस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो धर्मो मर्त्यतां कथमेष्यति ॥ ६ ॥

सदसद्वादिनः सर्वेऽपीति । पुरस्तात्कृतभाष्यश्लो (ष्यः श्लो)कः ॥ ६ ॥

जातस्यैव जन्मनाऽनर्थक्यादनवस्थानाच्चाजातस्यैव पदार्थस्य जन्म सद्वादिनोऽसद्वादिनश्च सर्वेऽपि स्वीकुर्वन्तीति परपक्षमनुवदति अजातस्येति । तत्र शिष्टामिष्टदोषं पदद्वयाभ्यनुजानाति- अजातो हीति । के ते वादिनो यैरेवमिष्यते तत्राऽऽह- सदसदिति । अवशिष्टानि श्लोकाक्षराणि व्याख्यातत्वान्न पुनर्व्याख्यानसापेक्षाणीत्याह—पुरस्तादिति ॥ ७ ॥

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥ ७ ॥
स्वभावेनामृतो यस्य धर्मो गच्छति मर्त्यताम् ।
कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥ ८ ॥

उक्तार्थानां श्लोकानामिहोपन्यासः परवादिपक्षाणामन्योन्यविरोधरूपापिवानुपोदनप्रदर्शनार्थः ॥ ७ ॥ ८ ॥

परिणामिब्रह्मवादे यदब्रह्मवादिभिर्दूषणमुच्यते तदप्यनुज्ञातमेवेति मत्वाऽऽह—न भवतीति । अमृतं हि ब्रह्म न तद्रूपे स्थिते मर्त्यं भवितुमर्हति । स्थितरूपविरोधात् । न च मर्त्यं कार्यं स्वरूपे स्थिते प्रलयावस्थायाममृतं ब्रह्म संपद्यते । नष्टेऽपि स्वरूपे तस्यैवाभावान्नान्यथात्वमित्यभिप्रेत्याऽऽह—प्रकृतेरिति । किंच यस्य परिणामवादिनः

---

१ ङ. °मः प्रतिपक्षपक्षपरिग्र° । २ ख. घ. ङ. °क्षपरिग्र° । ३ घ. ङ. च. ञ. °ग्रहेण । य° । ४ ख ङ. श्लोकाः । ५ छ. °भीष्टं दो° । ६ ङ यथा । ७ ख. च. ङ. °नुपपत्त्यनुमो° । ङ. °नुपपत्त्याऽनुमो° । ८ घ. ङ. छ. यद्ब्रह्म° । ९ ज. कार्यस्य° । १० ङ. °र्यं कार्यस्य° । ११ क. °रूपस्थि° । १२ क. स्थितं ।

स्वभावेनामृतः सन्परमात्मारूयो [1]धर्मशब्दितो भावो मर्त्यतां कार्यभावापत्त्या गच्छति तस्य [2]कृतकेन समु[3]च्चयानुष्ठानेनामृतो [4]जातो मुक्तो वक्तव्यः। स च कथं निश्चलः स्थातुं पारयति। यत्कृतकं तदनित्यमितिन्यायविरोधादित्याह–स्वभावनेति। पुनरु[5]क्तिमाशङ्क्य प्रत्यादिशति–उक्तार्थानामिति ॥ ७ ॥ ८ ॥

सांसिद्धिकी स्वाभाविकी सहजा[6] अकृता च या।
प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या[7] ॥ ९ ॥

यस्माल्लौकिक्यपि प्रकृतिर्न विपर्येति काऽसावित्याह–सम्यक्सिद्धिः संसिद्धिस्तत्र भवा सांसिद्धिकी यथा योगिनां सिद्धानामणिमाद्यैश्वर्यप्राप्तिः प्रकृतिः सा भूतभविष्यत्कालयोरपि योगिनां न विपर्येति तथैवं [8]सा। तथा स्वाभाविकी द्रव्यस्वभावत एव यथाऽग्न्यादीनामुष्णप्रकाशादिलक्षणा, [9]साऽपि न कालान्तरे व्यभिचरति देशान्तरे च। तथा सहज[10]ाऽऽत्मना सहैव [11]जाता यथा पक्ष्यादीनामाकाशगमनादिलक्षणा। अन्याऽपि [12]या काचिदकृता केनाचिन्न कृता यथाऽपां निम्नदेशगमनादिलक्षणा। अन्याऽपि [13]या काचित्स्वभावं न जहाति सा सर्वा प्रकृतिरिति विज्ञेया [14]लोके। मिथ्याकल्पितेषु लौकिकेष्वपि वस्तुषु प्रकृतिर्नान्यथा भवति किमुताजस्वभावेषु परमार्थवस्तुष्वमृतत्वल[15]क्षणा प्रकृतिर्नान्यथा भवतीत्यभिप्रायः ॥ ९ ॥

प्रकृतेरन्यथाभावो न कथंचिदित्युक्तं तत्र प्रकृतिशब्दार्थं कथयति–सांसिद्धिकीति। श्लोकाक्षराणि व्याकुर्वन्प्रकृतेरन्यथात्वाभावे हेतुमाह–यस्मादिति। तस्मादजाऽमृतस्वभावा प्रकृतिर्न विपर्येतीति किमु वक्तव्यमिति योजना। कैमुतिकन्यायद्योतनार्थोऽपिशब्दः। विवक्षितं हेतुं स्फुटयितुं प्रश्नपूर्वकं विभजते–काऽसावित्यादिना। साङ्गयोगमनुष्ठाय परिसमापनं संसिद्धिः। सिद्धानामणिमाद्यैश्वर्यप्राप्तौ सामग्रीसंपन्नानाम्। या काचित्स्वभावं न जहाति घटस्य घटत्वं पटस्य पटत्वमित्यादिकेति शेषः। प्रासङ्गिकं प्रकृतिशब्दार्थमुक्त्वा प्रकृतेरन्यथात्वाभावे प्रागुक्ते [16]स्वसिद्धान्ते यत्फलति तदिदानीं किंपुनर्न्यायेन कथयति–मिथ्येति ॥ ९ ॥

---

१ घ. धर्मवादिनो। २ क. कृतके स°। ३ ज. °च्चयोऽनु°। ४ घ. छ. झ. जीवो। ५ घ. °रुक्तमा°। ६ च. °जाऽप्यकृ°। झ. °जा कृतका यथा। प्र°। ७ झ. सा। ८ घ. च. °क्सिद्धि ता°। ९ च. °व स्वा°। ख. ज. °व या स्वा°। १० घ. सा स्वा°। ११ ज. सा न। १२ झ. °जा सा आत्म°। १३ झ. °पि का°। १४ क. °पि का°। १५ घ. छ. °तिर्ज्ञेया। १६ घ. °क्षणप्र°। १७ क. ग. °तीति भावः ॥ ९ ॥ ख. घ. ङ. ज. तीति ॥ ९॥ १८ क. घ. भावान्न ज.। १९ क. °के सि°।

जरामरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः ।
जरामरणमिच्छन्तश्च्यवन्ते तन्मनीषया ॥ १० ॥

किंविषया पुनः सा प्रकृतिर्यस्या अन्ययाभावो वादिभिः कल्प्यते कल्पनायां वा को दोष इत्याह-जरामरणनिर्मुक्ताः । जरामरणादिसर्वविक्रियावर्जिता इत्यर्थः । के । सर्वे धर्माः सर्व आत्मान इत्येतत्स्वभावतः प्रकृतितः । एवंस्वभावाः सन्तो धर्मा जरामरणमिच्छन्त इच्छन्त इवेच्छन्तो रज्ज्वामिव सर्पमात्मनि कल्पयन्तश्च्यवन्ते स्वभावतश्चलन्तीत्यर्थः । तन्मनीषया जन्मरणचिन्तया तद्भावभावितत्वदोषेणेत्यर्थः ॥ १० ॥

प्रासङ्गिकीमेव जीवानां प्रकृतिं दर्शयितुं प्रक्रमते-जरेति । आत्मानो हि सर्वविक्रियारहिताः स्वभावतो भवन्तीत्यर्थः । तेषामुक्तप्रकृतेरन्यथात्वे का क्षतिरित्याशङ्क्याऽऽह-जरामरणमिति । सर्वविक्रियाशून्ये स्वात्मनि विक्रियाकल्पनायां तद्वासनया स्वभावहानिः स्यादित्यर्थः । श्लोकाक्षराणि व्याकर्तुमाकाङ्क्षां दर्शयति-किंविषयेति । आश्रयविषयो विषयशब्दः । अप्रकृतं प्रकृतेराश्रयनिरूपणमित्याशङ्क्याऽऽह-यस्या इति । प्रश्नान्तरं प्रकरोति-कल्पनायामिति । तत्र पूर्वार्धमुत्तरत्वेन व्याकरोति-आहेत्यादिना । उत्तरार्धं विभजते-एवंस्वभावा इति ॥ १० ॥

कारणं यस्य वै कार्यं कारणं तस्य जायते ।
जायमानं कथमजं भिन्नं नित्यं कथं च तत् ॥ ११ ॥

कथं सज्जातिवादिभिः सांख्यैरनुपपन्नमुच्यत इत्याह वैशेषिकः । कारणं मृद्वदुपादानलक्षणं यस्य वादिनो वै कार्यं कारणमेव कार्याकारेण परिणमते यस्य वादिन इत्यर्थः । तस्याजमेव सत्प्रधानादि कारणं महदादि कार्यरूपेण जायत इत्यर्थः । महदाद्याकारेण चेज्जायमानं प्रधानं कथमजमुच्यते तैर्विप्रतिषिद्धं चेदं जायतेऽजं चेति । नित्यं च तैरुच्यते प्रधानं भिन्नं विदीर्णं स्फुटितमेक-

---

ग. ङ. °र्यां को° । २ छ. °यारहिता । ३ च. के ते स° । ४ क. आत्मन । ५ ज. °मेवं जी° । ६ ग. °तिं प्रद° । ७ ख. हि वि° । ८ घ. ङ. मुक्ते प्र° । ज. °मुक्तः प्र° । ९ ग. झ. °सनायाः । स्व° । १० ख. °रं क° । ११ ग, छ, झ. °नायां वेति । १२ च. इत्यत आह । १३ च. रूपं ना° । १४ घ. ङ. च. °ते विप्र° ।

देशेन सत्कथं नित्यं भवेदित्यर्थः। न हि सावयवं घटादि एकदेशस्फुटनधर्मि नित्यं दृष्टं लोके इत्यर्थः। विदीर्णं च स्यादेकदेशेनाजं नित्यं चेति। एतद्विप्रतिषिद्धं तैरभिधीयत इत्यभिप्रायः॥ ११॥

प्रासङ्गिकं परित्यज्य सांख्यपक्षे वैशेषिकादिभिरुच्यमानं दूषणमस्यनुज्ञातमनुभाषते—कारणमिति। कारणस्य जायमानत्वे का हानिरित्याशङ्क्याऽऽह—जायमानमिति। सावयवत्वाच्च प्रधानस्य नित्यत्वानुपपत्तिरित्याह—भिन्नमिति। श्लोकस्य तात्पर्यमाह—कथमिति। तत्र प्रथमपादाक्षराणि योजयति—कारणमित्यादिना। तदेव स्पष्टयति—कारणमेवेति। द्वितीयपादं विभजते—तस्येति। प्रधानादीत्यादिशब्देन तदवयवाः सत्त्वादयो गृह्यन्ते। महदादीत्यादिशब्देनाहंकारादिग्रहणम्। तृतीयपादं व्याकरोति—महादादीति। विप्रतिषेधं विशदयति—जायत इति। चतुर्थपादार्थमाह—नित्यं चेति। विमतमनित्यं सावयवत्वाद्घटादिवदित्यभिप्रेत्य दृष्टान्तं साधयति—न हीति। सांख्यस्मृतिविरुद्धमनुमानमित्याशङ्क्याऽऽह—विदीर्णं चेति॥ ११॥

कारणाद्यदनन्यत्वमतः कार्यमजं यदि।
जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम्॥ १२॥

उक्तस्यैवार्थस्य स्पष्टीकरणार्थमाह—कारणादजात्कार्यस्य यद्यनन्यत्वमिष्टं त्वया ततः कार्यमजमिति प्राप्तम्। इदं चान्यद्विप्रतिषिद्धं कार्यमजं चेति तव। किंचान्यत्कार्यकारणयोरनन्यत्वे जायमानाद्धि वै कार्यात्कारणमनन्यन्नित्यं ध्रुवं च ते कथं भवेत्। न हि कुक्कुट्या एकदेशः पक्षवत एकदेशः प्रसवाय कल्प्यते॥ १२॥

किंच कार्यकारणयोरभेदे किं कारणाभिन्नं कार्यं वा किं कार्याभिन्नं कारणमिति विकल्प्याऽऽद्यमनुवदति—कारणादिति। अतोऽस्मिन्पक्षे कार्यमजं स्यात्। तथाविधकारणाभिन्नत्वादिति दूषयति—अत इति। द्वितीयमनुर्दवति—यदीति। जायमानात्कार्यात्कारणमभिन्नं यदीति योजना। न तर्हि कारणं ध्रुवं भवितुमर्हति कार्याभिन्नत्वात्तस्य चाध्रुवत्वादिति दूषयति—कारणमिति। श्लोकस्य तात्पर्यमाह—उक्तस्येति। कार्यकारणयोरभेदवादे विप्रतिषेधो दर्शितः। तस्यैव दृढीकरणार्थमयं श्लोक इत्यर्थः। पूर्वार्धाक्षरोत्थमर्थमाह—कारणादिति। प्राप्तेरनिष्टपर्यवसायित्वमाह—इदं चेति। प्रधान-

---

१ छ. °दिरेक°। २ छ. °देशे स्फु°। ३ ख. ङ. च. ज. 'त्यं च दृ°। ४ ख. °दीर्णं च। ५ क. साध्यत्वा°। ६ ख, घ. ङ. °वकुटस्यैक°। ७ च. छ. वल्पते। ८ छ. नुवदति। ९ घ. °त्कार्यका°।

स्याजत्वं जायमानत्वं च विप्रतिषिद्धमित्युक्तम् । ततोऽन्यदित्युक्तमेव व्यनक्ति-कार्यमिति । अभेदेऽपि मायावादे नैष दोषः कारणस्य कार्यादनन्यत्वानभ्युपगमात् । कार्यस्यैव कारणमात्रत्वाङ्गीकारादिति मत्वाऽऽह—तवेति । द्वितीयार्धं विभजते—किं चान्यदिति । अभेदवादेऽपि कार्यस्यानित्यत्वं कारणस्य नित्यत्वमिति व्यवस्था किमिति न भवतीत्याशङ्क्याऽऽह—न हीति ॥ १२ ॥

अजाद्वै जायते यस्य दृष्टान्तस्तस्य नास्ति वै ।
जाताच्च जायमानस्य न व्यवस्था प्रसज्यते ॥ १३ ॥

किंचान्यदजादनुत्पन्नाद्वस्तुनो जायते यस्य वादिनः कार्यं दृष्टान्तस्तस्य नास्ति वै । दृष्टान्ताभावेऽर्थादजान्न किंचिज्जायत इति सिद्धं भवतीत्यर्थः । यदा पुनर्जाताज्जायमानस्य वस्तुनोऽभ्युपगमः, तदप्यन्यस्माज्जातात्तदप्यन्यस्मादिति न व्यवस्था प्रसज्येत । अनवस्थानं स्यादित्यर्थः ॥ १३ ॥

किंच यस्य प्रधानवादिनो मते प्रधानादजादभिन्नं कार्यं जायते महदादीत्यभ्युपगम्यते तस्य पक्षे तस्मिन्नर्थे दृष्टान्तो वक्तव्यः, तदवष्टम्भेनैव तेनार्थव्यवस्थापनात् । न चात्रोभयसंप्रतिपन्नो दृष्टान्तो दृष्टोऽस्तीत्याह—अजादिति । यद्यजान्नित्याद्वस्तुनो जायमानमभ्युपगन्तुं न शक्यते तर्हि जातादेव जायमानमभ्युपगम्यतामिशङ्क्याऽऽह—जाताच्चेति । सांख्यसमये दोषान्तरप्रदर्शनपरत्वं श्लोकस्य प्रतिजानीते—किंचान्यदिति । तत्र पूर्वार्धाक्षराणि योजयति—अजादिति । दृष्टान्ताभावेऽपि प्रमाणान्तरादर्थप्रतिपत्तिर्भविष्यतीत्याशङ्क्याऽऽह—दृष्टान्तेति । परस्य खल्वनुमानाधीनमर्थपरिज्ञानम् । न च दृष्टान्ताभावेऽनुमानमवकल्पते तस्मान्न सांख्यसमयः संभवतीत्यर्थः । द्वितीयार्धं व्याचष्टे—यदा पुनरित्यादिना ॥ १३ ॥

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥ १४ ॥

"यत्र त्वस्य सर्वमात्मैवाभूत्" इति परमार्थतो द्वैताभावः श्रुत्योक्तस्तमाश्रित्याऽऽह—हेतोर्धर्माधर्मादेरादिः कारणं देहादिसंघातः फलं येषां

---

१ घ. °णका° । २ ख. °भेदेऽपि । ३ छ. °जादुत्प° । ४ झ. °न्नित्याद्व° । ५ झ. °ति प्रसि° । ६ झ. तदाऽप्य° । ७ ग. °न्तानुभा° । ८ ग. झ. °न्तानुभा° । ९ घ. ङ. ज. °कल्प्यते । १० छ. श्रुत्युक्त° । ११ क. घ. ज. °र्मादे° । १२ झ. देहसं° । १३ घ. छ. फलमेषां ।

वादिनाम् । तथाऽऽदिः कारणम् । हेतुधर्माधर्मादिः फलस्य च देहादिसंघातस्य । एवं हेतुफलयोरितरेतरकार्यकारणत्वेनाऽऽदिमत्त्वं ब्रुवद्भिरेवं हेतोः फलस्य चानादित्वं कथं तैरुपवर्ण्यते विप्रतिषिद्धमित्यर्थः । न हि नित्यस्य कूटस्थस्याऽऽत्मनो हेतुफलात्मता संभवति ॥ १४ ॥

द्वैतवादिभिरन्योन्यपक्षप्रतिक्षेपमुखेन(ण)रूयापितं वस्तुनोऽजत्वमद्वैतवादिनाऽभ्यनुज्ञातमिदानीं द्वैतनिरसनमपि श्रौतं विद्वदनुभवानुसारित्वात्तेनाभ्यनुज्ञातमेवेत्याह—हेतोरिति । हेतुफलात्मकः संसारोऽनादिरिति वदद्भिस्तस्यानादित्वस्वभावो नैव वक्तुं शक्यते । हेतुफलयोरादिमत्त्वस्यैव कण्ठोक्तत्वादतो हेतुफलात्मकं द्वैतमनिरूपितरूपमवस्तुभूतमित्यर्थः । श्लोकस्य तात्पर्यमाह—यत्र त्विति । तमाश्रित्य कार्यकारणात्मकस्य द्वैतस्य दुर्निरूपत्वमाहेति योजना । हेतुफलयोरात्मपरिणामत्वादादिमत्त्वमुपादानरूपेण चानादित्वमित्याशङ्क्याऽऽत्मनो निरंशस्यैव कूटस्थस्य नित्यस्यैव परिणामानुपपत्तेर्नैवमित्याह—न हीति ॥ १४ ॥

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ॥ १५ ॥

कथं तैर्विरुद्धमभ्युपगम्यत इति । उच्यते । हेतुजन्यादेव फलाद्धेतोर्जन्माभ्युपगच्छतां तेषामीदृशो विरोध उक्तो भवति यथा पुत्राज्जन्म पितुः ॥१५॥

हेतुफलयोरन्योन्यमादिमत्त्वं ब्रुवता तदात्मकस्य संसारस्यानादित्वं विप्रतिषिद्धमित्युपपादितम् । संप्रति कार्यकारणभावोऽपि तयोर्न संभवतीत्याह—हेतोरित्यादिना । हेतुफलयोरन्योन्यं कारणत्वमभ्युपगच्छद्भिरभ्युपगम्यते विरुद्धमित्येतत्प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । ईदृशत्वमेव विशदयति—यथेति ॥ १५ ॥

संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया ।
युगपत्संभवे यस्मादसंबन्धो विषाणवत् ॥ १६ ॥

यथोक्तो विरोधो न युक्तोऽभ्युपगन्तुमिति चेन्मन्यसे संभवे हेतुफलयोरु-

---

१ क. ङ. ञ. °र्मादिः° । २ ङ. देहसं° । ३ क. °तरका° । ४ च. ङ. °नादिः क° । ५ ख. घ. ङ ज. °त्यकू° । ६ क. छ. °त्मकता । ७ क. °रि चैतेना° । ख. ज °रि च तेना° । ग. °रित्वादिना° । ८ ग. ङ. °स्य त्वयैवोक्त° । ९ घ. °मनुरू° । १० छ. ज. °त्पर्यार्थमा° । ११ छ. °रूपितत्वमा° । १२ घ. °दिमत्वमि° । १३ ग. ङ. °स्य प° । १४ छ. °स्थनि° । १५ ख. घ. ङ. ज. °स्य स्वतः प° । १६ छ. °म्यते । हे° । १७ ङ. °च्छतामी° । १८ ङ. °गन्तुं चे° ।

त्पत्तौ क्रम एषितव्यस्तत्रयाऽन्वेष्टव्यो हेतुः पूर्वं पश्चात्फलं चेति । इतश्च युगपत्संभवे यस्माद्धेतुफलयोः कार्यकारणत्वेनासंबन्धः । यथा युगपत्संभवतोः सव्येतरगोविषाणयोः ॥ १६ ॥

प्रतीतितो हेतुफलयोरुत्पत्तेरुपगन्तव्यत्वान्न युक्तं तन्निराकरणमित्याशङ्क्याऽऽह-- संभव इति । तयोरुदये प्रातीतिके नियतपूर्वभावी हेतुर्नियतोत्तरभावि फलमित्यभ्युपगमे हेतुमाह—युगपादिति । यथोक्तो विरोधो हेतुफलभावस्यासंभवः सं न युक्तोऽभ्युपगन्तुं प्रतीतिविरोधादिति व्यावर्त्यौ शङ्कामनुवदति—यथेति । तत्रोत्तरत्वेन श्लोकाक्षराणि योजयति—संभव इति । प्रतीत्या क्रमस्वीकारवदुपपत्तेश्चेत्याह—इतश्चेति । तामेवोपपत्तिं स्फोरयति—युगपादिति । ययोर्युगपत्संभवस्तयोर्न कार्यकारणत्वं यथा विषाणयोरिति व्याप्तेर्व्यक्तत्वात्क्रमस्याऽऽवश्यकतेत्यर्थः ॥ १६ ॥

फलादुत्पद्यमानः सन्न ते हेतुः प्रसिध्यति ।
अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति ॥ १७ ॥

कथमसंबन्ध इत्याह—जन्यात्स्वतोऽलब्धात्मकात्फलादुत्पद्यमानः सञ्शश-विषाणादेरिवासतो न हेतुः प्रसिध्यति जन्म न लभते । अलब्धात्मकोऽप्रसिद्धः सञ्शशविषाणादिकल्पस्तव कथं फलमुत्पादयिष्यति । न हीतरेतरापेक्षासिद्धयोः शशविषाणकल्पयोः कार्यकारणभावेन संबन्धः क्वचिद्दृष्टः, अन्यथा वेत्यभिप्रायः ॥ १७ ॥

उक्तव्याप्तेरनुग्राहकं तर्कमुपन्यस्यति—फलादिति । हेतुफलयोर्मिथो हेतुफलत्वं ब्रुवतो मते हेत्वधीनतयाऽलब्धात्मकात्फलादुत्पद्यमानो हेतुर्न ततो लब्धात्मको भवत्यलब्धात्मकश्चासत्त्वान्न फलमुत्पादयितुं शक्नोतीति । अतो हेतुफलभावस्यैवासिद्धिरित्यर्थः । हेतुफलयोरक्रमवतोर्न कार्यकारणभावेन संबन्धः सिध्यतीत्येतदाकाङ्क्षापूर्वकं साधयति—कथमित्यादिना । स्वतो हेतुस्वरूपाऽजन्यं फलं तदधीनत्वेन लब्धात्मकं स्वतश्चालब्धात्मकम् । तत उत्पद्यमानः सन्नेष हेतुर्न प्रसिध्यति । न खलु शशविषाणादेरसतः सकाशात्किंचिल्लब्धात्मकमुपलभ्यते । हेतुश्चेदप्रसिद्धोऽलब्धात्मकोऽभ्युपगतः स तर्हि यथाविधोऽसद्रूपः सन्न फलमुत्पादयितुमुत्सहते । न हि सद्वादिमते फलमसतः सकाशादुपलब्धचरमित्यर्थः । तथाऽपि कथं हेतुफलयोरसंबन्धः सिध्यतीत्याश-

---

१ क. °सन्युक्तो° । २ ग. ङ. झ. °वर्त्यमाश° । ३ घ. °तो हे° । ४ क. °तुः सि° । घ. °तुः । फलं प्र° । ५ च. °कोऽसि° । ६ च. °दिदि° । ७ च. °था चेय° । ८ क. घ. ञ. °ना हे° ।

[2]
ङ्क्याऽऽह न—हीति । अन्यथा वेत्याधाराधेयभावादिकथनं हेतुफलयोर्यौगपद्ये सत्यन्यतरस्यापि न पूर्वक्षणे [3]सत्तेत्यसतोः शशविषाणयोरिवान्योन्यापेक्षया जन्यजनकत्वं नोपपद्यते शशविषाणादिष्वपि प्रसङ्गादित्युक्तम् ॥ १७ ॥

यदि हेतोः फलं[4]त्तिसिद्धिः फलसिद्धिश्च हेतुतः ।
कतरत्पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया ॥ १८ ॥

[5]
असंबन्धतादोषेणाँपोदितेऽपि हेतुफलयोः कार्यकारणभावे यदि हेतुफलयोरन्योन्यसिद्धिरभ्युपगम्यत एव त्वया कतरत्[6]पूर्वनिष्पन्नं हेतुफलयोर्यस्य पश्चाद्भाविनः सिद्धिः स्यात्पूर्वसिद्धयपेक्षया तद्ब्रूहीत्यर्थः ॥ १८ ॥

इदानीं पुण्यो वै पुण्येन कर्मणा भवतीत्यादिश्रुतेर्धर्मादिषु हेतुफलभावमाशङ्क्य श्रुतेरसंभावितार्थे प्रामाण्यायोगादवश्यं पौर्वापर्यं वक्तव्यमित्याह—यदीति । श्लोकाक्षराणि योजयति—असंबन्धेत्यादिना ॥ १८ ॥

अशक्तिरपरिज्ञानं क्रमकोपोऽथवा पुनः ।
एवं हि सर्वथा बुद्धैरजातिः परिदीपिता ॥ १९ ॥

अथैतन्न शक्यते वक्तुमिति मन्यसे सेयमशक्तिरपरिज्ञानं तत्त्वाविवेको मूढतेत्यर्थः । अथवा योऽयं त्वयोक्तः क्रमो हेतोः फलस्य सिद्धिः फलाच्च हेतोः सिद्धिरितीतरेतराऽनन्तर्यलक्षणस्तस्य कोपो विपर्यासोऽन्यथाभावः स्यादित्यभिप्रायः । एवं हेतुफलयोः कार्यकारणभावानुपपत्तेरजातिः सर्वस्यानुत्पत्तिः परिदीपिता प्रकाशिताऽन्योन्यपक्षदोषं ब्रुवद्भिर्बौद्धादिभिर्बुद्धैः पण्डितैरित्यर्थः ॥ १९ ॥

हेतुफलयोरिदं पूर्वमिदं पश्चादिति न ज्ञायते । परस्पराश्रयात् । अतश्चेदं [11]पूर्वनिष्पन्नमिति वक्तुमशक्यमित्याह—अशक्तिरिति । उत्तरावसरे [12]चेदुत्तरापरिज्ञानं तर्हि [13]कार्यमशक्तिसूचकं तन्निग्रहस्थानमप्रतिभामिधानीयमापततीत्यर्थः । किंच यदि क्रमस्य नियतपूर्वा[14]परभावात्मनोऽपरिज्ञानं तदा पूर्वं कारणमुत्तरं कार्यमिति प्रतिज्ञा [15]हीयेत । [16]
तथा च प्रतिज्ञाहानिर्निग्रहान्तरमापद्येतेत्याह—क्रमेति । अन्योन्यपक्षप्रतिक्षेपमुखेन(ण)

---

१ ख. °ह्व । अ° । २ ग. झ. °धेयाभा° । ३ ग. झ. सत्त्वमित्य° । ४ च. झ. °लासिद्धिः । ५ झ. °बद्धता° । ६ घ. °पे मयोदि° । ७ च. °णाऽऽपादि° । ८ ख. घ. °त्पूर्वं नि° । ९ घ. ज. °न्यस इय° । १० क. छ. °न्योन्यापेक्ष° । ११ ख. ङ. झ. पूर्वं नि° । १२ ग. ङ. झ. चेत्तदु° । १३ झ. °थकात्त° । १४ ग. झ. °परीभा° । १५ घ. ज. ह्रीयते । १६ ग. °तिपक्षमु° ।

सतोऽसतश्च जन्मनी प्रत्याख्याते । क्रमाक्रमाभ्यामुत्पत्तेरनुपपत्तेरजातिरेवास्मदभिप्रेता वादिभिरादर्शिता भवतीत्युपसंहरति-एवं हीति । तत्राऽऽद्यं पादं व्याकरोति-अथेत्यादिना । क्रमपक्षे पूर्वनिष्पन्नमेतच्छब्देन परामृश्यते । द्वितीयपादं योजयति-अथवेत्यादिना । द्वितीयार्धं विवृणोति —एवमिति ॥ १९ ॥

बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः ।
न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥ २० ॥

ननु हेतुफलयोः कार्यकारणभाव इत्यस्माभिरुक्तं शब्दमात्रमाश्रित्य च्छलमिदं त्वयोक्तं पुत्राज्जन्म पितुर्यथा । विषाणवच्चासंबन्ध इत्यादि । न ह्यस्माभिरसिद्धाद्धेतोः फलसिद्धिरसिद्धाद्वा फलाद्धेतुसिद्धिरभ्युपगता । किं तर्हि बीजाङ्कुरवत्कार्यकारणभावोऽभ्युपगम्यत इति । अत्रोच्यते—बीजाङ्कुराख्यो दृष्टान्तो यः स साध्येन तुल्यो ममेत्यभिप्रायः । ननु प्रत्यक्षः कार्यकारणभावो बीजाङ्कुरयोरनादिर्न पूर्वस्य पूर्वस्यापरापरवदादिमत्त्वाभ्युपगमात् । यथेदानीमुत्पन्नोऽपरोऽङ्कुरो बीजादादिमान्बीजं चापरमन्यस्मादङ्कुरादिति क्रमेणोत्पन्नत्वादादिमत् । एवं पूर्वः पूर्वोऽङ्कुरो बीजं च पूर्वं पूर्वमादिवदेवेति प्रत्येकं सर्वस्य बीजाङ्कुरजातस्याऽऽदिमत्त्वात्कस्यचिदप्यनादित्वानुपपत्तिः । एवं हेतुफलानाम् । अथ बीजाङ्कुरसंततेरनादिमत्त्वमिति चेत् । न । एकत्वानुपपत्तेः । न हि बीजाङ्कुरव्यतिरेकेण बीजाङ्कुरसंततिर्नामैकाऽभ्युपगम्यते हेतुफलसंततिर्वा तदनादित्ववादिभिः । तस्मात्सूक्तं हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यत इति । तथा चान्यदप्यनुपपत्तेर्न च्छलमित्यभिप्रायः । न च लोके साध्यसमो हेतुः साध्यसिद्धौ सिद्धिनिमित्तं प्रयुज्यते प्रमाणकुशलैरित्यर्थः । हेतुरिति दृष्टान्तोऽत्राभिप्रेतो गमकत्वात् । प्रकृतो हि दृष्टान्तो न हेतुरिति ॥ २० ॥

बीजाङ्कुरयोरिव हेतुफलयोरन्योन्यं कार्यकारणभावाभ्युपगमान्नान्योन्याश्रयत्वमित्या-

---

१ छ. °नुत्पत्तेरतोऽजा° । २ ग. झ. °रतोऽजा° । ३ ग. झ. °वं तर्हीति । ४ च. नः । ५ क. °रणाभा° । ६ च. स साध्यसमः सा° । ७ झ. °न समस्तुल्यो । ८ च. °त्यक्षं का° । ९ घ. च. °दिर्नापू° । १० च. °स्याऽऽदि° । ११ क. °रवादि° । १२ क. झ. पूर्वं पू° । १३ च. पूर्वाङ्कु° । १४ च. झ. °तस्य चाऽऽदि° । १५ छ. °दिमत्त्वानु° । १६ ग. घ. °संमति° । १७ च. झ. °स्मात्सुष्ठूक्तं । १८ च. च सा° । १९ च. हेतोरि° । २० घ. °ति च दृ° ।

शङ्क्याऽऽह–बीजेति । दृष्टान्तस्य साध्यसमत्वेऽपि साधर्म्यत्वमस्तित्वत्याशङ्क्याऽऽह–न हीति । श्लोकार्थोद्यं चोद्यमुद्भावयति— नन्विति । शब्दमात्रं विवक्षितार्थशून्यम् । शब्दमाश्रित्य च्छलप्रयोगमेवोदाहरति–पुत्रादिति । आदिशब्देन फलादुत्पद्यमानः सन्न ते हेतुः प्रतिषेधतीत्यादि गृह्यते । कार्यकारणभावो हेतुफलयोरित्यत्रानभिप्रेतमर्थं कथयति–न हीति । तत्रैव प्रश्नपूर्वकमभिप्रेतमर्थमुदाहरति–किं तर्हीति । दृष्टान्तासंप्रतिपत्त्या परिहरति— अत्रेति । मायावादिमते क्वचिदपि कार्यकारणभावस्य वस्तुभूतस्यासंप्रतिपत्तेर्ममेत्युक्तम् । प्रत्यक्षावष्टम्भेन दृष्टान्तं साधयन्नाशङ्कते–नन्विति । किं बीजाङ्कुरव्यक्त्योरिदं कार्यकारणत्वमिष्यते किंवा बीजाङ्कुरसंतानयोरिति विकल्प्याऽऽद्यं दूषयति–न पूर्वस्येति । तदेव प्रपञ्चयति–यथेत्यादिना । बीजव्यक्तेरङ्कुरव्यक्तेश्चोक्तप्रकारेणानादित्वस्यान्योन्यकारणत्वस्य चानुपपत्तिरिति शेषः । कल्पान्तरमुत्थापयति—अथेति । बीजसंततेरङ्कुरसंततेश्चानादित्वमन्योन्यकारणत्वं चाविरुद्धं सिध्यति । बीजजातीयादङ्कुरजातीयमङ्कुरजातीयाद्बीजजातीयमुत्पद्यमानमुपलभ्यते । तथैव हेतुजातीयात्फलजातीयं फलजातीयाच्च हेतुजातीयमविरुद्धमित्यर्थः । दृष्टान्ते दार्ष्टान्तिके च संततेरेकस्या व्यक्तेर्व्यतिरेकेणासंभवान्नैवमिति दूषयति–नेत्यादिना । तदेव प्रपञ्चयति— न हीति । तदनादित्ववादिभिस्तासु व्यक्तिषु मिथो हेतुत्वमनादित्वं तद्वदनशीलैरिति यावत् । अन्योन्याश्रयत्वादनवस्थानाद्वा हेतुफलयोर्मिथो हेतुफलभावस्य वक्तुमशक्यत्वादृष्टान्तदार्ष्टान्तिकयोरनुपपत्तिः सिद्धेत्युपसंहरति–तस्मादिति । दृष्टान्तस्यासंप्रतिपन्नत्वे स्थिते कार्यकारणस्य क्वचिदपि संप्रतिपत्त्यभावान्पुत्राज्जन्म पितुर्यथेत्यादि न च्छलप्रयुक्तमिति फलितमाह–तथा चेति । एवं श्लोकस्य पूर्वार्धं व्याख्यायोत्तरार्धं व्याचष्टे–न चेति । किमिति हेतुशब्दस्य मुख्यमर्थं त्यक्त्वा गौणोऽर्थो गृह्यते, प्रकरणसामर्थ्यादित्याह–प्रकृतो हीति । हेतुफलभावानुपपत्तिमुपपादितामुपसंहर्तुमितिशब्दः ॥ २० ॥

पूर्वापरापरिज्ञानमजातेः परिदीपकम् ।
जायमानाद्धि वै धर्मात्कथं पूर्वं न गृह्यते ॥ २१ ॥

---

१ छ. °कम° । २ ख. °पोद्यं चो° । ३ ग. °मानो हे° । ४ ग. झ. तत्रैवं । ५ ग. झ. °पत्तिर्म° । ६ घ. किं बी° । ७ झ. °त्वस्याप्यनु° । ८ ख. छ. °धः । विरु° । ९ ग. झ. °दिमत्त्वम° । १० ग झ. °न्यकार्यका° । ११ ग. झ. °णत्वं वा वि° । १२ ग झ. °यमु° । १३ ख. °के सं° । १४ ग. ज. झ. व्यक्तिव्यति° । १५ घ. ङ. °क्तेर्व्यक्तिव्याति° । १६ क. °दनुशी° । १७ क. ख. छ. °णत्वस्य । १८ छ मुख्यार्थं । १९ ज. °ते क° । २० घ. °परप° । २१ क. घ. ङ. ज. °द्धि चेद्धर्मा° । २२ छ. वै कार्यात्क° ।

कथं बुद्धेरजातिः परिदीपितेत्याह--यदेतद्धेतुफलयोः पूर्वापरपरिज्ञानं तच्चैतदजातेः परिदीपकमवबे धकमित्यर्थः । जायमानो हि च धर्मो गृह्यते, कथं तस्मात्पूर्वं कारणं न गृह्यते । अवश्यं हि जायमानस्य ग्रहीत्रा तज्जनकं ग्रहीतव्यम् । जन्यजनकयोः संबन्धस्यानपेतत्वात् । तस्मादजातिपरिदीपकं तदित्यर्थः ॥ २१ ॥

यत्पुनरन्योन्यपक्षं प्रतिक्षिपद्भिरजातिर्वस्तुतो ज्ञापिता परीक्षकैरित्युपक्षिप्तं तत्र कथमजातिर्वस्तुतो ज्ञापितेत्याशङ्क्याऽऽह–पूर्वापरेति । कार्यस्य गृह्यमाणत्वाज्जातिरसिद्धेत्याशङ्क्य कारणस्यापि तर्हि ग्राह्यत्वादितरेतराश्रयादजातिरेवेत्युक्ता सिध्यतीत्याह–जायमानादिति । तत्र पूर्वार्धं प्रश्नद्वारा विवृणोति–कथमित्यादिना । नियते पौर्वापर्ये निर्धारिते जातिः सिध्यति । तदभावे तदसिद्धिरित्यर्थः । द्वितीयार्धं विभजते–जायमानो हीति । कार्यग्रहणे कारणं ग्रहीतव्यमिति कुतो नियम्यते तत्राऽऽह–अवश्यं हीति । कार्यकारणयोर्नियतसंबन्धवतोरितरेतराश्रयाददुर्ग्रहत्वादजातिरेव वस्तुतो ज्ञापितेत्युपसंहरति—तस्मादिति । कार्यकारणयोर्दुर्ज्ञानत्वं तच्छब्देन परामृश्यते ॥ २१ ॥

स्वतो वा परतो वाऽपि न किंचिद्वस्तु जायते ।
सदसत्सदसद्वाऽपि न किंचिद्वस्तु जायते ॥ २२ ॥

इतश्च न जायते किंचित् । यज्जायमानं वस्तु स्वतः परत उभयतो वा सदसत्सदसद्वा न जायते न तस्य केनचिदपि प्रकारेण जन्म संभवति । न तावत्स्वयमेवापरिनिष्पन्नात्स्वतः स्वरूपात्स्वयमेव जायते यथा घटस्तस्मादेव घटात् । नापि परतोऽन्यस्मादन्यो यथा घटात्पटः पटात्पटान्तरम् । तथा नोभयतः । विरोधात् । यथा घटपटाभ्यां घटः पटो वा न जायते । ननु मृदो घटो जायते पितुश्च पुत्रः । सत्यम् । अस्ति जायत इति प्रत्ययः शब्दश्च मूढानाम् । तावेव शब्दप्रत्ययौ विवेकिभिः परीक्ष्येते किं सत्यमेव तावुत मृषेति यावता परीक्ष्यमाणौ । शब्दप्रत्ययविषयं वस्तु घटपुत्रादिलक्षणं शब्दमात्रमेव तत् । " वाचाऽऽरम्भ-

---

१ झ. बुधेर° । २ छ. °दीपिक° । ३ ख. घ. च. छ. ज. हि चेद्धर्मो । झ हि वै घ° । ४ ख. घ. ङ. ञ. °रभिव्य° । ५ ग. °यतयौ° । ६ ग. झ. °ध्यतीति । ७ ग. झ. °वेन त° । ८ ग. ज. °णंदुर्ज्ञा° । ९ झ. °च्छलेन । १० घ. यतो यज्जा° । ११ ज. °ष्पन्नत्वात्स्वतः स्व° । १२ क. छ. °त्स्वरू° । १३ क. च. छ. वा जा° । १४ ज. °ोऽपि° । १५ झ. °माणं झ° ।

णम्" इति श्रुतेः। सच्चेन्न जायते सत्त्वान्मृत्पिण्डादिवत्। यद्यसत्त्वथाऽपि न जायते सत्त्वादेव शशविषाणादिवत्। अथ सदसत्त्वथाऽपि न जायते विरुद्धस्यैकस्यासंभवात्। अतो न किंचिद्वस्तु जायत इति सिद्धम्। येषां पुनर्जनिरेव जायत इति क्रियाकारकफलैकत्वमभ्युपगम्यते क्षणिकत्वं च वस्तुनः, ते दूरत एव न्यायापेताः। इदमित्थमित्यवधारणक्षणान्तरानवस्थानादननुभूतस्य स्मृत्यनुपपत्तेश्च ॥ २२ ॥

वस्तुनो वस्तुतो जन्म नास्तीति विकल्पपूर्वकं साधयति—स्वतो वेत्यादिना। कस्यचिदपि वस्तुनो जन्म नास्तीत्यस्मिन्नर्थे हेत्वन्तरपरत्वं श्लोकस्य दर्शयति—इतश्चेति। इत शब्दार्थमेव स्फोरयितुं जायमानमनूद्य षोढा विकल्पयति—यज्जायमानमिति। सर्वेष्वपि पक्षेषु दोषसंभावनां सूचयति—न तस्येति। तत्राऽऽद्यं दूषयति—न तावदिति। स्वयमेव जायमानं कार्यं स्वस्मादेव स्वरूपान्न तावज्जायते स्वयमेव स्वापेक्षामन्तरेण स्वकारणाधीनतया परिनिष्पन्नत्वात्। अन्यथा स्वसिद्धेः स्वासिद्धिरित्यात्माश्रयात्। न हि घटादेव घटो जायमानो दृष्टोऽस्तीत्यर्थः। द्वितीयं प्रत्याह—नापीति। न खल्वन्यत्वं जनकत्वे प्रयोजकम्। घटादपि पटोत्पत्तिप्रसङ्गात्। न चोत्पादकत्वयोग्यत्वविशेषितमन्यत्वं तथेति वाच्यम्। उत्पत्तिमन्तरेण तद्योग्यत्वस्य दुरवगमत्वादित्यर्थः। तृतीयं निरस्यति—तथेति। विरोधमेव दृष्टान्तद्वारा स्पष्टयति—यथेति। न हि घटपटाभ्यां घटः पटो वा जायमानो दृश्यते। तथा जायमानं स्वस्मादन्यस्माच्च भवतीत्यनुपपन्नमित्यर्थः। अन्यत्वे सत्यपि जन्यजनकभावस्य प्रत्यक्षत्वान्नासौ शक्यते प्रतिक्षेप्तुमिति शङ्कते—नन्विति। किं प्रत्यक्षानुसारिणो शब्दप्रत्ययावविवेकिनामिष्येते किंवा विवेकिनामिति विकल्प्याऽऽद्यमङ्गी करोति—सत्यमिति। द्वितीयं प्रत्याह—तावेवेति। मृषेवेति परीक्ष्यमाणे सतीति संबन्धः। तच्च जन्मशब्दधीविषयं वस्तु शब्दमात्रमेव वाचाऽऽरम्भणश्रवणान्न परमार्थतो यावता विद्यते, तस्मादसत्यालम्बनत्वमेव शब्दप्रत्यययोरिष्टव्यमिति योजना। चतुर्थं शिथिलयति—सच्चेदिति। पञ्चमं निराकरोति—यदीति। षष्ठं प्रत्याह—अथेत्यादिना। षण्णां विकल्पानां निरासे फलितं निगमयति—अतो नेति। क्रियाकारक-

---

१ क. ख. घ. ज. °त्पिण्डादि°। २ क. ख. °ते विशतेऽपि°। ३ क. छ. झ °षाणव°। ४ च. °पि जा°। ५ च. °स्तुतस्ते दू°। ६ ख. °मित्य°। ७ घ. °रणा°। ८ ज. °णलक्ष°। ९ ग. झ. °स्तुतोऽव°। १० क. छ. झ. °नो वस्तुनो ज°। ११ क. ज. °पि घटो°। १२ क. °पत्तिरित्य°। १३ च. छ. ज. झ. °मिष्यते। १४ ग. झ. तन्न। १५ ज. विकाराणां। १६ झ. °ता क°। १७ घ. ङ. ज. °तं ग°।

फलनानात्वपक्षे[1] जन्मानुपपत्तिदोषमुक्त्वा पक्षान्तरमनूद्य दूषयति-येषां पुनरिति। बौद्धानां न्यायावष्टम्भेन वस्तु व्यवस्थापयतां कुतो न्यायबाह्यत्वमित्याशङ्क्याऽऽह—इदमिति। इदमा वस्तु परामृष्टम्। इत्थमिति क्षणिकत्वं विवक्षितम्। एवंमवधारणावच्छिन्ने क्षणे वस्त्ववच्छेदकक्षणातिरिक्ते वस्तुनोऽवस्थानाभावान्न तस्मिन्ननुभवः सिध्यतीत्यर्थः। न च तस्मिन्नननुभूतेऽर्थे स्मृतिरुत्पद्यते। तथा च वस्तुनि प्रत्ययद्वयासिद्धौ व्यवहारासिद्धिरित्याह—अननुभूतस्येति ॥ २२ ॥

हेतुर्न जायतेऽनादेः फलं चापि स्वभावतः।
आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते ॥ २३ ॥

किंच हेतुफलयोरनादित्वमभ्युपगच्छता त्वया बलाद्धेतुफलयोरजन्मैवाभ्युपगतं स्यात्। तत्कथम्, अनादेरादिरहितात्फलाद्धेतुर्न जायते न ह्यनुत्पन्नादनादेः फलाद्धेतोर्जन्मेष्यते त्वया। फलं चाऽऽदिरहितादनादेर्हेतोरजात्स्वभावत एव निर्निमित्तं जायत इति नाभ्युपगम्यते। तस्मादनादित्वमभ्युपगच्छता त्वया हेतुफलयोरजन्मैवाभ्युपगम्यते। यस्मादादिः कारणं न विद्यते यस्य लोके तस्य ह्यादिः पूर्वोक्ता जातिर्न विद्यते। कारणवत एव ह्यादिरभ्युपगम्यते नाकारणवतः ॥ २३ ॥

वस्तुनो वस्तुतो जन्मराहित्ये हेत्वन्तरमाह-हेतुर्नेति। नानादेः फलाद्धेतुर्जायते। न हि फलस्यानादित्वे ततो हेतुजन्म युक्तं सदा तज्जन्मप्रसङ्गादित्यर्थः। फलमपि न हेतोरनादेर्जायते दोषसाम्यादित्याह—फलं चेति। नापि स्वभावतो निमित्तमन्तरेण फलं हेतुर्वा जायते। तत्र हेतुमाह—आदिरिति। कारणरहितस्य जन्मानुपलब्धेरित्यर्थः। वस्तुनो वस्तुतो जन्माभावे हेत्वन्तरपरत्वं श्लोकस्य सूचयति—किंचेति। हेत्वन्तरमेव दर्शयितुं प्रथमं प्रतिज्ञां करोति—हेत्विति। फलाद्धेतुर्जायते ततश्च फलमित्यभ्युपगमात्कथमजन्माभ्युपगतामिति पृच्छति—कथमिति। तत्राऽऽद्यपादाक्षरयोजनया परिहरति-अनादेरिति। तदेवोपपादयति-न हीति। फलं कार्यकारणसंघातः। हेतुर्धर्मादिः। फलं चापीति भागं विभजते—फलं चेति। अजाज्जायत इति नाभ्युपगम्यत इति संबन्धः। स्वभावत इति पदं योजयति—स्वभावत एवेति। फलितं निगमयति—तस्मादिति। न हेतुफलयोर्जन्मवतोरनादित्वमभ्युप-

---

१ ख. °क्षे अज°। ङ. °क्षेऽजस्याज°। २ ग. झ. °पत्तिं दो°। ३ ग. °वमेवाव°। ४ छ. °वाज्ञानु°। ५ क. घ. छ. ज. °ज्ञनु°। ६ च. वाऽपि। ७ झ. °दिमत्त्वम°। ८ झ. °दजादना°। ९ झ. तस्याऽऽदिः। १० ग. झ. °न्तरं सू°। ११ ङ. झ. °यैकर°।

गन्तुं शक्यम् । अभ्युपगमे[1] च जन्मैव तयोराकस्मिकं स्यादित्यर्थः । स्वभाववादनिराकरणं प्रतिज्ञातमुत्तरार्धावष्टम्भेन प्रतिपादयति—यस्मादिति ॥ २३ ॥

प्रज्ञप्तेः सनिमित्तत्वमन्यथा द्वयनाशतः ।
संक्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता ॥ २४ ॥

उक्तस्यैवार्थस्य दृढीकरणचिकीर्षया पुनराक्षिपति—प्रज्ञानं प्रज्ञप्तिः शब्दादिप्रतीतिस्तस्याः सनिमित्तत्वम् । निमित्तं[2] कारणं विषय इत्येतत्सनिमित्तत्वं सविषयत्वं स्वात्मव्यतिरिक्तविषयतेत्येतत्प्रतिजानीमहे । न हि निर्विषया प्रज्ञप्तिः[3] शब्दादिप्रतीतिः स्यात् । तस्याः सनिमित्तत्वात् । अन्यथा निर्विषयत्वे शब्दस्पर्शनीलपीतलोहितादिप्रत्ययवैचित्र्यस्य द्वयस्य नाशतोऽनाशोऽभावः प्रसज्येतेत्यर्थः । न च प्रत्ययवैचित्र्यस्य द्वयस्याभावोऽस्ति प्रत्यक्षत्वात् । अतः प्रत्ययवैचित्र्यस्य द्वयस्य दर्शनात् । परेषां तन्त्रं परतन्त्रमित्यन्यशास्त्रं तस्य परतन्त्रस्य[10] परतन्त्राश्रयस्य बाह्यार्थस्य ज्ञानव्यतिरिक्तस्यास्तिता मताऽभिमता । न हि प्रज्ञप्तेः[11] प्रकाशमात्रस्वरूपाया नीलपीतादिबाह्यालम्बनवैचित्र्यमन्तरेण स्वभावभेदेनैव[12] वैचित्र्यं संभवति । स्फटिकस्येव नीलाद्युपाध्याश्रयैर्विना[13] वैचित्र्यं[14] न घटत इत्यभिप्रायः । इतश्च परतन्त्राश्रयस्य बाह्यार्थस्य[15] ज्ञानव्यतिरिक्तस्यास्तिता । संक्लेशनं संक्लेशो दुःखमित्यर्थः । उपलभ्यते ह्यग्निदाहादिनिमित्तं दुःखं यद्यग्न्यादिर्बाह्यो[16] दाहादिनिमित्तं[17] विज्ञानव्यतिरिक्तं न स्यात्ततो दाहादिदुःखं नोपलभ्येत[18] उपलभ्यते तु, अतस्तेन मन्यामहेऽस्ति च ह्योऽर्थ इति । न हि विज्ञानमात्रे संक्लेशो युक्तः । अन्यत्रादर्शनादित्यभिप्रायः ॥ २४ ॥

वस्तुनो वस्तुतो जन्मायोगादजं विज्ञानमात्रं तत्त्वमित्युक्तम् । इदानीं बाह्यार्थवादमुत्थापयति—प्रज्ञप्तेरिति । ज्ञानस्य[20] निर्विषयत्वे[21] प्रत्ययवैचित्र्यानुपपत्तिं प्रमाणयति—अन्यथेति । अग्निदाहादिप्रयुक्तदुःखोपलब्ध्यनुपपत्तेश्चास्ति बाह्योऽर्थ[22] इत्याह—संक्लेशस्येति । परतन्त्रं परकीयं[23] शास्त्रं तस्यास्तिता तद्विषयस्य बाह्यार्थस्य विद्यमानतेति

---

१ ङ. ज. झ. °मे त्वज° । २ क. ग. झ. °वादिनि° । ३ घ. °मित्तका° । ४ क. °तं कर° । ५ क. °तस्य नि° । ६ च. °षयं तदेत° । ७ घ. झ. °प्तिः स्यात्सनि° । ८ क °त्र्यद्व° । ९ झ. °न्यथाशा° । १० क. तन्त्रा° । ११ झ. प्तेः स्वप्र° । १२ च. झ. °नैतद्वैचि° । १३ छ. नीलपीताद्यु° । १४ च. °चित्र्यमित्य° । १५ च °र्थस्या° । १६ च. °बाह्यदा° । १७ क. दारादि° । १८ झ. °मित्तवि° । १९ ज. °लभ्यते । उ° । २० ग. °नस्यास्तिव° । २१ क. ख. °स्य सविष° । २२ ग. झ. °ह्यार्थरीत्या° । २३ ख. °कीयशा° ।

यावत् । श्लोकस्य तात्पर्यमाह–उक्तस्यैवेति । वस्तुनो नास्ति वस्तुतो जन्मेत्युक्तार्थ-स्तस्यैव दृढीकरणं पूर्वोत्तरपक्षाभ्यां चिकीर्ष्यते तथा पुनरुक्षेपमुखेन(ण) बाह्यार्थवा-दिनां प्रस्थानमुत्थापयतीत्यर्थः । ब्रह्मस्वरूपभूतां प्रज्ञप्तिं प्रतिषेधति—शब्दादीति[1] । साकारवादं व्युदस्यति–स्वात्मेति । प्रज्ञप्तेर्विषयनिरपेक्षत्वान्न स्वातिरिक्तविषयतेत्या-शङ्क्याऽऽह–न हीति । सनिमित्तत्वं स विषयत्वेन स्फुरणम् । तमेव हेतुं द्वितीय-पादयोजनया विशदयति— अन्यथेति । प्रसङ्गस्येष्टत्वं प्रत्याचष्टे—न चेति । प्रत्ययवैचित्र्यानुपपत्तिप्रयुक्तं फलं चतुर्थपादव्याख्यानेन कथयति— अत इति । ननु प्रज्ञप्तेः स्वभावभेदेनैव बाह्यालम्बनं वैचित्र्यमन्तरेण स्वगतं वैचित्र्यं घटिष्यते तत्राऽऽह-न हीति । औपाधिकं तर्हि प्रत्ययवैचित्र्यमित्याशङ्क्य बाह्यार्थातिरिक्तोपाध्यनधि-गमान्नैवमित्याह—स्फटिकस्येति । तृतीयपादं हेत्वन्तरपरत्वेनावतारयति—ततश्चेति । तस्योपलब्धिमुपपादयति–उपलभ्यते हीति । तदुपलम्भेऽपि कुतो बाह्यार्थसिद्धि-रित्याशङ्क्याऽऽह–यदीति । उपलब्धिरेव तर्हि दुःखस्य मा भूदिति चेन्न । स्वानु-भवैविरोधादित्याह–उपलभ्यते त्विति । विशिष्टदुःखोपलब्ध्यनुपपत्तिसिद्धं फल माह–अत इति । विज्ञानातिरिक्तबाह्यार्थाभावेऽपि क्लेशोपलब्धिरविरुद्धेत्याशङ्क्याऽऽ-ह–न हीति । अन्यत्र दाहच्छेदादिव्यतिरिक्ते चन्दनपङ्कलेपादाविति यावत् ॥२४॥

प्रज्ञप्तेः सनिमित्तत्वमिष्यते युक्तिदर्शनात् ।
निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात् ॥ २५ ॥

अत्रोच्यते— बाढमेवं प्रज्ञप्तेः सनिमित्तत्वं द्वयसंक्लेशोपलब्धियुक्तिदर्शना-दिष्यते त्वया । स्थिरी भव तावत्त्वं युक्तिदर्शनं वस्तुनस्तथात्वाभ्युपगमे कारणमित्यत्र । ब्रूहि किं तत इति[7] । उच्यते । निमित्तस्य प्रज्ञप्त्यालम्बनामि-मि(म)तस्य घटादेरनिमित्तत्वमनालम्बनत्वं वैचित्र्याहेतुत्वमिष्यतेऽस्माभिः, कथं, भूतदर्शनात्परमार्थदर्शनादित्येतत् । न हि घटो यथाभूतमृद्रूपदर्शने सति तद्व्यतिरेकेणास्ति । यथाऽश्वान्महिषः, पटो वा तन्तुव्यतिरेकेण । तन्तवश्चांशुव्यतिरेकेणेत्येवमुत्तरोत्तरभूतदर्शनं [12] शब्दप्रत्ययनिरोधाभ्यामेव निमित्तमुपलभामह इत्यर्थः । अथवा भूतदर्शनाद्बाह्यार्थस्यानिमित्तत्वमि-

---

१ घ. 'ह्मरू' । २ ग. ज. झ. °ति । स्वाका° । ३ क. छ. °म्बनवै° । ४ क. कृता । ५ छ. °वासिद्धत्वमि° । ६ ग. लब्धानु° । ७ घ. °किर्दर्श° । ८ झ. °ति । अत्रोच्य° । ९ क. 'ह्यलाल° । १० झ. °केणेति । त° । ११ ख. ङ. च. छ. °न्तवो वांऽशु° । १२ च. °दर्शने श° । १३ छ. आदिश° ।

ष्यते । रज्ज्वादाविव सर्पादेरित्यर्थः । भ्रान्तिदर्शनविषयत्वाच्च निमित्तस्यानिमित्तत्वं भवेत् । तदभावेऽभावात् । न हि सुषुप्तसमाहितमुक्तानां भ्रान्तिदर्शनाभावे आत्मव्यतिरिक्तो बाह्योऽर्थ उपलभ्यते । न ह्युन्मत्तावगतं वस्त्वनुन्मत्तैरपि तथाभूतं गम्यते । एतेन द्वयदर्शनं संक्लेशोपलब्धिश्च प्रत्युक्ता ॥२५॥

द्वाभ्यामर्थापत्तिभ्यां बाह्यार्थवादे प्राप्ते विज्ञानवादमुद्भावयति — प्रज्ञप्तेरिति । अस्तु का नाम वस्तुक्षतिरित्याशङ्क्याऽऽह—निमित्तस्येति । मतान्तरे प्राप्ते तन्निराकरणमुच्यते—विज्ञानवादिनेति । श्लोकस्य तात्पर्यमाह—अत्रेति । तत्र पूर्वार्धं विभजते—द्वाभ्यामित्यादिना । द्वैतिनस्तव तर्कप्रधानत्वान्न प्रतीतिमात्रशरणता युक्तेति मत्वाऽऽह—स्थिरो भवेति । वस्तुनो बाह्यस्यार्थस्य तथात्वं प्रज्ञप्तिविषयत्वं तस्याभ्युपगमे कारणं प्रागुक्तयुक्तिदर्शनमित्येतस्मिन्नर्थे त्वं स्थिरो भवेति योजना । विचारदृष्टिभेवावष्टभ्याहं वर्ते किं ततो दूषणं ब्रूहीति पृच्छति—ब्रूहीति । तत्रोत्तरार्थं सिद्धान्ती व्याकुर्वन्नुत्तरमाह—उच्यत इत्यादिना । घटादेर्वैचित्र्यहेतुत्वे प्रश्नपूर्वकं हेतुमाह—कथमित्यादिना । परमार्थदर्शनं प्रपञ्चयति—न हीति । तत्र वैधर्म्यदृष्टान्तमाह—तथेति । घटे दर्शितं न्यायं पटेऽपि दर्शयति—पटो वेति । तन्तुष्वपि न्यायसाम्यमुदाहरति—तन्तव इति । परमार्थदर्शनफलमुपसंहरति—इत्येवमिति । घटादीनां स्वकारणव्यतिरेकेणासतां न प्रत्ययवैचित्र्यहेतुत्वमतो घटादिप्रत्ययवत्प्रत्ययान्तरोऽपि प्रत्ययत्वाविशेषाद्वास्तवालम्बनवर्जितानि मन्तव्यानीत्यर्थः । भूतदर्शनं यौक्तिकं तत्त्वदर्शनं ततो निमित्तस्यानिमित्तत्वमिति व्याख्यातम् । इदानीमभूतदर्शनादिति पदच्छेदेन व्याख्यानान्तरमाह—अथवेति । यथा रज्ज्वादाविष्ठाने सर्पादेरारोपितस्य दर्शनान्न तस्य वस्तुनो दर्शनं प्रत्यालम्बनत्वमिष्टम् । तथैवाधिष्ठानज्ञानापेक्षया परमार्थतो दर्शनाद्बाह्यस्यार्थस्य ज्ञानं प्रत्यालम्बनत्वं वास्तवमभ्युपगन्तुमशक्यमित्यर्थः । किंच विमतो बाह्यार्थो न तत्त्वतो ज्ञानं प्रत्यालम्बनं भ्रान्तिविषयत्वाद्रज्ज्वां सर्पादिवदित्याह—भ्रान्तीति । हेतुं साधयति—तदभाव इति । भ्रान्त्यभावे बाह्यार्थो न भातीत्युक्तं हेतुं प्रपञ्चयति—न हीति । देहाभिमानवतो बाह्यार्थप्रतिभानभ्रान्त्या द्वैतदर्शिनोऽपि तत्प्रतिभानमप्रत्यूहं प्राप्नोतीत्याशङ्क्याऽऽह—न ह्युन्मत्तेति । बाह्यार्थसमर्थनार्थमुक्तमर्थापत्तिद्वयं कथं निरसनीयमित्याह—एतेनेति । तत्त्व-

---

१ ङ. °भानात् । २ च. बाह्यार्थे° । ३ च. °गतव° । ४ क. °नुत्पत्तेर्° । ५ झ. °शैनसं° । ६ च. °विश्चेत्यु° । ७ क. छ. प्रयुक्तं । ८ ग. छ. झ. °बाह्यार्थ° । ९ च. गुक्तं यु° । १० ग. झ. °र्थे स्थि° । ११ ज. °ति । त° । १२ ख. °व्याद्धेतु° । १३ घ. ज. °र्शितन्या° । १४ ग. झ. पटे द° । १५ ख. घ. झ. °सामान्यमु° । १६ ख. ङ. °ति । एव° । १७ छ. प्रत्ययाल° । १८ छ. °द्बाह्यार्थ° । १९ छ. प्रत्ययाल° । २० ज. °ति । दे° । २१ घ. क. ज. °नार्थमर्था° । २२ ग. छ. ज. °त्याशङ्क्याऽऽह ।

दर्शिनां स्फुरणातिरिक्तवस्त्वनुपलम्भप्रदर्शनेन वैचित्र्यदर्शनं दुःखोपलब्धिश्च प्रत्युक्ता। तेनानुपपद्यमानार्थापत्तिद्वयस्यानुत्थानम्। व्यवहारदृष्ट्या तु पूर्वभ्रमसमारोपितस्वप्नवद्देवं संदेवने वैचित्र्यं दुःखे च व्यवहाराङ्गमित्यन्यथाऽप्युपपत्तिरित्यर्थः ॥ २५ ॥

चित्तं न संस्पृशत्यर्थं नार्थाभासं तथैव च ।
अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् ॥ २६ ॥

यस्मान्नास्ति बाह्यं निमित्तमतश्चित्तं न स्पृशत्यर्थं बाह्यालम्बनाविषयम्। नाप्यर्थाभासं चित्तत्वात्स्वप्नचित्तवत्। अभूतो हि जागरितेऽपि स्वप्नार्थवदेव बाह्यः शब्दाद्यर्थो यत उक्तहेतुत्वाच्च। नाप्यर्थाभासाश्चित्तात्पृथक्चित्तमेव हि घटाद्यर्थवदवभासते यथा स्वप्ने ॥ २६ ॥

ज्ञानस्य सालम्बनत्वप्रसिद्धेस्तत्त्वदृष्ट्या ज्ञेयाभावे ज्ञानमपि न स्यादित्याशङ्क्याऽऽह--चित्तमिति। न हि स्फुरणं सकर्मकं तस्य सकर्मकत्वप्रसिद्ध्यभावात्। जानातेस्तु सकर्मकत्वं क्रियाफलत्वकल्पनया स्वीकृतमिति भावः। चित्तस्यार्थस्पर्शित्वाभावेऽपि तदाभासस्पर्शित्वं स्यादित्याशङ्क्याऽऽह—नार्थेति। हेतुमाह--अभूत इति। प्रथमपादं व्याचष्टे--यस्मादिति। विमतं चित्तमर्थाभासमपि न स्पृशति चित्तत्वात्संप्रतिपन्नवदिति द्वितीयं पादं विभजते-नापीति। न हि दृष्टान्ते तस्यार्थाभासस्पर्शित्वं तस्यैव तदात्मना भानादित्यर्थः। तृतीयपादं व्याकरोति—अभूतो हीति। विमतोऽर्थः सन्न भवत्यर्थत्वात् संप्रतिपन्नवदित्यनुमानान्न ज्ञानस्याऽऽलम्बनमित्यर्थः। विमतोऽर्थः स्वविषयज्ञानजनको न भवति भ्रान्तिविषयत्वात्संप्रतिपन्नवदित्युक्तमनुमानं स्मारयति—उक्तेति। अर्थजन्यत्वाभावे विज्ञानस्यार्थाभासजन्यत्वं स्यादित्याशङ्क्य चतुर्थपादार्थमाह—नापीति ॥ २६ ॥

निमित्तं न सदा चित्तं संस्पृशत्यध्वसु त्रिषु ।
अनिमित्तो विपर्यासः कथं तस्य भविष्यति ॥ २७ ॥

ननु विपर्यासस्तर्ह्यसति घंटादौ घटाद्याभासता चित्तस्य। तथा च सत्यविपर्यासः क्वचिदुक्तव्य इति। अत्रोच्यते। निमित्तं विषयमतीता-

---

१ ग. छ. झ. °वैभ्रान्ति°। २ ख. ग. ङ. झ. °पितं स्व°। ३ ख. ङ. ज. °व वै°। ४ ख. °चित्ये दु°। ५ च. °स्तथा पु°। ६ ख. घ. ज. न संस्पृ°। ङ. च. न संस्पर्शत्य°। ७ ज. °ते हि स्व°। ८ झ. स्मरणं। ९ ख. ज. °र्मक°। १० झ. सर्वकर्मकत्वाकि°। ११ झ. °लक°। १२ ङ ज. °र्शितत्वा°। १३ घ. ज. °वे त°। १४ घ. ङ. ज. °शितत्वं। १५ ख. झ. °भूतो हीति। °६ घ. ङ. ज. °न्तेऽस्य°। १७ झ. °तीर्थं व्या°। १८ घ. °र्थः वि°। १९ ग. °षये झा°। २० घ. ङ. ज. घटे घ°।

नागतवर्तमानाध्वसु त्रिष्वपि सदा चित्तं न स्पृशेदेव हि । यदि हि क्वचित्संस्पृशेत्सोऽविपर्यासः परमार्थत इति । अतस्तदपेक्षयाऽसति घटे घटाद्याभासता विपर्यासः स्यान्न तु तदस्ति कदाचिदपि चित्तस्यार्थसंस्पर्शनम् । तस्मादनिमित्तो विपर्यासः कथं तस्य चित्तस्य भविष्यति न कथंचिद्विपर्यासोऽस्तीत्यभिप्रायः । अयमेव हि स्वभावश्चित्तस्य यदुतासति निमित्ते घट दौ तद्वदवभासनम् ॥ २७ ॥

ज्ञानस्य सालम्बनत्वाभावे तस्य तथात्वप्रथा भ्रान्तिर्भवेत् । भ्रान्तिश्चाभ्रान्तिप्रयोगिनीत्यन्यथाख्यातिमाशङ्क्याऽऽह—निमित्तामिति । कालत्रयेऽपि ज्ञानस्य वस्तुतोऽर्थस्पर्शित्वाभावे तद्वासनाभावात्तज्जन्या नान्यथाख्यातिः सिध्यति । भ्रान्तिस्तु विघान्तरेणापि भविष्यतीत्याह—अनिमित्त इति । लोकव्यवस्थामाशङ्क्य दर्शयति—नान्विति । यदि घटादिर्बाह्योऽर्थो न गृह्यते तर्हि तस्मिन्नसत्येव तदाभासता ज्ञानस्य विपर्यासः । अतस्मिंस्तद्बुद्धेस्तथात्वात् । विपर्यासे च स्वीकृते क्वचिदप्यविपर्यासो वक्तव्यः, भ्रान्तेरभ्रान्तिपूर्वकत्वस्यान्यथाख्यातिवादिभिरिष्टत्वादित्यर्थः । तत्र पूर्वार्धयोजना परिहरति—अत्रेति । उक्तमेवार्थमुत्तरार्धयोजनया साधयति—यदीति । अभ्रान्तेरभावादसंभवे भ्रान्तेरसति घटादौ घटाद्याभासता ज्ञानस्य कथं निर्वहतीत्याशङ्क्याऽऽह—अयमेवेति । स्वभावशब्देनाविद्योच्यते । न हि भ्रान्तिरभ्रान्तिपूर्विकेति नियमः । सविषयाणां भ्रमाणामविद्यात्वाभ्युपगमादित्यर्थः ॥ २७ ॥

तस्माद्न जायते चित्तं चित्तदृश्यं न जायते ।
तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम् ॥ २८ ॥

भङ्गेः सनिमित्तत्वमित्याद्येतदन्तं विज्ञानवादिनो बौद्धस्य वचनं बाह्यार्थवादिपक्षप्रतिषेधपरमाचार्येणानुमोदितम् । तदेव हेतुं कृत्वा तत्पक्षप्रतिषेधाय तदिदमुच्यते तस्मादित्यादि । यस्मादसत्येव घटादौ घटाद्याभासता चित्तस्य विज्ञानवादिनाऽभ्युपगता तदनुमोदितमस्माभिरपि भूतदर्शनात् । तस्मात्तस्यापि चित्तस्य जायमानाऽवभासताऽसत्येव जन्मनि युक्ता भवितुमित्यतो न जायते चित्तम् । यथा चित्तदृश्यं न जायतेऽसत्तस्य चित्तस्य ये जातिं

---

१ च न संस्पृ° । २ ज. °शेत्सो° । ३ ख. घ. ङ. °व य° । च. °व चिते य° । ४ क. छ. झ. °टाभा° । ५ च. झ. °र्थस्य सं° । ६ च. °य अपे स° । ७ घ. ङ. ज °ये विज्ञा° । ८ ख. °दिर्बाह्यो । ९ घ. ङ. ज. °बाह्यार्थो । १० क. °न्नत्वेव । ११ क. °सत्त्वाज्ज्ञान° । १२ घ. ङ. ज. °दवि° । १३ क. ग. ज. झ. °जनार्थं सा° । १४ च. °षेधयति । अतस्तदि° । १५ घ. °दि ह्यस्तात्तत्से° । १६ क. °स्य ज्ञाय° । १७ घ. चित्त तथा । १८ घ. °था द° । १९ ज चित्तं द° । २० च. °ते यत° ।

पश्यन्ति विज्ञानवादिनः क्षणिकत्वंदुःखित्वशून्यत्वानात्मत्वादि च, तेनैव चित्तेन चित्तस्वरूपं द्रष्टुमशक्यं पश्यन्तः खे वै पश्यन्ति ते पदं पक्ष्यादीनाम्। अत इतरेभ्योऽपि द्वैतिभ्योऽत्यन्तसाहसिका इत्यर्थः। येऽपि शून्यवादिनः पश्यन्त एव सर्वशून्यतां स्वदर्शनस्यापि शून्यतां प्रतिजानते ते ततोऽपि साहसिकतरा स्वं मुष्टिनाऽपि जिघृक्षन्ति ॥ २८ ॥

बाह्यार्थवादिपक्षमेवं विज्ञानवादिमुखेन प्रतिक्षिप्य विज्ञानवादमिदानीमपवदति—तस्मादिति। प्रतिक्षणं विज्ञानस्य जन्म दृश्यते विज्ञानवादिभिरित्याशङ्क्याऽऽह—तस्येति। वृत्तसंकीर्तनपूर्वकं श्लोकस्य तात्पर्यमाह—प्रज्ञप्तेरिति। तच्च बाह्यार्थवादिनो बाह्योऽर्थो विज्ञानवदस्तीति पक्षप्रतिषेधमुखेन प्रवृत्तं तत्पुनराचार्येण मैवत्वेवमित्यनुज्ञातम्, बाह्यार्थवाददूषणस्य स्वमतेऽपि संमतत्वादित्याह-बाह्यार्थ इति। बाह्यार्थवाददूषणानुमोदनप्रयोजनमाह—तदेवेति। असत्येव घटादौ घटाद्याभासत्वं विज्ञानस्य यदुक्तं तदेव हेतुत्वेनोपादाय विज्ञानवादनिषेधार्थं बाह्यार्थपक्षदूषणमनुमोदितमित्यर्थः। संप्रति विज्ञानवाददूषणमवतारयति—तदिदमिति। तस्मादित्यादि व्याचष्टे—तस्मादिति। भूतदर्शनाद्घटादेर्मृदादिमात्रं भूतं वस्तुतत्त्वं तस्यापि विज्ञप्तिमात्रं तत्त्वं तस्य शास्त्रतो दर्शनादिति यावत्। द्वितीयपादं दृष्टान्तत्वेन विभजते—यथेति। विमतं विज्ञानजन्म न तात्त्विकं दृश्यत्वाच्छिलपीतादिवदित्यर्थः। विपक्षे दोषमाह—अत इति। तत्त्वतो विज्ञानस्य जन्मायोगाद्ये तस्य तात्त्विकं जन्म पश्यन्ति ते पक्ष्यादीनां खेऽपि पदं पश्यन्तीत्यन्वयः। अनात्मत्वादीत्यादिशब्देनान्योन्यविलक्षणत्वमन्योन्यसादृश्यं च गृह्यते। तत्र हेतुं सूचयति—तेनैवेति। स्ववृत्तेरनुपपत्तेस्तद्दृश्यतामन्तरेण च तद्धर्मदृश्यतासंभवादित्यर्थः। विज्ञानवादे फलितं विशेषं दर्शयति—अत इति। शून्यवादिनं प्रति विशेषं कथयति—येऽपीति। पश्यन्त एवेत्यविलुप्तदृग्भूता द्योत्यते। दृग्बलादेव सर्वाभावः सिध्यति। दृग्भावस्तु कथं सिध्येत्। न च तावद्दृगेव तदभावं साधयेत्। तयोरेककालत्वानुपपत्तेरित्यर्थः। किंच सर्वशून्यतां वदन्तः शून्यतादर्शनस्य स्वात्मदर्शनस्य च शून्यतां वदन्ति। तथा च स्वपक्षासिद्धिरित्यभिप्रेत्याह—स्वदर्शनस्येति। ततोऽपीति। विज्ञानवादिभ्योऽपीत्यर्थः ॥२८॥

---

१ ङ. °स्वशु°। २ च. झ. °दुःखत्व°। ३ घ. ङ. ञ. °त्तरू°। ४ झ. °श्यन्तोऽतः खे। ५ ङ. °नन्ति ते ६ ग. छ. झ. °कर्ता°। ७ ग. °नो वि°। ८ छ. बाह्यार्थो वि°। झ. °बाह्यार्थवि°। ९ क. छ °क्षेनाप्र°। १० ग. घ. ङ. ञ. °वस्येव°। ११ क. छ. झ. °श्यन्यनु°। १२ ख. खे प°। १३ क. ङ. दृग्भावस्तु। १४ घ. ङ. ञ. °स्थ शु°।

अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥ २९ ॥

उक्तैर्हेतुभिरजमेकं ब्रह्मेति सिद्धम् । यत्पुनरादौ प्रतिज्ञातं तत्प्रत्येतुं [illegible]-द्वारार्थोऽयं श्लोकः । अजातं यच्चित्तं ब्रह्मैव जायत इति वादिभिः परिकल्प्यते तदजातं जायते यस्मादजातिः प्रकृतिस्तस्यै ततस्तस्मादजातरूपायाः प्रकृतेरन्यथाभावो जन्म न कथंचिद्भविष्यति ॥ २९ ॥

यदि विज्ञानस्य बाह्यालम्बनत्वं क्षणिकत्वं शून्यत्वं च न संभवति किं तर्हि तत्त्वमेकरूपं भवतीत्याशङ्क्याऽऽह—अजातमिति । तस्याश्च प्रकृतेरन्यथात्वं पुरस्तादेव निरस्तमित्याह—प्रकृतेरिति । श्लोकस्य तात्पर्यमाह—उक्तैरिति । कूटस्यमद्वितीयं ब्रह्मेति यत्पूर्वत्र प्रतिज्ञातं तज्जन्मनो दुर्निरूपत्वादुक्तहेतुभिः सिद्धम् । तस्यैव सिद्धस्यार्थस्य फलमुपसंहर्तुमेष श्लोक इत्यर्थः । पूर्वार्धं योजयति—अजातमिति । यदि चित्तं स्फुरणमजातमभीष्टं तर्हि तद्ब्रह्मैव तस्य कौटस्थ्यैकस्वाभाव्यात्तस्पुनर्वस्तुतो न जातमेव मायया जन्मवदिति कल्प्यते चेत्तस्याजातिरेवाजातत्वात्प्रकृतिर्भवतीत्यर्थः । द्वितीयार्धं योजयति—अजातरूपाया इति । तस्याश्चेदन्यथात्वं स्वरूपहानिरापतेदित्यर्थः ॥ २९ ॥

अनादेरन्तवत्त्वं च संसारस्य न सेत्स्यति ।
अनन्तता चाऽऽदिमतो मोक्षस्य न भविष्यति ॥ ३० ॥

अयं चापर आत्मनः संसारमोक्षयोः परमार्थसद्भाववादिनां दोष उच्यते । अनादेरतीतकोटिरहितस्य संसारस्यान्तवत्त्वं समाप्तिर्न सेत्स्यति युक्तितः सिद्धिं नोपयास्यति । न ह्यनादिः सन्नन्तवान्कश्चित्पदार्थो दृष्टो लोके । बीजाङ्कुरसंबन्धनैरन्तर्यविच्छेदो दृष्ट इति चेत् । न । एकत्वस्वभावेनापोदितत्वात् । तथाऽनन्तताऽपि विज्ञानप्राप्तिकालप्रभवस्य मोक्षस्याऽऽदिमतो न भविष्यति ।

---

१ ङ. 'ते य' । २ च. 'जातिस्तत्तस्त' । ३ ङ. छ. 'स्य चित्तस्य त' । ४ ग. झ. 'नवादस्य । ५ ग झ. 'त्वं शू' । ६ ग. झ. 'कत्वरूपं च संभ' । ७ ग. झ. तत्तज्ज' । ८ ग. झ. 'मपीष्टं । ९ ग. घ. ङ. ज. 'टस्यैक' । १० ख. 'ज्यात्पु' । ११ ख. घ. ङ. ज. 'तमिति मा' । १२ ङ 'जायमानत्वा' । १३ च. 'ता आदि' । १४ च. 'ति । तर्ह्यना' । १५ घ. ङ. ज. 'श्चित्सत्प' । १६ च. ज. झ. 'बन्धे नै' । १७ च. 'वस्तुभावेनाऽऽपादि' । १८ ख. झ. 'पि ह्या' । १९ ख. घ. ङ. ज. 'प्रसव' । २० ज. भवति ।

घटादिष्वदर्शनात्। घटादिविनाशवदवस्तुत्वाददोष इति चेत्। तथा च मोक्षस्य परमार्थसद्भावप्रतिज्ञाहानिः। असत्त्वादेव शशविषाणस्येवाऽऽदिमत्त्वाभावश्च ॥ ३० ॥

कूटस्थं तत्त्वं तात्त्विकमित्यत्र हेत्वन्तरमाह-अनादेरिति। विमतः संसारो नानन्तवाननादिमावत्वादात्मवदित्यर्थः। किंच मोक्षोऽनन्तो नैं भावैत्वे सत्यादिमत्त्वाद्घटवदित्याह—अनन्तेति। श्लोकस्य तात्पर्यमाह—अयं चेति। तत्र पूर्वार्धं व्याकरोति—अनादेरिति। अतीतकोटिरहितस्य पूर्वं नाऽऽसीदित्यवच्छेदवर्जितस्येत्यर्थः। योऽनादिमावः सोऽनन्तवान्नेति व्याप्तिरात्मनि व्यक्तेत्याह—न हीति। बीजाङ्कुरयोर्हेतुफलभावेन संबन्धस्तस्य नैरन्तर्यं संतानस्तस्यानादिमावत्वेऽपि विच्छेदस्यान्तस्य दृष्टत्वादनैकान्तिकतेति शङ्कते—बीजेति। भवत्वविशेष्यांशस्य तत्रावर्तनान्न व्यभिचारशङ्केति दूषयति—नैकेति। द्वितीयार्धं व्याचष्टे—तथेति। यत्राऽऽदिमत्त्वं तत्र नानन्तत्वमिति व्याप्तिभूमिमाह—घटादिष्विति। यथा कृतकोऽपि घटादिध्वंसो नित्यस्तथा बन्धध्वंसोऽपि भविष्यतीत्यनैकान्तिकत्वमाशङ्कते—घटादीति। मोक्षस्याभावत्वे सति परमार्थसत्त्वप्रतिज्ञा भज्येतेति दूषयति—तथा चेति। किंच प्रागसतः सत्तासमवायरूपं कार्यत्वं तदपि मोक्षस्यासत्त्वे सिध्यतीत्याह—असत्त्वादेवेति ॥३०॥

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ३१ ॥
सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ३२ ॥

वैतथ्ये कृतव्याख्यानौ श्लोकाविह संसारमोक्षाभावप्रसङ्गेन पठितौ ॥ ३१ ॥ ३२ ॥

अस्तु तर्हि मोक्षस्याऽऽद्यन्तवत्त्वं तत्राऽऽह—आदाविति। यदित्यूषरोदकादि गृह्यते। तथा वस्तुतो नास्त्येवेति यावत्। वितथैस्तैरेव मरीच्युदकादिभिः। सादृश्यमाद्यन्तवत्त्वम्। विमता मोक्षादयो न परमार्थसन्तो भवितुमर्हन्त्याद्यन्तवत्त्वान्मरीच्युदकादि-

---

१ ज. °वस्तु°। छ. °वद्वस्तु°। २ च. झ. सति मो°। ३ च. °दित्वयन्तभावाच्च। अवितथा एव भावाः सप्रयोजनत्वादित्यत आह। आदावन्तेति ॥ ३१ ॥ सप्रयोजनतां तेषां निषेधयति सप्रयोजनतेति। वै°। ४ ग. झ. ञ. भविष्यत्या°। ख. छ. न भवति भा°। ५ घ. ङ. ज. °वत्त्वे स°। ६ ग. छ. ज. °दूषटादिव°। ७ ख. °दिर्भावः। ८ ग. झ. °न्तर्यसं°। ९ छ. °शेषांश°। १० घ. °कमा°। ११ घ. ङ. °रूपका°। १२ ङ. ज. °दि द्यूष°। १३ घ. ङ. ज. °वत्त्वेन मरी°।

वादित्यर्थः । कथं तर्हि मोक्षादीनामपि तथात्वप्रथेत्याशङ्क्याऽऽह—अवितथा इति । लक्षिता मूढैरविचारकैरिति शेषः । ऊषरोदकादीना स्नानपानादिप्रयोजनानुपलम्मान्मोक्षस्वर्गादीनां तु सुखादिप्राप्तिप्रयोजनप्रतिलम्मान्न मोक्षादिवैतथ्यमित्याशङ्क्याऽऽह—सप्रयोजनतेति । तेषां मोक्षादीनामिति यावत् । पुनरुक्तिशङ्कां वारयति—वैतथ्य इति ॥ ३१ ॥ ३२ ॥

सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् ।
संवृतेऽस्मिन्प्रदेशे वै भूतानां दर्शनं कुतः ॥ ३३ ॥

निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनादित्ययमर्थः प्रपञ्च्यत एतैः श्लोकैः ॥ ३३ ॥

किंच येन हेतुना स्वप्नस्य मिथ्यात्वमिष्टं तस्य जागरितेऽपि तुल्यत्वाज्जन्मादिरहितं संविन्मात्रं तत्त्वमेष्टव्यमिति विवक्षित्वाऽऽह—सर्वे इति । यदि देहान्तर्दर्शनान्मिथ्यात्वं स्वप्नस्येष्टं तर्हि वैराजदेहे सर्वस्य जागरितस्य दर्शनान्मिथ्यात्वं दुर्वारमित्यर्थः । किंच योगयदेशवैधुर्यान्मिथ्यात्वं स्वप्नस्य यद्यमीष्टं तर्हि संवृत्ते प्रदेशे प्रत्यग्भूते ब्रह्मण्यखण्डैकरसे भूतानां विद्यमानानां दर्शनं न कुतोऽपि स्याद्ब्रह्मणोऽनवकाशत्वादित्याह—संवृत इति । अवतारितश्लोकसहितानामुत्तरश्लोकानां जात्याभासमित्यस्मात्प्राक्तनानां तात्पर्यमाह—निमित्तस्येति ॥ ३३ ॥

न युक्तं दर्शनं गत्वा कालस्यानियमाद्गतौ ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥ ३४ ॥

जागरिते गत्यागमनकालो नियतो देशः प्रमाणतो यस्तस्यानियमान्निषेधस्याभावात्स्वप्ने न देशान्तरगमनमित्यर्थः ॥ ३४ ॥

उक्तमेवार्थं प्रपञ्चयति—न युक्तमित्यादिना । स्वप्ने देशान्तरगतौ नियतकालाभावान्न गत्वा दर्शनमिष्टं तथा मरणादूर्ध्वमर्चिरादिमार्गेण गत्वा ब्रह्मदर्शनमयुक्तं कालानवच्छिन्नत्वादित्यर्थः । किं च यद्देशस्थः स्वप्नं पश्यति प्रतिबुद्धस्तस्मिन्देशे नास्तीति मिथ्यात्वमभीष्टम् । तथा यस्मिन्देशे स्थितः संसारमनुभवति ब्रह्मभावं प्रतिपन्नस्तस्मिन्देहदेशे नास्ति

---

१ घ. °ति विशे° । २ झ. °ति विवक्षितत्वादिति । ३ ज. झ. °न्तर्दर्श° । ४ ख. प्रत्य° । ५ घ. °नं कु° । ६ क. छ. °कालौ नियतौ दे° । ७ छ. °ना—किंच स्व° । ८ क. °वाच्च ग° । ९ ख. ग्रबु° । १० ख. °त्वमिष्टं तथा । ११ क. ज. यथा । १२ ज. °नुवदति । १३ ख. नास्तीति प° ।

परिपूर्णब्रह्मरूपेणावस्थानादतो जागरितस्यापि मिथ्यात्वमेष्टव्यमित्याह-प्रतिबुद्धश्चेति। श्लोकस्य तात्पर्यार्थं कथयति-जागरित इति ॥ ३४ ॥

मित्राद्यैः सह संमन्त्र्यं संबुद्धो न प्रपश्यते ।
गृहीतं चापि यत्किंचित्प्रतिबुद्धो न पश्यति ॥ ३५ ॥

मित्राद्यैः सह संमन्त्र्य तदेव मन्त्रणं प्रतिबुद्धो न प्रपश्यते । गृहीतं च यत्किंचिद्धिरण्यादि न प्राप्नोति । गतश्च न देशान्तरं गच्छति स्वप्ने ॥३५॥

किंच यथा स्वप्ने विसंवादादप्रामाण्यमिष्टं तथा जागरितेऽपि परं श्रेयोऽस्माभिः साधनीयमिति स ब्रह्मवादिभिः सह समालोच्याविद्यानिद्रातः प्रतिबुद्धो नैव श्रेयः-सिद्ध्यैवमालोचितं प्रतिपद्यते । सर्वस्य नित्यमुक्तत्वनिश्चयात् । अतो मुमुक्षुत्वं श्रवणादिकर्तव्यता च भ्रान्त्यैवेत्याह-मित्राद्यैरिति । किंच स्वप्नवदेव गृहीतमुपदेशादि विद्वान्न पश्यति तत्साध्यफलाभावादित्याह-गृहीतं चेति । अथवा लोकदृष्ट्या यत्किंचिद्गृहीतं वस्त्रान्नोदकादि तद्विद्वान्नैव किंचित्करोमीति प्रतिबुद्धोऽन्यप्रत्ययबाधान्न स्वसंबन्धित्वेनाधिगच्छति । तेन तदाभासमात्रमेवेत्याह-गृहीतं चेति । उक्तमर्थं विवक्षित्वा श्लोकाक्षराणि योजयति-मित्राद्यैरित्यादिना ॥ ३५ ॥

स्वप्ने चावस्तुकः कायः पृथगन्यस्य दर्शनात् ।
यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम् ॥ ३६ ॥

स्वप्ने चाटन्दृश्यते यः कायः सोऽवस्तुकस्ततोऽन्यस्य स्वापदेशस्थस्य पृथक्कायान्तरस्य दर्शनात् । यथा स्वप्नदृश्यः कायोऽसंस्तथा सर्वं चित्तदृश्यमवस्तुकं जागरितेऽपि चित्तदृश्यत्वादित्यर्थः । स्वप्नसमत्वादसज्जागरितमपीति प्रकरणार्थः ॥ ३६ ॥

किंच स्वप्नावस्थायां येन देहेन नाड्यादिषु पर्यटति स मिथ्या पृथग्भूतस्य निश्चलस्य देहस्य दर्शनात् । तथा जागरिते येन परिव्राजकादिशरीरेण लोकैस्य पूज्यो द्वेष्यो वा दृश्यते स मिथ्या कथ्यते । पृथगेव कूटस्थब्रह्माख्यशरीरस्यानुभवादित्याह-स्वप्ने चेति । किंच यथा स्वप्ने देहो मिथ्या तथा चित्तदृश्यं जडं सर्वमवस्तुकं मिथ्या-

---

१ छ. °त्वमिष्टमि° । २ ग. झ. °त्पर्य क° । ३ ख. घ. च. ज. °ऽय प्रबु° । ४ झ. °णं न । ५ ख. घ. ङ. ज प्रतिषु° । ६ ख. घ. ङ. °तं य° । ७ ख. घ. ङ. च. ज. °व्यावृत° । ८ झ. °विद्यया नि° । ९ ग. झ. °तः सकाशात्प्रति° । १० झ. °साधनत्व° । ११ छ. °थमा° । १२ ग. झ. प्रबु° । १३ ग. घ. °समे° । १४ च. °सर्वचित्त° । १५ क. स्वप्नदे° । १६ क. ङ. झ. °न नद्यादि° । १७ ख. °कपू° । १८ घ. °नुभावा° ।

भूतमेषितव्यमित्याह–ययेति । पूर्वार्धगतान्यक्षराणि योजयति— स्वप्न इति । उत्तरार्धगतानि व्याकरोति–ययेत्यादिना । प्रकरणार्थमुपसंहरति–स्वप्न इति ॥ ३६ ॥

ग्रहणाज्जागरितवत्तद्धेतुः स्वप्न इष्यते ।
तद्धेतुत्वात्तु तस्यैव सज्जागरितमिष्यते ॥ ३७ ॥

इतश्चासत्त्वं जाग्रद्वस्तुनो जागरितवज्जागरितस्यैव ग्रहणाद्ग्राह्यग्राहकरूपेण स्वप्नस्य तज्जागरितं हेतुरस्य स्वप्नस्य स स्वप्नस्तद्धेतुर्जागरितकार्यमिष्यते । तद्धेतुत्वाज्जागरितकार्यत्वात्तस्यैव स्वप्नदृश एव सज्जागरितं न त्वन्येषाम् । यथा स्वप्न इत्यभिप्रायः । यथा स्वप्नः स्वप्नदृश एव सन्साधारणविद्यमानवस्तुवदवभासते तथा तत्कारणत्वात्साधारणविद्यमानवस्तुवदवभासमानं न तु साधारणं विद्यमानवस्तु स्वप्नवदेवेत्यभिप्रायः ॥३७॥

यथा जागरितं तथा स्वप्नो गृह्यते । तथा च स्वप्नस्य जागरितकार्यत्वाद्यः स्वप्नद्रष्टा तस्यैव जागरितं सदिति स्वप्नवत्तन्मिथ्यात्वमित्याह–ग्रहणादिति । किंच जागरितस्य विद्यमानत्वमनेकसाधारणत्वं च वस्तुनो नास्ति स्वप्नकारणत्वात्किंतु तथा भासमानत्वमित्याह–तद्धेतुत्वादिति । जागरितस्य वस्तुतोऽसत्त्वे हेत्वन्तरपरत्वं श्लोकस्य दर्शयति–इतश्चेति । इतःशब्दार्थमेव स्फोरयन्पूर्वार्धं योजयति–जागरितवदिति । उत्तरार्धं योजयति–तद्धेतुत्वादिति । सति प्रमातरि बाध्यत्वं स्वप्नस्य मिथ्यात्वं जागरितस्य पुनस्तदनुपलम्भात्परमार्थः सत्त्वम् । कार्यस्य मिथ्यात्वे कारणस्यापि मिथ्यात्वमिति मानाभावात् । न हि सर्वसाधारणं विद्यमानं न जागरितं मिथ्या भवितुं युक्तमित्याशङ्क्याऽऽह–ययेत्यादिना ॥ ३७ ॥

उत्पादस्याप्रसिद्धत्वादजं सर्वमुदाहृतम् ।
न च भूतादभूतस्य संभवोऽस्ति कथंचन ॥ ३८ ॥

ननु स्वप्नकारणत्वेऽपि जागरितवस्तुनो न स्वप्नवदवस्तुत्वम् । अत्यन्तचलो हि स्वप्नो जागरितं तु स्थिरं लक्ष्यते । सत्यमेवमविवेकिनां स्यात् ।

---

१ ख. छ. °तान्यक्षराणि व्या° । २ क. घ. छ. °तस्यैव । ३ ख. स्वप्नस्तज्जा° । ४ घ. ङ. ञ. °स्य जाग° । ५ क. °प्नस्त° । ६ घ. ङ. ञ. °स च स्व° । ७ ञ. °प्नदृ° । ८ च. °स्वप्नद्र। ९ च. झ. °व। तत्साधा° । १० च. °नं तु° । ११ क. °था स्व° । १२ झ °प्नजा° । १३ घ. ङ. ञ. °वन्मि° । १४ ग. झ. °रणं च । १५ क. °त्वं व° । १६ ग. झ. वस्तुतो । १७ ग. छ झ. °व स्फुटय° । १८ ग झ. °त्नमि° । १९ घ झ. °स्तदुप° । २० ख छ. ज. स्वप्नं प्रति का° । २१ ङ. घ. °त्वे जा° । २२ क. °भेवावि° ।

विवेकिनां तु न कस्यचिद्वस्तुन उत्पादः प्रसिद्धोऽतोऽप्रसिद्धत्वादुत्पाद्-स्याऽऽत्मैव सर्वमित्यजं सर्वमुदाहृतं वेदान्तेषु सबाह्याभ्यन्तरो ह्यज इति। यदपि मन्यसे जागरितात्सतोऽसत्स्वप्नो जायत इति तदसत्। न भूता-द्विद्यमानादभूतस्यासतः संभवोऽस्ति लोके न ह्यसतः शशविषाणादेः संभवो दृष्टः कथंचिदपि ॥ ३८ ॥

कार्यकारणभावेऽपि स्वप्नजागरितयोर्न मिथ्यात्वमविशिष्टमत्यन्तवैषम्यादित्या-शङ्क्याऽऽह—उत्पादस्येति। यत्तु कार्यकारणत्वं सत्यासत्यर्थयोरिव स्वप्नजागरि-तयोरित्युक्तं तदनुवदति—न चेति। श्लोकव्यावर्त्यमाशङ्कामाह—नन्विति। किमिदं वैलक्षण्यमविवेकिनां प्रतिभाति किंवा विवेकिनामिति विकल्प्याऽऽद्यमङ्गी करोति—सत्यमिति। द्वितीयं प्रत्याह—विवेकिनां त्विति। द्वितीयमागमाकाङ्-क्षाद्वारा विभजते—यदपीत्यादिना। संभवो नासतोऽस्तीत्येतद्दृष्टान्तेन साधयति—न हीति। कथंचिदपि सतोऽसतो वेत्यर्थः ॥ ३८ ॥

असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः।
असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यति ॥ ३९ ॥

ननूक्तं त्वयैव स्वप्नो जागरितकार्यमिति तत्कथमुत्पादोऽप्रसिद्ध इत्युच्यते। शृणु तत्र यथा कार्यकारणभावोऽस्माभिरभिप्रेत इति। असद्विद्यमानं रज्जु-सर्पवद्विकल्पितं वस्तु जागरिते दृष्ट्वा तद्भावभावितस्तन्मयः स्वप्नेऽपि जागरितवद्ग्राह्यग्राहकरूपेण विकल्पयन्पश्यति तथाऽसत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यत्यविकल्पयन्। चशब्दात्तथा जागरितेऽपि दृष्ट्वा स्वप्ने न पश्यति कदाचिदित्यर्थः। तस्माज्जागरितं स्वप्नहेतुरुच्यते न तु परमार्थसादिति कृत्वा ॥ ३९ ॥

यदुक्तमुत्पादस्याप्रसिद्धत्वं तदयुक्तम्। स्वप्नजागरितयोस्तथा कार्यकारणत्वाङ्गी-करणादित्याशङ्क्याऽऽह—असदिति। जागरिते दृष्टस्य स्वप्ने दर्शनाज्जागरितस्य स्वप्नं प्रति कारणत्वं चेत्तर्हि स्वप्ने दृष्टस्य जागरितेऽपि दर्शनात्तस्य जागरितं प्रति कारणत्वं किं न स्यादित्याशङ्क्याऽऽह—असत्स्वप्नेऽपीति। श्लोकव्यावर्त्यमाशङ्का-मुत्थापयति—नन्विति। पूर्वापरविरोधे चोदिते परिहारे वक्ष्यमाणे मनःसमाधानं प्रार्थयते—शृण्विति। तमेव प्रकारं प्रकटयन्नक्षराणि योजयति—असदिति।

---

१ ग. यद्यपि। २ ग. °रणाभा°। ३ झ. °रणं स°। ४ ग. °ल्ययोः स्व°। ५ क. ख. °योरेव। ६ ख. तदयुक्त°। ७ च. स्वप्ने हे°। ८ क. °स्त्वका°। ९ च. °रितद्द°। १० ग. स्वप्नद°। ११ ग. प्रार्थ्यते।

तुच्छत्वं व्यवच्छिनत्ति—रज्ज्विति। दर्शनस्याऽऽभासत्वं सूचयति—विकल्पित-मिति। यथा जाग्रद्दृष्टस्य विशेषस्य स्वप्ने दर्शनाज्जागरितवासनाधीनः स्वप्नो जागरितकार्यत्वेन व्यवह्रियते तथा स्वप्ने दृष्टस्य जागरितेऽपि दर्शनात्तत्कार्यत्वं जागरितस्य प्राप्तमित्याशङ्क्य द्वितीयार्धं व्याचष्टे—तथेति। यत्तु स्वप्नजागरितयो-रुक्तं कार्यकारणत्वं तदपि न नियतमिति निपातार्थं कथयति—चशब्दादिति। तस्मा-त्प्रायशः स्वप्नस्य जाग्रद्वासनाधीनत्वादिति यावत्। जागरितस्य परमार्थसत्त्वात्का-र्यस्य स्वप्नस्यापि तादात्म्यापत्तेस्तत्त्वं विवक्षित्वा कार्यकारणत्वप्रथा कथं न भवतीति व्यावर्त्य कथयति—नन्विति। ३९॥

नास्त्यसद्धेतुकमसत्सदसद्धेतुकं तथा।
सच्च सद्धेतुकं नास्ति सद्धेतुकमसत्कुतः॥ ४०॥

परमार्थतस्तु न कस्यचित्केनचिदपि प्रकारेण कार्यकारणभाव उपपद्यते। कथम्। नास्त्यसद्धेतुकमसच्छशविषाणादि हेतुः कारणं यस्यासत एव स्यात्कुसुमादेस्तदसद्धेतुकमसन्न विद्यते तथा सदपि घटादिवस्तु असद्धेतुकं शशविषाणादिकार्यं नास्ति। तथा सच्च विद्यमानं घटादि विद्यमानघटादि वस्त्वन्तरकार्यं नास्ति। सत्कार्यमसत्कुत एव संभवति। न चान्यः कार्य-कारणभावः संभवति शक्यो वा कल्पयितुम्। अतो विवेकिनामसिद्ध एव कार्यकारणभावः कस्यचिदित्यभिप्रायः॥ ४०॥

व्यवहारदृष्ट्या कार्यकारणत्वं स्वप्नजागरितयोरुक्तम्। तत्त्वदृष्ट्या त्वप्रसिद्धमेव क्वचिदपि कार्यकारणत्वमिति वदन्वस्तुनोऽज्ञानादवस्त्वेव कार्यं भवतीति मतं व्यावर्तय-ति—नास्तीति। शून्यवादिनस्तु सदेव कार्यं जायते शून्यादिति मन्यन्ते तान्प्र-त्याह—सदिति। तथेत्यनेन नासदित्येतदनुकृष्यते। सांख्यादयस्तु कार्यकारणयो-र्द्वयोरपि सत्त्वं संगिरन्ते तान्प्रत्युक्तम्—सच्चेति। सद्ब्रह्म कारणं मिथ्याप्रपञ्चसृष्टेरि-त्येके वर्णयन्ति तान्निराचष्टे—सद्धेतुकमिति। श्लोकस्य तात्पर्यमाह—परमार्थत-

---

१ ख. °कल्पयन्निति। २ ख. जागरे दृष्ट°। ३ ग. छ झ. °ज्जाग्रद्वास°। ४ ग. °र्थं च क°। ५ झ. °सत्यत्वा°। ६ घ. °स्वात्तत्का°। ७ ख. घ. झ. °णत्वं क°। ग. °णत्वकथा न। ८ च. कथं तत्रऽऽह। ना°। ९ क. कुपुष्पादे°। १० च °देरस°। ११ च °सद्विध°। १२ झ. °तु श°। घ. °तुकश°। १३ छ. °स्ति सत्का°। झ. °स्ति स°। १४ क. घ. °दि व°। १५ छ. °मप्रसि°। १६ क. °प्रतिषिद्ध°। १७ ग. °स्तुतोऽज्ञा°। १८ ज. झ. शून्यत्वादि°। १९ ग. झ °स्तीत्यनु°।

स्तित्वेति । प्रसिद्धं कार्यकारणत्वं यया कया च प्रक्रियया प्रतिपादयितुमुचितमन्यथा प्रसिद्धिप्रकोपादित्याक्षिपति—कथमिति । अनिर्वाच्यं मायामयं कार्यकारणत्वं प्रतीतिमात्रसिद्धमयौक्तिकमधिकृत्य प्रसिद्धिरविरुद्धेत्यभिसंधायाऽऽद्यं पादं विभजते—नास्तीत्यादिना । द्वितीयं पादं व्याचष्टे—तथेत्यादिना । तृतीयं पादं व्याकरोति—तथा सच्चेति । चतुर्थपादार्थमाह—असदिति । अस्तु तर्हि प्रकारान्तरेण कार्यकारणभाव इत्याशङ्क्य योग्यानुपलब्धिविरुद्धत्वान्नैवमित्याह—न चेति ॥ ४० ॥

विपर्यासाद्यथा जाग्रदचिन्त्यान्भूतवत्स्पृशेत् ।
तथा स्वप्ने विपर्यासाद्धर्मांस्तत्रैव पश्यति ॥ ४१ ॥

पुनरपि जाग्रत्स्वप्नयोरसतोरपि कार्यकारणभावाशङ्कामपनेतुमाह । विपर्यासादविवेकतो यथा जाग्रज्जागरितेऽचिन्त्यान्भावानशक्यचिन्तनीयान्रज्जुसर्पादीन्भूतवत्परमार्थवत्स्पृशन्निव विकल्पयेदित्यर्थः । कश्चिद्यथा तथा स्वप्ने विपर्यासाद्रथ्यादीन्धर्मान्पश्यन्निव विकल्पयति तत्रैव पश्यति न तु जागरितादुत्पद्यमानादित्यर्थः ॥ ४१ ॥

स्वप्नजागरितयोर्वस्तुतो नास्ति कार्यकारणत्वमित्यत्रैव हेत्वन्तरमाह—विपर्यासादिति । श्लोकस्य तात्पर्यमाह—पुनरपीति । अक्षरार्थं कथयति—विपर्यासादित्यादिना । कश्चिदित्यस्य पूर्वेण क्रियापदेन संबन्धः । दृष्टान्तमनूद्य दार्ष्टान्तिकमाह—यथेत्यादिना ॥ ४१ ॥

उपलम्भात्समाचारादस्तिवस्तुत्ववादिनाम् ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥ ४२ ॥

याऽपि बुद्धैरद्वैतवादिभिर्जातिर्देशितोपदिष्टा । उपलम्भनमुपलम्भस्तस्मादुपलब्धेरित्यर्थः । समाचाराद्गुणाश्रयादिधर्मसमाचरणात् । ताभ्यां हेतुभ्यामस्तिवस्तुत्ववादिनामस्ति वस्तुभाव इत्येवंवदनशीलानां दृढाग्रहवतां श्रद्दधानानां मन्दविवेकिनामर्थोपायत्वेन सा देशिता जातिः । तां गृह्णन्तु तावत् । वेदान्ताभ्यासिनां तु स्वयमेवाजाद्वयात्मविषयो विवेको भविष्यतीति न तु परमार्थबुद्ध्या । ते हि श्रोत्रियाः स्थूलबुद्धित्वादजातेरजातिवस्तुनः सदा त्रस्यन्त्यात्मनाशं मन्यमाना अविवेकिन इत्यर्थः । उपायः सोऽवतारायेत्युक्तम् ॥ ४२ ॥

---

१ ग. °या च. । २ ग. घ झ. °द्धिको° । ३ ख. यया । ४ च. °नयंस्तमाह । ५ क. °सादिवि° । ६ ख. °साद्विरुद्धाम्ह्स्या° । ७ क. °दीन्प° । ८ झ. °श्चतवि । ९ ग. ज. °स्तुनोर्नास्ति । १० क. °म् । ये° ।

तत्त्वदृष्ट्या कार्यकारणत्वस्यापसिद्धत्वे कथं जन्मादिसूत्रप्रमुखैः सूत्रैर्जगत्कारणं ब्रह्म सूत्रितमित्याशङ्क्याऽऽह—उपलम्भादिति। अविवेकिनां विवेकोपायत्वेन कार्यकारणत्वमुपेत्य सूत्रकारप्रवृत्तिरित्यर्थः। श्लोकाक्षराणि व्याचष्टे—याऽपीत्यादिना। अस्ति वस्तुभावो द्वैतस्येति शेषः। कार्यकारणभावमुपेत्य जन्मोपदिशतामद्वैतवादिनां मन्दविवेकिषु विवेकदार्ढ्योपायत्वेन कथं तदुपदेशः स्यादित्याशङ्क्याऽऽह—तामिति। यदा ब्रह्मणः सकाशादशेषं जगद्भवतीत्यभ्युपेतं तदा तदतिरेकेण जगतोऽभावाद्ब्रह्मैव सर्वमिति निश्चितम्। तद्विषयेषु[1] च वेदान्तेषु पौर्वापर्येणाऽऽलोचितेषु तदभ्यासिनां तेषां तदभ्यासप्रसादादेव कूटस्थाद्वितीयवस्तुविवेकदार्ढ्यं सेत्स्यतीत्यभिप्रेत्याद्वैतवादिभिर्जातिरुपदिष्टा न तु द्वैतस्य श्रुतितो न्यायतश्च निरूपयितुमशक्यस्य परमार्थत्वं गृहीत्वा जातिरुपदिष्टेत्यजातिरेव पारमार्थिकीत्यर्थः। चतुर्थपादार्थमाह—ते हीति। तेषां विवेकोपायत्वेन जातिरुपदिष्टेत्यत्रोपक्रममनुकूलयति—उपाय इति ॥ ४२ ॥

अजातेस्त्रसतां तेषामुपलम्भाद्वियन्ति ये।
जातिदोषा न सेत्स्यन्ति दोषोऽप्यल्पो भविष्यति ॥४३॥

ये चैवमुपलम्भात्समाचाराच्चाजातेरजातिवस्तुनस्त्रसन्तोऽस्ति वस्त्वित्यद्वयादात्मनो वियन्ति विरुद्धं यन्ति द्वैतं प्रतिपद्यन्त इत्यर्थः। तेषामजातेस्त्रसतां श्रद्दधानानां सन्मार्गावलम्बिनां जातिदोषा जात्युपलम्भकृता दोषा न सेत्स्यन्ति सिद्धिं नोपयास्यन्ति। विवेकमार्गप्रवृत्तत्वात्। यद्यपि कश्चिद्दोषः स्यात्सोऽप्यल्प एव भविष्यति। सम्यग्दर्शनाप्रतिपत्तिहेतुक इत्यर्थः ॥४३॥

उदरमन्तरं कुरुते। अथ तस्य भयं भवतीत्यादिश्रुतिभ्यो ब्रह्मणि विकारदर्शिनां भयप्राप्तिः श्रूयते। तथा च श्रोत्रियाणामपि भेददर्शिनां नानुग्राह्यतेत्याशङ्क्याऽऽह—अजातेरिति। न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति स्मृतेस्तेषामात्यन्तिकपतनाभावेऽपि निन्दानुपपत्त्या कश्चिद्दोषलेशः संभवतीत्याशङ्क्य सम्यग्दर्शनप्राप्तिप्रयुक्तं गर्भवासादिदोषमभ्युपगच्छति—दोषोऽपीति। अन्वयमादर्शयन्पादत्रयगतान्यक्षराणि योजयति—ये चेत्यादिना। चतुर्थपादं व्याचष्टे—यद्यपीति। कश्चिन्निन्दानुपपत्तिसूचित इति यावत् ॥ ४३ ॥

---

१ ग. °ये च। २ छ. °षु वे°। ३ ग. छ. झ. °स्तुविषयवि°। ४ क. °ति ॥४२॥ ते°। ५ झ. °त्यत्र पादोप°। ६ क. °ति। उ°। ७ घ. °स्त्विति सद्वयमात्म°। ८ क. ख. छ. °यात्म°। ९ ख. च. झ. °रुदय°। १० क. घ. ङ. ज. °दर्शनाज्ञानु°। ११ ख. ग. घ. ङ. छ. °श्चिदेव लें°।

उपलम्भात्समाचारान्मायाहस्ती यथोच्यते ।
उपलम्भात्समाचारादस्ति वस्तु तथोच्यते ॥ ४४ ॥

ननूपलम्भसमाचारयोः प्रमाणत्वादस्त्येव द्वैतं वारित्वति । न । उपलम्भसमाचारयोर्व्यभिचारात् । कथं व्यभिचार इत्युच्यते । उपलभ्यते हि मायाहस्ती । हस्तीव हस्तिनमिवात्र समाचरन्ति । बन्धनारोहणादिहस्तिसंबन्धिभिर्धर्मैर्हस्तीति चोच्यतेऽसन्नपि यथा तथैवोपलम्भसमाचारादद्वैतं भेदरूपमस्ति वस्त्वित्युच्यते । तस्मान्नोपलम्भसमाचारौ द्वैतवस्तुसद्भावे हेतू भवत इत्यभिप्रायः ॥ ४४ ॥

यत्तु हेतुभ्यां द्वैतस्यास्तित्वमुक्तं तद्दूषयति-उपलम्भादिति । श्लोकव्याख्यामाशङ्क्यानूद्य दूषयति— नन्वित्यादिना । व्यभिचारस्यासिद्धिमाशङ्क्य परिहरति— कथमित्यादिना । उपलम्भसमाचारौ मायामये हस्तिनि वस्तुत्वाभावेऽपि भवतः, तथा द्वैतेऽपि न तयोरस्ति वस्तुत्वसाधकत्वमित्युपसंहरति-तस्मादिति ॥ ४४ ॥

जात्याभासं चलाभासं वस्त्वाभासं तथैव च ।
अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम् ॥ ४५ ॥

किं पुनः परमार्थसद्वस्तु यदास्पदा जात्याद्यसद्बुद्धय इत्याहे । अजातिसज्जातिवदवभासत इति जात्याभासम् । तद्यथा देवदत्तो जायत इति । चलाभासं चलमिवाऽऽभासत इति । यथा स एव देवदत्तो गच्छतीति । वस्त्वाभासं वस्तु द्रव्यं धर्मि तद्वदवभासत इति वस्त्वाभासम् । यथा स एव देवदत्तो गौरो दीर्घ इति जायते देवदत्तः स्पन्दते दीर्घो गौर इत्येवमवभासते परमार्थतस्त्वजमचलमवस्तुत्वमद्रव्यं च । किं तदेवंप्रकारं विज्ञानं विज्ञप्तिः । जात्यादिरहितत्वाच्छान्तम् । अत एवाद्वयं च तदित्यर्थः ॥ ४५ ॥

भूतदर्शनावष्टम्भेन निमित्तस्यानिमित्तत्वमुक्तमेतदन्तैः श्लोकैर्विप्रश्चितम् । संप्रति भूतदर्शनमुपसंहरति—जात्याभासामिति । श्लोकाक्षराण्याकाङ्क्षाद्वारा विवृणोति— किं पुनरित्यादिना । गौरत्वदीर्घत्वोक्त्या देवदत्तस्य गुणवत्त्वेन द्रव्यत्वं स्फुटी

---

१ च. झ. 'द्वैतव' । २ च. 'दद्वैतरू' । झ. द्वैतभे' । ३ झ. 'काम' । ४ च. इत्यत आहि । ५ क. ञ. 'द्व जा' । ६ क. 'लनसि' । ७ ख. दीर्घगौ' । ८ ज. 'कारवि' । ९ ग. झ. 'त्वमे' ।

क्रियते। पूर्वार्धार्थानुवादेनापरार्धं योजयति—जायत इत्यादिना। विशेष्यं प्रश्नपूर्वकं विशदयति—किं तदित्यादिना ॥ ४५ ॥

एवं न जायते चित्तमेवं धर्मा अजाः स्मृताः।
एवमेवं विजानन्तो न पतन्ति विपर्यये ॥ ४६ ॥

एवं यथोक्तेभ्यो हेतुभ्यो न जायते चित्तमेवं धर्मा आत्मानोऽजाः स्मृता ब्रह्मविद्भिः। धर्मा इति बहुवचनं देहभेदानुविधायित्वाददृयस्यैवोपचारतः। एवमेव यथोक्तं विज्ञानं जात्यादिरहितमद्वयमात्मतत्त्वं विजानन्तस्त्यक्तषाड्वैषणाः पुनर्न पतन्त्यविद्याध्वान्तसागरे विपर्यये। "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्यादिमन्त्रवर्णात् ॥ ४६ ॥

ब्रह्मणश्चिद्रूपस्याजत्वमुपपादितमुपसंहरति-एवं नेति। चित्प्रतिबिम्बानां जीवानां बिम्बभूतब्रह्ममात्रत्वादजत्वमेवेति विशिष्टमित्याह—एवमिति। उक्तब्रह्मात्मैक्यज्ञानस्य फलमाह—एवमिति। श्लोकाक्षराणि व्याकरोति—एवमित्यादिना। कार्यकारणभावस्य दुर्घटत्वादयो यथोक्ता हेतवः। चित्तं चैतन्यं ब्रह्मेति यावत्। एवमिति। प्रतिबिम्बानां बिम्बमात्रत्वं जीवानामपि प्रतिबिम्बकल्पानां बिम्बभूतब्रह्ममात्रत्वादित्यर्थः। अद्वयस्य बहुवचनमात्मत्वमयुक्तमित्याशङ्क्याऽऽह—धर्मा इतीति। उत्तरार्धं योजयति-एवमेवेति। विज्ञानं विज्ञप्तिरूपं ब्रह्मेत्यर्थः। यथोक्तज्ञाने मुख्यानधिकारिणो व्यपदिशति-त्यक्तेति। उक्तज्ञानवतां संसारसंत्रासाभावे प्रमाणमाह—तत्रेति ॥ ४६ ॥

ऋजुवक्रादिकाभासमलातस्पन्दितं यथा।
ग्रहणग्राहकाभासं विज्ञानस्पन्दितं तथा ॥ ४७ ॥

यथोक्तं परमार्थदर्शनं प्रपञ्चयिष्यन्नाह—यथा हि लोक ऋजुवक्रादिप्रकाराभासमलातस्पन्दितमुल्काचलनं तथा ग्रहणग्राहकाभासं विषयिविषयाभासमित्यर्थः। किं तद्विज्ञानस्पन्दितम्। स्पन्दितमिव स्पन्दितमविद्यया। न

---

१ ग. झ. °र्धानु°। २ ग. झ. °देन प°। ३ च. °व च विज्ञातौ न। ४ क. देहे भे°। ५ च. °चारात्। ए°। ६ घ. पुनः पुनर्नि°। ७ ख. ङ. ज. एवमिति। ८ छ. झ. चित्तप्रति°। ९ झ. °नां बि°। १० घ. °मवशि°। ११ छ. °मैकत्वज्ञा°। १२ ग. छ. झ °लक्षत्वमा°। १३ घ. °योग्या य°। १४ छ. °थोक्तहे°। १५ ख. घ. ङ. ज. °ह्यत्वा°। १६ घ. ङ. ज. °नं ह्य°। १७ ग. छ. झ. ब्रह्मैवेत्य°। १८ ख. छ. °ख्याधि°। १९ च. ज. झ. °ज्ञानं स्प°। २० क. °षया°। २१ छ. °विद्याया न।

ह्यचलस्य विज्ञानस्य स्पन्दनमस्ति । अजाचलमिति ह्युक्तम् ॥ ४७ ॥

विज्ञानमजमचलमेव जात्याभासं चलाभासं चेत्युक्तं तदिदानीं दृष्टान्तेन प्रपञ्चयति—ऋजुवक्रादिकेति । अप्रच्युतपूर्वस्वरूपस्यासत्यनानाकारावभासो विवर्तस्तदत्र विज्ञानस्य स्पन्दितत्वम् । श्लोकस्य तात्पर्यमाह—यथोक्तमिति । तत्र दृष्टान्तभागं व्याचष्टे—यथा हीति । दार्ष्टान्तिकं योजयति—तथेति । किमित्यविद्यामन्तरेण मुख्यमेव स्पन्दनं विज्ञानस्य नेष्यते तत्राऽऽह—न हीति । निरवयवस्य विभुनो विज्ञानस्य वस्तुतश्चलनविकल्पस्यावि[3]द्यमानमेव स्पन्दनमित्यत्र वाक्योपक्रमानुकूल्यं कथयति—अजेति ॥ ४७ ॥

अस्पन्दमानमलातमनाभासमजं यथा ।
अस्पन्दमानं विज्ञानमनाभासमजं तथा ॥ ४८ ॥

अस्पन्दमानं स्पन्दनवर्जितं तदेवालातमृज्वाद्याकारेणाजायमानमनाभासमजं यथा तथाऽविद्यया स्पन्दमानमविद्योपरमेऽस्पन्दमानं जात्याद्याकारेणानाभासमजमचलं भविष्यतीत्यर्थः ॥ ४८ ॥

विज्ञानं शान्तमित्युक्तं दृष्टान्ते स्पष्टयति—अस्पन्दमानमिति । श्लोकाक्षराणि व्याकरोति—अस्पन्दमानमित्यादिना । तथाविद्ययेत्यत्राविद्ययेति च्छेदः ॥४८॥

अलाते स्पन्दमाने वै नाऽऽभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पन्दान्नालातं प्रविशन्ति ते ॥ ४९ ॥

किंच तस्मिन्नेवालाते स्पन्दमान ऋजुवक्राद्याभासा अलातादन्यतः कुतश्चिदागत्यालातेनैव भवन्तीति नान्यतोभुवः । न च तस्मान्निस्पन्दादलातादन्यत्र निर्गताः । न च निस्पन्दमलातमेव प्रविशन्ति ते ॥ ४९ ॥

अलातदृष्टान्ते कथमृजुवक्रादीनामसत्त्वमित्याशङ्क्याह निरूपणासहत्वादित्याह—अलात इति । यदा खल्वलातं स्पन्दमानमवतिष्ठते तदा तस्मिन्नन्यतो देशान्तरादागत्याऽऽभासा भवन्तीति न शक्यं वक्तुमृजुवक्राद्याभासानां देशान्तरादागमनस्यानव-

---

१ क. घ. ङ. °सं चे° । २ ख. ज. °नस्य° । ३ क. °कल्पस्या° । ४ ख. घ. छ. °विद्यया विद्यमा° । ५ घ. वाक्यक° । ६ ज. अजस्येति । ७ ङ. च. ज. °नमाला° । ८ च. °रेण जा° । ९ झ. °विद्यास्प° । १० ङ. ज. झ. °त्याका° । ११ च. °रेण ना° । १२ ख. घ. ङ ज. °साक्षान्य° । १३ घ. °स्पन्दना° । १४ झ. °सत्त्वादि° । १५ ख. °रागम° ।

गमात्। यदा तदेवालातं निस्पन्दनं स्पन्दनवर्जितं वर्तते तदा ततोऽन्यत्राऽऽभासा भवन्तीत्यपि न युक्तं वक्तुमनुपलम्भाविशेषात्। न चाऽऽभासास्तस्मिन्नेवालाते लीयन्ते तदनुपादानत्वात्। यदि हि स्पन्दननिमित्तमलातमुपादानं तदा निमित्ताभावमात्रान्नैमित्तिकाभावादर्शनादृजुवक्राद्याकाराः स्पन्दनाभावेऽप्यलाते भवेयुरित्यर्थः। इतश्च दृष्टान्ते दृष्टानामाभासानां मिथ्यात्वमेष्टव्यमित्याह—किंचेति। हेत्वन्तरमेव स्पष्टयन्पूर्वार्धाक्षराणि व्याचष्टे—तस्मिन्नेवेति। आभासानां देशान्तरादागमनस्यानुपलम्भो हेतुः कर्तव्यः। अनुपलब्धिमेव हेतूकृत्य तृतीयपादार्थमाह—न चेति। चतुर्थपादार्थमाह—न च निस्पन्दमिति॥ ४९॥

न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः॥ ५०॥

किंच न निर्गता अलातात्त आभासा गृहादिवद्द्रव्यत्वाभावयोगतः। द्रव्यस्य भावो द्रव्यत्वम्। तदभावो द्रव्यत्वाभावः। द्रव्यत्वाभावयोगतो द्रव्यत्वाभावयुक्तैर्वस्तुत्वाभावादित्यर्थः। वस्तुनो हि प्रवेशादि संभवति नावस्तुनः। विज्ञानेऽपि जात्याद्याभासास्तथैव स्युराभासस्याविशेषतस्तुल्यत्वात्॥ ५०॥

ऋजुवक्राद्याभासानां दृष्टान्ते निर्गमनप्रवेशौचित्यं साधयति—नेत्यादिना दृष्टान्तनिविष्टाभासवद्दार्ष्टान्तिकेऽपि जन्माद्याभासा मिथ्यैव भवेयुरित्याह—विज्ञानेऽपीति। ऋजुवक्राद्याकारेषु जन्माद्याकारेषु चाऽऽभासत्वस्य तुल्यत्वादिति हेतुमाह—आभासस्येति। इतश्च दृष्टान्ते मिथ्यात्वमाभासानामेष्टव्यमित्याह—किंचेति। तदेव पूर्वार्धयोजनयैव विशदयति—नेति। ऋजुवक्राद्याभासानां वस्तुतोऽभावेऽपि किमिति प्रवेशाद्यसिद्धिरित्याशङ्क्याऽऽह—वस्तुनो हीति। द्वितीयार्धं योजयन्दार्ष्टान्तिकमाचष्टे—विज्ञानेऽपीति॥ ५०॥

कथं तुल्यत्वमित्याह—

विज्ञाने स्पन्दमाने वै नाऽऽभासा अन्यतोभुवः।
न ततोऽन्यत्र निस्पन्दान्न विज्ञानं विशन्ति ते॥ ५१॥

---

१ ख. युक्तम°। २ घ. छ. °न्दनं नि°। ३ क. °भासमा°। ४ झ. °भावद°। ५ क. °ष्टान्ताना°। ६ ज. °च नि°। ७ क. ज. °दिव द्रव्य°। ८ छ. °क्ते वस्तु°। ९ घ. °त्याभा°। १० ग झ. °शनयो°। ११ ज. °निमित्ताभा°। १२ ख. °पि। जात्याभा°। १३ झ °स्वतु°। १४ घ °स्वभा° १५ छ. °या दर्शय°। १६ क. °र्धं दार्ष्टा°।

न निर्गतास्ते विज्ञानाद्द्रव्यत्वाभावयोगतः ।
कार्यकारणताभावायतोऽचिन्त्याः सदैव ते ॥ ५२ ॥

अलातेन समानं सर्वं विज्ञानस्य । सदाऽचलत्वं तु विज्ञानस्य विशेषः । जात्याद्याभासा विज्ञानेऽचले किंकृता इत्याह । कार्यकारणताभावाज्जन्य-जनकत्वानुपपत्तेरभावरूपत्वादचिन्त्यास्ते यतः सदैव । यथाऽसत्स्वृज्वाद्याभासेषु ऋज्वादिबुद्धिर्दृष्टाऽलातमात्रे तथाऽसत्स्वेव जात्यादिषु विज्ञानमात्रे जात्यादिबुद्धिर्मृषैवेति समुदायार्थः ॥ ५१ ॥ ५२ ॥

तुल्यत्वं सार्धेनोत्तरश्लोकेन साधयति—कथमित्यादिना । न हि तस्मिन्विज्ञाने यथा कथंचिच्चलनवति ततोऽन्यस्मात्कस्माच्चिदागत्य जन्माद्याभासास्तत्र भवितुमर्हन्ति तथार्थाभावान्न च तस्माद्विज्ञानादचलतयाऽवस्थितादन्यत्राऽऽभासा भवितुमुत्सहन्ते प्रतीत्यभावस्य तुल्यत्वान्नापि तदेव विज्ञानं प्रविशन्ति । तस्य केवलस्य तदुपादानत्वानुपगमात् । न च ते विज्ञाने प्रवेष्टुं समर्थास्ततो निर्गन्तुं वा पारयन्ति । तेषामवस्तुत्वादित्यर्थः । कथं तर्हि विज्ञाने प्रथां(था)तेषामित्याशङ्क्य मृषैवेत्याह—कार्येति । आभासानां विज्ञानस्य च कार्यकारणतायाः दुर्वचनत्वादामासाः सर्वदैव निरूपयितुमशक्यत्वान्मायामयाः सन्तो मिथ्यैव भवन्तीत्यर्थः । सार्धश्लोकतात्पर्यमाह—अलातेनेति । तर्हि सक्रियत्वमपि विज्ञानस्य प्रसज्येतेत्याशङ्क्याऽऽह—सदेति । यदि विज्ञानमचलमभीष्टं तर्हि तत्र जात्याद्याभासा हेत्वभावान्न स्युरित्याशङ्क्यान्तिमार्धेन परिहरति—जात्याद्याभासा इत्यादिना । यतः सदैवाचिन्त्या अतो मृषैवेति शेषः । संक्षेपतस्तात्पर्यमाह—यथेत्यादिना ॥ ५१ ॥ ५२ ॥

द्रव्यं द्रव्यस्य हेतुः स्यादन्यदन्यस्य चैव हि ।
द्रव्यत्वमन्यभावो वा धर्माणां नोपपद्यते ॥ ५३ ॥

अजमेकमात्मतत्त्वमिति स्थितं तत्र यैरपि कार्यकारणभावः कल्प्यते तेषां द्रव्यं द्रव्यस्यान्यैस्यान्यद्धेतुः कारणं स्यान्न तु तस्यैव तत् । नाप्यद्रव्यं कस्य-

---

१ क. ज्ञ. °ता वि° । २ क. ज्ञ. °नात्ते द्रव्य° । ३ ख. घ. ज. °सदृज्वा° । ४ ज. मात्रा त° । ५ घ. °थाऽसत्सत्त्वे° । ६ ज. 'दिबु° । ७ ज्ञ. °लनं संभव° । छ. °लनं भ. । ८ ग. ज्ञ. °स्माच्चि° । ९ ग. 'प्रथनाभा° । १० क. तदैव ११ छ. न ते । १२ छ. °णतया । १३ ज्ञ. °त्वा° । १४ ख. °जेत नेत्या° । १५ घ. ङ. ज 'त्याह । १६ ग ज्ञ. °त्याभा° । १७ च. भावाः कल्प्यन्ते तेषां मतमाह । द्र° । १८ च. °न्यस्य हेतुः ।

चित्कारणं स्वतन्त्रं दृष्टं लोके। न च द्रव्यत्वं धर्माणामात्मनामुपपद्यतेऽन्यत्वं वा कुतश्चिद्येनान्यस्य कारणत्वं कार्यत्वं वा प्रतिपद्येत। अतोऽद्रव्यत्वादनन्यत्वाच्च न कस्यचित्कार्यं कारणं वाऽऽत्मेत्यर्थः ॥ ५३ ॥

यदुक्तं कार्यकारणताभावादिति तदिदानीमुपपादयितुमुपक्रमते—द्रव्यमिति। अवयवद्रव्यमवयविद्रव्यस्योपादानम्। अवयवगुणाश्चावयविगुणेषु समानजातीयेष्वसमवायिनो दृष्टाः। न चैवमात्मनो द्रव्यत्वं येन समवायित्वम्। न च तद्रूपाणां क्वचिदसमवायित्वं गुणगुणिभावस्यान्यत्वस्य तस्मिन्दुर्वचनत्वादित्यर्थः। श्लोकाक्षराणि योजयति—अजमित्यादिना। अवयवावयविविभागविरहित्वमजत्वम्। एकत्वं गुणगुणिभावशून्यत्वम्। तत्रेत्यात्मतत्त्वं परामृशते। तत्र कार्यकारणभावं दूषयितुं सामान्यन्यायमाह—तेषामिति। अद्रव्यस्यापि रूपादेस्तन्त्वादिद्वारा पटशुक्लत्वादौ कारणत्वं दृष्टमित्यतो विशिनष्टि—स्वतन्त्रमिति। अस्तु तर्हि द्रव्यत्वेनान्यत्वेन चाऽऽत्मनि कार्यकारणत्वं नेत्याह—न चेति। न हि तत्र गुणवत्त्वेन द्रव्यत्वं निर्गुणत्वान्नापि समवायित्वेन तथात्वमन्योन्याश्रयत्वप्रसङ्गात्। न च तत्र कुतश्चिदन्यत्वं सर्वस्य सन्मात्रत्वेनैकरूपत्वप्रतिभानात्। अतो न तत्र कारणत्वं कार्यत्वं वा प्रतिपत्तुं शक्यमिति फलितमाह—अत इति ॥ ५३ ॥

एवं न चित्तजा धर्माश्चित्तं वाऽपि न धर्मजम्।
एवं हेतुफलाजातिं प्रविशन्ति मनीषिणः ॥ ५४ ॥

एवं यथोक्तेभ्यो हेतुभ्य आत्मविज्ञानस्वरूपमेव चित्तमिति न चित्तजा बाह्यधर्मा नापि बाह्यधर्मजं चित्तम्। विज्ञानस्वरूपाभासमात्रत्वात्सर्वधर्माणाम्। एवं न हेतोः फलं जायते नापि फलाद्धेतुरिति हेतुफलयोरजातिं हेतुफलाजातिं प्रविशन्त्यध्यवस्यन्ति। आत्मनि हेतुफलयोरभावमेव प्रतिपद्यन्ते ब्रह्मविद इत्यर्थः ॥ ५४ ॥

चिकीर्षितकुम्भसंवेदसमनन्तरं कुम्भः संभवति। संभूतश्चासौ कर्मतया स्वसंविदं जनयतीति व्यवहारोऽपि नोपपद्यते। कस्यचिदपि विद्वद्दृष्टचनुरोधेनानन्यत्वादित्याह—एवमिति। यश्च धर्मादेः शरीरादेश्च कार्यकारणभावो विद्वद्दृष्ट्या पुरस्तान्निरस्तः सोऽप्यनन्यत्वाभावेन सिध्यतीत्याह—एवं हेत्विति। तत्र पूर्वार्धं योजयति—एवमित्यादिना।

---

१ क. ङ. °न्यका°। २ च. छ. त्वं प्र°। ३ च. °पद्यन्ते ततोऽ°। ४ च. छ. °णं चाऽऽमे°। ५ ग. झ. °पवङ्क्रम°। ६ ज. °दपि स°। ७ घ. ङ. ज. गुणिगुणभा°। ८ घ. °गरहितत्व°। ९ ख. ग. छ. झ. °हितत्व°। १० झ. °त्वे वाऽऽत्म°।

आत्मस्वरूपस्य निर्विकारत्वमद्रव्यत्वमप्रसिद्धत्वमित्यादयो यथोक्ता हेतवः । बाह्या घर्मा घटादयो नाऽऽत्मनः । न च धर्मशब्दितानां जीवानां चित्तशब्दितात्परस्मादात्मनो जन्मेति युक्तम् । तेषां प्रतिबिम्बकल्पानां बिम्बभूतब्रह्ममात्रत्वादित्यभिप्रेत्याऽऽह—विज्ञानेति । उत्तरार्धं योजयति—एवं नेति ॥ ९४ ॥

यावद्धेतुफलावेशस्तावद्धेतुफलोद्भवः ।
क्षीणे हेतुफलावेशे नास्ति हेतुफलोद्भवः ॥५५॥

ये पुनर्हेतुफलयोरभिनिविष्टास्तेषां किं स्यादित्युच्यते—धर्माधर्माख्यस्य हेतोरहं कर्ता मम धर्माधर्मौ तत्फलं कालान्तरे क्वचित्प्राणिनिकाये जातो भोक्ष्य इति यावद्धेतुफलयोरावेशो हेतुफलाग्रह आत्मन्यध्यारोपणं तच्चित्तेत्यर्थः । तावद्धेतुफलयोरुद्भवो धर्माधर्मयोस्तत्फलस्य चानुच्छेदेन प्रवृत्तिरित्यर्थः । यदा पुनर्मन्त्रौषधिवीर्येणेव ग्रहावेशो यथोक्ताद्वैतदर्शनेनाविद्योद्भूतहेतुफलावेशोऽपनीतो भवति तदा तस्मिन्क्षीणे नास्ति हेतुफलोद्भवः॥५५॥

न फलाद्धेतुर्जायते नापि फलं हेतोरिति तत्त्वदृष्ट्योपदिष्टम् । इदानीं मुमुक्षूणां तदभिनिवेशव्यावृत्त्यर्थं तदभिनिवेशभावाभावयोस्तदुद्भवानुद्भवौ दर्शयति—यावदिति । श्लोकाक्षराण्याकाङ्क्षाप्रदर्शनपुरःसरं विवृणोति—ये पुनरित्यादिना ॥ ९९ ॥

यावद्धेतुफलावेशः संसारस्तावदायतः ।
क्षीणे हेतुफलावेशे संसारं न प्रपद्यते ॥ ५६ ॥

यदि हेतुफलोद्भवस्तदा को दोष इत्युच्यते—यावत्सम्यग्दर्शनेन हेतुफलावेशो न निवर्ततेऽक्षीणः संसारस्तावदायतो दीर्घो भवतीत्यर्थः । क्षीणे पुनर्हेतुफलावेशे संसारं न प्रपद्यते कारणाभावात् ॥ ५६ ॥

अभिनिवेशवैशाद्धेतुफलोद्भवे किं भवति तदाह—यावादीति । अभिनिवेशनिवृत्त्या तदनुद्भवे वा किं स्यादित्याशङ्क्याऽऽह—क्षीण इति । आकाङ्क्षापूर्वकं पूर्वार्धं योजयति—यदीति । उत्तरार्धं व्याचष्टे—क्षीणे पुनरिति ॥ ९६ ॥

संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै ।
सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ॥ ५७ ॥

---

१ च. °दे प्र° । २ च. °नेन वि° । ३ च. इति तत्राऽऽह या° । ४ ख. °वेशाद्धे° । ५ क. °वशद्धे° । ६ घ. च. °तं तेन नास्ति वै ।

नन्वजादात्मनोऽन्यन्नास्त्येव तत्कथं हेतुफलयोः संसारस्य चोत्पत्तिविनाशावुच्येते त्वया । शृणु । संवृत्या संवरणं संवृतिरविद्याविषयो लौकिको व्यवहारस्तया संवृत्या जायते सर्वं तेनाविद्याविषये शाश्वतं नित्यं नास्ति वै। अत उत्पत्तिविनाशलक्षणः संसार आयत इत्युच्यते । परमार्थसद्भावेन त्वजं सर्वमात्मैव यस्मात् । अतो जात्यभावादुच्छेदस्तेन नास्ति वै कस्यचिद्धेतुफलादेरित्यर्थः ॥ ५७ ॥

कूटस्थमद्वितीयमात्मतत्त्वमिच्छता कुतो जन्मनाशौ व्यवहियेते तत्राऽऽह-संवृत्येति। अविद्यया सर्वस्य जायमानत्वे सत्यविद्याविषये नित्यं नाम नास्त्येवेत्याह—शाश्वतमिति । परमार्थतस्तु सर्वमजं कूटस्थमास्थीयते तेन कल्पनां विना विनाशो नास्त्येव हेतुफलादेरित्याह-सद्भावेनेति । पूर्वापरविरोधमाशङ्कते-नन्विति । न तावदात्मनो जन्मविनाशौ तस्य कूटस्थत्वान्नापि ततोऽन्यस्य तौ युक्तौ तस्याद्वितीयत्वात् । तथा च हेत्वादेर्बन्धस्य जन्मनाशौ च त्वया वक्तव्यावित्यर्थः । उच्यमाने समाधाने मनःसमाधानमर्थयते-शृण्विति । तत्र पूर्वभागाक्षरार्थं कथयति-संवृत्येत्यादिना । अविद्याविषये नित्यस्य वस्तुनोऽभावे फलितमाह-अत इति । द्वितीयार्धाक्षरार्थमाह-परमार्थेति । जात्यभावो जन्मादिविक्रियाभावस्तमेवोच्छेदाभावे हेतुं कथयति—तेनेति । यथा पुरोवर्तिनि भुजगाभावमनुभवन्विवेकी नास्ति भुजंगो रज्जुरेषा कथं वृथैव बिभेमीति भ्रान्तमभिदधाति । भ्रान्तस्तु स्वकीयादपराधादेव भुजंगं परिकल्प्य भीतः सन्पलायते । न च तत्र विवेकिनो वचनं मूढदृष्ट्या विरुध्यते । तथा परमार्थकूटस्थात्मदर्शनं व्यावहारिकजन्मादिवचनेनाविरुद्धमिति भावः ॥ ५७ ॥

धर्मा य इति जायन्ते जायन्ते ते न तत्त्वतः ।
जन्म मायोपमं तेषां सा च माया न विद्यते ॥ ५८ ॥

येऽप्यात्मानोऽन्ये च धर्मा जायन्त इति कल्प्यन्ते त इत्येवंप्रकारा यथोक्ता संवृतिर्निर्दिश्यत इति । संवृत्यैव धर्मा जायन्ते न ते तत्त्वतः परमार्थतो जायन्ते । यत्पुनस्तत्संवृत्या जन्म तेषां धर्माणां यथोक्तानां

---

१ घ. ङ. ञ. °नो ह्येतन्ना° । २ घ. °योः संभवः सं° । ३ च. त्वयेति चेच्छृणु । तत्र कारणमित्याह । सं° । ४ घ. °त्तिल° । झ. °त्तिना° । ५ ज. झ. °सारो जाय° । ६ ख. ङ. ज. जात्यभा° । ७ छ. °स्थमा° । ८ घ. °च्छतां कु° । ९ घ. °षयं नि° । १० ग. °र्थस्तु । ११ झ. °ते । क° । १२ घ. °नाशो । १३ ग. छ. झ. °न्मना° । १४ ज. °था हे° । १५ छ. पूर्वार्धाक्षं° । १६ ग. घ. ङ. ज झ. जात्याद्यभा° । १७ घ. छ. ज. भुजंगा° । १८ ग. छ. झ. °यति न । १९ क. यथा° । २० घ. ङ. ज. झ. °प्यात्मनोऽ° । २१ च. °कारा यथोक्ताः संवृत्या निर्दिश्यन्त इ° । २२ च. तु । २३ च. °न्म येषां ते° ।

यथा मायया जन्म तथा तन्मायोपमं प्रत्येतव्यम् । माया नाम वस्तु तर्हि । नैवम् । सा च माया न विद्यते मायेत्यविद्यमानस्याऽऽख्येत्यभिप्रायः ॥५८॥

संवृत्या जायते सर्वमित्युक्तं तदिदानीं प्रपञ्चयति—धर्मा इति । तत्राऽऽद्यं पादं विभजते—येऽपीति । प्रसिद्धावद्योतकत्वमितिशब्दस्य दर्शयति—त इत्येवंप्रकारा इति । एवंप्रकारत्वमेव स्फोरयति—यथोक्तेति । अनन्तरप्रकृता संवृतिरितिशब्देनोक्ता । तथा च संवृत्यैव ते धर्मा जायन्ते न तु तेषां तत्त्वतो जन्मास्तीत्यर्थः । न ते तत्त्वत इत्युक्तं प्रपञ्चयति—परमार्थत इति । संवृत्याऽपि जन्म पारमार्थिकमपेक्षेत्याशङ्क्य तृतीयपादं योजयति—यत्पुनरिति । प्रत्येतव्यं जन्मेति शेषः । चतुर्थपादार्थमाकाङ्क्षाद्वारा स्फोरयति—मायेत्यादिना ॥ ५८ ॥

यथा मायामयाद्बीजाज्जायते तन्मयोऽङ्कुरः ।
नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना ॥ ५९ ॥

कथं मायोपमं तेषां धर्माणां जन्मेत्याह । यथा मायामयादाम्रादिबीजाज्जायते तन्मयो मायामयोऽङ्कुरो नासावङ्कुरो नित्यो न चोच्छेदी विनाशी वाऽभूतत्वात्तद्वदेव धर्मेषु जन्मनाशादियोजना युक्तिः । न तु परमार्थतो धर्माणां जन्म नाशो वा युज्यत इत्यर्थः ॥ ५९ ॥

जन्म मायोपमं तेषामित्युक्तं तदेव दृष्टान्तावष्टम्भेन साधयति—यथेत्यादिना । श्लोकाक्षराण्याकाङ्क्षां दर्शयन्योजयति—कथमित्यादिना ॥ ५९ ॥

नाजेषु सर्वधर्मेषु शाश्वताशाश्वताभिधा ।
यत्र वर्णा न वर्तन्ते विवेकस्तत्र नोच्यते ॥ ६० ॥

परमार्थतस्त्वात्मस्वजेषु नित्यैकरसविज्ञप्तिमात्रसत्ताकेषु शाश्वतोऽशाश्वत इति वा नाभिधा नाभिधानं प्रवर्तत इत्यर्थः । यत्र येषु वर्ण्यन्ते यैरर्थास्ते वर्णाः शब्दा न प्रवर्तन्तेऽभिधातुं प्रकाशयितुं न प्रवर्तन्त इत्यर्थः । इदमेवमिति विवेको विविक्तता तत्र नित्योऽनित्य इति नोच्यते । " यतो वाचो निवर्तन्ते " इति श्रुतेः ॥ ६० ॥

---

१ च. माया । २ ख. ग. घ. ज. झ. 'ति इत्ये' । ३ ग. 'मेवं स्फो' । ४ ग. तु । ५ ज. स्फोटयति । ६ क. ख. ग. घ. च. छ. 'त्वादे' । ७ ख. ग. छ. ज. 'देवं ध' । ८ क. तदपि । ९ ख. घ. ज. 'धानं' । झ. 'धामि' । १० घ. ज. 'यितुमि' । ११ क. विवेक्तता ।

यदुक्तं सद्भावेन ह्यजं सर्वमिति तत्प्रपञ्चयति—नाजोऽस्तीति । आत्मनि नित्यानित्यकथा नावतरतीत्यत्र हेतुमाह—यत्रेति । श्लोकस्य पूर्वार्धं व्याचष्टे—परमार्थतस्त्वति । द्वितीयार्धं व्याकरोति—यत्रेत्यादिना । तत्रेति प्रकृतेषु धर्मेष्वित्यर्थः । आत्मसु नित्या नित्यकथाभावे शब्दागोचरत्वं हेतुस्तत्र प्रमाणमाह—यत इति ॥ ६० ॥

यथा स्वप्ने द्वयाभासं चित्तं चलति मायया ।
तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ॥ ६१ ॥
अद्वयं च द्वयाभासं चित्तं स्वप्ने न संशयः ।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ॥ ६२ ॥

यत्पुनर्वाग्गोचरत्वं परमार्थतोऽद्वयस्य विज्ञानमात्रस्यैव तन्मनसः स्पन्दमात्रं न परमार्थत इति । उक्तार्थौ श्लोकौ ॥ ६१ ॥ ६२ ॥

आत्मनः शब्दागोचरत्वे कथमसौ व्याख्यातृभिः शब्दैरेव प्रतिपाद्यतामाचरतीत्याशङ्क्य चित्तस्पन्दनमात्रमविचारसुन्दरं प्रतिपाद्यप्रतिपादकरूपं द्वैतमिति दृष्टान्तमाह—यथेति । स्वप्ने प्रतिपाद्यप्रतिपादकद्वैतस्य चित्तस्पन्दितमात्रत्वेऽपि जागरिते कथं तथा स्यादित्याशङ्क्यांऽऽह—अद्वयं चेति । पौनरुक्त्यं श्लोकयोरार्शङ्क्य शङ्कान्तरनिरासार्थत्वान्नैवमिति मन्वानः सन्नाह—यत्पुनरिति ॥ ६१ ॥ ६२ ॥

स्वप्नदृक्प्रचरन्स्वप्ने दिक्षु वै दशसु स्थितान् ।
अण्डजान्स्वेदजान्वाऽपि जीवान्पश्यति यान्सदा ॥ ६३ ॥

इतश्च वाग्गोचरस्याभावो द्वैतस्य । स्वप्नान्पश्यतीति स्वप्नदृक्प्रचरन्पर्यटन्स्वप्ने स्वप्नस्थाने दिक्षु वै दशसु स्थितान्वर्तमानाञ्जीवान्प्राणिनोऽण्डजान्स्वेदजान्वा यान्सदा पश्यतीति । यद्येवं ततः किम् । उच्यते ॥ ६३ ॥

वाचो गोचरीभूतस्य द्वैतस्यासत्त्वे हेत्वन्तरमाचक्षाणो दृष्टान्तमाचष्टे—स्वप्नदृगिति । यान्पश्यति ते न विद्यन्ते पृथगित्युत्तरत्र संबन्धः । श्लोकस्य तात्पर्यमाह—इतश्चेति । इतःशब्दार्थमेव स्फुटयन्नक्षराणि व्याचष्टे—स्वप्नानिति । न ते विद्यन्त इति पूर्ववदन्वयः । स्वप्नदृशो विषयभूतानां भेदानां तत्र दृश्यमानत्वेऽपि द्वैतभेदमिथ्यात्वे किमा-

---

१ छ. °त्मसु नि° । २ क. शब्दगो° । ३ छ. °र्वाचागोच° । ४ च. °स्य तं न स्प° । ५ च. इत्याह ॥ ६१ ॥ ६ झ. °द्यशब्दता° । ७ छ. °स्पन्दितमा° । ८ ग. झ. °शङ्का° । ९ च, °दृक्काऽऽच° । १० ग. °रत्वाभा° । ११ ग. च. वाचा ।

यातमिति पृच्छति—यदीति । उत्तरश्लोकेनोत्तरमाह-उच्यत इति ॥ ६३ ॥

स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं स्वप्नदृक्चित्तमिष्यते ॥ ६४ ॥

स्वप्नदृशश्चित्तं स्वप्नदृक्चित्तम् । तेन दृश्यास्ते जीवास्ततस्तस्मात्स्वप्नदृक्चित्तात्पृथङ्न विद्यन्ते न सन्तीत्यर्थः । चित्तमेवं ह्यनेकजीवादिभेदाकारेण विकल्प्यते । तथा तदपि स्वप्नदृक्चित्तमिदं तद्दृश्यमेव, तेन स्वप्नदृशा दृश्यं तद्दृश्यम् । अतः स्वप्नदृग्व्यतिरेकेण चित्तं नाम नास्तीत्यर्थः ॥ ६४ ॥

श्लोकाक्षराणि योजयन्कर्मधारयं व्यावर्तयति—स्वप्नेति । जीवादिभेदानां स्वप्ने दृश्यमानानामुक्तानां चित्तात्पृथगसत्त्वं साधयति—चित्तमेवेति । तर्हि द्रष्टा चित्तं चेति द्वयं स्वप्ने स्वीकृतम्, नेत्याह—तथेति । तच्छब्दस्य चित्तविषयत्वं व्यावर्तयति—तेनेति । स्वप्नावस्थस्य चित्तस्य स्वप्नदृग्विषयत्वे फलितमाह—अत इति ॥ ६४ ॥

चरञ्जागरिते जाग्रद्दिक्षु वै दशसु स्थितान् ।
अण्डजान्स्वेदजान्वाऽपि जीवान्पश्यति यान्सदा ॥ ६५ ॥
जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते ॥ ६६ ॥

जाग्रतो दृश्या जीवास्तच्चित्ताद्व्यतिरिक्ताश्चित्तेक्षणीयत्वात्स्वप्नदृक्चित्तेक्षणीयजीववत् । तच्च जीवेक्षणात्मकं चित्तं द्रष्टुरव्यतिरिक्तं द्रष्टृदृश्यत्वात्स्वप्नचित्तवत् । उक्तार्थमन्यत् ॥ ६५ ॥ ६६ ॥

दृष्टान्तनिविष्टमर्थं दार्ष्टान्तिके योजयति-चरन्नित्यादिना । जाग्रदवस्थो हि पुरुषो यान्जीवान्पश्यतीत्यत्र जीवशब्देन कार्यकारणसंघाता गृह्यन्ते । चेतनानां दृश्यत्वाभावादिति द्रष्टव्यम् । श्लोकद्वये विवक्षितमनुमानद्वयमारचयति—जाग्रत इति । अक्षरव्याख्यानं तु दृष्टान्तव्याख्यानेनैव स्पष्टत्वान्न पृथगपेक्षितमिति विवक्षित्वाऽऽह—उक्तार्थमिति ॥ ६५ ॥ ६६ ॥

---

१ च. झ. दृश्याः स्वप्नदृक्चित्तदृश्या । २ क. °व तर्हि न जी° । ३ झ. °कल्पते । ४ ख. °तामिति । ५ घ. ज. °न्ने प्रकृ° । ६ च. चित्ते । ७ क. °त्तं तद्द्रष्टुर्व्यति° । ८ ख. °मित्याह ॥ ६५ ॥

उभे ह्यन्योन्यदृश्ये[1] ते किं तदस्तीति[2] नोच्यते।
लक्षणाशून्यमुभयं तन्मतेनैव गृह्यते ॥ ६७ ॥

जीवचित्ते उभे चित्तचैत्ये ते अन्योन्यदृश्ये इतरेतरगम्ये। जीवादिविषयापेक्षं हि चित्तं नाम भवति। चित्तापेक्षं हि जीवादि दृश्यम्। अतस्ते अन्योन्यदृश्ये। तस्मान्न किंचिदस्तीति चोच्यते चित्तं वा चित्तेक्षणीयं वा किं तदस्तीति विवेकिनोच्यते। न हि स्वप्ने हस्ती हस्तिचित्तं वा विद्यते तथेहापि विवेकिनामित्यभिप्रायः। कथम्। लक्षणाशून्यं लक्ष्यतेऽनयेति लक्षणा प्रमाणं प्रमाणशून्यमुभयं चित्तं चैत्यं द्वयं यतस्तन्मतेनैव तच्चित्ततयैव तद्गृह्यते। न हि घटमतिं प्रत्याख्याय घटो गृह्यते नापि घटं प्रत्याख्याय घटमतिः। न हि तत्र प्रमाणप्रमेयभेदः शक्यते कल्पयितुमित्यभिप्रायः ॥ ६७ ॥

दृश्यदर्शनव्यतिरेकग्राहकप्रमाणप्रतिहतं हेतुद्वयमित्याशङ्क्याऽऽह—उभे हीति। दृश्यदर्शने परस्परापेक्षसिद्धिके दृश्ये सिद्धे तदवच्छिन्नं दर्शनं सिध्यति तच्च सिद्धौ तदवच्छिन्नं दृश्यं सिध्यतीत्यन्योन्याश्रयान्न दृश्यं दर्शनं वा सिध्यतीत्यतो विभागावगाहिप्रमाणाभावान्न तद्बाधो हेतुद्वयस्येत्यर्थः। किंच संभावनायां प्रमाणप्रवृत्तिर्वक्तव्या न च दृश्यदर्शनयोरन्यतरस्यापि नैरपेक्ष्येण संभावना भवत्यन्योन्याश्रयदोषात्। तथा च परस्परपुरस्कारेण सिध्येदुभयं कल्पितमेव स्यादिति मत्वाऽऽह—किं तदिति। तद्दृश्यं दर्शनं वा किमस्तीति पृष्टे विवेकिना नास्तीत्येवोच्यते प्रागुक्तदोषादित्यर्थः। किंच प्रामाणिकस्यैव प्रामाणिको भेदः संभवति। न च दृश्यदर्शनयोः स्वरूपे प्रमाणमस्तीत्याह—लक्षणेति। कथं तर्हि प्रमाणप्रमेयविभागो वादिभिर्गृह्यते तच्चिततादोषेणेत्याह—तन्मतेनेति। तत्र प्रथमं पादं विभजते—जीवेति। ते जीवचित्ते इति संबन्धः। अन्योन्यदृश्यत्वमितरेतरग्राह्यत्वं तदेव स्पष्टयति—जीवादिति। द्वितीयपादं व्याचष्टे—तस्मादिति। तदेव स्फुटयति—चित्तं वेति। किं तदस्तीति पृष्टे सति न किंचिदस्तीत्युच्यते विवेकिनेति योजना। उक्तमेवार्थं दृष्टान्तेन विवृणोति—न हीति। इहेति जागरितोक्तिः।

---

१ च. °श्येत किं। २ ग. ङ. च. छ. °ति चोच्य°। ३ च. °यं त°। ४ ख. घ. ङ. ज. वा। न किंचिद°। ५ च. °मित्याशयः। ६ घ. चित्तचैत्यं। ७ घ. °चित्तं तथैव। ८ घ. छ. गृह्यते तत्र हि। ९ ख. ग. झ. °ति। ते हि द°। १० ग. झ. °स्य सि°। ११ ग. झ. °ध्यत्य°। १२ क. न द°। १३ ग. झ. °ना समस्यान्यो°। १४ क. °ण विद्येत यदु°। १५ ग. झ. सिध्यदु°। १६ छ. °भयोः क°। १७ छ. °यभेदो वा°। १८ ग. छ, झ. °तरावगाह्य°। १९ छ. °तीयं पादं विभजते त°।

द्वितीयार्थं व्याचिख्यासुतया पृच्छति—कथमिति । तदेवावतार्य व्याकरोति—लक्षणेत्यादिना । यतस्ततो न तद्भेदस्य प्रामाणिकत्वमिति शेषः । कथं तर्हि लौकिकानां परीक्षकाणां च प्रमाणप्रमेयविभागप्रवृत्तिरित्याशङ्क्य चतुर्थपादार्थमाह—तन्मतेनेति । तदेव प्रपञ्चयति—न हीति । घटे किं प्रमाणमित्युक्ते ज्ञानमित्यनुत्तरमतिप्रसङ्गात्तापि घटज्ञानमन्योन्याश्रयप्रसङ्गादतो न घटतज्ज्ञानयोर्मानमेयभावः संभवतीत्यर्थः ॥ ६७ ॥

यथा स्वप्नमयो जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥६८॥
यथा मायामयो जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥६९॥
यथा निर्मितको जीवो जायते म्रियतेऽपि वा ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥ ७०॥

मायामयो मायाविना यः कृतो निर्मितको मन्त्रौषध्यादिभिर्निष्पादितः । स्वप्नमायानिर्मितका अण्डजादयो जीवा यथा जायन्ते म्रियन्ते च यथा मनुष्यादिलक्षणा अविद्यमाना एव चित्तविकल्पनामात्रा इत्यर्थः ॥६८॥ ॥ ६९ ॥ ७० ॥

दृश्यानामण्डजादीनां दर्शनातिरिक्तानामसत्त्वानुमानस्य भेदग्राहकप्रमाणबाधं परिहृत्य दर्शनातिरेकेण तेषामसत्त्वे जन्मादिप्रत्ययबाधः स्यादित्याशङ्क्य परिहरति—यथेत्यादिना । मायामयस्य निर्मितकस्य च जीवस्य विशेषं बुभुत्समानं प्रत्याह—मायेति । संविदतिरेकेणाण्डजादीनां परमार्थतः सत्त्वाभावानुमानस्य न जन्मादिप्रतिभासबाधः । सत्त्वाभावेऽपि स्वप्नादिषु जन्मादिविकल्पबाहुल्योपलम्भादिति श्लोकत्रयस्य तात्पर्यमाह—स्वप्नेत्यादिना ॥ ६८ ॥ ६९ ॥ ७० ॥

न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते ॥ ७१ ॥

---

१ ख. ग. ङ. °यार्धन्याचिख्यासया । घ. ङ. ज. °यार्धं व्याचिख्यासया । २ ग. ङ. तदव° । ३ घ. °देव तात्पर्यं व्या° । ४ ग. छ. ङ. तत्र भेद° । ५ ख. घ. ज. ङ. °वैं न भवन्ति भ° । ६ च. छ. वा । ७ ख. घ. छ. ज. °वैं न भवन्ति भ° । ८ च. °ना कृतो यो नि° । ९ च. °निर्मितका । १० ज. °स्य ज° ।

व्यवहारसत्यविषये जीवानां जन्ममरणादिः स्वप्नादिजीववदित्युक्तम्। उत्तमं तु परमार्थसत्यं न कश्चिज्जायते जीव इति। उक्तार्थमन्यत् ॥ ७१ ॥

यस्तु जन्मादि सत्यमिति मन्यते तं प्रति प्रागुक्तं स्मारयति—न कश्चिदिति। वृत्तानुवादपूर्वकं श्लोकतात्पर्यमाह—व्यवहारेति। अक्षराणि न व्याख्येयानि व्याख्यातत्वादित्याह—उक्तार्थमिति ॥ ७१ ॥

चित्तस्पन्दितमेवेदं ग्राह्यग्राहकवद्द्वयम्।
चित्तं निर्विषयं नित्यमसङ्गं तेन कीर्तितम् ॥ ७२ ॥

सर्वं ग्राह्यग्राहकवच्चित्तस्पन्दितमेव द्वयं चित्तं परमार्थत आत्मैवेति निर्विषयं तेन निर्विषयत्वेन नित्यमसङ्गं कीर्तितम्। "असङ्गो ह्ययं पुरुषः" इति श्रुतेः। सविषयस्य हि विषये सङ्गः। निर्विषयत्वाच्चित्तमसङ्गमित्यर्थः ॥ ७२ ॥

संवेदनस्य कल्पितदृश्योपहितरूपेण दृश्यत्वाद्द्रष्टुर्व्यतिरेकेण सत्त्वमिति स्वप्नदृष्टान्तेनोक्तमिदानीं तत्त्वतः संवेदनस्य विषयसंबन्धाभावादात्मैव संवेदनमित्याह—चित्तेति। अक्षरार्थं कथयति—सर्वमित्यादिना। निर्विषयत्वेनासङ्गत्वे सिद्धे श्रुतिमपि संवादयति—असङ्गो हीति। श्रुतियुक्तिसिद्धमसङ्गत्वं साधयति—सविषयस्येति ॥ ७२ ॥

योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ।
परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः ॥ ७३ ॥

ननु निर्विषयत्वेन चेदसङ्गत्वं चित्तस्य न निःसङ्गता भवति यस्माच्छास्त्रा शास्त्रं शिष्यश्चेत्यैवमादेर्विषयस्य विद्यमानत्वात्। नैष दोषः। कस्मात्। यः पदार्थः शास्त्रादिर्विद्यते स कल्पितसंवृत्या कल्पिता च सा परमार्थप्रतिपत्त्युपायत्वेन संवृतिश्च सा तया योऽस्ति परमार्थेन नास्त्यसौ न विद्यते। शास्त्रे द्वैतं न विद्यत इत्युक्तम्। यश्च परतन्त्राभिसंवृत्या परशास्त्रव्यवहारेण स्यात्पदार्थः स परमार्थतो निरूप्यमाणो नास्त्येव। तेन युक्तमुक्तमसङ्गं तेन कीर्तितमिति ॥ ७३ ॥

---

१ घ. °हारेऽस्त°। २ ख. °सत्ये वि°। ३ क. °षयजी° ४ घ. ङ. इत्याशुक्ता°। ५ ग. ङ च. °तत्तद्दृष्टयोपात्तरू°। ङ. °तत्तद्दृश्योपात्तरू°। ६ क. °श्च दृष्टव्याति°। ७ छ. °ष्टान्तरूपेणो°। ८ ख. ज. °क्तम°।

निर्विषयत्वेन चित्तस्यासङ्गत्वं संगीतं तदसंगतं शास्त्रादेर्विषयस्य सत्त्वादित्याशङ्क्याऽऽह-योऽस्तीति । ननु परमार्थतो वैशेषिकाः षट् पदार्थान्द्रव्यादिसमवायान्तानातिष्ठन्ते तथा च चित्तस्य कथमसङ्गत्वं तत्राऽऽह-परेति । वैशेषिकपारिभाषिकव्यवहारानुरोधेन पदार्थो यो द्रव्यादिः समवायान्तः स्यान्न स परमार्थतोऽस्ति किंतु संवृत्या प्रतिभाति तस्मादविरुद्धमसङ्गत्वमित्यर्थः । व्यावर्त्य चोद्यमुत्थापयति-नन्विति । तत्र यस्मादिति सामान्योक्तं हेतुं विशेषतो व्यनक्ति-शास्त्रेति । आदिशब्देन प्रमाता प्रमाणं प्रमेयमित्यादि गृह्यते । असङ्गत्वाक्षेपं परिहरति-नैष दोष इति । तत्र निर्विषयत्वहेतुं प्रश्नपूर्वकं पूर्वार्धयोजनया साधयति-कस्मादित्यादिना । परमार्थतो द्वैतस्यासत्त्वे वाक्योपक्रममनुगुणमादर्शयति-ज्ञात इति । द्वितीयार्धं योजयति-यश्चेति । न हि द्रव्यस्य लक्षणं गुणादिपञ्चकस्य च ततो व्यावर्तकप्रातिस्विकलक्षणप्रतिपत्तिमन्तरेण प्रकल्प्यते । तथा च तल्लक्षणस्तत्प्रतिपत्तौ तदितरप्रतिपत्तिः । तत्प्रतिपत्तौ च तल्लक्षणतस्तद्व्यावृत्ततत्तत्प्रतिपत्तिरिति परस्पराश्रयान्न किंचिदपि वस्तुतः सिध्येदित्यर्थः । वस्तुतो निर्विषयस्यैव सिद्धत्वादसङ्गत्वं चित्तस्य प्रागुक्तं संगतमेवेत्युपसंहरति-तेनेति ॥ ७३ ॥

अजः कल्पितसंवृत्या परमार्थेन नाप्यजः ।
परतन्त्राभिनिष्पत्त्या संवृत्या जायते तु सः ॥ ७४ ॥

ननु शास्त्रादीनां संवृतित्वेऽज इतीयमपि कल्पना संवृतिः स्यात् । सत्यमेवम् । शास्त्रादिकल्पितसंवृत्यैवाज इत्युच्यते । परमार्थेन नाप्यजः । यस्मात्परतन्त्राभिनिष्पत्त्या परशास्त्रसिद्धिमपेक्ष्य योऽजः इत्युक्तः स संवृत्याजायते । अतोऽज इतीयमपि कल्पना परमार्थविषये नैव क्रमत इत्यर्थः ॥७४॥

शास्त्रादिभेदकल्पनायाः संवृतिसिद्धत्वे तदधीनात्मन्यजत्वकल्पनाऽपि संवृतिसिद्धैव स्यादित्याशङ्क्याङ्गी करोति-अज इति । कल्पितमात्मन्यजत्वमित्यत्र हेतुमाह-परतन्त्रेति । परिणामवादप्रसिद्धजन्मना भ्रान्त्यैवाऽऽत्मा जायते जन्मनश्च विभ्रमत्वे-

---

१ ख. °ह । प°। २ क. ख. घ. ङ. छ. °न्न प°। ३ ग. °सत्त्वमि°। ४ ख. °यत्वं हे°। ५ झ. °र्धे यो°। ६ ज. °स्य त°। ७ घ. °र्तकं प्रा°। ८ घ. ङ. °कल्प्यन्ते । त° ९ क. ख. ङ. ज. तत्तल्ल°। १० छ. °तरेतर°। ११ घ. ङ. ज. तत्तल्ल°। १२ घ. °स्तत्तद्व्या°। १३ ग. °स्यैवं सि°। १४ क. °तन्त्रोऽभि°। १५ घ. ङ. च. छ. °वृत्तित्वेऽ°। १६ ङ. छ. ज. झ. °वृत्तिः स्या°। १७ ख. ङ. ज. °अप्रसि°। १८ क. °सिद्धम°। १९ ग. झ. °दविक°। २० ग. घ. ङ. ज. झ. °वृत्तिसि°। २१ ग. घ. ङ. ज. झ. °वृत्तिसि°।

तन्निषेधस्याजत्वस्यापि तथात्वं युक्तमित्यर्थः । श्लोकव्यावर्त्यामाशङ्कामाह—नन्विति । शास्त्रादिभेदस्य कल्पितत्वे तत्प्रयुक्तमात्मन्यजत्वमपि कल्पितं स्यादित्यर्थः । किमजोऽयमात्मेति व्यवहारस्य कल्पितत्वं किंवा तदुपलक्षितस्यैव रूपस्येति विकल्प्याऽऽद्यमङ्गीकरोति—सत्यमिति । अजोऽयमित्यभिधानस्य संवृतिप्रयुक्तत्वात्तद्व्यवहारस्य कल्पितत्वमिष्टमित्यर्थः । कैवल्यावस्थायामजोऽयमित्यभिधानाभावमभ्युपेत्य व्यावर्त्यं दर्शयति—परमार्थेनेति । आत्मन्यजत्वव्यवहारस्य कल्पितत्वे द्वितीयार्धव्याख्यानेन हेतुमाह—यस्मादिति । परेषां परिणामवादिनां शास्त्रे या परिणामप्रसिद्धिस्तामपेक्ष्य तन्निषेधेन योऽज इत्यात्मोक्तः स संवृत्यैव यतो जायतेऽतश्च प्रतियोगिनो जन्मनः संवृतिसिद्धत्वात्तन्निषेधरूपमजत्वमपि तादृगेवेत्यर्थः । अजत्वादिव्यवहारोपलक्षितस्वरूपस्याकल्पितत्वम् । तस्य कल्पनाधिष्ठानत्वात् । न च कल्पितस्य शास्त्रादेरकल्पितेन प्रमितिहेतुत्वं प्रतिबिम्बादौ बिम्बादिप्रमितिहेतुत्वस्य संप्रतिपन्नत्वादिति द्रष्टव्यम्॥७४॥

अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ।
द्वयाभावं स बुद्ध्यैव निर्निमित्तो न जायते ॥ ७५ ॥

यस्मादसद्विषयस्तस्मादसत्यभूते द्वैतेऽभिनिवेशोऽस्ति केवलमभिनिवेश आग्रहमात्रम् । द्वयं तत्र न विद्यते । मिथ्याभिनिवेशमात्रं च जन्मनः कारणं यस्मात्तस्माद्द्वयाभावं बुद्ध्वा निर्निमित्तो निवृत्तमिथ्याद्वयाभिनिवेशो यः स न जायते ॥ ७५ ॥

ननु ज्ञानस्य कल्पितशास्त्रादिजन्यत्वे मिथ्यात्वान्न पुनरावृत्तिफलसाधनत्वं तत्राऽऽह—अभूतेति । यदि द्वितीयः संसारः सत्यः स्यात्तदा तन्निवृत्त्यर्थे साधनमपि वस्तुभूतमभिधीयते मिथ्याभिनिवेशमात्रस्य तु मिथ्योपायजन्येनापि ज्ञानेन वस्तुनिष्ठेन निवृत्तिः सिध्यतीति श्लोकार्थं कथयति—यस्मादित्यादिना ॥ ७५ ॥

यदा न लभते हेतूनुत्तमाधममध्यमान् ।
तदा न जायते चित्तं हेत्वभावे फलं कुतः ॥ ७६ ॥

जात्याश्रमविहिता आशीर्वर्जितैरनुष्ठीयमानाः धर्मा देवत्वादिप्राप्तिहेतव

---

१ घ. ङ. ज. °त्यांश° । २ ग. झ. शास्त्रभे° । ३ ग. छ. झ. °तस्वरू° । ४ ख. ङ. ञ. °स्य स्वरू° । ५ ग. घ. छ. ज. झ. °वृत्तिप्र° । ६ छ. °मित्य° । ७ ग. झ. °त्मोक्तस्तसंवृ° । ८ ग. घ. ङ. छ. °वृत्तिसि° । ९ ग. झ. °तस्या° । १० ज. °ल्पितत्वेन । ११ क. °म्बादि° । १२ ख. च. छ. झ. °सद्द्वैतविष° । १३ घ. ङ. ज. °स्तद्भूते । १४ झ. °दा तन्निदान° । १५ ग. छ. झ. °वृत्तये स्व° । १६ घ. ङ. ज. °स्यर्थं सा° । १७ क. °°नाद्धर्मादेव ।

उत्तमाः केवलाश्च धर्माः । अधर्मव्यामिश्रा मनुष्यत्वादिप्राप्त्यर्था मध्यमाः । तिर्यगादिप्राप्तिनिमित्ता अधर्मलक्षणा प्रवृत्तिविशेषाश्चाधमाः । तानुत्तममध्यमाधमान्विद्यापरिकल्पितान्यदैकमेवाद्वितीयमात्मतत्त्वं सर्वकल्पनावर्जितं जानन्न लभते न पश्यति यथा बालैर्दृश्यमानं गगनेमलं विवेकी न पश्यति तद्वदा न जायते नोत्पद्यते चित्तं देवाद्याकारैरुत्तमाधममध्यफलरूपेण । न ह्यसति हेतौ फलमुत्पद्यते बीजाद्यभाव इव सस्यादि ॥ ७६ ॥

निर्निमित्तो न जायत इत्युक्तं तदेतत्प्रश्नयति—यदेति । उत्तमान्हेतून्विभजते—ज्ञानेति । आशीर्वर्जितैः फलतृष्णारहितैरधिकारिभिरिति यावत् । देवत्वादीत्यादिशब्देनोत्कृष्टं जन्म गृह्यते । केवलत्वं धर्माणां प्राधान्यम् । मनुष्यत्वादीत्यादिशब्देन मध्यमयोनयो गृह्यन्ते । तिर्यगादीत्यादिशब्देनाधमं जन्म संगृह्यते । वाक्यार्थज्ञानादज्ञाननिवृत्तौ तन्निवृत्त्यर्थं विशिनष्टि—अविद्येति । अविदुषां प्रतीयमाना हेतवो विदुषां न प्रतिभान्तीत्येतद्दृष्टान्तेन स्फुटयति— यथेति । उक्तेऽर्थे हेतुत्वेन चतुर्थपादं व्याचष्टे—न हीति ॥ ७६ ॥

अनिमित्तस्य चित्तस्य याऽनुत्पत्तिः समाऽद्वया ।
अजातस्यैव सर्वस्य चित्तदृश्यं हि तत्समम् ॥ ७७ ॥

हेत्वभावे चित्तं नोत्पद्यत इति ह्युक्तम् । सा पुनरनुत्पत्तिश्चित्तस्य कीदृशीत्युच्यते । परमार्थदर्शनेन निरस्तधर्माधर्माख्योत्पत्तिनिमित्तस्यानिमित्तस्य चित्तस्येति या मोक्षाख्याऽनुत्पत्तिः सा सर्वदा सर्वावस्थासु समा निर्विशेषाऽद्वया च । पूर्वमप्यजातस्यैवानुत्पन्नस्य चित्तस्य सर्वस्याद्वयस्येत्यर्थः । तस्मात्प्रागपि विज्ञानाच्चित्तदृश्यं तद्द्वयं जन्म च तस्मादजातस्य सर्वस्य सर्वदा चित्तस्य समाऽद्वयैवानुत्पत्तिर्न पुनः कदाचिद्भवति कदाचिद्वा न भवतीति । सर्वदैकरूपैवेत्यर्थः ॥ ७७ ॥

तदा न जायत चित्तमिति कालपरिच्छेदप्रतीतेरागन्तुकत्वमाशङ्क्य परिहरति—अनिमित्तस्येति । चित्तस्य हि निमित्तवर्जितस्य नित्यसिद्धस्य या सर्वदाऽनुत्पत्तिः सा निर्विशेषाऽद्वितीया चेत्यत्र हेतुमाह—अजातस्येति । सर्वस्य द्वैतस्य चित्तद-

---

१ ङ. °सत्या इत्यर्थः । के° । २ झ. °ला च° । ३ क. ङ. °धर्मा च° । ४ च. सर्वं क° । ५ ङ. °गनदलम° । ६ क. च. झ. °स्यादिः ॥ ७६ ॥ ७ क. ख. झ. °त्कृष्ट° । ८ क. छ. °लत्वेन च° । ९ ख. ज. वाक्यार्थज्ञा° । १० घ. ज. °त्वं न द्वयं । ११ छ. °द्वया चानु° । १२ ज. °नुत्पत्ति° । १३ ख. घ. क. ज. °वस्तीति । १४ छ. °रूपेत्य° ।

श्यत्वेन मिथ्यात्वान्नित्यसिद्धस्य परिपूर्णस्य चित्तात्मस्य स्फुरणस्य जन्मायोगात्तद्-नुत्पत्तिरुक्तलक्षणा युक्तेत्यर्थः । उक्तमनूद्याऽऽकाङ्क्षापूर्वकं श्लोकमवतार्य व्याकरोति—हेत्वभावः इत्यादिना । यथा रूप्यकल्पनाकालेऽपि शुक्तेररूप्यत्वं स्वाभाविकं तथा जन्मकल्पनाकालेऽपि संविदो निर्विशेषाद्वितीयब्रह्मता स्वाभाविकी जन्मभ्रमनिवृत्त्यपेक्षया तु तदा न जायत इत्युक्तमित्याह—सर्वदेति । न केवलं मोक्षावस्थस्यैव चैतन्यस्याजत्वं किंतु घटाद्युपरक्तस्यापीत्यभिप्रेत्याऽऽह—सर्वावस्थास्विति । सर्वस्यैव चित्तप्र[ति]बिम्बस्य बिम्बकल्पब्रह्मरूपत्वादिति हेतुमभिप्रेत्याऽऽह—अद्वया चेति । तृतीयपादार्थं कथयति—पूर्वमपीति । तत्र हेतुमाह—यस्मादिति । तस्माद्रज्जुसर्पवद्द्वैतस्य जन्मनश्च दृश्यत्वाद्वस्तुतोऽसत्त्वादिति यावत् ॥ ७७ ॥

बुद्ध्वाऽनिमित्ततां सत्यां हेतुं पृथगनाप्नुवन् ।
वीतशोकं तथा काममभयं पदमश्नुते ॥ ७८ ॥

यथोक्तेन न्यायेन जन्मनिमित्तस्य द्वैतस्याभावादनिमित्ततां च सत्यां परमार्थरूपां बुद्ध्वा हेतुं धर्मादिकारणं देवादियोनिप्राप्तये पृथगनाप्नुवन्ननुपाददानस्त्यक्तबाह्यैषणः सन्कामशोकादिवर्जितमविद्यादिरहितमभयं पदमश्नुते पुनर्न जायत इत्यर्थः ॥ ७८ ॥

द्वयाभावं स बुद्ध्वैव निर्निमित्तो न जायत इत्युक्तं तदिदानीं प्रपञ्चयति—बुद्ध्वेति । द्वैताभावोपलक्षितां सत्तामनाद्यनन्तां परमार्थभूतां प्रतिपद्य देवादियोनिप्राप्तौ धर्मादिहेतुमसांकर्येणाननुतिष्ठन्यदा विद्वानवतिष्ठते तदा सर्वसंसारकारणरहितं पदमश्नुवानो न पुनः शरीरं गृह्णातीत्यर्थः । श्लोकं व्याचष्टे—यथोक्तेनेति—दृश्यत्वादिना हेतुना द्वैतस्य रज्जुसर्पादिवदेव कल्पितत्वं यथोक्तो न्यायस्तेन चैतन्यस्य जन्मनि यद्द्वयं निमित्तं तस्याभावतामभावोपलक्षितां सत्तां निमित्ताभावादेवानाद्यनन्तां तस्मादेव सत्यां बुद्ध्वेति योजना । पृथगिति देवतादिप्रकृष्टजन्मप्राप्तये धर्ममनुष्यत्वप्राप्तये धर्माधर्मौ तिर्यगाद्यधमयोनिप्राप्तये चाधर्मसांकर्येणाननुतिष्ठन्निति यावत् । प्रकृतस्य ज्ञानवतो धर्माद्यनुष्ठानायोगे हेतुं सूचयति—त्यक्तेति । कार्यभूतसर्वानर्थराहित्यमुक्त्वा पुनरभयमित्यस्यार्थमाह—अविद्येति ॥ ७८ ॥

---

१ छ. °गाद° । २ छ. रूपक° । ३ ज. °दोऽपि नि° । ४ झ. °वस्यैव । ५ छ. °बिम्बितस्य । ६ छ. °तोऽभावादि° । ७ घ. °थोक्तन्या° । ८ क. द्वयाभा° । ९ छ. °पादा° । १० च. झ. °ते न पुनर्जाय° । ११ झ. सर्वकारणसंसार° । १२ ख. °रकर° । १३ क. °दताप्र° । १४ ङ. °व्यत्वादिप्रा° । ग. झ. °व्यप्रा° । १५ ग. घ. °योगाद्धेतुं ।

अभूताभिनिवेशाद्धि सदृशे तत्प्रवर्तते ।
वस्त्वभावं स बुद्ध्वैव निःसङ्गं विनिवर्तते ॥ ७९ ॥

यस्मादभूताभिनिवेशादसति द्वयेऽद्वयास्तित्वनिश्चयोऽभूताभिनिवेशस्तस्मादविद्यात्मामोहरूपाद्धि सदृशे तदनुरूपं तच्चित्तं प्रवर्तते । तस्य द्वयस्य वस्तुनोऽभावं यदा बुद्धवांस्तदा तस्मान्निःसङ्गं निरपेक्षं सद्विनिवर्ततेऽभूताभिनिवेशाविषयात् ॥ ७९ ॥

यथोक्तपदप्राप्तिः सदाऽस्तीत्याशङ्क्याऽऽह—अभूतेति । व्यभिचारित्वादिहेतुभिरद्वयात्मदर्शनेन वा साध्यसाधनात्मनो द्वैतस्य वस्तुनोऽभावं यदा पुमान्बुद्धवांस्तदा वस्त्वभावं पुरुषो बुद्ध्वैव निःसङ्गं चित्तं यथा पुनर्न प्रवर्तते तथा तन्निवृत्तिमनुवृत्तो भवतीत्यर्थः । अक्षराणि विभजते—यस्मादित्यादिना । यस्मादभूताभिनिवेशात्तदनुरूपे चित्तं प्रवर्तते तस्मान्निःसङ्गं निवर्तत इति संबन्धः । अभूताभिनिवेशमेव विशदयति—असतीति । अभिनिवेशस्याविद्यात्मामोहरूपत्वमन्वयव्यतिरेकसिद्धमिति वक्तुं हीत्युक्तम् । तदनुरूपं इत्यत्र तच्छब्देनाभिनिवेशो गृह्यते । तस्येति । अभिनिवेशविषयस्येत्यर्थः ॥ ७९ ॥

निवृत्तस्याप्रवृत्तस्य निश्चला हि तदा स्थितिः ।
विषयः स हि बुद्धानां तत्साम्यमजमद्वयम् ॥ ८० ॥

निवृत्तस्य द्वैतविषयाद्विषयान्तरे चाप्रवृत्तस्याभावदर्शनेन चित्तस्य निश्चला चलनवार्जिता ब्रह्मस्वरूपैव तदा स्थितिर्यैषा ब्रह्मस्वरूपा स्थितिश्चित्तस्याद्वयाविज्ञानैकरसघनलक्षणा । स हि यस्माद्विषयो गोचरः परमार्थदर्शिनां बुद्धानां तस्माच्चत्साम्यं परं निर्विशेषमजमद्वयं च ॥ ८० ॥

अभयं पदमश्नुत इत्यत्र हेतुमाह—निवृत्तस्येति । विद्वदनुभवैकगम्यत्वादशेषकल्पनातीतत्वाच्च सिद्धं मोक्षस्याभयादिरूपत्वमित्याह—विषय इति । अक्षरार्थं कथयति—निवृत्तस्येत्यादिना ॥ ८० ॥

---

१ घ. ज. °पे चित्तं । २ ख. घ. ङ. ज. तस्मिन्निः । ३ झ. बुद्धयैव । ४ छ. °नुनिवृ° । ५ छ. रार्थं वि° । ६ ग छ. झ. °ङ्गं विनि° । ७ ग. झ. °शामो° । ८ ख. घ. ङ. °पमित्य° । ९ घ. निश्चलं । १० क. तत्त्वात्म्यम° । ११ ख. च. झ. °रे चाऽप्र° । १२ घ. ङ. ज. °लव° । १३ क. °तां स्व° । १४ च. सा । १५ क. °षयंगो° । च °षयागो° ।

अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम्।
सकृद्विभातो ह्येवैष धर्मो धातुस्वभावतः॥ ८१॥

पुनरपि कीदृशश्चासौ बुद्धानां विषय इत्याह—स्वयमेव तत्प्रभातं भवति नाऽऽदित्याद्यपेक्षं स्वयंज्योतिःस्वभावमित्यर्थः। सकृद्विभातः सदैव विभात इत्येतत्। एष एवंलक्षण आत्माख्यो धर्मो धातुस्वभावतो वस्तुस्वभावत इत्यर्थः॥ ८१॥

यो मोक्षो विदुषां विषयो दर्शितस्तमेव पुनर्विशिनष्टि—अजमिति। स्वयंप्रभातत्वे हेतुमाह—सकृदिति। कल्पितस्य सर्वस्य धारणाद्धर्मो नासौ कथमपि परतन्त्रो भवितुमर्हत्यनवस्थानादतः स्वयंज्योतिरित्याह—धर्म इति। किंच धीयते निधीयते सर्वं निक्षिप्यते सुषुप्तादावस्मिन्निति धातुरात्मोच्यते। तथा च सर्वस्य ज्ञानसाधनस्योपसंहारेऽपि सुषुप्तादौ साक्षितयाऽऽत्मनः सिद्धेः स्वयंज्योतिष्ट्वमेष्टव्यमित्याह—धातुरिति। किंचाऽऽत्मत्वादेवाऽऽत्मनः स्वयंज्योतिष्ट्वमन्यथा घटवदनात्मत्वप्रसङ्गादित्याह—स्वभावत इति। आकाङ्क्षापूर्वकं श्लोकमवतार्य तदक्षराणि योजयति—पुनरपीत्यादिना। धातुस्वभावत इत्येकं पदं गृहीत्वा व्याचष्टे—वस्त्विति। विवक्षितार्थस्तु पूर्वस्मान्नातिरिच्यते॥ ८१॥

सुखमाव्रियते नित्यं दुःखं विव्रियते सदा।
यस्य कस्य च धर्मस्य ग्रहेण भगवानसौ॥ ८२॥

एवमुच्यमानमपि[10] परमार्थतत्त्वं[11] कस्माल्लौकिकैर्न गृह्यत इत्युच्यते—यस्माद्यस्य कस्यांचिद्द्वयवस्तुनो[12] धर्मस्य ग्रहेण ग्रहणावेशेन मिथ्याभिनिविष्टतया सुखमाव्रियतेऽनायासेनाऽऽच्छाद्यत[13] इत्यर्थः। द्वयोपलब्धिनिमित्तं हि तत्राऽऽवरणं न यत्नान्तरमपेक्षते। दुःखं च विव्रियते[14] प्रकटी क्रियते। परमार्थज्ञानस्य दुर्लभत्वात्। भगवानसावात्माऽद्वयो देव इत्यर्थः। अतो वेदान्तैराचार्यैश्च बहुश उच्यमानोऽपि नैव ज्ञातुं शक्य इत्यर्थः। "आश्चर्यो वक्ता कुशलोऽस्य लब्धा" इति श्रुतेः॥ ८२॥

---

१ क. च. छ. धातुः स्व°। घ. धतुं स्व°। २ झ. पुनः की°। ३ क. च. छ. धातुः स्व°। ४ ख. भावे व°। ५ घ. °स्य साधा°। ६ ख. ग. घ. ङ. ज. झ. च नि°। ७ ङ. छ. °ष्पुप्तादौ। ८ ख. °त्मतत्स°। ९ क. °त्येकप°। १० झ. °पि बहुशः प°। ११ च. °त्त्वं यस्मा°। १२ च. °चिद्वस्तु°। १३ घ. °मद्रिय°। १४ क. °र्थः। अद्व°। १५ ख. ग. घ. ङ. ज. तत्त्वाव°। १६ च. च व्रि°। घ. ज. वत्रि°। १७ झ. °ते द्वितीयाद्वै भयं भवतीति श्रुतेः। प°। १८ च. °मानेऽपि। १९ च. झ. °क्यत इ°। २० घ. लब्ध इति।

आत्मा चेदुक्तलक्षणो विवक्षितस्तर्हि किमित्यसौ श्रुत्याचार्योपदिष्टस्तयैव सर्वैर्न गृह्यते तत्राऽऽह-सुखमिति । मिथ्याभिनिवेशादात्मतत्त्वस्वरूपसुखं सदैवाऽऽच्छाद्यते तस्मादेव वस्तुतोऽसदपि दुःखं सर्वदा प्रकटी क्रियते तेनासौ भगवानात्मा श्रुत्याचार्योपदिष्टोऽपि न विस्पष्टो भवतीत्यर्थः । श्लोकव्याव[1]र्त्यां शङ्कां दर्शयति-एवमिति । स्वयंज्योतिष्ट्वादिप्रागुपदिष्टप्रकारेणेति यावत् । तत्र श्लोकमवतार्य व्याकरोति—उच्यत इत्यादिना । द्वैते गृह्यमाणेऽपि कथमात्मस्वरूपस्य सुखस्व[2]रूपस्यानायासेनाऽऽच्छाद्यमानत्वं तत्राऽऽह—द्वयेति । इतश्चाऽऽत्मतत्त्वं यथावन्न प्रतिभातीत्याह—दुःखं चेति । यथावदात्म[3]प्रथाभावे हेतुमाह-परमार्थेति । देवो याथात्म्येन न भातीति शेषः । सुखस्य विद्यमानस्याऽऽवरणमविद्यमानस्य दुःख[4]स्य विवरणमिति स्थिते फलितमाह-अत इति । श्रुत्याचार्योपदेशस्य तात्पर्यशून्यत्वं वारयति[5]-बहुश इति । आत्मनि प्रवचनस्थं परिज्ञानस्थं दुर्लभत्वे प्रमाणमाह-आश्चर्य इति ॥ ८२ ॥

अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चलस्थिरोभयाभावैरावृणोत्येव बालिशः ॥ ८३ ॥

अस्ति नास्तीत्यादिसूक्ष्मविषया अपि पण्डितानां ग्रहा भगवतः परमात्मन आवरणा एव किमुत मूढजनानां बुद्धिलक्षणा इत्येवमर्थं प्रदर्शयन्नाह—अस्तीति । अस्त्यात्मेति वादी कश्चित्प्रतिपद्यते । नास्तीत्यपरो वैनाशिकः । अस्ति नास्तीत्यपरोऽर्धवैनाशिकः । सदसद्वादी दिग्वासाः । नास्ति नास्तीत्यत्यन्तशून्यवादी । तत्रास्तिभावश्चलः, घटाद्यनित्यविलक्षणत्वात् । नास्तिभावः स्थिरः सदाविशेषत्वात् । उभयं चलस्थिरविषयत्वात्सदसद्भावोऽभावोऽत्यन्ताभावः । प्रकारचतुष्टयस्यापि वैरेतैश्चलस्थिरोभयाभावैः सदसदादिवादी सर्वोऽपि भगवन्तमावृणोत्येव बालिशोऽविवेकी । यद्यपि पण्डितो बालिश एव परमार्थतत्त्वानवबोधात्किमु स्वभावमूढो जन इत्यभिप्रायः ॥८३॥

परीक्षकाभिनिवेशानामप्यात्मावरणत्वे सति लौकिकपुरुषाभिनिवेशानां तदावरणत्वं किमु वक्तव्यमिति साधयति—अस्तीत्यादिना । श्लोकस्य तात्पर्यमाह—अस्तीति ।

---

१ ग. झ. °कस्य व्यावर्त्याश° । २ छ. °वर्त्यामाश° । ३ झ. °त् । श्रुत्याचार्योपदेशस्य तात्पर्यशून्यत्वं वारयति-बहुश इति । त° । ४ ग. छ. झ. °स्वस्या° । ५ ख. ज. °प्रत्ययाभा° । ६ झ. °ति । आ° । ७ ख. °स्य दु° । ८ ग. छ. झ. °स्य दु° । ९ ख. झ. अस्त्यात्मेति । १० च. अस्ति ह्यात्मे° । ११ झ. °विषयत्वा° । १२ च. °भय व° । १३ घ. °त्वात्सद्भा° । १४ च. °ऽन्तः प्र° । १५ च. सदासद्वादी सदसद्वादी असदसद्वादी ।

प्रमाता देहादिव्यतिरिक्तोऽस्तीत्यादौ वैशेषिकादिपक्षः। देहादिव्यतिरिक्तोऽपि नासौ बुद्धेर्व्यतिरिच्यते क्षणिकस्य विज्ञानस्यैवाऽऽत्मत्वादिति द्वितीयो विज्ञानवादिपक्षः। तृतीयो दिगम्बरपक्षः। चतुर्थं तु शून्यवादिपक्षे शून्यस्याऽऽत्यन्तिकत्वद्योतनार्थाऽऽप्सा। द्वितीयार्धं विभजते—तत्रेत्यादिना। अनित्येभ्यो घटादिभ्यः सुखाद्याकारपरिणामितया वैलक्षण्यादस्तिभावो योऽयं प्रमातोक्तः स चलः सविशेषः सन्परिणामीत्यर्थः। देहाद्यतिरिक्तोऽपि प्रमाता बुद्ध्यतिरिक्तो नास्तीति यो नास्तिभावः स स्थिरो निर्विशेषत्वात्तदभावस्येत्याह—नास्तिभाव इति। प्रकारचतुष्टयस्यास्तित्वस्य नास्तित्वस्यास्तिनास्तित्वस्य नास्तिनास्तित्वस्य चेति यावत्। बालिशत्वे सिद्धे फलितं न्यायमुपसंहरति—किम्विति ॥ ८३ ॥

कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सदाऽऽवृतः।
भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् ॥ ८४ ॥

कीदृक्पुनः परमार्थतत्त्वं यदवबोधादबालिशः पण्डितो भवतीत्याह—कोट्यः प्रावादुकशास्त्रनिर्णयान्ता एता उक्ता अस्ति नास्तीत्याद्याश्चतस्रो यासां कोटीनां ग्रहैर्ग्रहणैरुपलब्धिनिश्चयैः सदा सर्वदाऽऽवृत आच्छादितस्तेषामेव प्रावादुकानां यः स भगवानाभिरस्तिनास्तीत्यादिकोटिभिश्चतसृभिरस्पृष्टोऽस्त्यादिविकल्पनावर्जित इत्येतत्। येन मुनिना दृष्टो ज्ञातो वेदान्तेष्वौपनिषदः पुरुषः स सर्वदृक्सर्वज्ञः परमार्थपण्डित इत्यर्थः ॥८४॥

आत्मनो यदावरणमुक्तं तदुपसंहरति—कोट्य इति। यासां कोटीनां परीक्षकपरिकल्पितनिर्णयनिरूपणीयानां ग्रहैरभिनिवेशविशेषैरात्मा सदा समावृतस्ताः खल्वेताश्चतस्रः कोट्यः सन्ति। तथा चाऽऽत्मनो न यथावदात्मप्रथनमित्यर्थः। यदि सदाऽऽत्मा समावृतो न तर्हि तस्य ज्ञानं ज्ञाने वा नास्ति नैराकाङ्क्ष्यं ज्ञातव्यान्तरपरिशेषादित्याशङ्क्याऽऽह—भगवानिति। आत्मा हि वस्तुतोऽस्तीत्यादिकल्पनारहितो येनोपनिषत्श्रवणेन प्रतिपन्नः स सर्वज्ञो ज्ञातव्यान्तरमपश्यन्परमार्थपण्डितो निराकाङ्क्षो भवती-

---

१ घ. ङ. ज. °वादप°। २ क. °र्थे शू°। ३ घ. ङ. °नार्थवी°। ४ ग. झ. °णामत°। ५ ग. छ. °हाद्वयति°। ६ झ. °शेषात्त°। ७ च. °श्च तत्परायास्तु ग्रहैस्तासां। ८ घ. °ताश्च ग्र°। ९ च. तत्परायास्तासां। १० ख. यः पुनः स। ११ क. °रस्पृ°। १२ ख. घ. ङ. °दिक°। १३ च. °दान्तदृष्ट्यौप°। १४ च. °दः स°। १५ घ. °तस्ताश्च°। १६ घ. °थाऽऽत्मं°। १७ ख. °वस्प्रथ°। १८ क. °नाहि°। १९ ग. सर्व°।

त्यर्थः । श्लोकनिरस्यामाकाङ्क्षां दर्शयति-कीदृगिति किमिति परमार्थतत्त्वं जिज्ञास्यते, तज्ज्ञानात्पाण्डित्यसिद्ध्यर्थमित्याह— यदवबोधादिति । तत्र श्लोकमवतार्य व्याकरोति-आहेत्यादिना । तेषामेव प्रावादुकानामुपलब्धिनिश्चयैरिति संबन्धः । यो भगवानुक्तविशेषणः स येनेति योजना ॥ ८४ ॥

प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयम् ।
अनापन्नादिमध्यान्तं किमतः परमीहते ॥ ८५ ॥

प्राप्यतां यथोक्तां कृत्स्नां समस्तां सर्वज्ञतां ब्राह्मण्यं पदं स ब्राह्मणः । " एष नित्यो महिमा ब्राह्मणस्य " इति श्रुतेः । आदिमध्यान्ता उत्पत्तिस्थितिलया अनापन्ना अप्राप्ता यस्माद्वयस्य पदस्य न विद्यन्ते तदनापन्नादिमध्यान्तं ब्राह्मण्यं पदम् । तदेव प्राप्य लब्ध्वा किमतः परमस्मादात्मलाभाद्ऊर्ध्वमीहते चेष्टते निष्प्रयोजनमित्यर्थः । " नैव तस्य कृतेनार्थः " इत्यादिस्मृतेः ॥ ८५ ॥

ज्ञानवतोऽपि यावज्जीवादिश्रुतिवशादग्निहोत्रादि कर्तव्यमित्याशङ्क्याऽऽह—प्राप्येति । यथोक्तां चतुष्कोटिविनिर्मुक्तामिति यावत् । समस्तत्वं ज्ञातव्यशेषशून्यत्वं परिपूर्णब्रह्मस्वरूपत्वम् । तत्र ब्राह्मण्यपदप्रयोगे प्रमाणमाह—स ब्राह्मण इति । स विद्वान् परोक्षीकृतब्रह्मसतत्त्वः सन्फलावस्थो मुख्यो ब्राह्मणो भवतीत्यर्थः । ब्राह्मणस्य ब्रह्मविदो विद्याफलावस्थस्यैव स्वभावो महिमेत्युक्तो निर्विकारो वृद्धिह्रासाभावादेकरूपो भवतीति वाक्यान्तरस्यार्थः । तदेव पदं विशिनष्टि—अनापन्नादिमध्यान्तमिति । तद्व्याकरोति—आदीति । अन्वयं दर्शयन्नवशिष्टं व्याचष्टे—तदेव प्राप्येति । ज्ञानवान्फलावस्थः सन्कृतकृत्यो न तस्य किंचिदस्ति कर्तव्यमित्यस्मिन्नर्थे भगवद्वाक्यं प्रमाणयति—नैव तस्येति ॥ ८५ ॥

विप्राणां विनयो ह्येष शमः प्राकृत उच्यते ।
दमः प्रकृतिदान्तत्वादेवं विद्वाञ्शमं व्रजेत् ॥ ८६ ॥

विप्राणां ब्राह्मणानां विनयो विनीतत्वं स्वाभाविकं यदेतदात्मस्वरूपेणावस्थानम् । एष विनयः शमोऽप्येष एव प्राकृतः स्वाभाविकोऽकृतक उच्यते । दमोऽप्येष एव प्रकृतिदान्तत्वात्स्वभावत एव चोपशान्तरूपत्वाद्ब्रह्मणः । एवं यथोक्तं स्वभावोपशान्तं ब्रह्म विद्वाञ्शममुपशान्तिं स्वाभाविकीं ब्रह्मस्वरूपां व्रजेद्ब्रह्मस्वरूपेणावतिष्ठत इत्यर्थः ॥ ८६ ॥

१ ब. °ध्रमाणमि° । २ च. °व स्वमतस्थापनं विना परमतखण्डनं न संभवति । परमतोत्पादनं विना स्वमतस्थापनं न संभवतीति प्र° । ३ छ. °न्तस्वरू° । ४ छ. °त्वाद्ब्राह्म° । ५ ब. °ह्मरू° ।

यावज्जीवादिश्रुतेरविद्वद्विषयत्वाद्विदुषो नाग्निहोत्रादि कर्तव्यमित्युक्तम् । इदानीं तस्यापि नियोगतोऽस्ति कर्तव्यमित्याशङ्क्याऽऽह–विप्राणामिति । ब्रह्मविदां ब्राह्मणानामेष विनयः स्वभावतो न नियोगाधीनां कर्तव्यतामधिकरोति । शमोऽपि स्वाभाविको न नियोगेन क्रियते । दमोऽपि स्वभावसिद्धत्वान्न नियोगमपेक्षते । एवं कूटस्थमात्मतत्त्वं विद्वान्पुमानशेषविक्रियाशून्यब्रह्मस्वरूपेण तिष्ठतीत्यर्थः । अक्षरार्थं कथयति–विप्राणामित्यादिना । तमेव स्वाभाविकं विनयं विवृणोति–यदेतदिति । एष एवेत्यात्मस्वभावो गृह्यते ॥ ८६ ॥

सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते ।
अवस्तु सोपलम्भं च शुद्धं लौकिकमिष्यते ॥ ८७ ॥

एवमन्योन्यविरुद्धत्वात्संसारकारणानि रागद्वेषदोषास्पदानि प्रावादुकानां दर्शनानि । अतो मिथ्यादर्शनानि तानीति तैर्युक्तिभिरेव दर्शयित्वा चतुष्कोटिवर्जितत्वाद्रागादिदोषानास्पदं स्वभावशान्तमद्वैतदर्शनमेव सम्यग्दर्शनमित्युपसंहृतम् । अथेदानीं स्वप्नक्रियाप्रदर्शनार्थं आरम्भः–सवस्तु संवृत्तीति । सता वस्तुना सह वर्तत इति सवस्तु । तथा चोपलब्धिरूपलम्भस्तेन सह वर्तत इति सोपलम्भं च शास्त्रादिसर्वव्यवहारास्पदं ग्रह्यग्राहकलक्षणं द्वयं लौकिकं लोकादनपेतं लौकिकं जागरितमित्येतत् । एवंलक्षणं जागरितमिष्यते वेदान्तेषु । अवस्तु संवृत्तेरप्यभावात् । सोपलम्भं वस्तुवदुपलम्भनमुपलम्भोऽसत्यपि वस्तुनि तेन सह वर्तत इति सोपलम्भं च । शुद्धं केवलं प्रविभक्तं जागरितात्स्थूललौकिकं सर्वप्राणिसाधारणत्वादिष्यते स्वप्न इत्यर्थः ॥ ८७ ॥

परमतनिराकरणमुखेनाऽऽत्मतत्त्वमवधारितम् । अधुना स्वप्नक्रियया ऽवस्थात्रयोपन्यासमुखेनापि तदवधारयितुमवस्थाद्वयमुपन्यस्यति–सवस्त्विति । वृत्तानुवादपूर्वकं प्रकरणशेषस्य तात्पर्यं दर्शयति–एवमिति । शिष्यस्याध्यारोपदृष्टिमाश्रित्य जाग्रदादिपदार्थपरिशुद्धिपूर्वको बोधप्रकारः स्वप्नक्रिया तया तस्यैवाऽऽत्मतत्त्वस्य प्रदर्शनपरो ग्रन्थशेष इत्यर्थः । तत्र जागरितमुदाहरति–सवस्त्विति । यद्धि प्रातिभासिकं

---

१ च. °भावोऽतो । २ क. °द्वान° । ३ ग. °शून्येन ब्र° । ४ ख. °णामिति त° । ५ घ. ङ. ज. तत्त्वयु° । ६ क °दानीमस्वप्नाक्रियप्र° । ७ छ. °नार्थमार° । ८ क. °वृत्तिः । स° । घ. च. °वृत्ति सत्ताव° । ङ. °वृत्तिस° । ९ क. घ. °वृतेर° । १० घ. °लम्भव° । ११ च. °स्तुत उप° । १२ क. प्रतिविविक्तं । ङ. छ. प्रविविक्तं । १३ झ. °स्थाद्वयो° । १४ ग. झ. °षता° । १५ ङ. °र्थं व्यय° । १६ घ. तच्च जा° । झ. तज्जाग° ।

व्यावहारिकं च स्थूलमर्थजातमादित्यादिदेवतानुगृहीतैरिन्द्रियैरुपलभ्यते तज्जागरितमित्यर्थः । द्वयमित्यस्यार्थमाह-शास्त्रादीति । तत्र श्लोके लोकप्रसिद्धमित्येतदुच्यते—लौकिकमिति । तद्व्याचष्टे-लोकादिति । न केवलमिदं जागरितं लोकप्रसिद्धम् । किंतु वेदान्तेष्वपि परम्परया ज्ञानोपायत्वेन प्रसिद्धमित्याह—एवंलक्षणमिति । स्वप्नोपन्यासपरमुत्तरार्धं योजयति-अवस्त्विति । बाह्येन्द्रियप्रयुक्तो व्यवहारः संवृत्तिशब्दार्थः । सोऽपि स्थूलार्थवन्न स्वप्ने संभवति । तथा च बाह्येषु करणेषूपसंहृतेषु जागरितवासनानुसारेण मनसस्तदर्थाभासाकारावभासनं स्वप्नशब्दितमित्यर्थः। शुद्धमित्यस्य केवलमिति पर्यायं गृहीत्वा विवक्षितमर्थमाह-प्रविभक्तमिति । तस्यापि लोकप्रसिद्धत्वं लौकिकमित्यनेनोक्तं तद्विवृणोति-सर्वप्राणीति॥ ॥ ८७ ॥

अवस्त्वनुपलम्भं च लोकोत्तरमिति स्मृतम् ।
ज्ञानं ज्ञेयं च विज्ञेयं सदा बुद्धैः प्रकीर्तितम् ॥ ८८ ॥

अवस्त्वनुपलम्भं च ग्राह्यग्रहणवर्जितमित्येतल्लोकोत्तरम् । अत एव लोकातीतम् । ग्राह्यग्रहणविषयो हि लौकस्तदभावात्सर्वप्रवृत्तिबीजं सुषुप्तमित्येतदेवं स्मृतं सोपायं परमार्थतत्त्वं लौकिकम् । शुद्धलौकिकं लोकोत्तरं क्रमेण येन ज्ञानेन ज्ञायते तज्ज्ञानं ज्ञेयमेतान्येव त्रीणि । एतद्व्यतिरेकेण ज्ञेयानुपपत्तेः । सर्वभावादुककल्पितवस्तुनोऽत्रैवान्तर्भावाद्विज्ञेयं परमार्थसत्यं तुर्याख्यमद्वयमजमात्मतत्त्वमित्यर्थः । सदा सर्वदैतल्लौकिकादिविज्ञेयान्तं बुद्धैः परमार्थदर्शिभिर्ब्रह्मविद्भिः प्रकीर्तितम् ॥ ८८ ॥

संप्रति सुषुप्तं दर्शयति-अवस्त्विति । स्थूलं सूक्ष्मं च वस्तु विषयभूतं यत्र न विद्यते तत्तथा । इन्द्रियार्थसंप्रयोगजन्यो वा स्थूलार्थावगाही वासनात्मको वा यत्रोपलम्भो न संभवति तदशेषविशेषविज्ञानशून्यं सुषुप्तमिति । विशिनष्टि-अनुपलम्भं चेति। नन्विदं कारणात्मना बुद्धेरवस्थानम् । न च कारणं लोके प्रसिद्धम् । कार्यस्यैवावस्थाद्वयात्मकस्य तथात्वादित्यभिप्रेत्याऽऽह—लोकोत्तरमिति । तस्य साक्षिप्रसिद्धत्वं विवक्षित्वोक्तम्-इति स्मृतमिति । ज्ञानज्ञेयात्मकावस्थात्रयं तुरीयं च परमार्थ-

---

१ झ. °कारत्वभा° । २ क. ङ. छ. ज. प्रविविक्तामिति । ३ छ. °ह्यग्राहकव° । ४ ख. लोको लोकाभा° । ५ क. छ. शुद्धं लौ° । ६ च °रं च जाग्रदादिक° । ७ ख. °ज्ञाय° । ८ छ. त्रीण्येव त° । ९ घ. °सत्त्वं तु° । च. °सत्यतु° । १० ज. °कावि° । ११ च. °ज्ञेयं तद्बुद्धैः । १२ छ. सुषुप्तिं । १३ झ. यत्र वि° । १४ ग. °लार्थविगा° । १५ झ. ञाऽत्र सोप° । १६ ख. तच्चेदं । ग. नत्विदं । १७ ग. °स्थाद्व° । १८ क. °क्तमित्याह—स्मृ° । १९ ग. झ. ज्ञानेन ज्ञे° ।

तत्त्वं विद्वदनुभवसमधिगम्यमित्याह—ज्ञानमिति । श्लोकगतं पदद्वयमनूद्य विवक्षितमर्थं कथयति—अवस्त्विति । ग्राह्यग्रहणविमार्गवर्जितत्वादेव कुतो लोकातीतत्वमित्याशङ्क्याऽऽह—ग्राह्येति । सुषुप्तं चेदं लौकिकं कथं तदवगम्यतामित्याशङ्क्याऽऽह—सर्वप्रवृत्तीति । अवस्थात्रयबीजं सुषुप्तमित्येतत्प्रसिद्धं शास्त्रविदामित्याह—एवमिति । अवस्थात्रयमेवमुक्त्वा ज्ञानपदार्थं कथयति—सोपायमिति । ज्ञानमत्र मनोवृत्तिरूपं विवक्षितमवस्थात्रयातिरिक्तमपि परीक्षकपरिकल्पितं ज्ञेयं संभवतीत्याशङ्क्याऽऽह—सर्वैरिति । सर्वैरेव प्रावादुकैः शुष्कतर्कजल्पनशीलैः परिकल्पितस्य कार्यकारणादिरूपवस्तुनोऽवस्थात्रये नियमेनान्तर्भावाज्ज्ञेयान्तरं नास्तीत्यर्थः । ज्ञेयमेव विशेषेण ज्ञेयं विज्ञेयमुच्यते तेन तदपि नावस्थात्रयातिरिक्तमस्तीत्याशङ्क्याऽऽह—विज्ञेयमिति । उपायोपेयभूते यथोक्तेऽर्थे विदुषाममिमतिमादर्शयति—सदेति ॥८८॥

ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयम् ।
सर्वज्ञता हि सर्वत्र भवतीह महाधियः ॥ ८९ ॥

ज्ञाने च लौकिकादिविषये । ज्ञेये च लौकिकादौ त्रिविधे । पूर्वं लौकिकं स्थूलम् । तदभावेन पश्चाच्छुद्धं लौकिकम् । तदभावेन लोकोत्तरमित्येवं क्रमेण स्थानत्रयाभावेन परमार्थसत्ये तुर्येऽद्वयेऽजेऽभये विदिते स्वयमेवाऽऽत्मस्वरूपमेव सर्वज्ञता सर्वश्चासौ ज्ञश्च सर्वज्ञस्तद्भावः सर्वज्ञता । इहास्मिँल्लोके भवति महाधियो महाबुद्धेः । सर्वलोकातिशयवस्तुविषयबुद्धित्वादेवंविदः सर्वत्र सर्वदा भवति । सकृद्विदिते स्वरूपे व्यभिचाराभावादित्यर्थः । न हि परमार्थविदो ज्ञानोद्भवाभिभवौ स्तो यथाऽन्येषां प्रावादुकानाम् ॥ ८९ ॥

आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीति श्रुत्या यत्प्रतिज्ञातं तदुक्तवस्तुज्ञाने फलतीति कथयति—ज्ञाने चेति । ज्ञानज्ञेयवेदने विवक्षितं क्रममनुक्रामति—पूर्वमित्यादिना । यत्पुनरवस्थात्रयातीतं तुरीयं तत्परिज्ञाने विवक्षितं क्रमं दर्शयति—स्थानेति । तुर्ये विदिते सतीति संबन्धः । तस्य स्थानत्रयात्मद्वैताभावोपलक्षितत्वमाह—अद्वय इति । जन्मादिसर्वविक्रियारहितत्वे कौटस्थ्यं कथयति—अज इति । कार्यसंबन्धस्तत्र नास्तीति वक्तुं कारणभूताविद्यासंबन्धाभावमभिदधाति—अभय इति । यथोक्ततत्त्व-

---

१ ग. °गविव° । २ ग. घ. ज. °नमात्र° । ३ घ °जनन° । ४ ग. झ. °लैः क° । ५ ख. ग. घ. छ. °पाय व° । ६ छ. तेनेदमपि । ७ घ. °ने लौ° । ८ क. झ. °धे च पू° । घ. ङ. °धे सर्वं । ९ च. °च्छुद्धलौ° । १० छ. °तं वस्तु त° । ११ ग. झ. °यज्ञाने । १२ घ. ङ. °ति । सर्व° । १३ क. कौटस्थं ।

ज्ञानस्य परिपूर्णब्रह्मरूपेणावस्थानं फलमाह—स्वयमेवेति । ज्ञानवतो यथोक्तं फलमचिरादिमार्गायत्तमिति शङ्कां वारयति—इहेति । उक्तज्ञानवतो महाबुद्धित्वे हेतुमाह—सर्वलोकेति । ज्ञानवतो यथोक्तं ज्ञानं कदाचिद्भवेत्(वदपि) कालान्तरेऽभिभूतमसत्कल्पं भविष्यतीत्याशङ्क्याऽऽह— एवंविद इति । श्रुत्याचार्यप्रसादाद्विदिते स्वरूपे स्वरूपस्फुरणस्य व्यभिचाराभावात्परिपूर्णज्ञप्तिरूपता विदुषो भवतीत्युक्तं स्फुटयति— न हीति ॥ ८९ ॥

ज्ञेयज्ञेयाप्यपाक्यानि विज्ञेयान्यग्रयाणतः ।
तेषामन्यत्र विज्ञेयादुपलम्भस्त्रिषु स्मृतः ॥ ९० ॥

लौकिकादीनां क्रमेण ज्ञेयत्वेन निर्देशादस्तित्वाशङ्का परमार्थतो मा भूदित्याह—हेयानि च लौकिकादीनि त्रीणि जागरितस्वप्नसुषुप्तान्यात्मन्यसत्त्वेन रज्ज्वां सर्पवद्धातव्यानीत्यर्थः । ज्ञेयमिह चतुष्कोटिवर्जितं परमार्थतत्त्वम् । आप्यान्याप्तव्यानि त्यक्तबाह्यैषणात्रयेण भिक्षुणा पाण्डित्यबाल्यमौनाख्यानि साधनानि । पाक्यानि रागद्वेषमोहादयो दोषाः कषायाख्यानि(णि) पक्तव्यानि । सर्वाण्येतानि हेयज्ञेयाप्यपाक्यानि विज्ञेषाणि भिक्षुणोपायत्वेनेत्यर्थः । अग्रयाणतः प्रथमतस्तेषां हेयादीनामन्यत्र विज्ञेयात्परमार्थसत्यं विज्ञेयं ब्रह्मैकं वर्जयित्वा । उपलम्भनमुपलम्भोऽविद्याकल्पनामात्रम् । हेयाप्यपाक्येषु त्रिष्वपि स्मृतो ब्रह्मविद्भिर्न परमार्थसत्यता त्रयाणामित्यर्थः ॥ ९० ॥

अवस्थात्रयस्य ज्ञेयत्वनिर्देशात्परमार्थतोऽस्तित्वमाशङ्क्य परिहरति—हेयेति । शङ्कोत्तरत्वेन श्लोकमवतार्य हेयशब्दार्थं व्याचष्टे—लौकिकादीनामिति । तान्येव त्रीणि विभजते—जागरितेति । पाण्डित्यं वेदान्ततात्पर्याभिज्ञत्वमाद्वितयिवस्तुविचारचातुर्यपरिनिष्पन्नं श्रवणम् । बाल्यं दम्भदर्पाहंकारादिराहित्यम्, युक्तितः श्रुतेरर्थानुसंधानकुशलत्वम् । मौनं मुनेः कर्म ज्ञानाभ्यासलक्षणं निदिध्यासनशब्दितम् । तान्येतान्याप्तव्यानि । यद्यपि ज्ञेयस्य विज्ञेयत्वं युक्तं तथाऽपि कथं हेयादीनां विज्ञेयत्वमित्याशङ्क्याऽऽह—उपायत्वेनेति । तदेव प्रकटयितुं प्रथमत इत्युक्तम् । उत्तरार्धं व्याचष्टे—तेषामिति । हेयादीनां रज्जुसर्पवदविद्याकल्पितत्वान्नास्ति परमार्थत्वशङ्केत्यर्थः ॥ ९० ॥

---

१ ज्ञ. °णरू° । २ छ. °ज्ञस्वरू° । ३ ग. ज्ञ. °तुफलमा° । ४ क. छ. °वेऽपि का° । ५ छ. °णत्य° । ६ ज्ञ. उपाल° । ७ ज्ञ. °मुपाल° । ८ ख. घ. ङ. ज. °ल्पनमा° । ९ ग ज्ञ. श्लोकार्थम° । १० ग. °दिच्चातु° । ११ छ. दम्भाहं° । १२ घ. ङ. ज. °तानु° । १३ घ. ज्ञ. °पि विज्ञे° । १४ . °यत्वमुक्तं । १५ ग. ज्ञ. °र्थश्च° ।

प्रकृत्याऽऽकाशवज्ज्ञेयाः सर्वे धर्मा अनादयः।
विद्यते न हि नानात्वं तेषां क्वचन किंचन ॥ ९१ ॥

परमार्थतस्तु प्रकृत्या स्वभावत आकाशवदाकाशतुल्याः सूक्ष्मनिरञ्जनसर्वगतत्वैः सर्वे धर्मा आत्मानो ज्ञेया मुमुक्षुभिरनादयो नित्याः। बहुवचनकृतभेदाशङ्कां निराकुर्वन्नाह—क्वचन किंचन किंचिदणुमात्रमपि तेषां न विद्यते नानात्वमिति ॥ ९१ ॥

यदुक्तं ज्ञेयं चतुष्कोटिवर्जितं परमार्थतत्त्वमिति तदिदानीं स्फुटयति—प्रकृत्येति। बहुवचनप्रयोगप्राप्तं दोषं प्रत्यादिशति—विद्यत इति। कल्पितभेदनिबन्धनं बहुवचनमित्यर्थः। क्वचनेति देशकालावस्थाग्रहणम्। अणुमात्रमपीति कार्यकारणभावस्वांशांशिभावस्य चोपादानम् ॥ ९१ ॥

आदिबुद्धाः प्रकृत्यैव सर्वे धर्माः सुनिश्चिताः।
यस्यैवं भवति क्षान्तिः सोऽमृतत्वाय कल्पते ॥ ९२ ॥

ज्ञेयताऽपि धर्माणां संवृत्यैव न परमार्थत इत्याह—यस्मादादौ बुद्धा आदिबुद्धाः प्रकृत्यैव स्वभावत एव यथा नित्यप्रकाशस्वरूपः सवितेवं नित्यबोधस्वरूपा इत्यर्थः। सर्वे धर्माः सर्व आत्मानः। न च तेषां निश्चयः कर्तव्यो नित्यनिश्चितस्वरूपा इत्यर्थः। न संदिह्यमानस्वरूपा एवं नैवं चेति। यस्य मुमुक्षोरेवं यथोक्तप्रकारेण सर्वदा बोधनिश्चयनिरपेक्षताऽऽत्मार्थं परार्थं वा यथा सविता नित्यं प्रकाशान्तरनिरपेक्षः स्वार्थं परार्थं चेत्येवं भवति क्षान्तिर्बोधकर्तव्यतानिरपेक्षता सर्वदा स्वात्मनि सोऽमृतत्वायामृतभावाय कल्पते। मोक्षाय समर्थो भवतीत्यर्थः ॥ ९२ ॥

ज्ञेयशब्दप्रयोगान्मुख्यमेव ज्ञेयत्वं प्राप्तं प्रत्युदस्यति—आदिबुद्धा इति। यथोक्तरीत्या समुत्पन्नस्य ज्ञानस्य फलमाह—यस्येति। प्रथमपादस्य तात्पर्यमाह—ज्ञेयताऽपीति। उक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेति। पादान्तरस्यार्थं कथयति—न चेति। निश्चितस्वरूपत्वमेव व्यतिरेकद्वारा स्फोरयति—नेत्यादिना। न खल्वात्मा स्वसत्तायामेवं नैवमिति संदिह्यमानस्वरूपो भवितुमर्हति। तस्य स्फुरणाव्यभिचारात्तद्रूपत्वस्य प्रागेव साधितत्वादित्यर्थः। द्वितीयार्धं व्याकरोति—यस्ये-

---

१ छ. °वत्सर्वे ज्ञेया ध°। २ क. °गतत्वे स°। छ. °गत्वे स°। ३ क. च. ङ. ज. आत्मनो। ४ घ. °भेदश°। ५ ख. किंचि°। ६ ग. झ. प्राप्तदो°। ७ झ. बुद्धाः। ८ च. °र्थः। न स°। ९ छ. सर्वधं°। १० छ. ज. झ. आत्मनः। ११ छ. निश्चयस्व°। १२ झ. °र्थं वेत्ये°। १३ च. °दाऽऽत्म°। १४ ज. °र्थो न भ°। १५ ज. 'सं व्युद्°। १६ ज. °त्मा स°। १७ क. घ. झ. °स्य°।

त्यादिना । आत्मस्वरूपस्य स्फुरद्रूपत्वं यथोक्तप्रकारः । बोधाख्यो निश्चयो बोध-निश्चयस्तस्मिन्निरपेक्षत्वं स्वार्थमन्यार्थं वा यस्य भवति सोऽमृतत्वाय कल्पत इति संबन्धः । तदेव दृष्टान्तेन साधयति—यथेत्यादिना । इतिशब्दो यथेत्यनेन संबध्यते ॥ ९२ ॥

आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव सुनिर्वृताः ।
सर्वे धर्माः समाभिन्ना अजं साम्यं विशारदम् ॥९३॥

तथा नापि शान्तिकर्तव्यताऽऽत्मनीत्याह—यस्मादादिशान्ता नित्यमेव शान्ता अनुत्पन्ना अजाश्च प्रकृत्यैव सुनिर्वृताः सुष्ठूपरतस्वभावा इत्यर्थः । सर्वे धर्माः समाश्चाभिन्नाश्च समाभिन्ना अजं साम्यं विशारदं विशुद्धमात्मतत्त्वं यस्मात्तस्माच्छान्तिर्मोक्षो वा नास्ति कर्तव्य इत्यर्थः । न हि नित्यैकस्वभावस्य कृतं किंचिदर्थवत्स्यात् ॥ ९३ ॥

सोऽमृतत्वायेत्यादिवचनादागन्तुकममृतत्वं प्रत्युदस्यति—आदिशान्ता इति । श्लोकस्य तात्पर्यमक्षरार्थं च निर्दिशति—तथा नापीत्यादिना । उक्तमेवार्थं चतुर्थपादेन संक्षिप्य दर्शयति—अजमिति । श्लोकार्थमुपसंहरति—विशुद्धमिति । उक्तरूपतानङ्गीकारे मोक्षस्यापुरुषार्थता स्यादित्याह—न हीति । संसारदुःखोपशमनं सुखजन्म वा यदि क्रियेत तदा कृतकस्यानित्यत्वमवर्जनीयमित्यर्थः ॥ ९३ ॥

वैशारद्यं तु वै नास्ति भेदे विचरतां सदा ।
भेदनिघ्नाः पृथग्वादास्तस्मात्ते कृपणाः स्मृताः ॥९४॥

ये यथोक्तं परमार्थतत्त्वं प्रतिपन्नास्त एवाकृपणा लोके कृपणा एवान्य इत्याह—यस्माद्भेदनिघ्ना भेदानुयायिनः संसारानुगा इत्यर्थः । के । पृथग्वादाः पृथङ्नाना वैतथ्यमेवं वदनं येषां ते पृथग्वादा द्वैतिन इत्यर्थः । तस्मात्ते कृपणाः क्षुद्राः स्मृता यस्माद्वैशारद्यं विशुद्धिर्नास्ति तेषां भेदे विचरतां द्वैतमार्गेऽविद्याकल्पिते सर्वदा वर्तमानानामित्यर्थः । अतो युक्तमेव तेषां कार्पण्यमित्यभिप्रायः ॥ ९४ ॥

इदानीं मुमुक्षुप्रबोधनार्थमविद्वन्निन्दां दर्शयति—वैशारद्यं त्विति । श्लोकस्य तात्पर्यं दर्शयति—ये यथोक्तमिति । उत्तरार्धमादौ योजयति—यस्मादिति ।

---

१ क. °ोक्तं प्र° । २ झ. बोद्धव्यो नि° । ३ ज. निर्मिताः । ४ च. °थाऽपि न शा° । ५ क. °रस्वं° । ६ ग. छ. झ. °त्वं प्राप्तं तत्प्रत्यु° । ७ घ. °रूपान° । ८ ज. झ. सुखं ज° । ९ घ. °इयं भवतीत्य° । १० च. °के अन्ये कृपण एवेत्या । ११ क. °णास्त्वन्य° । १२ च. वस्त्वस्तीत्येवं ।

तस्मादित्युत्तरेणास्य संबन्धः। प्रथमार्धमुक्तेऽर्थे हेतुत्वेन व्याचष्टे—यस्मादित्यादिना। समनन्तरोक्तस्य यस्मादित्यस्यापेक्षितं पूरयति—अत इति ॥ ९४ ॥

अजे साम्ये तु ये केचिद्भविष्यन्ति सुनिश्चिताः।
ते हि लोके महाज्ञानास्तव लोको न गाहते ॥ ९५ ॥

यदिदं परमार्थतत्त्वममहात्मभिरपण्डितैर्वेदान्तबहिष्ठैः क्षुद्रैरल्पप्रज्ञैरनवगाह्यमित्याह—अजे साम्ये परमार्थतत्त्व एवमेवेति ये केचित्स्त्र्यादयोऽपि सुनिश्चिता भविष्यन्ति चेत्तं एवं हि लोके महाज्ञाना निरतिशयतत्त्वविषयज्ञाना इत्यर्थः। तच्च तेषां वर्त्म तेषां विदितं परमार्थतत्त्वं सामान्यबुद्धिरन्यो लोको न गाहते नावतरति न विषयी करोतीत्यर्थः।

" सर्वभूतात्मभूतस्य सर्वभूतहितस्य च।
देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः॥
शकुनीनामिवाऽऽकाशे गतिर्नैवोपलभ्यते "।

इत्यादिस्मरणात् ॥ ९५ ॥

एवमविद्वन्निन्दां प्रदर्श्य विद्वत्प्रशंसां प्रसारयति—अज इति। कूटस्थे वस्तुनि निर्विशेषे येषामसंभावनाविपरीतभावनाविरहि निर्धारणरूपं विज्ञानं संभावनोपनीतमस्ति ते हि व्यवहारभूमौ महति निरतिशये तत्त्वे परिज्ञानवत्त्वान्महानुभावा भवन्तीत्यर्थः। ननु तत्त्वविषयज्ञानस्य सर्वलोके साधारणत्वात्तत्त्वज्ञानवतां किमिति प्रशंसा प्रस्तूयते तत्राऽऽह—तच्चेति। श्लोकस्य तात्पर्यमाह—यदिदमिति। यदित्युपक्रमात्तदमहात्मभिरनवगाह्यमिति योजनीयम्। अमहात्मत्वं क्षुद्रहृदयत्वम्। तत्र हेतुः—अपण्डितैरिति। अपाण्डित्यं विवेकरहितत्वम्। तत्र हेतुर्वेदान्तेत्यादिना सूच्यते। तेषां पौर्वापर्येण पर्यालोचनापरिचयपराङ्मुखैरित्यर्थः। विचारचातुर्याभावादेव पदार्थवाक्यार्थविभागावगमशून्यत्वमाह—अल्पप्रज्ञैरिति। तर्हि पारमार्थिके तत्त्वे केषामेव मनीषा समुन्मिषेदित्याशङ्क्य येषां केषांचिदेव तन्निष्ठानामित्याह—

---

१ च. °हिष्कृतैः। क्षु°। २ क. °ल्पज्ञै°। ३ च. °तर्हि त एव। ४ झ. °व लो°। ५ ब. °ज्ञानिनि°। ६ च. तच्चैषां। ७ घ. °र्यं क°। ८ क. °वा मार्गेऽपि मु°। झ. °मापि°। ९ क. ङ. °ह्यन्ति ह्यप°। १० घ. ङ. ज. झ. °कुनाना°। ११ झ. °पपद्यते। १२ ख. घ. ङ. °टस्थव°। १३ झ. °र्णं रू°। १४ क. छ. °ज्ञानसं°। ज. °ज्ञाने सं°। झ. °ज्ञातत्त्वसं°। १५ घ. ङ. °ज्ञातव°। १६ ग. झ. °लोकसा°। १७ ग. झ. °चनप°। १८ ग. झ. °चार्यभा°। १९ ग. °भेवं म°।

ये केचिदिति । स्त्र्यादीनामुपनिषदूद्वारा ज्ञानाधिकारामावेऽपि द्वारान्तरप्रयुक्तस्तदधिकारः संभवतीत्यभिप्रेत्यापीत्युक्तम् । तत्त्वज्ञानस्य दुर्लभत्वमभ्युपेत्य चेदित्युक्तम् । चतुर्थपादं व्याचष्टे—तत्रेति । ज्ञानवतां विज्ञातं परमार्थतत्त्वमन्येषामनवगाह्यमित्यत्र प्रमाणमाह—सर्वभूतेति । सर्वेषां भूतानां ब्रह्मादीनां स्तम्बपर्यन्तानामात्मा परं ब्रह्म तज्ज्ञतस्य विदुषः सर्वत्राऽऽत्मभूतस्य सर्वेषु भूतेषु निरुपचरितस्वरूपत्वादेव परमहितस्य परमप्रेमास्पदत्वादेव परमसुखात्मकस्य प्राप्यपुरुषार्थविरहिणो मार्गे देवा विद्यावन्तोऽपि पदमन्वेषमाणा विविधं मोहमुपगच्छन्तीत्यर्थः । महात्मनो ज्ञानवतो गन्तव्यपदरहितस्य परिपूर्णस्य गतिरवगन्तुमशक्येति निदर्शनवशेन विशदयति—शकुनीनामिति ॥ ९५ ॥

अजेष्वजमसंक्रान्तं धर्मेषु ज्ञानमिष्यते ।
यतो न क्रमते ज्ञानमसङ्गं तेन कीर्तितम् ॥ ९६ ॥

कथं महाज्ञानत्वमित्याह—अजेष्वनुत्पन्नेष्वचलेषु धर्मेष्वात्मस्वजमचलं च ज्ञानमिष्यते सवितरीवौष्ण्यं प्रकाशश्च यतस्तस्मादसंक्रान्तमर्थान्तरे ज्ञानमजमिष्यते । यस्मान्न क्रमतेऽर्थान्तरे ज्ञानं तेन कारणेनासङ्गं तत्कीर्तितमाकाशकल्पमित्युक्तम् ॥ ९६ ॥

अजं साम्यमित्युक्तं प्रमेयम् । तद्विषयनिश्चयवान्प्रमाता । प्रमाणं तथाविधनिश्चयज्ञानमिति । वस्तुपरिच्छेदे कथं महाज्ञानत्वमित्याशङ्क्याऽऽह—अजेष्विति । अजा धर्माश्चित्प्रतिबिम्बा जीवा विवक्ष्यन्ते । तेष्वजं ज्ञानं कूटस्थदृष्टिरूपं बिम्बकल्पं ब्रह्माचलमात्मभूतमभ्युपगम्यते । तथा च मानमेयादिभावस्य कल्पितत्वेऽपि वस्तुतो वस्तुपरिच्छेदाभावादुपपन्नं तज्ज्ञानवतां महाज्ञानत्वमित्यर्थः । किंचास्मन्मते ज्ञानस्य यदसङ्गत्वमङ्गीकृतं तदपि विषयाभावादेव सिध्यति । ततश्च मुक्त्यै निर्विषयं मन इति यदुच्यते तदप्यविरुद्धमित्याह—यतो नेति । आकाङ्क्षापूर्वकं पूर्वार्धं योजयति—कथमित्यादिना । उत्तरार्धं व्याचष्टे—यस्मान्नेति । नित्यविज्ञप्तिरूपस्याऽऽत्मनोऽसङ्गत्वं प्रागपि सूचितमित्याह—आकाशेति ॥ ९६ ॥

अणुमात्रेऽपि वैधर्म्ये जायमानेऽविपश्चितः ।
असङ्गता सदा नास्ति किमुताऽऽवरणच्युतिः ॥ ९७ ॥

---

१ छ. °नाभा° । २ ख. घ. ङ. सर्वभूतात्म° । छ. सर्वात्म° । ३ ग. °तरू° । ४ ग. झ. °परप्रे° । ५ घ. ङ. ज. झ. शकुनानामिति । ६ च. °र्थं तेषां महाज्ञानवत्त्वमित्यत आह । ७ झ. °लं ज्ञा° । ८ च. °न्न संक्र° । ९ घ. ङ. ज. °मिति । ह्युऽक्त° । १० घ. ज. °धज्ञा° । ११ ग. तत्प्रज्ञान° । १२ छ. °नवत्त्वमि° । १३ क. °थयभा° । १४ ग. झ. मुक्तेर्निर्वि° । १५ ज. °प्तिस्वरूपस्या°

इतोऽन्येषां वादिनामणुमात्रेऽल्पेऽपि वैधर्म्ये वस्तुनि बहिरन्तर्वा जायमान उत्पाद्यपानेऽविपश्चितोऽविवेकिनोऽसङ्गस्याऽसङ्गत्वं सदा नास्ति किंमुत वक्तव्यमावरणच्युतिर्बन्धनाशो नास्तीति ॥ ९७ ॥

कूटस्थं ब्रह्मैव तत्त्वमिति स्वमते ज्ञानमसङ्गं सिध्यतीत्युक्तम् । मतान्तरे पुनः सविषयत्वाज्ज्ञानस्यासङ्गत्वमसंयतं प्रसज्येतेत्याह—अणुमात्रेऽपीति । अविद्वद्दृष्ट्या कस्यचिदपि पदार्थस्य जन्माङ्गीकारे ज्ञानस्य तदनुषङ्गित्वेनासङ्गत्वायोगे बन्धध्वंसलक्षणं प्रयोजनं दूरापास्तं भवतीत्याह—किमुतेति । श्लोकाक्षराणि व्याकरोति—इत इति । विद्वानद्वैतवादी पञ्चम्या परामृश्यते ॥ ९७ ॥

अलब्धावरणाः सर्वे धर्माः प्रकृतिनिर्मलाः ।
आदौ बुद्धास्तथा मुक्ता बुध्यन्त इति नायकाः ॥ ९८ ॥

तेषामावरणच्युतिर्नास्तीति ब्रुवतां स्वसिद्धान्तेऽभ्युपगतं तर्हि धर्माणामावरणम् । नेत्युच्यते । अलब्धावरणाः । अलब्धमप्राप्तमावरणमविद्यादिबन्धनं येषां ते धर्मा अलब्धावरणा बन्धनरहिता इत्यर्थः । प्रकृतिनिर्मलाः स्वभावशुद्धा आदौ बद्धास्तथा मुक्ता यस्मान्नित्यबुद्धशुद्धमुक्तस्वभावाः । यद्येवं कथं तर्हि बुध्यन्त इत्युच्यते । नायकाः स्वामिनः समर्था बोद्धुं बोधशक्तिमत्स्वभावा इत्यर्थः । यथा नित्यप्रकाशस्वरूपोऽपि सविता प्रकाशत इत्युच्यते यथा वा नित्यनिवृत्तगतयोऽपि नित्यमेव शैलास्तिष्ठन्तीत्युच्यते तद्वत् ॥९८॥

न चेदावरणच्युतिरिष्यते तर्हि स्वीकृतमावरणमित्याशङ्क्याऽऽह—अलब्धेति । बोद्धृत्वं तर्हि कथमित्याशङ्क्य बोधनशक्तिमत्त्वादित्याह—बुध्यन्त इति । शैङ्कोत्तरत्वे श्लोकमवतारयति—तेषामित्यादिना । अविद्वद्दृष्टेश्चाविद्यावरणं सिध्यति न तत्त्वदृष्टेत्येमिप्रेत्य व्याचष्टे—अलब्धेति । उक्तेऽर्थे हेतुकथनार्थं विशेषणत्रयमित्याह—यस्मादिति । तस्माद्बन्धनरहिता इति पूर्वेण संबन्धः । आत्मनो यथोक्तस्वभावत्वे बोद्धृत्वं न सिध्यतीत्याक्षिपति—यद्येवमिति । पादान्तरेणोत्तरमाह—उच्यत इति । मुख्यावेव क्रियाकर्तारौ प्रकृतिप्रत्ययाभ्यामभिधेयावित्याशङ्क्य नियममुदाहरणाभ्यां निरस्यति—यथेत्यादिना ॥ ९८ ॥

---

१ ख. घ. ङ. ज. °षां तु वा° । २ ख. °ङ्गत्वं । ३ झ. °त्वं ना° । ४ क. छ. किमु । ५ च. °ति ॥९७॥ अलब्धावरणाः । ६ क. °नः स्वावि° । ७ झ. °गेऽत्वं दृ° । ८ ख. °क्षणप्र° । ९ घ. °णतेत्यु° । १० ज. झ. °रणव° । ११ घ. °त्यबु° । १२ झ. बोध° । १३ च. °श इ° । १४ ख. छ. झ. °त्युच्यन्ते त° । १५ ग. झ शङ्कान्तरं । १६ क. बोधत्वं । १७ झ. °वेवाकि° ।

क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तापि(यि)नः ।
सर्वे धर्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितम् ॥ ९९ ॥

यस्मान्न हि क्रमते बुद्धस्य परमार्थदर्शिनो ज्ञानं विषयान्तरेषु धर्मेषु धर्मसंस्थं सवितरीव प्रभा । तापि(यि)नः, तापोऽ(योऽ)स्यास्तीति तापी(यी), संतानवतो निरन्तरस्याऽऽकाशकल्पस्येत्यर्थः । पूजावतो वा प्रज्ञावतो वा सर्वे धर्मा आत्मानोऽपि तथा ज्ञानवदेवाऽऽकाशकल्पत्वान्न क्रमन्ते क्वचिदप्यर्थान्तर इत्यर्थः । यदादावुपन्यस्तं ज्ञानेनाऽऽकाशकल्पेनेत्यादि तदिदमाकाशकल्पस्य तापि(यि)नो बुद्धस्य तदनन्यत्वादाकाशकल्पं ज्ञानं न क्रमते क्वचिदप्यर्थान्तरे तथा धर्मा इति । आकाशमिवाचलमविक्रियं निरवयवं नित्यमद्वितीयमसङ्गमदृश्यमग्राह्यमशनायाद्यतीतं ब्रह्मात्मतत्त्वम् । "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतेः । ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वमद्वयमेतन्न बुद्धेन भाषितम् । यद्यपि बाह्यार्थनिराकरणं ज्ञानमात्रकल्पना चाद्वयवस्तुसामीप्यमुक्तम् । इदं तु परमार्थतत्त्वमद्वैतं वेदान्तेष्वेव विज्ञेयमित्यर्थः ॥ ९९ ॥

किमिति मुख्ये बोद्धृत्वे संभाविते तदेव नेष्टमित्याशङ्क्य ज्ञानस्य विद्वद्दृष्टया विषयसंबन्धासंभवादित्याह-क्रमत इति । किंच जीवानां ब्रह्मात्मना विभुत्वादाकाशवत्क्रियासमवायायोगान्न मुख्यं बोद्धृत्वं सेद्धुमलमित्याह-सर्व इति । ज्ञानमात्रं पारमार्थिकं तत्रैव ज्ञातृज्ञेयादि कल्पितमिति सौगतमतमेव भवताऽपि संगृहीतमित्याशङ्क्याऽऽह-ज्ञानमिति । तत्र पूर्वार्धाक्षराणि व्याकरोति— यस्मादिति । यद्धि परमार्थदर्शिनो ज्ञानं तन्न विषयान्तरेषु क्रमते किं तु सवितरि प्रकाशवदात्मन्येव प्रतिष्ठितं यस्मादिष्यते तस्मान्नास्मिन्मुख्यं बोद्धृत्वं सेद्धुमर्हतीत्यर्थः । परमार्थदर्शिनो विशेषणम्-तापि(यि)न इति । तदव्याचष्टे-तापोऽ(योऽ)स्येत्यादिना । आत्मनो मुख्यस्य बोद्धृत्वस्याभावे हेत्वन्तरम्-सर्वे धर्मास्तथेति । तद्विभजते-सर्व इत्यादिना । प्रकरणादावुक्तमेव किमर्थं पुनरिहोच्यते तत्राऽऽह-यदादाविति । तदिदमिहोपसंहृतमिति शेषः । क्रमते न हीत्यादेरक्षरार्थमुपसंहरति—आकाशकल्पस्येति । सर्वे धर्मास्तथेत्यस्यार्थं निगमयति-तथेति । धर्मा न क्रमन्ते क्वचिदपीति शेषः । तथा च नाऽऽत्मनि मुख्यं

---

१ च. °तरि प्र° । २ छ. °पो यस्या° । ३ क. छ. °पी तस्य सं° । ४ क. च. तापव° । ५ क. ग. च. ज. आत्मनोऽ° । ६ झ. °र्यान्त इ° । ७ छ. °मसद° । ८ छ. °न्न भाषितं बुद्धेन ब° । ९ च. भावितम् । १० च. °रणज्ञा° । ११ च. मात्रं क° । १२ ग. झ. °न्धाभावा° । १३ ग. झ. तदेव । १४ ज. °तमेव । १५ क. °मुख्यत्वं । १६ ज. °मात्मद° । १७ छ. °पो यस्यें° । १८ ग. झ. °ल्यबो° । १९ ङ. सर्वध° ।

बोद्धृत्वं किंत्वौपचारिकमिति प्रकृतमुपसंहर्तुमितिशब्दः। पूर्वार्धस्य तात्पर्यमाह—आकाशमिति। ज्ञानमित्यादि व्याचष्टे—ज्ञानेति। सकलभेदविकलं परिपूर्णमनादिनिधनं ज्ञप्तिमात्रमुपनिषदेकसमधिगम्यं तत्त्वमिह प्रतिपाद्यते। मतान्तरे तु नैवमिति कुतो मतसांकर्याशङ्काऽवकाशमासादयेदित्यर्थः॥ ९९॥

दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम्।
बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलम्॥ १००॥

इति गौडपादाचार्यकृता माण्डूक्योपनिषत्कारिकाः संपूर्णाः। ॐ तत्सत्।

====

शास्त्रसमाप्तौ परमार्थतत्त्वस्तुत्यर्थं नमस्कार उच्यते। दुर्दर्शं दुःखेन दर्शनमस्येति दुर्दर्शम्। अस्ति नास्तीति चतुष्कोटिवर्जितत्वादतिदुर्विज्ञेयमित्यर्थः। अत एवातिगम्भीरं दुष्प्रवेशं महासमुद्रवदकृतप्रज्ञैः। अजं साम्यं विशारदम्। ईदृक्पदमनानात्वं नानात्ववर्जितं बुद्ध्वाऽवगम्यं तद्भूताः सन्तो नमस्कुर्मस्तस्मै पदाय। अव्यवहार्यमपि व्यवहारगोचरमापाद्य यथाबलं यथाशक्तीत्यर्थः॥ १००॥

प्रकरणचतुष्टयविशिष्टस्य शास्त्रस्याऽऽदाविवान्तेऽपि परदेवतातत्त्वमनुस्मरंस्तन्नमस्काररूपं मङ्गलाचरणं संपादयति—दुर्दर्शमिति। दुर्विज्ञेयत्वे प्रत्यक्षादिप्रमाणानधिगम्यत्वं हेतुं विवक्षित्वा विशिनष्टि—अतिगम्भीरमिति। प्रत्यक्षादिभिरनवगाह्यत्वे कूटस्थत्वं निर्विशेषत्वं सर्वसंबन्धविधुरत्वं चेति हेतुत्रयमभिप्रेत्याऽऽह—अजमित्यादिना। विशेषणत्रयं तर्हि कुतश्चिदवगतं तन्नास्त्येवेति निश्चेतुं युक्तम्, प्रमाणाधीनत्वात्प्रमेयसिद्धेरित्याशङ्क्योपनिषद्धिरतद्धर्माध्यासापाकरणद्वारेणावगम्यमानत्वान्नैवमित्याह—पदमिति। तत्र तर्हि सकलविभागविकले कुतो नमस्कारक्रिया स्वीक्रियामर्हतीत्याशङ्क्याऽऽह—अनानात्वमिति। यद्यपि वस्तुतस्तस्मिन्नानात्वं नावकल्प्यते तथाऽपि यथासामर्थ्यं मायाबलमवलम्ब्य काल्पनिकं नानात्वमनुसृत्य नमस्कारक्रिया प्रचयादिप्रयोजनवती प्रामाणिकैरभिप्रेतेत्यर्थः। श्लोकस्य तात्पर्यमाह—शास्त्रेति। यदि परमार्थतत्त्वं शास्त्रस्याऽऽदाविवान्तेऽपि नमस्क्रियते तदा तस्याऽऽद्यन्तमध्येष्वनुसंधेय-

---

१ क. °पकारि°। २ ग. ङ. °शब्दप्रयोग.। पू°। ३ घ. ङ. °त्पर्यार्थमा°। ४ घ. °शक्लप्स्येति। ५ ख. ग. ङ. °ने विज्ञप्ति°। ६ ख. घ. ङ. °षदैक°। ७ च. °त्यर्थन°। ८ च. °स्ती. त्यादि च°। ९ ङ °दुर्ज्ञे°। १० ङ. °म्य ज्ञात्वा तं°। ११ख. छ. °रतामा°। १२ घ. ङ. ज. °दि वि°। १३ छ. °गतत्वाना°। १४ घ. °माधी°। १५ ख. घ. ङ. ज. सर्वावि°। १६ ख. °स्तुतोऽस्मि°। १७ क. °नुस्मृत्य। १८ घ. ङ. ज. शास्त्रादा°।

तया स्तुतिः सिध्यति। तेन तदर्थमादाविवावसानेऽपि प्रह्वीभावस्तद्विषयश्लोकेनोपदिश्यते। तथा च प्रतिपाद्यस्य ब्रह्मणो महामहिमत्वं समधिगतमित्यर्थः। दुर्दर्शत्वमुक्तं व्यनक्ति-अस्तीति। सर्वेषामेव यथोक्ते परमार्थतत्त्वे प्रवेशानुपपत्तिमाशङ्क्य संप्रदायरहितानां तथात्वेऽपि तद्वतां मैवमित्याह—अकृतेति। कौटस्थ्यादिसिद्ध्यर्थं व्याख्यातमेव पदत्रयमनुवदति—अजमिति। उक्तं वेदान्तैकगम्यं तत्त्वं द्वैतामावोपलक्षितमित्याह—ईदृगति। यथोक्तं ब्रह्म ज्ञात्वा ज्ञानसामर्थ्याद्ब्रह्मीभूतश्चेदाचार्यस्तर्हि कथं तस्मै नमस्कर्तुं प्रवर्तते। न हि परिपूर्णं वस्तु वस्तुतो व्यवहारगोचरतामाचरतीत्याशङ्क्याऽऽह—अव्यवहार्यमिति। परमार्थतो व्यवहारगोचरत्वेऽपि परमार्थतत्त्वस्य मायाशक्तिमनुसृत्य व्यवहारगोचरतां परिकल्प्य नमस्कारक्रिया तस्मिन्प्रयोजनवशादाश्रितेत्यर्थः ॥ १०० ॥

अजमपि जनियोगं प्रापदैश्वर्ययोगा-
दगति च गतिमत्तां प्रापदेकं ह्यनेकम्।
विविधविषयधर्मग्राहिमुग्धेक्षणानां
प्रणतभयविहन्तृ ब्रह्म यत्तन्नतोऽस्मि ॥ १ ॥

इदानीं भाष्यकारोऽपि भाष्यपरिसमाप्तौ शास्त्रप्रतिपादितपरदेवतातत्त्वमनुस्मृत्य तन्नमस्काररूपं मङ्गलाचरणमाचरति—अजमपीति। यद्ब्रह्मशब्दोपनिषत्प्रसिद्धं सर्वथा परिच्छेदरहितं तदहं प्रत्यग्भूतं नमस्ये(नतोऽस्मि) तद्विषयं प्रह्वीभावं करोमीति संबन्धः। प्रणामप्रयोजनमाह—प्रणतेति। ये हि प्रणता ब्रह्मणि प्रकटीभूतास्तन्निष्ठास्तिष्ठन्ति तेषां यदविद्यातत्कार्यात्मकं भयं तदाचार्योपदेशजनितबुद्धिवृत्तिफलकारूढं ब्रह्मैव हन्ति न खलु जडा बुद्धिवृत्तिर्वस्तुसामर्थ्यमन्तरेणाज्ञानं सकार्यमपनेतुमलम्। बुद्धीद्धो बोधो बोधेद्धा वा बुद्धिरुक्तं फलमादधातीत्यर्थः। तस्यैव ब्रह्मणः संप्रति तटस्थलक्षणं विवक्षति—अजमित्यादिना। यद्यपि जन्मादिसर्वविक्रियाशून्यं वस्तुतो ब्रह्म कूटस्थमास्थीयते तथाऽपि तदैश्वर्येण तदीयशक्त्यात्मकेनानिर्वाच्याज्ञानवैभवेन योगादाकाशादिकार्यात्मना जन्मसंबन्धं प्राप्य जगतो निदानमिति व्यपदेशभाग्भवति। तथा च श्रुतिसूत्रयोर्ब्रह्मणो जगत्कारणत्वं प्रसिद्धमित्यर्थः। यद्यपि चेदं ब्रह्म कूटस्थतया विभुतया

---

१ ख. श्रुतिः। २ क. प्रकटीभा°। ३ ख. °षयः श्लो°। ४ ख. ग. घ. °हित्वं। ५ ख. घ. ङ. ञ. °थोक्तप°। ६ ज. °पूर्णव°। ७ घ. ङ. ज. °रमा°। ८ क. °हारागो°। ९ च. °योग्यप्रा°। १० छ. °नमस्ये ॥ १० ॥ ११ घ. °दितं दे°। १२ ङ. °तात्वम°। १३ ग. छ. झ. °नुसृत्य। १४ क. प्रकटीभा°। १५ क. °डा वृ°। १६ क. °नं स्वका°। १७ क. °द्धां बु°। १८ ख. ज. झ. °रुक्तफ°। १९ झ. °क्षते। अ°। २० ग. छ. झ. °वैकि°। २१ घ. च. °ह्मणः कार°।

च गतिवर्जितमवतिष्ठते तथाऽपि यथोक्तज्ञानमाहात्म्यात्कार्यब्रह्मतां प्राप्य गतिमत्तां गन्तव्यतां वादर्थविकरणन्यायेन प्रतिपद्यते तदाह—अगतिं चेति । यद्यपि चेदं ब्रह्म वस्तुतो निरस्तसमस्तनानात्वमेकरसमद्वितीयमुपनिषद्भिरभ्युपगम्यते तथाऽपि जीवो जगदीश्वरश्चेत्येतद्वदनाद्यनिर्वाच्याविद्यावशादनेकमिव प्रतिभातीत्याह—एकमिति । केषां दृष्ट्या पुनरनेकत्वं ब्रह्मणोऽवगम्यते तदाह—विविधेति । विविधाश्च ते विषयधर्माश्च तद्ग्राहितया मुग्धं विपर्यस्तं विवेकविकलमीक्षणं येषां तेषां दृष्ट्या ब्रह्मणोऽनेकत्वधीर्न तु तत्त्वतः शान्तदृष्ट्या तु तस्मिन्नेकत्वमेव प्रामाणिकमित्यर्थः ॥ १ ॥

प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नोऽन्तरस्थं
भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समुद्रे ।
कारुण्यादुद्दधारामृतमिदममरैर्दुर्लभं भूतहेतो-
र्यस्तं पूज्याभिपूज्यं परमगुरुमुं पादपातैर्नतोऽस्मि ॥ २ ॥

संप्रति ग्रन्थप्रणयनप्रयोजनप्रदर्शनपूर्वकं परमगुरूणागमशास्त्रस्य व्याख्यातस्य प्रणेतृत्वेन व्यवस्थितान्प्रणमति—प्रज्ञेति । यो हि कारुण्यादिदं ज्ञानाख्यममृतं भूतहेतोस्तदुपकारार्थमुद्दधार तं परमगुरुं नतोऽस्मीति संबन्धः । अमुमिति तस्य पुरोदेशे संनिहितत्वेनापरोक्षत्वं सूचितम् । परमगुरुत्वं पूज्यानामपि गुरूणामतिशयेन पूज्यत्वादाचार्यस्य समधिगतमित्याह—पूज्येति । नमस्कारप्रक्रियां प्रकटयति—पादपातैरिति । पादौ तदीयौ पादौ तयोः स्वकीयस्योत्तमाङ्गस्य पातैः भूयो भूयो नम्रीभावास्तैरिति यावत् । आचार्यो ज्ञानाख्यममृतं कथंभूतमुद्धृतवानित्यपेक्षायामुक्तम्—अन्तरस्थमिति । कस्यान्तरस्थमिति विवक्षायामाह—वेदेति । कथमित्यत्राऽऽह—प्रज्ञेति । मेधासहिता प्रज्ञैव वैशाखो मन्थास्तस्य वेधो वेधनं क्षेपणं तेन क्षुभितो विलोडितो जलनिधिर्वेदनामा तस्यान्तरेऽभ्यन्तरे स्थितमिदममृतमिति यावत् । उक्तस्य ज्ञानामृतस्य प्रसिद्धादमृतादवान्तरवैषम्यमादर्शयति—अमरैरिति । यद्धि भगवता नारायणेन क्षीरसागरान्तरावस्थितममृतं समुद्धृतं तदेव कथंचिदमरा लेभिरे । इदं तु तैरनायासलभ्यं न भवति । ज्ञानसामग्रीसंपन्नैरेव लभ्यत्वादित्यर्थः । यदि कारुण्यादिदममृतमाचार्येण वेदोदधेर्भूतोपकारार्थमुद्धृतं कथं तर्हि कारुण्यं तस्य प्रादुरभूदित्याशङ्क्याऽऽह—भूतानीति । योऽयं समुद्रवदुद्दुरुत्तारः संसारस्तस्मिन्नविर-

---

१ क. °ष्ठति त° । २ छ. °मतां ग° । ३ ग. °था जी° । ४ ख. °णोरग° । ५ ग. ङ. °विरला° । ६ ख. ङ. छ. ज. शास्त्रद्दृ° । घ. शास्त्रतो दृ° । ७ घ. °गुरुगम्भशा° । ८ घ. ङ. ज. °शे च सं° । ९ ज. सूचयति । १० ङ. °शयत्वेन । ११ ङ. पूज्यावा° । १२ ङ. प्रकथयति । १३ ख. °यौ त° । १४ ख. °कीयोत्त° । १५ ग. ङ. °ता भूयो न° । १६ ख. मन्धस्त° ।

तमनवरतं संततमेव यानि जननानि विग्रहभेदग्रहणानि तान्येव ग्राहा जलचरास्तैर्घोरे क्रूरे भयंकरे मज्ञानि मग्नसंकल्पानि परवशानि भूतान्युपलभ्य कारुण्यमाचार्यस्य प्रादुरासीत्। ततश्चेदममृतमुद्धृत्य भूतेभ्यो दत्त्वा तानि रक्षितवानित्यर्थः ॥ २ ॥

यत्प्रज्ञालोकभासा प्रतिहतिमगमत्स्वान्तमोहान्धकारो
मज्जोन्मज्जच्च घोरे ह्यसकृदुपजनोदन्वतित्रासने मे।
यत्पादावाश्रितानां श्रुतिशमविनयप्राप्तिरुद्धा ह्यमोघा
तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैर्नमस्ये ॥ ३ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतौ गौडपादीयागमशास्त्रविवरणेऽलातशान्त्याख्यं चतुर्थप्रकरणं समाप्तम् ॥ ४ ॥

ॐ तत्सत्।

अथाधुना स्वगुरुभक्तेर्विद्याप्राप्तावन्तरङ्गत्वमङ्गीकृत्य तदीयपादसरसीरुहयुगलं प्रणमति—यत्प्रज्ञेति। तेषामस्मद्गुरूणां पादौ सर्वभावैर्वाङ्मनोदेहानां ह्रीभावैर्नमस्ये नम्री भवामीति संबन्धः। तौ च जगतः सर्वस्यापि पावनीयौ पवित्रतया पवित्रत्वभावाद्य निर्वृणाते तौ च स्वसंबन्धिनां सर्वेषां भवः संसारस्तत्प्रयुक्तं भयं स्वकारणेन सहापनुद्य पुरुषार्थपरिसमाप्तिं कुर्वाते। तानेव गुरून्विशिनष्टि—यत्प्रज्ञेति। मे मम स्वान्तमन्तःकरणं तस्मिन्मोहो व्याकुलताहेतुरविवेकस्तस्य कारणं यदनाद्यज्ञानं तेनैषां प्रज्ञैवाऽऽलोकस्तस्य भा दीप्तिस्तया प्रतिहतिं विनाशमगमद्भवत्तत्पादाविति संबन्धः। न केवलमज्ञानमेवाऽऽचार्यप्रसादादपगच्छत्तुच्छी भवति किंतु तत्कार्यमनर्थजातमपि कारणनिवृत्तौ स्थितिमलममानमामासी भवतीत्याह—मज्जोन्मज्जदिति। असकृदनेकशो देवतिर्यगादियोनिषु योऽयमुपजनो नानाविधदेहभेदसंग्रहोऽसावेवोदन्वानुदधिस्तस्मिन्नतित्रासने मयावहे कदाचिद्यथोक्तमज्ञानं कार्यरूपेण मज्जदनभिव्यक्तमवतिष्ठते तदेव चावस्थाविशेषे तद्रूपेणोन्मज्जदभिव्यक्तमनर्थकरं परिवर्तते तदेवमतिक्रूरे संसारसागरे परिवर्तमानमज्ञानं सकार्यमाचार्यप्रसादादपनीतमासीदित्यर्थः। न केवलमेकस्य ममैव यथोक्तफलप्राप्तिराचार्यप्रसादादाविरभूत्किंतु तच्चरणपरिचर्यापरायणा-

१ ग. ङ. ञ. °रादयस्तै°। २ क. विग्रहभे°। ३ घ. °न्तमोहा°। ४ ख. ङ. ज. ञ. °न्मज्जं (ज्जं)श्च घो°। ५ ग. ञ. अधुना। ६ क. प्रकटीभा°। ७ घ. ङ. ज. °तः स्वस्या°। ८ ग. ञ. °भापद्य°। ९ घ. ज. °पाद्येते नि°। १० ख. निर्वृण्व ते। ११ क. कुर्वन्ते°। १२ ख. ङ. °व स्वगु°। १३ घ. °म तत्स्वान्त°। १४ घ. ज. तदेषां। १५ ङ. ग्रह°। १६ ख. °तिं ना°। १७ ज. °त्रासेन भ°। १८ क. °विषये त°। १९ क. °नं स्वका°।

नामन्येषामपि भूयसामित्याह— यत्पादाविति । येषां गुरूणां पादद्वयमाश्रितानामन्येषामपि शिष्याणां तदीयशुश्रूषाप्रणयिमनीषाजुषां श्रुतिर्मननिदिध्यासनसहकृतं श्रवणज्ञानम् । शमः शान्तिरिन्द्रियोपरतिः । विनयोऽवनतिरनौद्धत्यं तेषां प्राप्तिरज्या श्रेष्ठा प्रतिष्ठिता सिध्यति । यस्मादमोघा सफला श्रवणादीनां प्राप्तिस्तस्मादन्यत्वं तस्यां संभाव्यते तदेवमाचार्यप्रसादादात्मनोऽन्येषां च बहूनां पुरुषार्थे परिसमाप्तिसंभवादाचार्यपरिचरणं पुरुषार्थकामैराचरणीयमित्यर्थः ॥ ३ ॥

विष्णुं कृष्णं स्वमायाविरचितविविधद्वैतवर्गे मिसर्गो-
द्युद्यातानर्थसार्थे निरवधिमधुरं सच्चिदेकस्वभावम् ।
आज्ञायाऽऽत्मानमेकं विधिमुखविमुखं नेति नेतीति गीतं
वन्दे वाचां धियां चापरमपि जगतामास्पदं कल्पितानाम् ॥१॥

गौडपादीयभाष्यस्य व्याख्या व्याख्यातृसंमता ।
संमिता निर्मिता सेयमर्पिता पुरुषोत्तमे ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितायां गौडपादीयभाष्यटीकायामलातशान्त्याख्यं
चतुर्थप्रकरणम् ॥ ४ ॥

ॐ तत्सत् ।

===

समाप्तेयमानन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता सगौडपादीयकारिकार्थर्ववेदीय-माण्डूक्योपनिषत् ।

=====

१ क. °णयम° । ख. °णयिनां म° । ग. ङ. णयनम° । च. °णयिनीम° । २ ग. तस्या भा° । ३ क. घ. ग. °चार्यप° । ४ ख. ङ. °दुरकाता° । घ. छ. ज. °दुद्धाता° ।

शांकरानन्दभगवत्कृता माण्डूक्योपनिषद्दीपिका ।

माण्डूक्योपनिषद्व्याख्यां करिष्ये पदचारिणीम् ।
ओमात्मामेदसंबोधादानन्दात्मप्रकाशनीम् ॥ १ ॥

नामनामिनोर्लोके भेदस्याप्रसिद्धत्वाद्वस्तुतश्चौंकारस्य ब्रह्मविवर्तत्वाद्विवर्तानां च विवर्ताधिष्ठानेन भेदशून्यत्वादतं ओंकारं ब्रह्मनामधेयं ब्रह्मदृष्ट्याऽऽह—ओम् । अवति ब्रह्मबुद्ध्या दृष्टो द्रष्टृनित्योम् । इति ओंकारानुकरणार्थः । एतत् । उक्तमोंकाररूपं जगत्पर्णस्य शङ्कुस्थानीयं ब्रह्मणा तादात्म्यं प्राप्तं ब्रह्मणो विकारो नामधेयं च । अक्षरम् । वर्णात्मकम् । इदं विविधप्रत्ययगम्यं चेतनाचेतनात्मकं जगत्सर्वं निखिलं तस्य सर्वात्मकस्यौंकारस्योपव्याख्यानमुप सामीप्येन विस्पष्टमा समन्तात्कथनमुक्तार्थविवरणमित्यर्थः । भूतमतीतं भवद्वर्तमानं भविष्यदनागतमित्यनेन प्रकारेण सर्वं निखिलमोंकार एव प्रणव एव न त्वन्यत् । यच्च यदपि प्रसिद्धं सदसदात्मकमन्यदुक्तादव्यतिरिक्तं त्रिकालातीतमुक्तकालत्रयासंसृष्टं[3] तदप्युक्तं ब्रह्म नरविषाणादिकमपि । अपिशब्दः पूर्वेण समुच्चयमाह । ओंकार एव व्याख्यातम् । ओंकारस्य ब्रह्मणो नामधेयत्वादिसंज्ञाभिरित्यभिप्रायेणाऽऽह—सर्वं निखिलं हि निश्चितमेतत्प्रपञ्चजातं ब्रह्म सत्यज्ञानादिलक्षणं बृहत् । जडस्यैव ब्रह्मात्मत्वमुक्तं, न चेतनस्येतिशङ्कानिराकरणार्थमाह—अयमनुभूयमान आत्माऽस्मत्प्रत्ययालम्बनश्चेतनस्त्वंपदार्थः । ब्रह्मोक्तं तत्पदार्थः । स कार्यकारणभावमन्तरेण ब्रह्मणा तादात्म्यं प्राप्तोऽयमात्मा व्याख्यातम् । चतुष्पाच्चत्वारः पादा यस्य स चतुष्पात् ।

नैवं किं चतुष्पादित्याशङ्क्य नेत्याह—जागरितस्थानो जागरितं स्थानं यस्य स जागरितस्थानः । * बहिःप्रज्ञो बहिः रूपादौ चक्षुरादिग्राह्ये प्रज्ञा यस्य स बहिःप्रज्ञः । सप्ताङ्गः सप्तसंख्याकानि द्युमूर्धवाक्याशरयिपृथिव्याहवनीयाख्यानि मूर्धचक्षुःप्राणशरीरान्तर्भागमूत्राशयपादास्यान्यङ्गानि यस्य स सप्ताङ्गः । एकोनविंशतिमुखः पञ्चज्ञानकर्मेन्द्रियप्राणान्तःकरणचतुष्टयरूपाणि मुखान्येकोनविंशतिसंख्याकानि यस्य स एकोनविंशतिमुखः । स्थूलभुक्, स्थूलं रूपादिकं भुङ्क्त इति स्थूलभुक् । वैश्वानरो विश्वेषामयं नरो विश्वे वा नरा यस्य विश्वश्चासौ नरश्चेति [वा] विश्वानरः,

* अत्र नित्यं समासेऽनुत्तरपदस्थस्येतिषत्वाभावस्तु च्छन्दसि दृष्टानुविधेराश्रयणात् ।

१ ग. °दृष्टश्चैत्याह । २ ग. घ. संभवति । ओं ब्र°। ३ ग. संस्पृष्टं । ४ ग. °ङ्ग-शरीरान्तर्भागं ङ° । ५ ग. °शवारिषु° ।

स एव वैश्वानरः । अथवा विश्वेषां नरशब्दवाच्यानां चतुर्विधानां स्थूलानां देहानामधिष्ठाताऽयं वैश्वानरः प्रथमः पादः । आत्मनोऽयं सर्वैः सुकरावगमत्वात्प्रथमोंऽशः ।

इदानीं द्वितीयं पादमाह—**स्वप्नस्थानः** स्वप्नं जागरितवासनाजन्यं स्थानं यस्य स स्वप्नस्थानः । **अन्तःप्रज्ञोऽन्तर्मानसवासनाविलासे** प्रज्ञा बुद्धिर्यस्य सोऽन्तःप्रज्ञः । **सप्ताङ्ग एकोनविंशतिमुखः** । व्याख्यातम् । **प्रविविक्तभुक्प्रविविक्तं** सूक्ष्मं भुङ्क्त इति प्रविविक्तभूक् । तैजसस्तेजोऽन्तःकरणं कर्तृकरणकार्यादिभावेन परिणतं तदेव स्थूलशरीरादिहीनं यस्य स तैजसः । अन्तःकरणस्य स्वामीत्यर्थः । जागरितानन्तरभावित्वात् । द्वितीयः पादः । स्पष्टम् ।

इदानीं तृतीयं पादं वक्तुमाह—**यत्र** यस्मिन्काले **सुप्तः** उपरतेन्द्रियग्रामो **न कंचन कामं कामयते** कमपि पुण्यपापहेतुभूतं पुत्रक्षेत्रादिकं नाभिलषति । **न कंचन स्वप्नं पश्यति** । कमपि शुभमशुभं वा वासनाविलासं नावलोकयति **तत्कामाकामनस्वप्नानवलोकनरूपं सुषुप्तं** गाढनिद्राप्राप्तिस्थानम् । **सुषुप्तस्थानः सुषुप्तं** स्वयं श्रुत्या व्याख्यातं स्थानं यस्य स सुषुप्तस्थानः । **एकीभूतः** । सर्वजगद्बीजभूतस्याऽऽवरणात्मकस्याज्ञानस्यानुपरमादनेकोऽप्यन्तःकरणविक्षेपोपरमामेकतां गतः । **प्रज्ञानघन एव** प्रज्ञानमात्मनो रूपं ब्रह्मणा भेदरहितं स्वयंप्रकाशं तस्य घनः पिण्ड इव स एव न त्वन्तःकारणादिबाह्यं च । न च निरानन्द इत्याह—**आनन्दमयो** विक्षेपाणामुपरमादावरणस्यानुवृत्तेश्च स्वरूपानन्दप्रचुरो हि यस्मात्तस्मादानन्दभुगानन्दो विक्षेपाभावोपलक्षित आत्मा तमेव भुङ्क्तेऽज्ञानवृत्तिभिरवगच्छतीत्यानन्दभुक् । **चेतोमुखश्चेत** आत्मस्वरूपबोधः स एवाऽऽवरणशक्तिसहितो मुखं यस्य स चेतोमुखः **प्राज्ञः** प्रकृष्टे स्वयंप्रकाश आनन्दात्मनि साज्ञाने ज्ञप्तिरज्ञानवृत्तिरूपो बोधो यस्य स प्रज्ञः प्रज्ञ एव प्राज्ञः । उक्तावस्थाद्वयाभावेनावगम्यमानत्वात् । तृतीयः पादः । स्पष्टम् । प्राज्ञं प्रस्तौति सर्वकारणत्वात्तस्य । **एष** उक्तः **प्राज्ञः सर्वेश्वरः** सर्वनियामक **एष प्राज्ञः सर्वज्ञः** सर्वश्चासौ ज्ञश्चेति सर्वकार्यात्मकत्वादज्ञानस्य वा जानातीति सर्वज्ञः । **एष** प्राज्ञोऽन्तर्याम्यन्तर्यमयिता । **एष** प्राज्ञो **योनिः** कारणं **सर्वस्य** निखिलस्य चेतनाचेतनात्मकस्य जगतः । योनित्वे हेतुमाह—**प्रभवाप्ययावुत्पत्तिविनाशौ** हि यस्माद्भूतानां चेतनाचेतनरूपाणामितो भवत इति शेषः ।

इदानीं तुरीयं पादमाह—**नान्तःप्रज्ञं** न मानसवासनाविलासदर्शनलालसं **न बहिःप्रज्ञं** नेन्द्रियैर्विषयावलोकनपरं **नोभयतःप्रज्ञं** जागरणस्वप्नान्तरालावस्थावबोधशून्यं **न प्रज्ञानघनं** न ज्ञानमात्रबोधं **न प्रज्ञं** निर्विकल्पबोधशून्यं **नाप्रज्ञं** न बोधाभावरूपम् ।

अदृष्टं प्रत्यक्षादिप्रमाणैरनवलोकितम् । अव्यवहार्यं वचनादानादिव्यवहारगन्धरहितम् । अग्राह्यं सर्वप्रकारग्रहणायोग्यम् । अलक्षणं गन्धवत्त्वादिबोधशून्यम् । अचिन्त्यमन्तःकरणवृत्त्यविषयभूतम् । अव्यपदेश्यं पृथिवीत्यादिव्यपदेशवद्व्यपदेशायोग्यम् । एकात्मप्रत्ययसारं सर्वाद्वैतप्रत्ययः सारभूतोऽवगतिहेतुत्वेन यस्मिंस्तदेकात्मप्रत्ययसारं वाङ्मनसातीतमप्यात्मबोधेनावगन्तुं शक्यमित्यर्थः । प्रपञ्चोपशमं प्रपञ्चस्य कार्यकारणात्मकस्योपशमोऽभावो यस्मिंस्तत्प्रपञ्चोपशमम् । [शान्तं स्पष्टम्] । शिवं स्वयंप्रकाशमानन्दात्मस्वरूपत्वान्मङ्गलम् । अद्वैतमानन्दात्मव्यतिरिक्तशून्यं चतुर्थं तुरीयं पादं मन्यन्ते संख्याशून्यमपि पूर्वापेक्षयाऽवगच्छन्ति स वस्तुतस्त्वतुरीयरूपोऽप्यविद्यया चतुष्पादात्माऽऽनन्दात्माऽस्मत्प्रत्ययव्यवहारयोग्यः स तुरीयरूपोऽपगतसमस्तविशेषो विज्ञेयो विशेषेण साक्षात्कर्तव्यः ।

इदानीमात्मौंकारयोरभेदं कण्ठत आह— सोऽयमात्मा व्याख्यातम् । अध्यक्षरमक्षराण्यकारोकारमकारार्धमात्राख्यानि स्वपादसंमितान्यधिकृत्य वर्तत इत्यध्यक्षरम् । ओंकार ओंकारस्वरूप ओंकारस्याऽऽत्मस्वरूपत्वे साम्यम् । अधिमात्रमकाराद्याश्चतस्रो मात्रा विश्वादिपादसमसंख्याका अधिकृत्याधिमात्रम् । आत्मौंकारयोरभेदे कारणमाह— पादा विश्वतैजसप्राज्ञतुरीयाख्या मात्रा अकारोकारमकारार्धमात्राः । तादात्म्यं दृढीकर्तुमुक्तं विपर्ययेण निर्दिशति—मात्राश्च पादाः । चकार एवकारार्थः । नायं विपर्ययनिर्देशस्त्वमहमितिवदुपचारार्थः किंतु घटः कलशः कलशो घट इतिवन्निरुपचरितं मात्राणां पादानां च तादात्म्यमित्येवकारार्थः । व्याख्यातमन्यत् । अर्धमात्रायास्तुरीयपादरूपत्वात्तुरीयस्य च पूर्वपादत्रयादत्यन्तवैलक्षण्यादतोऽर्धमात्रां परित्यज्य[२] शेषमात्रा आह—अकार उकारो मकारः, स्पष्टम् । इति मात्रात्रयनिर्देशार्थः । इदानीं विभागेन मात्राणां पादरूपतामाह—जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा । पूर्वा मात्रा । व्याख्यातमन्यत् । अकारस्य पूर्वमात्रात्व उपपत्तिमाह—आप्तेर्वाप्तेः । अकारो हि जागरितस्थानादिकं सर्वमाप्नोति । प्रकारान्तरेण पुनर्निरुक्तिमाह—आदिमत्त्वाद्वा । अ आ इ इत्येवमादिरादिः स यस्मिन्नस्ति सोऽयमादिमांस्तस्य भाव आदिमत्त्वमादिसामान्यवत्त्वमित्यर्थः । प्रथमपादोऽपि यथा पादानामादिरत एव तत्सामान्यवानाप्नोति चेतरत्पादजातं पूर्वभावित्वात् । वाशब्दः पक्षान्तरार्थः । विश्वाकारयोरैक्यमाप्तेर्वाऽऽदिमत्त्वाद्वेत्यर्थः । इदानीं विश्वाकारयोराप्त(प्या)दिमत्त्वज्ञानात्फलमाह—आप्नोति । प्राप्नोति ह प्रसिद्धान्वै स्मर्यमाणान्सर्वान्निखिलान्कामान्काम्यमानान्पुत्रक्षेत्रादीन् । आप्तेः फलमुक्त्वाऽऽदिमत्त्व-

---

१ क. ख. भेदका° । २ ग. °शेषा मा° ।

स्य फलमाह—आदिश्च स्वानां मध्ये सर्वेषु कार्येषु प्रथमगण्यः। चकारादपि प्रथमं फलं भवति । स्पष्टम् । यस्य फलं तमाह—यः पादमात्रातादात्म्यज्ञ एवमुक्तेन प्रकारेणोक्तयोः पादमात्रयोः सामान्यं वेद जानाति स आप्नोतीत्यन्वयः । स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा । स्पष्टम् । तैजसोकारयोस्तादात्म्ये हेतुमाह—उत्कर्षादुर्ध्वभावित्वेनोत्कृष्टत्वात् । पुनरन्यत्सामान्यमाह—उभयत्वाद्वा । विश्वाकाराभ्यां तैजसोकारयोर्द्वितीयत्वात् । वाशब्दः पूर्ववत् । इदानीमुक्तज्ञानस्य फलमाह—उत्कर्षति ह वै ज्ञानसंततिं शिष्यप्रशिष्यादिज्ञानसंततत्योत्कृष्टो भवति । व्याख्यातमन्यत् । उभयत्वज्ञानस्य फलमाह—समानश्च भवति, यो हि स्वावस्थानदेशे काले वोत्कृष्टस्तत्समानः । चकारात्तस्मादुत्कृष्टोऽपि भवति । इदानीमुभयज्ञानस्य साधारणं फलमाह—नास्याब्रह्मवित्कुले भवति । अस्योत्कर्षोभयत्वज्ञानवतः कुलेऽन्वये शिष्यप्रशिष्यादिरूपेऽहं ब्रह्मास्मीत्येतज्ज्ञानशून्यो न भवति । य एवं वेद, व्याख्यातम् । सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा, स्पष्टम् । प्राज्ञमकारयोस्तादात्म्ये हेतुमाह—मितेर्मिनोति हि प्राज्ञः सर्वमात्मनि तादात्म्येन मकारोऽप्यकारोकारौ प्रक्षिपत्येवमात्मस्वरूपेऽन्यथोंकारस्यानिष्पत्तेः । अपीतेर्वा मकारो ह्योंकारे वर्तमानः स्पष्टं नोपलभ्यते ततः प्रलयः प्राज्ञश्च प्रलयः प्रसिद्धः प्रलयसामान्यात् । वाशब्दः पूर्ववत् । इदानीं मितिज्ञात(न)स्य फलमाह—मिनोति ह वा इदं सर्वम् । इदं विविधप्रत्ययगम्यं जगन्निखिलं प्रस्थमिव यावत्, मिनोति सर्वात्मभावेन स्वात्मनि प्रक्षिपति । अपीतिज्ञानस्य फलमाह- अपीतिश्च भवति, सर्वात्मक्येन प्रलयः सर्वस्य, चकारात्स्वयं प्रलयशून्यश्च भवति । य एवं वेद, व्याख्यातम् । अर्धमात्राया अवयवस्योंकारस्यावयविनश्चामेदमुररीकृत्य चतुर्थपादरूपनिरञ्जनात्मस्वरूपतामोंकारस्याऽऽह—अमात्रोऽकारादिमात्राशून्यश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः, स्पष्टम् । एवमुक्तेन मात्रातादात्म्येनोंकार आत्मैव, स्पष्टम् । संविशति सम्यक्प्रवेशं करोत्यात्मनोंकारेणाऽऽत्मानमानन्दात्मस्वरूपं य ओंकारात्मज्ञ एवमुक्तेन प्रकारेणोंकारात्मनोस्तादात्म्यं वेद जानाति तस्योंकाररूपानन्दात्मप्राप्तिफलमर्थसिद्धं ततः श्रुत्या नोक्तम् । अथवा संविशत्यात्मनाऽऽत्मानमितीदं फलवाक्यमस्तु ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्य श्रीशंकरानन्दभगवतः कृतौ माण्डूक्योपनिषद्दीपिका समाप्ता ॥

अथ श्रीमद्गौडपादाचार्यविरचितमाण्डूक्योपनिषत्कारिकाय चरणानामकारादिवर्णानुक्रमसूची ।

आद्यचरणप्रतीकानि ।	पृ० कारि०
अ.	
अकल्पकमजं ज्ञानम्	१४१–३१
अकारो नयते विश्वम्	९८–२१
अजः कल्पितसंवृत्या	२०२—७४
अजमनिद्रमस्वप्नम्	१४४—३६
,,	२०७—८१
अजातेस्त्रसनां तेषाम्	१८७—४३
अजातस्यैव धर्मस्य	१६०—६
अजातस्यैव भावस्य	१२८—२०
अजातं जायते यस्मात्	१७९—२९
अजाद्वै जायते यस्य	१६४—१३
अजेष्वजमसंक्रान्तं	२१८—९६
अजे साम्ये तु ये केचित्	२१७—९५
अणुमत्रेति वैधर्म्ये	२१८—९७
अतो वक्ष्याम्यवार्पण्यम्	१०४—२
अद्वयं च द्वयाभासं	१३९–३०
,,	१९७–१२
अदीर्घत्वाच्च कालस्य	६६—२
अद्वैतं परमार्थो हि	१२६–१८
अनादिमायया सुप्तः	९०–१६
अनादेरन्तवत्त्वं च	१७९–३०
अनिमित्तस्य चित्तस्य	२०४–७७
अनिश्चिता यथा रज्जुः	८१–१७
अन्तःस्थानात्तु भेदानां	६९—४
अन्यथा गृह्णतः स्वप्नः	९०–१५
अपूर्वं स्थानिधर्मो हि	७१—८

आद्यचरणप्रतीकानि ।	पृ० कारि०
अभावश्च रथादीनां	६८—३
अमूतामिनिवेशाद्धि	२०६–७९
अमूतामिनिवेशोऽस्ति	२०३–७१
अमात्रोऽनन्तमात्रश्च	६४–२९
अलब्धावरणाः सर्वे	२१९–९८
अलाते स्पन्दमाने वै	१९०–४९
अवस्त्वनुपलम्भं च	२१२–८८
अव्यक्ता एव येऽन्तस्तु	७८–१९
अशक्तिरपरिज्ञानं	१६७–१९
असज्जागरिते दृष्ट्वा	१८४–३९
असतो मायया जन्म	१३८–२८
अस्ति नास्त्यस्ति नास्तीति	२०८–८३
अस्पन्दमानमलातम्	१९०–४८
अस्पर्शयोगो वै नाम	१४८–३९
,,	१९८—२
आ.	
आदावन्ते च यन्नास्ति	७०—६
,,	१०८–११
आदिबुद्धाः प्रकृत्यैव	२१५–९२
आदिशान्ता ह्यनुत्पन्नाः	२१६–९३
आत्मसत्यानुबोधेन	१४१–३२
आत्मा ह्याकाशवज्जीवैः	१०५—३
आश्रमास्त्रिविधा हीन०	१५३–१६
इ.	
इच्छामात्रं प्रभोः सृष्टिः	३१—८

आद्यचरणप्रतीकानि ।	पृ० कारि०	आद्यचरणप्रतीकानि ।	पृ० कारि०
उ.		ग्र.	
उत्पादस्याप्रसिद्धत्वात्	१८३–३८	ग्रहणाज्जागरितवत्	१८३–३७
उपलम्भात्समाचारात्	१८६–४२	ग्रहो न तत्र चोत्सर्ग	१४७–३८
,,	१८८–४४	घ.	
उपायेन निगृह्णीयात्	१९०–४२	घटादिषु प्रलीनेषु	१०७—४
उपासनाश्रितो धर्मः	१०३—१	च.	
उभयोरपि वैतथ्यं	७४–११	चरञ्जागरिते जाग्रत्	१९८–१९
उभे ह्यन्योन्यदृश्येते	१९९–१७	चि.	
उत्सेक उदधेर्यद्वत्	१९०–४१	चित्तकाला हि येऽन्तस्तु	७६–१४
ऋ.		चित्तं न संस्पृशत्यर्थं	१७६–२६
ऋजुवक्रादिकाभासम्	१८८–४७	चित्तस्पन्दितमेवेदं	२०१–७२
ए.		ज.	
एतैरेषोऽपृथग्भावैः	८९–३०	जरामरणनिर्मुक्ताः	१६२–१०
एवं न चित्तजा धर्मा	१९३–९४	जा.	
एवं न जायते चित्तम्	१८९–४१	जाग्रच्चित्तेक्षणीयास्ते	१९८–६६
ओ.		जाग्रद्वृत्तावपि त्वन्तः	७४–१०
ओंकारं पादशो विद्यात्	६१–२४	जात्याभासं चलाभासं	१८८–४५
क.		जी.	
कल्पयत्यात्मनाऽऽत्मानम्	७९–१२	जीवात्मनोः पृथक्त्वं यत्	११९–१४
का.		जीवात्मनोरनन्यत्वम्	११७–१३
कार्यकारणबद्धौ तौ	४७–११	जीवं कल्पयते पूर्वं	७९–१६
कारणाद्यदनन्यत्वम्	१६३–१२	त.	
कारणं यस्य वै कार्यं	१६२–११	तत्त्वमाध्यात्मिकं दृष्ट्वा	१०१–३८
काल इति कालविदः	८९–२४	तस्मादेवं विदित्वैनम्	९९–३१
को.		तस्मान्न जायते चित्तं	१७७–२८
कोटयश्चतस्र एतास्तु	२०९–८४	तै.	
क्र.		तैजसस्योत्वविज्ञाने	१८–२०
क्रमते न हि बुद्धस्य	२२०–९९	त्रि.	
ख्या.		त्रिषु धामसु यत्तुल्यं	१८–२२
ख्याप्यमानामजातिं तैः	११९—९	त्रिषु धामसु यद्भोज्यं	३३–९

आद्यचरणप्रतीकानि ।	पृ०कारि०
द.	
दक्षिणाक्षिमुखे विश्वः	२६– २
दु.	
दुःखं सर्वमनुस्मृत्य	१९१–४३
दुर्दर्शमतिगंम्भीरम्	२२१–१००
द्र.	
द्रव्यं द्रव्यस्य हेतुः स्यात्	१९२–९३
द्व.	
द्वयोर्द्वयोर्मधुज्ञाने	११६–१२
द्वै.	
द्वैतस्याग्रहणं तुल्यम्	४८–१३
ध.	
धर्माय इति जायन्ते	१९९–९८
न.	
न कश्चिज्जायते जीवः	१९१–४८
न कश्चिज्जायते जीवः	२००–७१
न निर्गता अलातात्ते	१९१–९०
न निर्गतास्ते विज्ञानात्	१९२–९२
न युक्तं दर्शनं गत्वा	१८१–३४
न विरोधो न चोत्पत्तिः	९१–३२
न भवत्यमृतं मर्त्यं	१२९–२१
,,	११०–७
ना.	
नाऽऽकाशस्य घटाकाशो	११३–७
नाजेषु सर्वधर्मेषु	१९६–१०
नाऽऽत्मानं न परांश्चैव	४७–१६
नाऽऽस्वादयेत्सुखं तत्र	१९२–४९
नाऽऽत्मामावेन नानेदं	९७–३४
नास्त्यसद्धेतुकमसत्	१८५–४०
नि.	
निगृहीतस्य मनसः	१४२–३४

आद्यचरणप्रतीकानि ।	पृ०कारि०
निःस्तुतिर्निर्नमस्कारः	१००–३७
निमित्तं न सदा चित्तं	१७६–२७
निवृत्तेः सर्वदुःखानाम्	४६–१०
निवृत्तस्याप्रवृत्तस्य	२०६–८०
निश्चितायां यथा रज्ज्वां	८१–१८
नेह नानेति चाऽऽम्नायात्	१३१–२४
प.	
पञ्चविंशक इत्येके	८६–२६
पा.	
पादा इति पादविदः	८४–२१
पू.	
पूर्वापरापरिज्ञानम्	१६९—२१
प्र.	
प्रकृत्याऽऽकाशवज्ज्ञेयाः	२१९—९१
प्रणवं हीश्वरं विद्यात्	६१—२८
प्रणवो ह्यपरं ब्रह्म	६२—२६
प्रपञ्चो यदि विद्येत	९२–१७
प्रभवः सर्वभावानां	३१—६
प्रज्ञप्तेः सनिमित्तत्वम्	१७३—२४
,,	१७४–२९
प्रा.	
प्राण इति प्राणविदः	८३—२०
प्राणादिभिरनन्तैश्च	८३—१९
प्राप्य सर्वज्ञतां कृत्स्नां	२१०—८९
फ.	
फलादुत्पद्यमानः सन्	१६६—१७
ब.	
बहिष्प्रज्ञो विभुर्विश्वः	२९—१
बी.	
बीजाङ्कुराख्यो दृष्टान्तः	११८—२०

आद्यचरणप्रतीकानि ।	पृ०कारि०
बु.	
बुद्ध्यनिमित्ततां सत्यां	२०९—७८
भा.	
भावैरसद्भिरेवायम्	९९–३
भू.	
भूततोऽभूततो वाऽपि	१३०–२३
भूतस्य जातिमिच्छन्ति	१९८–३
भूतं न जायते किंचित्	१९९–४
भो.	
भोगार्थं सृष्टिरित्यन्ये	३७–९
म.	
मकारमात्रे प्राज्ञस्य	९८–२१
मन इति मनोविदः	८६–२९
मनसो निग्रहायत्तम्	१४९–४०
मनोदृश्यमिदं द्वैतं	१४०–३१
मरणे संभवे चैव	११४–९
मा.	
मायया भिद्यते ह्येतत्	१९७–१९
मि.	
मित्राद्यैः सह संमन्त्र्य	१८२–३९
मृ.	
मृल्लोहविस्फुलिङ्गाद्यैः	१२१–१५
य.	
यथा निर्मितको जीवः	२००–७
यथा भवति बालानां	११३– ८
यथा मायामयाद्बीजात्	१९६–५९
यथा मायामयो जीवः	२००–६९
यथा स्वप्नमयो जीवः	२००–६८
यथा स्वप्ने द्वयाभासं	१३९–२५
,,	१९७–६१

आद्यचरणप्रतीकानि ।	पृ० कारि०
यथैकस्मिन्घटाकाशे	१०७–५
यदा न लभते हेतून्	२०३–७६
यदा न लीयते चित्तं	१९३–४६
यदि हेतोः फलाप्तिसिद्धिः	१६७–१८
या.	
यावद्धेतुफलावेशः	१९४–९९
,,	१९४–९६
यु.	
युञ्जीत प्रणवे चेतः	६१–२९
योऽस्ति कल्पितसंवृत्त्या	२०१–७३
यं भावं दर्शयेद्यस्य	८८— २९
र.	
रसादयो हि ये कोशाः	११६–११
रू.	
रूपकार्यसमाख्याश्च	१२२—६
ल.	
लये संबोधयेच्चित्तं	१९१–४४
ली.	
लीयते हि सुषुप्ते तत्	१४३—३९
लो.	
लोकालोकविदः प्राहुः	८७–२७
वि.	
विकरोत्यपरान्भावान्	७६–१३
विकल्पो विनिवर्तेत	९३–१८
विपर्यासाद्यथा जाग्रत्	१८६–४१
विप्राणां विनयो ह्येषः	२१०–८६
विभूतिं प्रसवं त्वन्ये	३५—७
विश्वस्यात्मविवक्षायाम्	१७—१९
विश्वो हि स्थूलभुङ्नित्यं	३३–३

आद्यचरणप्रतीकानि ।	पृ० कारि०
विज्ञाने स्पन्दमाने वै....	१९१–९१
वी.	
वीतरागभयक्रोधैः	९८—३९
वे.	
वेदा इति वेदविदः	८४—२२
वै.	
वैतथ्यं सर्वभावानां	६९—१
वैशारद्यं तु वै नास्ति	२१६—९४
स.	
स एष नेति नेतीति	१३९–२६
सतो हि मायया जन्म	१३७—२७
सप्रयोजनता तेषां	७०—७
,,	१८०–३२
सर्वस्य प्रणवो ह्यादि	६२—२७
सर्वाभिलापविगतः	१४६—३७
सर्वे धर्मा मृषा स्वप्ने	१८'—३३
सवस्तु सोपलम्भं च	२११—८७
सं.	
संघाताः स्वप्नवत्सर्वे	११९—१०
संभवे हेतुफलयोः	१६९—१६
संभूतेरपवादाच्च	१३३—२९
संवृत्या जायते सर्वं	१९४—९७
सां.	
सांसिद्धिकी स्वाभाविकी	१६१—९
सु.	
सुखमाप्नियते नित्यं	२०७—८२

आद्यचरणप्रतीकानि ।	पृ० कारि०
सू.	
सूक्ष्म इति सूक्ष्मविदः	८९–२३
सृ.	
सृष्टिरिति सृष्टिविदः	८७—२८
स्थू.	
स्थूलं तर्पयते विश्वं	३२–४
स्व.	
स्वतो वा परतो वाऽपि	१७०–२२
स्वप्नदृक्चित्तदृश्यास्ते	१९८–६४
स्वप्नदृक्प्रचरन्स्वप्ने	१९७–६३
स्वप्नजागरितस्थाने	६९–५
स्वप्ननिद्रायुतावाद्यौ	४९–१४
स्वप्नमाये यथा दृष्टे	९०–३१
स्वप्नवृत्तावपि त्वन्त	७३—९
स्वप्ने चावस्तुकः कायः	१८२—३६
स्वभावेनामृतो यस्य	१२९–२२
,,	१६०–८
स्वसिद्धान्तव्यवस्थासु	१२१—१७
स्वस्थं शान्तं सनिर्वाणम्	१९४–४७
हे.	
हेतुर्न जायतेऽनादेः	१७२–२३
हेतोरादिः फलं येषाम्	१६४–१४
,,	१६९–१९
हेयज्ञेयोपपाक्यानि	२१४–२९
ज्ञा.	
ज्ञाने च त्रिविधे ज्ञेये	२१३–८९
ज्ञानेनाऽऽकाशकल्पेन	१९६—१

समाप्तेयं श्रीमद्गौडपादाचार्यविरचितमाण्डूक्योपनिषत्का-
रिकाद्यचरणानामकारादिवर्णानुक्रमसूची ।

ग्रन्थनाम ।	मूल्यम् रू०	आ
९४ संस्कारपद्धतिः—अभ्यंकरोपाह्वभास्करशास्त्रिविरचिता ।	२	८
९५ काश्यपशिल्पम्—महेश्वरोपदिष्टम् ।	३	१
९६ करणकौस्तुभः—कृष्णदैवज्ञविरचितः ।	०	९
९७ मीमांसादर्शनम्-सतन्त्रवार्तिकशाबरभा० भागषट्कात्मकम्।	२५	९
९८ धर्मतत्त्वनिर्णयः—अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः ।	०	९
९८ धर्मतत्त्वनिर्णयपरिशिष्टम्— ,, ,,	०	१३
९९ भास्करीयबीजगणितं—नवाङ्कुरटीकासहितम्। ...	२	•
१०० प्रायश्चित्तेन्दुशेखरः—नागेशभट्टविरचितः । कुण्डार्कयुतः ।	१	१०
१०१ शांकरपादभूषणम्—पर्वतेइत्युपाह्वरघुनाथशास्त्रिकृतं द्विभा०	८	५
१०२ ब्रह्मवैवर्तपुराणम्—भागद्वयात्मकम् ।	९	४
१०३ श्रुतिसारसमुद्धरणम्—गिर्यपरनामकतोटकाचार्यप्रणीतम् ।	०	१३
१०४ त्रिंशच्छ्लोकी—टिप्पणीविवृतिभ्यां समेता। धर्मशास्त्रग्रन्थः।	२	१५
१०५ आश्वलायनगृह्यसूत्रम्—आश्वलायनाचार्यप्रणीतम् ।	२	१२
१०६ दशोपनिषदः—मूलमात्राः ।	२	•
१०७ लीलावती-श्रीमद्भास्कराचार्यप्रणीता। टीकाद्वयोपेता द्विभागा।	३	०
१०८ व्या०महाभाष्यम्—(अङ्ग.)। पतञ्जलिवि.प.उ.यु.द्विभागम्।	४	४
१०९ श्रीमद्भगवद्गीताप्रथमाध्यायौ—म.म. अभ्यंकरटीकायुतौ ।	२	३
११० ग्रहगणिताध्यायः—भागद्वयात्मकः । भाष्यटीकोपेतः ।	४	५
१११ कायपरिशुद्धिः—म.म. अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीता ।	१	४
११२ श्रीमद्भगवद्गीता—राजानकरामकविकृतटीकायुता ।	३	•
११३ मध्वतन्त्रमुखमर्दनम्—अप्पय्यदीक्षितकृतम् । ...	१	८
११४ रुद्राध्यायः—विष्णुसूरिकृतभाष्ययुतः । अद्वैतपरः । ...	०	१२
११५ रसरत्नसमुच्चयटीका—वामनात्मजचिन्तामणिविरचिता ।	२	८
११६ दत्तकमीमांसा—श्रीनन्दपण्डितविरचिता मञ्जरीव्या. स. ।	३	५
११७ ब्रह्मसूत्रसिद्धान्तमुक्तावलिः—वनमालिकृता । ...	२	८
११८ दत्तकचन्द्रिका—कुबेरभट्टप्रणीता । शांकरीयव्याख्यायुता ।	१	४
११९ कालमाधवकारिकाः—माधवाचार्यप्रणीताः वैद्यनाथकृत वि.स.०		८
१२० तिथिचिन्तामणिः—गणेशदैवज्ञकृतः ।	०	८
श्रीमत्पद्मपुराणम्—महापुराणान्तर्गतं चतुर्भागात्मकम् । ...२०	०	
सिद्धान्तदर्शनम्—महर्षिवेदव्यासप्रणीतं निरञ्जनभाष्ययुतम् ।	१	४
आधानपद्धतिः—किंजवडेकरोपाह्ववामनशास्त्रिभिः कृता ।	१	१४
पश्वालम्भमीमांसा—किंजवडेकरोपाह्ववामनशास्त्रिविरचिता ।	०	१०
शिवभारतम्—कवीन्द्रपरमानन्दविरचितम् ।	१	•

ग्रन्थाङ्काः		मूल्यम् रू०	आ०
४१	अग्निपुराणम्	५	४
८७	अग्निहोत्रचन्द्रिका	२	१४
८४	अद्वैतामोदः	२	०
५७	आचारभूषणम्	४	६
५८	आचारेन्दुः	४	०
	आधानपद्धतिः	१	१४
१०५	आश्वलायनगृह्यसूत्रम्	२	१२
८१	आश्वलायनश्रौतसूत्रम्	४	११
६२	ईशकेनकठाद्युप०(रामा०)	२	८
७६	ईशकेनकठोपनिषदः(दिगं)	१	०
५	ईशावास्योपनिषत्	०	१४
२९	उपनिषदां समुच्चयः	६	१२
३२	ऐतरेयब्राह्मणम्	१०	१०
३८	ऐतरेयारण्यकम्	३	०
११	ऐतरेयोपनिषत्	१	४
९६	करणकौस्तुभः	०	९
७	काठकोपनिषत्	१	४
१११	कायपरिशुद्धिः	१	४
११९	कालमाधवकारिकाः	०	८
६६	काव्यप्रकाशः(प्रदीपो.)	६	४
८९	काव्यप्रकाशः(सांकेतटी)	३	४
९५	काश्यपशिल्पम्	३	१
६	केनोपनिषत्	१	०
५२	गणेशगीता	२	०
१	गणेशाथर्वशीर्षम्	०	६
७३	गायत्रीपुरश्चरणपद्धतिः	१	८
६१	गौतमसूत्रम्	२	८
११०	ग्रहगणिताध्यायः	४	५
१४	छान्दोग्योपनिषत्(शां०)	५	०
६३	छान्दोग्योपनि०(रामा)	३	१२
७९	छान्दोग्योप०(मिताक्षरा०)	२	०
२०	जीवन्मुक्तिविवेकः	३	१२

ग्रन्थाङ्काः		मूल्यम् रू०	आ०
२४	जैमिनीयन्यायमालाविस्तरः	८	०
६९	ज्ञानार्णवतन्त्रम्	१	४
८५	ज्योतिर्निबन्धः	३	१५
१२०	तिथिचिन्तामणिः	०	८
३७	तैत्तिरीयब्राह्मणम्	१४	८
४२	तैत्तिरीयसंहिता	४५	१२
३६	तैत्तिरीयारण्यकम्	९	१
१२	तैत्तिरीयोपनिषत्	१	१२
१३	तैत्तिरीयोपनिषद्भाष्यवा०	२	२
७८	त्रिस्थलीसेतुः	३	१२
१०४	त्रिंशच्छ्लोकी	२	१५
११६	दत्तकमीमांसा	३	५
११८	दत्तकचन्द्रिका	१	४
९३	दर्शपूर्णमासप्रकाशः	६	१२
१०६	दशोपनिषदः	२	०
७४	द्राह्यायणगृह्यसूत्रवृत्तिः	१	०
३३	धन्वन्तरीयनिघण्टू रा०	६	४
९८	धर्मतत्त्वनिर्णयः	०	९
९८	धर्मतत्त्व०परिशिष्टम्	०	१३
५६	नित्याषोडशिकार्णवः	३	८
८८	निरुक्तम्	१६	४
३०	नृसिंहपूर्वोत्तरतापनीयोप०	१	१२
९१	न्यायसूत्राणि	४	८
	पद्मपुराणम्	२०	०
	पश्चालम्भमीमांसा	०	१०
७२	परिभाषेन्दुशेखरः	२	६
४७	पातञ्जलयोगसूत्राणि	३	०
३	पुरुषसूक्तम्	०	४
५५	पुरुषार्थचिन्तामणिः	४	०
८	प्रश्नोपनिषत्	१	०
१००	प्रायश्चित्तेन्दुशेखरः	१	१०
९९	बीजगणितं सटीकम्	२	०
१५	बृहदारण्यकोपनिषत्	८	०

ग्रन्थाङ्कः	मूल्यम् रू०	आ०	ग्रन्थाङ्कः	मूल्यम् रू०	आ०
६४ बृहदा०(रामानुजटी०)	३	४	२ रुद्राध्यायः	१	६
३१ ,, (मिताक्षरा)	२	१२	११४ ,, अद्वैतपरः ।	०	१२
१६ बृहदारण्यकोपनिषद्वा०	२२	८	१०७ लीलावती	३	०
७१ बृहद्योगतरङ्गिणी	१०	१२	८० वाक्यवृत्तिः	०	८
६८ बृहद्ब्रह्मसंहिता	१	१२	४९ वायुपुराणम्	४	१२
२८ ब्रह्मपुराणम्	६	४	८६ विधानमाला	४	४
१०२ ब्रह्मवैवर्तपुराणम्	९	४	२७ वृन्दमाधवः	६	१२
२१ ब्रह्मसूत्राणि (शां०)	१२	०	७७ [illegible]ः	२	६
६७ ,, ब्रह्मामृतवर्षिणी-दीपिकासमेतानि	४	८	४३ वैयाकरणसिद्धान्तकारिकाः	०	१२
८२ ब्रह्मसूत्रवृत्तिः	२	७	२३ वैयासकन्यायमालाविस्तरः	१	१२
११७ ब्रह्मसूत्रसिद्धान्त-मुक्तावलिः ।	२	८	१०८ व्याकरणमहाभाष्यम्	४	४
३४ भगवद्गीता (शां०भा०)	२	०	१०१ शं[illegible]भूषणम्	८	५
३४ ,, (सटीकशां०भा०)	६	४	६५ शाङ्खायनब्राह्मण	१	४
४४ ,, (पैशाचभाष्य०)	१	८	९० शाङ्खायनारण्यकम्	०	९
४५ ,, (मधुसूदनीश्रीधरी०	५	४	शिवभारतम्	१	५
९२ ,, (रामानुजीया)	७	८	५९ श्राद्धमञ्जरी	२	०
१०९ ,,(अद्वैताङ्कुराटीका)	२	३	२२ श्रीमच्छंकरदिग्विजयः	६	०
११२ ,,काश्मीरपाठानुसारिणी	३	०	१०३ श्रुतिसारसमुद्धरणम्	०	१३
७५ भाष्यार्थरत्नमाला	४	४	१७ श्वेताश्वतरोपनिषत्	२	४
५४ मत्स्यपुराणम्	६	०	९४ संस्कारपद्धतिः	२	८
११३ मध्वतन्त्रमुखमर्दनम्	१	८	८३ संक्षेपशारीरकम्	९	१
१० मण्डूक्योपनिषत्	२	५	३५ संगीतरत्नाकरः	१०	४
९७ मीमांसादर्शनम्	२५	९	५३ सत्याषाढश्रौतसूत्रम्	२८	५
९ मुण्डकोपनिषत्	०	१०	५१ सर्वदर्शनसंग्रहः	२	०
६० यतिधर्मसंग्रहः	१	१२	४० संध्याभाष्यसमुच्चयः	२	०
५० यतीन्द्रमतदीपिका	१	४	३९ संन्यासरत्नमाला	१२	८
४६ याज्ञवल्क्यस्मृतिः	१३	०	सिद्धान्तदर्शनम्	१	४
४ योगरत्नाकरः	५	०	२५ सूतसंहिता	११	८
१९ रसरत्नसमुच्चयः	३	१२	१८ [illegible]	३	०
१५ रसरत्नसमुच्चयटीका	२	८	४८ स्मृतीनां समुच्चयः	५	०
			७० स्मृत्यर्थसारः	१	१०
			२६ हस्त्यायुर्वेदः	७	३